श्रीगणेशाय नमः ॥ श्रीरामचंद्राय नमः ॥ श्रीगोविंदपदांभोजरजश्चंद्रमरीचयः ॥ संचरिष्णोस्तमस्पंथे मम संत्ववलंबनं ॥ १ ॥
नमस्कृत्य गुरून्सर्वान्निगूढमणिदीधितौ ॥ श्रीनवानंदसिद्धांतवागीशेन प्रकाश्यते ॥ २ ॥ ॐ नम इति । परमात्मने सर्वोत्कृ
ष्टात्मने नमः । उत्कर्षश्चात एव सृष्टिस्थितिप्रलयकर्तृत्वं एकरूपस्य कथं सृष्ट्यादिविचित्रकार्यकारित्वं तत्र हेतुगर्भं
विशेषणमाह ॐमिति । ब्रह्मविष्णुशिवात्मकायेत्यर्थः । ॐकारघटकैरकारोकारमकारैर्ब्रह्मादीनां प्रतिपादनात्
तस्य च नमस्कार्यताप्रयोजकं रूपांतरं दर्शयति । सर्वेति । सर्वभूतानि । सर्वप्राणिनः । विष्टभ्य । अंतर्यामितया स्वस्वका
र्ये नियोज्य परितिष्ठते । अंतर्यामिनो भगवतः प्रेरणयैव सर्वप्राणिनां स्वस्वकार्ये प्रवृत्तिरिति भावः । विष्टंभश्च धार
णात्मकः संयोगविशेषः । भूतपदं मूर्त्तपरं । अत एव विश्वव्यापी विश्वशक्तिः पिनाकीत्यत्र विश्वशब्दो यावन्मूर्त्त
वचन इत्याचार्याः । प्रयत्नवदीश्वरसंयोगस्यैव ब्रह्मांडादिपतनप्रतिबंधकत्वात् । अत एव द्यावापृथिवी विधृते ति
ष्ठत इति श्रुतिरपि भगवत्संयोगस्य धारकत्वमाहेत्यपि वदंति । यत्तु आकाशेनातिरिच्यत इति मतानुसारेणेदमि राम १

ति तन्न । ईश्वरस्यैवाकाशतया भूतपदवाच्यत्वेन तत्रैव तत्प्रतियोगिकसंयोगाभावात् । अखंडो आनंदबोधो यस्य तस्मादित्यर्थः
नित्यं विज्ञानमानंदं ब्रह्मेति श्रुतिरपि ब्रह्मस्वरूपावधारणपरानंदविशिष्टस्य नित्यत्वं प्रतिपादयंती विशेषणस्यानंदस्या
पि नित्यत्वं प्रतिपादयति । तथा च श्रुतिबलात्सिद्धे नित्यसुखे सुखत्वावांतरजातिरेव पुण्यजन्यतावच्छेदकत्वेन कस्य
त इत्याशयः । अखंडो दुःखासंभिन्न आनंदो यस्मादेवंभूत उपासनात्मको बोधो यस्येति वार्थः । यस्येति षष्ठ्यर्थो वि
षयता पूर्णीय । अप्रतिहतेच्छाय । ननु संगतिप्रदर्शनानुमाननिरूपणप्रतिज्ञयोः प्रयोजनाभावः । संगतानिधानस्यै
वोन्मत्तप्रलपितत्वादिशंकानिरासप्रयोजनवत्त्वादत आह पूर्वापरेति । संगतिप्रदर्शनस्य फलमेकवाक्यताप्रतिपत्तिः
अनुमाननिरूपणप्रतिज्ञायाः फलं शिष्यावधानमित्यर्थः । सप्रयोजनवत्तामवगम्य पूर्वग्रंथे प्रवृत्तानां तदेकवाक्यता
ज्ञानेनैवोत्तरग्रंथेपि तत्प्रयोजनवत्ताज्ञानेन प्रवृत्तिसंभवादिति भावः । तत्र चार्थैक्यादेकवाक्यं साकांक्षं चेद्विभागे स्या
दिति जैमिनिसूत्रं । अर्थैक्यादेतावन्मात्रे कृते गंगा वो विभुनुपूषा वो विभजत्विसन योर्विभागरूपार्थैक्यादतिव्या
प्तिः स्यादतः साकांक्षं चेदिति । विभागे विच्छिद्य पाठे श्रोतुः पदपरस्परान्वयविषयिणी आकांक्षा भवति । यथा घटमान

येत्यत्र घटमित्युक्ते आनय पश्य वेत्याकांक्षा। एवमानयेत्युक्ते घटं पटं वेति श्रोतुराकांक्षा। भगो वां विभजत्तिस्यस्य विच्छिद्य पाठे
तु नैवमाकांक्षेति तद्युदासः। तावन्मात्रे च स्योनं ते सदनं कृणोमि घृतस्य धारया सुशेवं कल्पयामि तस्मिन्सीदामृते प्रतितिष्ठ व्रीही
णां मेध सुमनस्यमान इत्यत्र कल्पयामीत्यंतः सदनार्थको मंत्रस्तस्मिन्नित्यादिरपरः सादनार्थकः एतयोश्च विभागे साकांक्ष
त्वमस्ति कल्पयामीत्यंतस्य विच्छेदे तस्मिन्नु कस्मिन्निति साकांक्षा संभवति अतोऽर्थैक्यादिति। तत्र सदनसादनयोरर्थयोर्भेदादि
तिभावः। अर्थैक्यं च न वाक्यार्थैक्यं प्रति कारणं वाक्यानां भेदात्। किं तु तात्पर्यविषयैक्यं। प्रकृते च प्रमाणतत्त्वविवेचनमे
व चतुर्णां ग्रंथानां तात्पर्यविषयः। कारणकथनानंतरं कार्यस्याकथने किमस्य कार्यमित्याकांक्षा चेति। न च विभिन्नतात्पर्यके
पि प्रसंगादिसंगतिसत्त्वान्न संगतिरीदृशैकवाक्यताव्याप्तेति कथं तयैकवाक्यताप्रतिपत्तिरिति वाच्यं। एकवाक्यतापन्न
योरेव संगतिव्यवहारेण संगतिलक्षणघटकावाक्यतायाः अनुप्रवेशाद्विभिन्नतात्पर्यके संगत्यभावादिति भावः प्रकारांतप्रत्य
क्षपदस्य मूलेऽसत्त्वात्प्रत्यक्षेति पाठनिर्देशोऽनुचित इत्याशयेनाह। प्रत्यक्षवितीति। प्रत्यक्षमित्यनंतरं अनुमितिनिरूपणे
प्रत्यक्षप्रमाणानंतरं चानुमाननिरूपणे संगतेराकांक्षितत्वादुपनयत्रैव तत्प्रदर्शनपरत्वं मूलस्याह। अथ चोपजीव्योपजीवक

राम
२

फलयोरा

भाव इति। अत्र प्रत्यक्षानुमानयोः अत एवाग्रे निरूपणात्फलत इति प्रथममुपन्यस्तं। केचित्तु स्वरूपयोः फलयोश्च कार्यका
रणभावोऽपि स्वरूपयोः संगतिः जिज्ञासोपयोगित्वादित्याहुः। उपजीवकत्वेहि संगतिः। सा चानंतराभिधानव्याप्या। अत एवोपजी
वकत्वादनंतरं निरूप्यत इत्युक्तमिति प्राचां मतमनुसृत्याह। प्रत्यक्षफलस्येति। अनुमित्यनुव्यवसायादेरित्यादिनाऽनुमि
त्यात्मकं विशेषणतावच्छेदकप्रकारकधीमूलकविशिष्टवैशिष्ट्यबोधपरिग्रहः। न सर्वेति। अयं घट इति प्रत्यक्षे व्यभि
चारादित्यर्थः। तथा। अनुमित्युपजीविका। ननु यत्रातींद्रियमेव पक्षादि यथा परमाणुः आकाशसंयोगी गुरुत्वादित्यादौ तत्र
व्याप्तिज्ञानस्यानुमितिरूपत्वात्तज्जन्यानुमितौ न प्रत्यक्षोपजीवकत्वमत आह अनुमितयस्त्विति। तत्रापि पतनादिप्रत्य
क्षस्य गुरुत्वाद्यनुमितिद्वारा उपजीव्यत्वादत आह परंपरया वेति। ननु यत्किंचित्प्रत्यक्षज्ञाननिष्ठमुपजीवकत्वमपि सं
गतिरेव तथा विनिगमनेत्यत आह पुरस्कृतश्चेति। अनंतराभिधानप्रयोजकतया मुनिनोपात्त इत्यर्थः। अथ च। अनुमि
तित्वरूपप्रमितिविभाजकोपाध्यवच्छिन्ननिष्ठः उपजीवकतोत्कर्षः उत्कृष्टोपजीवकता परंपरयोपजीवकत्वस्यापि सं
गतित्वे प्रत्यक्षफलत्वावच्छेदेनापि तदस्तीत्याशंकते यद्यपीति अदृष्टजननी अदृष्टप्रयोजिका। कार्यमात्रे प्रति अदृ

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

ष्टं हेतुः। अदृष्टं च यागादिप्रवृत्त्यधीनं। प्रवृत्तिश्चेष्टसाधनताधीसाध्या। यागादाविष्टसाधनताज्ञानं च वेदात्। तत्र च शक्ति
ग्रहः कारणं। तच्चेदं पदमत्र शक्तमित्याकारं विना वृद्धैस्तत्र प्रयुज्यमानत्वात्। तस्यानुमितिरूपमिति शास्त्यनुमितेः प्रत्यक्षप्रयोज
कत्वं समयः शक्तिः। शक्तिग्रहापेक्षया व्यवधानेनोपजीव्यामनुमितिं दर्शयति। मत्कर्तव्यतेति। यागो मत्कृतिसाध्यो मत्कृतिं विना
सत्त्वे सतिसत्त्वात् इत्येवंरूपेत्यर्थः। आदिना मदिष्टसाधनतानुमितिसंग्रहः। नन्वनुमितेरनुमितित्वरूपप्रमितिविभाजकोपाध्य
वच्छेदेनं प्रत्यक्षोपजीवकत्वं न तु प्रत्यक्षप्रमितित्वावच्छेदकावच्छेदेनानुमित्युपजीवकत्वमीश्वरप्रत्यक्षेणावादित्यत आ
हेश्वरप्रत्यक्षं त्विति। तथा च फलयोर्निरूपणे फलतावच्छेदकावच्छेदेनोपजीवकत्वमेव पुरस्कर्तुमुचितं तच्च प्रकृतेऽस्त्ये
वेत्यर्थः। न च निरूप्यतावच्छेदकावच्छेदेनोपजीवकत्वमेव पुरस्कर्तुमुचितं निरूप्यतावच्छेदकं तु प्रत्यक्षमीश्वरप्रत्य
क्षसाधारणमिति वाच्यं। इंद्रियार्थसन्निकर्षोत्पन्नं ज्ञानमित्यादिना निरूपितप्रत्यक्षत्वस्येश्वरप्रत्यक्षावृत्तित्वादिति।
दृष्टद्वारकं। दृष्टमात्रद्वारकमदृष्टाद्वारकमिति यावत्। तेनादृष्टद्वारकस्यापि प्रवृत्त्यादिदृष्टद्वारकत्वेपि न क्षतिः। इह
अनुमितौ। तथात्वं उपजीवकत्वं इतरस्य अदृष्टद्वारकोपजीवकत्वस्य। अविनिगम्यत्वात्। विनिगमनायाऽविषय राम

३

त्वात्। एकतरपक्षपातिनी हि युक्तिर्विनिगमना। अदृष्टद्वारकोपजीवकत्वं चोभयसाधारणत्वान्नैकतरमात्रनिष्ठं। प्रत्यक्षफले
दृष्टद्वारकानुमित्युपजीवकत्ववत् अनुमानफलेष्वदृष्टद्वारकोपादानप्रत्यक्षोपजीवकत्वस्य सत्त्वादित्यर्थः। स्वरूपतउपजीव
कतां विवृणोति सर्वं चेति इंद्रियापेक्षोत्पत्तिकमिति। अनुमित्यात्मकव्याप्तिज्ञानेपि परंपरयेंद्रियस्यापेक्षणीयत्वमस्त्येवेति
भावः। वस्तुतः सर्वमेनोरूपेंद्रियजन्यत्वमस्त्येवेति भावः। ननु व्याप्तिज्ञानत्वेनैवानुमितिकरणता तथा च कारणीभूतेश्व
रीयव्याप्तिं न किंचिदपेक्षो। सत्तिकमत आह। अनुमितिमिति। भावयतः। प्रत्यक्षविषयोत्पादयतः तत्करणतेति। अनुमिति
फलोपहितकरणतानिर्वाहकप्रत्यासत्तिश्च विशेषणज्ञानत्वेन स्वजन्यपरामर्शः। सर्वत्र करणस्य व्यापारसंबंधेनैव फ
लोपधायकत्वात्। विशेषणज्ञानत्वेन जनकतायां च सामानाधिकरण्यं प्रत्यासत्तिः। ईश्वरीयव्याप्तिज्ञानेनास्मदीयप
रामर्शसंबंधेन फलोपहितं। तथा च नादृशस्वजन्यपरामर्शात्मकप्रत्यासत्तिविरहेणेश्वरज्ञानस्यानत्वात्। अनुमितिक
रणताशून्यत्वात् नित्यस्य स्वरूपयोग्यत्वे फलावश्यंभावात् फलावश्यंभावापत्तेः जन्यज्ञानत्वेनैवानुमितिकारणतावाच्येत्या
शयः। एतेनाप्रत्यासन्नस्यापरणस्य दंडादेः करणत्वात् प्रत्यासत्त्यभावो न कारणत्वाभावसाधक इति प्रत्युक्तं सामान्यतो

न्निधानात्। यत्त्वीश्वरीयव्याप्तिज्ञानमपि स्वजन्यपरामर्शसंबंधेनानुमितिफलोपहितं नवत्येव कार्यमात्रोपधायकस्य तस्य
फलानुकूलव्यापारात्मकपरामर्शं प्रत्युपधायकत्वादिति। तन्न। एवं सति व्यधिकरणव्याप्तिज्ञानस्य कालोपाधिविधया परा
मर्शोपधायकत्वेन स्वव्यधिकरणानुमितिकरणत्वप्रसंगेन विशेषणज्ञानत्वेन स्वजन्यपरामरामर्शस्यैव तत्प्रत्यासत्ति
तयाश्वरीयव्याप्तिज्ञानस्यानुमितिफलोपहितकरणत्वासंभवात्। न चैवं येन केनापि संबंधेन फलोपहितत्वेपि निष्प्र
स्मेत्यादिव्याप्तेर्बाध एवेति वाच्यं। स्वरूपयोग्यताघटकसंबंधेन फलोपधानस्यैव तत्र व्याप्तौ निवेशात्। अन्यथा कपा
लादेर्द्रव्यत्वरूपेण जनकत्वेपि आकाशादेः संयोगादिसंबंधेन घटाद्यात्मकफलसंबंधसत्वाभावात्। एतद्व्याप्त्युपादानस्यै
व निःप्रयोजनत्वापातादिति। फलायोगव्यवच्छिन्नं कारणं करणं तादृशमनुमितिकरणं च परामर्शः। तस्य करणताया
सामानाधिकरण्यप्रत्यासत्तिः फलोपहितकरणमेव निरूप्यं अत एव वक्ष्यति। फलोपहितस्य लक्ष्यतयेति। तथा चेश्वर
ज्ञानस्य फलसामानाधिकरण्यविरहेण तादृशफलोपहितकरणत्वाभावादित्यर्थ इति तु कश्चित्। अनुमितिकर
णत्वावच्छेदेन प्रत्यक्षोपजीवकत्वव्यवस्थापकप्रत्यक्षकारणत्वावच्छेदेनानुमानोपजीवकत्वस्य व्यतिरेकमाह। सर्वं पुन रम ४

रिति। ननु व्याप्तिज्ञानत्वेनैवानुमितिकरणता। नित्यवन्नित्येप्यदृष्टादिरूपसहकारिविरहेण फलव्यतिरेकसंभवान्नित्य
स्येति व्याप्तेरप्रयोजकत्वादत आह। दृष्टद्वारेति। तथा च करणतावच्छेदकधर्मसामानाधिकरण्येन स्वजनकादृष्टा
जनकेंद्रियजन्यत्वमेवानुमानेऽनंतर्यान्निधाननियाम। कमिति भावः। इंद्रियत्वसामानाधिकरण्येन स्वजनकाद
ष्टाजनकानुमानजन्यत्वं नास्तीत्याह। न चोत्पत्तिमदितीति। अपि नाकरणतावच्छेदकावच्छेदकत्वं कत्वं सूचितं। न च
यत्र चक्षुर्घर्षणेन पूर्वचक्षुर्नाशानंतरं चक्षुरंतरोत्पादस्तत्र चक्षुर्घर्षणजनकप्रवृत्तिजनकस्यादृष्टद्वारकस्य प्रकृतिसाध्य
तानुमानस्योपजीवकमेव चक्षुरंतरं एवमौषधपानानंतरं प्रकृष्टचक्षुरुत्पादेपीति वाच्यं। तत्र घर्षणजनकानुमा
नस्यौषधपानजनकस्य च प्रयोजकत्वेन जनकत्वाभावात्। न चैवमदृष्टाद्वारकत्वं व्यर्थं अदृष्टद्वारानुमानस्ये
न्द्रियजनकत्वाभावादिति वाच्यं। ईश्वरज्ञानस्याप्येतत्कल्पेऽनुमितिकरणतया तद्वारणायैव तदुपादानात्। अदृष्ट
द्वारकोपजीवकत्वस्योभयत्रसत्त्वान्न विनिगमकत्वमिति भावः। न नियम इति। तथा चोपजीवकत्वादिति हेतुः पंचम्यनु
पपन्नेति भावः। क्वचित्कार्यं निरूप्यापीति। यथात्रैवानुमितिनिरूपणानंतरं तत्करणनिरूपणमिति भावः। तज्ज्ञान

MEMORIAL
MEMORIAL

जन्यजिज्ञासाप्रयोज्यत्वं पंचम्यर्थः। ननु तज्ज्ञानज्ञाप्यत्वमित्याशयेनाह किं वा तदिति। तादृशनियमाभावे किमनिष्टमित्य
र्थः। नन्वनंतराभिधानाव्याप्यत्वेन तस्य संगतित्वमनुपपन्नं। अनंतराभिधानव्याप्यत्वस्यैव तद्घटकत्वादित्यत आह नही
ति। संगतिलक्षणपर्यालोचनेनापि तस्या अनंतराभिधानाव्याप्यत्वं दर्शयितुं तल्लक्षणमाह आनंतर्येति। आनंतर्याभिधा
नप्रयोजिकाया जिज्ञासाया जनकं यज्ज्ञानं तद्विषय इत्यर्थः। जिज्ञासाजनकज्ञानविषये घटादावतिव्याप्तिवारणाय प्रयो
जकोतं। प्रत्यक्षस्य कारणत्वज्ञाने कारणस्य कार्यमावश्यकमित्यादिक्रमेण कार्यत्वेन रूपेण कार्यसामान्यज्ञानं। ततः सा
मान्यधर्मप्रकारकज्ञानस्य विशेषधर्मप्रकारकजिज्ञासाजनकत्वात्। किमस्य कार्यमित्याकारिका शिष्यजिज्ञासा।
ततः शिष्यस्य किमस्य कार्यमिति शब्दप्रयोगः। ततः शिष्यजिज्ञासाज्ञानं गुरोः। ततः इष्टसाधनताज्ञानेनानंतराभि
धानमिति क्रमेण जिज्ञासाया अनंतराभिधानप्रयोजकत्वं। न च ज्ञानगोचरेच्छा जिज्ञासा। तत्र ज्ञाने इष्टसाधनताज्ञा
नं हेतुरिति तद्विषये इष्टसाधनत्वेऽतिव्याप्तिरिति वाच्यं। तादृशजिज्ञासां प्रति समानविशेष्यत्वप्रत्यासत्त्यनवच्छि
न्नाया जनकता तदवच्छेदकं यत्प्रकारकज्ञानत्वं तस्योक्तत्वात्। इष्टसाधनताज्ञानस्य हेतुतायां तु समानविशेष्य राम

५

त्वं प्रत्यासत्तिः। ननु कार्यत्वप्रकारकज्ञानत्वेन कार्यत्वावांतरधर्मप्रकारकजिज्ञासात्वावच्छिन्नं प्रति हेतुतायां कार्यत्वेन वस्तुगत्या घट
ज्ञानेपि कार्यत्वावांतरधर्मप्रकारकज्ञाने एवेच्छोदयात्। अवच्छेदकत्वं च तत्पर्याप्त्यधिकरणत्वं। तेन कार्यत्वघटकैकदेशनिरासः।
एतच्छ्रमायैववार्यपदं। यत्प्रकारकेत्यभिधानाद्भिन्नकार्यादौ धर्मिण्यतिव्यातिव्याप्तिरिति। यत्तु तादृशजिज्ञासात्वव्याप्यधर्मावच्छि
न्नकार्यताप्रतियोगिककारणतायां यत्प्रकारकज्ञानत्वमवच्छेदकं तत्त्वमर्थः। उपेयेच्छात्वावच्छिन्नं प्रति इष्टसाधनताज्ञानस्य
हेतुत्वादुपेयेच्छात्वस्य घटेच्छादिसाधारण्येन तादृशजिज्ञासात्वव्याप्यत्वाभावादिति। तन्न। कार्यत्वावांतरधर्मप्रकारकजिज्ञासा
त्वादीनामानंतर्याभिधानप्रयोजकजिज्ञासात्वाव्याप्यत्वात् तादृशकार्यकारणभावमादाय प्रकृते लक्षणसंगमनासंभवात्। तच्छक्ति
त्वावच्छिन्नकार्यताप्रतियोगिककारणतायां च तच्छक्तित्वस्यैवावच्छेदकतया कार्यत्वप्रकारकज्ञानत्वस्यानवच्छेदकत्वात्। तस्य
चेष्टसाधनत्वं कार्यकारणभावात्मकतया संगतिरेव तत्र चाव्याप्तिर्न दोषायेति तत्तुच्छं। प्रत्यक्षानुमानयोः कार्यकारणभावो हि तयोः
संगतिर्न त्विष्टसाधनत्वं। तथा च यदनंतरं यदभिधानं तत्प्रयोजकजिज्ञासाजनकज्ञानविषयो यः स तयोः संगतिः। एवंरूपे प्रत्य
क्षानुमानसंगतिलक्षणे इष्टसाधनत्वेऽतिव्याप्तिपरिहारात्। यद्धर्मव्याप्यधर्मप्रकारकज्ञाने इष्टसाधनताज्ञानं नानंतर्याभि

धानप्रयोजकजिज्ञासाजनकं सधर्मः संगतिः। अनंतरं सामान्यधर्मप्रकारकज्ञानस्य स्वानंतरोत्पन्नविशेषधर्मप्रकारकजिज्ञासां प्रति
जनकत्वाभावेपि न क्षतिः। न वा इष्टसाधनत्वेऽतिव्याप्तिरित्यपि केचित्। अत्र वदंति। गेहे घटोस्तीत्यभिधानानंतरं घटत्वसामा
न्यज्ञानात् कोऽसौ घट इति जिज्ञासायां कम्बुग्रीवादिमान् घट इत्यनंतराभिधानप्रयोजकजिज्ञासाविषये घटत्वेऽतिव्याप्तिः। एवमाधा
रत्वज्ञानानंतरं आधेयत्वसामान्यज्ञानात् किमस्याधेयमिति जिज्ञासायां आधेयस्यानंतराभिधानादाधेयत्वादावपीति। अ
त्र ब्रूमः। घटोस्तीत्यादौ संगतिरेव उपोद्घातमध्ये निवेशात्। तथाहि। चिंताप्रकृतिसिद्ध्यर्थामुपोद्घातं विदुर्बुधा इत्यनेन प्रकृतसिध्य
नुकूलचिंताकालावच्छिन्नप्रकृतानुकूलत्वमुपोद्घातः। प्रकृतं च तत्र तत्र विशिष्योपादेयं। अनुकूलत्वं च क्वचिद्घटकत्वं क्वचि
ज्ज्ञापकत्वं। घटकत्वं यथा। व्याप्तिविशिष्टपक्षधर्मताज्ञानजन्यं ज्ञानमित्यत्र अज्ञातव्याप्तिकस्य व्याप्तिपदवाच्यत्वेनाज्ञातेका व्या
प्तिरिति आकारिकायां जिज्ञासायां व्याप्तिनिरूपणं। एवमिंद्रियासन्निकृष्टपर्वतीयधूमे व्याप्तिविशिष्टत्वधीर्न तदुपस्था
पकं विनेति तदुपस्थापकं किमित्याकांक्षायां सामान्यलक्षणानिरूपणं। एवं विशिष्टज्ञानस्यानुमितिहेतुत्वे किं ज्ञापकमित्याकांक्षायां परा
मर्शस्यानुमितिहेतुत्वसिद्धिरित्याद्यनुमितितत्त्वे तत्रोपोद्घातपदप्रयोगः। प्रकृते चाज्ञातघटपदार्थस्य घटोस्तीत्यतो घटपदवाच्यत्वेनाज्ञा राम ६

तेको घटपदवाच्य इति जिज्ञासायां कंबुग्रीवादिमान् घट इत्यादिक्रमेण निरूपणे प्रकृतघटास्तित्वसिध्यनुकूलचिंताकाली
नस्य घटास्तित्वघटकत्वेनोपोद्घातत्वसंभवात्। एवमाधेयत्वमपि प्रसंगमध्ये निवेश्यते आधारप्रसंगेन स्मृतस्याधेयस्या
नुपेक्षणीयत्वज्ञानेन जिज्ञासोदयात्। केचित्तु गेहे घटोस्तीत्यादौ घटपदवाच्यत्वमाधेयत्वादिकं च प्रसंग एव। अनुपेक्ष
णीयत्वं उपेक्षानर्हतावच्छेदकधर्मवत्त्वं। स च धर्मो घटपदवाच्यत्वाधेयत्वादि उक्तरूपेणैव तदननुगमान्नाधिक्य
मित्याहुः। तत्र स्मृतिकालावच्छेदेनोपेक्षानर्हत्वं प्रसंगः। अत्र स्मृतिकालावच्छेदः स्वरूपसन्नितरांशो ज्ञातोपयोगी। स्मृ
तिरनुपेक्षणीयता चाभिधातुरेव। स्वयं स्मृतायां जिज्ञासानुदयात्। स्वीयानुपेक्षणीयत्वज्ञानस्य जनकत्वाभावाच्च।
केचित्तु श्रोतुरेव स्मृतिरनुपेक्षणीयता च वक्तुः। अस्मिन्नदृष्टे वक्तुरुपेक्षा न भविष्यतीति प्रतिसंधाय श्रोतुर्जिज्ञासोदया
दित्याहुः। एवं प्रकृतसिध्यनुकूलचिंताकालावच्छेदेन प्रकृतानुकूलत्वमुपोद्घातः चिंता वक्तुरेव ग्राह्या। अत्रापि ताद
शकालावच्छेदः स्वरूपसन्नुपोद्घातपदनियामकः। इतरांशो ज्ञातोपयोगी। एवं प्रतिबंधकीभूतशिष्यजिज्ञासानिवृ
त्तौ अवश्यवक्तव्यत्वमवसरः। अत्रापि निवृत्त्यंशः स्वरूपसन्नितरांशो ज्ञातोपयोगी। यथा अनुमाननिरूपणानंतरं ता

नवानंदी

दृशजिज्ञासानिवृत्तौ अवश्यवक्तव्यत्वज्ञानात् किं वक्तव्यमिति। अतो नुर्जिज्ञासा अनंतरमुपमाननिरूपणमिति· जिज्ञासिता
र्थस्य सिद्धत्वमवसरइति कश्चित्· तस्यापि पूर्वोक्तरीत्या वपर्यवसानं· भवति हि जिज्ञासाविषयसिद्धत्वे इदं ज्ञातमन्यत् किं चिद्व
क्तव्यमिति जिज्ञासेति· निर्वाहकत्वं· एककार्यनिर्वाहकत्वं· तच्च प्रयोजकत्वं· कारणतावच्छेदकसाधारणं। यथा व्याप्तिपक्षध
र्मतयोरनुमित्यजनकत्वेपि तज्जनकीभूतज्ञाने विषयतावच्छेदकत्वेनैककार्यानुकूलत्वं· सामान्यतोऽनुमितिं कार्यानुकूलत्वज्ञा। लक्षणैक
नेकिं तदनुकूलमिति जिज्ञासायामनंतरं पक्षधर्मतानिरूपणमिति· एककार्यत्वं एककार्यस्य कार्यताप्रयोज्यता· सा च जन्य
ताजन्यज्ञानविषयतात्व·। यथा ईश्वरशक्त्योरनुमानाजन्यत्वेपि तज्जन्यज्ञानविषयत्वलक्षणैककार्यत्वसंगत्या ईश्वरवादा
नंतरं मीमांसकेन शक्तिराशंकिता· नैयायिकेनेश्वरसिद्ध्यनंतरं शक्तिं निरस्य परमप्रयोजनं त्वनुमानस्यापवर्गइत्यनेनेश्व
रसिद्ध्यपवर्गयोरनुमाजन्यत्वलक्षणैककार्यत्वसंगतिः। सामान्यतो द्वैककार्यत्वज्ञाने किमन्यत्कार्यमिति जिज्ञायां विशि
ष्यकार्यतिराभिधानेन सामान्यलक्षणासंभवात्· यत्तु निर्वाहकत्वमुपपादकत्वमिति तन्न· उपपादकत्वं ज्ञापकत्वं घटकत्वं वा
सामान्यत उपोद्घातेन गतार्थत्वात्· न कारणत्वं हेतुतया गतार्थत्वात्· एवं सर्वत्रोहनीयं· अत्र निरुक्ततात्पर्यके संगतिव्यवहार राम

क

नावादेकवाक्यतापन्नत्वं सामान्यलक्षणो विशेषलक्षणो चेदेयं· अत्र च तादृशजिज्ञासासंरूपयोगत्वस्याति प्रसक्तत्वात्प्र
स्तोपधानस्य च सर्वत्रासंभवात् प्रसंगाद्यन्यतमत्वं तत्त्वमिति ध्येयं।। जायते वेति· कार्ये ज्ञाते कार्यं सकारणमिति रीत्या कारण
त्वस्य ज्ञानात् किमस्य कारणमिति जिज्ञासा· कारणे ज्ञाते कारणं सकार्यमिति रीत्या किमस्य कार्यमिति जिज्ञासेत्यर्थः।। द्वयोरेवेति·
तथा च संगतेरनंतराभिधानव्याप्यत्वं सुतरामसंभवि· तादृशवादिमतेपि कारणत्वव्यभिचारादिति भावः।। इत्थं च· संगतेरनं
तराभिधानव्याप्यत्वे च· एवं चोपजीवकत्वादिति पंचमी न हेतुतायां· किं तु ज्ञानजन्यजिज्ञासाप्रयोज्यतायामिति भावः।। लाघ
वायेति· यद्यपि उपमानएव संगतिप्रदर्शने तादृशशब्दे नैवाभिधातुं शक्यत्वान्न शब्दलाघवं· तथापि प्रकरणलाघवायेत्य
र्थः। प्रकरणं च संप्रदर्शनप्रयोजिका कोटा· प्रत्यक्षानंतरमुपमानात्प्रागभिधाने किं नियामकमिति जिज्ञासाया औत्सर्गिक
त्वेनतामनादृत्य उपमाने प्रदर्श्यतेत्संगतिप्रदर्शने आकांक्षांतरगौरवमिति भावः।। ननु बहुवादिसंमतत्वेन संगतिरत आह· सुप्र
सिद्धतयेत्यादि· अनुमानस्य सुप्रसिद्धत्वेन सामान्यधर्मप्रकारकज्ञानस्य जिज्ञासाजनकस्यसंभवादिति भावः।। सुप्रति पदतये
त्यत्र हेतुर्निरसनीयेति· निरसनीया अल्पवादिविप्रतिपत्तिर्यत्र तत्त्वेनेत्यर्थः।। दुरूहत्वेन बलवदनिष्टसाधनत्वज्ञानात्कदाचिदि

अप्रतिबंधः स्यादतः सुबोधत्वं प्रथमे जिज्ञासायामुपयोगि। दुरूहत्वे हेतुर्निसनीयबहुवादीति। ननु सुगमस्य स्वयमप्यूहितुं शक्यत्वादिति
न्यायेन सुगममुपेक्ष्य दुरूहेऽपि सुबुद्धेः कस्यचिज्जिज्ञासा प्रथमं न वर्त्यं वक्ष्यत आह। औत्सर्गिकीमिति। ननु प्रतिबंधकीभूताया जिज्ञासा
या निवृत्तिः प्रतिबंधकांतरवत्स्वरूपसती हेतुर्न ज्ञाता मानाभावादत आह यया चेति। आकरे प्रमाणतत्त्वबोधादौ। प्रतिबंधकजिज्ञा
सानिवृत्तौ सत्यामवश्यवक्तव्यत्वमवसरः। वक्तव्यत्वज्ञानादेव जिज्ञासेति न लक्षणाव्याप्तिः। अत एव ग्रंथशेषेऽवसरसंगत्यभाव
सूचनाय यथा चामिति शब्दस्य विरम्यते इति शब्दस्य वा उपनिबंधः। शब्दांतरे इति। उपमितिविषयीभूतगवयपदातिरिक्तगोशब्द
शक्तिग्राहकमित्यर्थः। शब्दांतरसमयग्राहकं केवलमतिदेशवाक्यार्थस्मृतिरूपव्यापारमात्रोपधानेनोपयोगि न तूपमितौ। त
त्र गोसादृश्यादीनामविषयत्वात्। अत उपमितिविषयीभूतगवयपदप्रवृत्तिनिमित्तत्वबोधकमनुमानमुपजीव्यत्वेन दर्शि
यति सप्रवृत्तीति। समानवित्तिवेद्यतया गवयपदप्रवृत्तिनिमित्तत्वविषयकं गवयपदं सप्रवृत्तिनिमित्तकं साधुपदत्वादित्या
कारकमित्यर्थः। गवयो गवयपदप्रवृत्तिनिमित्तमित्युपमितौ गवयपदप्रवृत्तिनिमित्तस्य विशेषणतया तज्ज्ञानकस्योपजीव्यत्वा
दिति भावः। इदं चिंतामणिकारमते। आचार्यमते तु गवयो गवयपदवाच्य इत्येवोपमितिरिति ध्येयं। अत्रोपमितावयं क्रमः। अगृही राम

८

त गवयपदशक्तिकस्य कीदृशो गवयपदवाच्य इति प्रश्नानंतरं गोसदृशो गवयपदवाच्य इत्याकारकमतिदेशवाक्यार्थज्ञानं ततः सा
दृश्यविशिष्टदर्शनं तदेव कारणं। ततोऽतिदेशवाक्यार्थस्मृतिः सैव च व्यापारः ततो गवयो गवयपदवाच्य इत्युपमितिरिष्यते। न
न्वेतावता उपमितिं उपजीव्यत्वमादर्शितं न तूपमानस्वरूपं प्रतिज्ञायत आह। अंतत इति। उपमितिकरणस्यापि कार्यत्वेनादृष्टजन
कप्रवृत्त्यौपयिकानुमानसापेक्षमेवोपमानमित्यर्थः। अयं गवयपदवाच्यगवयवानावयसंयोगादित्यनुमानस्य शक्तिविशेषस्यापि गवयो
गवयपदवाच्य इत्यनुमानोपजीवकत्वादाह। निखिलमेवेति। तत्रानुमानत्वावच्छेदेन नोपजीवकत्वेति न दोष इति। केचिदित्यस्वरसबी
जं तु बहुवादिसंमतत्वादिति मूलेन तादृशसंगतेरप्रदर्शनाद्व्यासंदर्भः। ननु संगतेरनियामकत्वेऽनंतराभिधाने किं नियामकमत आ
ह। संभवतीति चेति। एवं च निरूपणयोः कार्यकारणभावसंगतिमुद्भाव्य नोक्त इति दोषः। निरूप्ययोरिव निरूपणयोरपि कार्यकारणभावो यथा
कथंचिज्जिज्ञासाजननद्वारा संगतिरित्येव स्यपि कश्चित्। इह प्रत्यक्षानुमानस्थलेपि। निरूपणयोः प्रत्यक्षज्ञानानुमानज्ञानयोः। एवं प्रत्यक्ष
पूर्वकत्वेनानुमानज्ञानजननार्थं प्रत्यक्षज्ञानस्य प्रथममपेक्षितत्वात् आदौ प्रत्यक्षमभिहितमिति भावः। निरूपणयोः ज्ञानजनकशब्दयोः
कार्यकारणभावः प्रयोज्यप्रयोजकभाव इत्यर्थ इति तु कश्चित्। अथ तत्पूर्वकमनुमानं त्रिविधं पूर्ववच्छेषवत्सामान्यतो दृष्टं चेति सूत्रं। अथ

भावानंदी

प्रत्यक्षलक्षणानंतरं अनुमानमुच्यत इति शेषः। त्रैविध्यं दर्शयति पूर्ववदित्यादिना पूर्वं कारणं तल्लिंगकं यथांसतंतुसंयोगेन
महापटानुमानं शेषः कार्यं तल्लिंगकं यथा नदीउपरिदेशे वृष्टिमती विशिष्टपूरत्वादिति सामान्यतो दृष्टं कार्यकारणभिन्नं तल्लिंग
कं यथा इच्छा द्रव्याश्रिता गुणत्वादिति यद्वा पूर्वमन्वयी विशेषो व्यतिरेकी सामान्यतः सामान्येनान्वयव्यतिरेकसाधारणेन सहचारेण
गृहीतं एवं च केवलान्वयिसाध्यकं केवलव्यतिरेकिसाध्यकं अन्वयव्यतिरेकिसाध्यकमित्यर्थः। अत्र चानुमानं अनुमितिः कारण
लिंगिकेत्येवं व्याख्येयं सूत्रे तद्यत इत्यध्याहृत्य तादृशानुमितिर्यतस्तदनुमानमिति रीत्या अनुमितिकरणस्यापि लक्षणं लब्धं। फलायो
गव्यवच्छिन्नं कारणं करणमिति मते च तृतीयलिंगपरामर्श एवानुमानमित्यनुमानपदं यथाश्रुतार्थमेव तद्यत इत्यपि नाध्याहर्तव्य
मिति व्याप्त्यादीत्यादिना साध्यसाधनतत्सहचारपक्षादिपरिग्रहः। अत्र च तत्पूर्वकमित्यत्र तत्पदेन इंद्रियार्थसंनिकर्षोत्पन्नत्वेन प्रत्य
क्षस्य इंद्रियार्थसंनिकर्षोत्पन्नमित्यादिपूर्वसूत्रेण प्रक्रांतस्य परामर्शः। तेन स्वरूपनिरूपणयोः फलनिरूपणयोः कार्यकारणभावा
वगमः। अन्यथा प्रत्यक्षफलनिरूपणानुमितिकरणनिरूपणयोरेवोपजीव्योपजीवकभावलाभेनासंगतिः स्यादिति ध्येयं। नन्वेवं सौत्र
क्रमोपपादनेपि अत्रत्यक्रमो नोपपादित इत्यत आह अत्रापि अनुमानखंडेपि। सहचारप्रत्यक्षेति यद्यपि व्यभिचारज्ञानविरहसहकृ राम

तं सहचारदर्शनं व्याप्तिग्राहकमित्युक्तं तत्र च प्रत्यक्षं विशेष्यमिति कथं तन्निरूपणस्य हेतुत्वं तथापि प्रत्यक्षमप्रतिपाद्य प्रत्यक्षं व्याप्तिग्रा
हकमिति बोधयितुं परेण न शक्यत इति तत्रापि प्रत्यक्षनिरूपणं हेतुरिति ध्येयं। अत्रापि प्रत्यक्षखंडे इंद्रियत्वेनेंद्रियजन्यज्ञानं प्रत्यक्षमि
ति प्रत्यक्षलक्षणकरणात् करणनिरूपणयोरपि कार्यकारणभावावगमो तस्या तेन रूपेणानुमाननिरूपणस्य। अनुमानोपमानयोरपि
क्रमनियामकमाह एवमिति। अनुमानस्योपमानांतर्गतत्वं प्रसक्तं तया न निराकृतं उपमानस्यानुमानांतर्गतत्वं प्रसक्तं। एकदेशिनामनुमा
नेनैवोपमानकार्यान्यथासिद्ध्युपगमादिति उपमानखंडे अनुमानभिन्नत्वेनोपमानं निरूपितमिति तदर्थमनुमानं प्राङ्निरूपितमिति भावः।
नन्वनुमानलक्षणे कर्तव्येऽनुमितिलक्षितेत्यत आह लक्षणस्वरूपेति लक्षणं तत्करणमित्यादिना स्वरूपं न त्वित्यादिना। प्रामाण्यं अथानुमानं न प्र
माणमित्यादिना। आदिना तच्चानुमानं त्रिविधमिति विभागादिसंग्रहः। एषु सर्वेष्वनुमितेर्विशेषणत्वादिति भावः। प्रामाण्यादीनिरिति तृतीयाप्र
कारितानां निरूपणे शब्दः। तथा च लक्षणस्वरूपप्रामाण्यादिप्रकारकशाब्दविषयेऽनुमाने विशेषणत्वेनानुप्रविष्टा इयमनुमितिरित्यर्थात्
प्रथमोतान्वयविरोधः। तथा चाधारसप्तमी स्वविषयकनिरूपणप्रकारत्वं च संबंधः। प्रकारत्वं विषयत्वं च व्यापारानुबंधितया बोध्यं। अनुमाने नि
रूपणीये इति सति सप्तमी। अनुमाननिरूपणे कर्तव्ये इत्यर्थ इति कश्चित्। अनुमाने निरूपणीये अनुमाननिरूपणार्थं तथा च निमित्तसप्तमी। अन्ये

MEMORIAL

मानस्यविशेष्यतयानिरूपणस्यविशेषणतयापूर्ववाक्येनबोधितत्वादनुमाननिरूपणइतिपरामर्शस्यासंभवाद्विशेषणस्यनिमित्ततयावि
शिष्टेनिमित्तत्वस्यविवक्षितत्वात्तथोक्तमित्यन्ये॰अत्रानयत्राप्यनुमितिनिरूपणइत्यन्वयः। ननुभवतुमतेऽनुमितेरनुप्रवेशः। अनु
मितिलक्षणघटितमेवानुमानलक्षणंकिमितिकृतमन्यथापिलघुलक्षणसंभवादित्यतआह॰ करणस्येति॰ अत्रमूर्त्तिकरणत्वं॰नत्वक्रिया
भेदेनभिन्नं॰भेदोवैजात्यं॰तथाचप्रत्यक्षादिकरणतातः अनुमितिकरणतायाविभिन्नत्वमेवप्रत्यक्षानुमानयोर्विभिन्नप्रमाणत्वं॰व्या
प्तिशब्दोनथविषयकस्यैकस्मरणस्याभिन्नत्वेपिशब्दानुमानत्वेनपृथक्प्रमाणव्यवहारः। तथाचप्रत्यक्षादिप्रमितितोऽनुमितिर्वैलक्षण्य
ज्ञानार्थमनुमितिलक्षणमितिभावः। अत्रक्रियालक्षणवाक्ये॰कर्मधारयोत्तरेति॰ननुभावप्रत्ययस्यसामानाधिकरण्यत्वेनतत्तत्पदार्थताव
च्छेदकद्वयसामानाधिकरण्यत्वेनवाशक्तिः। आद्येनीलत्वोत्पलत्वयोःसामानाधिकरण्यज्ञानः। तयोःपदार्थतावच्छेदकत्वेनसामानाधिकर
ण्येनन्वयात्॰नचतत्तत्पदेनीलत्वोत्पलत्वयोरेवलक्षणेतिरवात्। नीलत्वोत्पलत्वयोरभेदस्यबाधितत्वात्॰नीलोत्पलपदान्नीलाभिन्नोत्पला
नुभवापत्तापापत्तेश्च॰द्वितीयेनीलोत्पलोयेनीलत्वोत्पलत्वसामानाधिकरण्यमित्येवंरीत्याप्रत्ययार्थतादृशसामानाधिकरण्यावच्छेदकतासं
बंधेनप्रकृत्यर्थस्यनीलोत्पलस्यान्वयोपपादनेनैकदेशान्वयाभावेप्यनंतशक्तिकल्पनापत्तेः। एवंघटत्वादौप्रकृत्यर्थतावच्छेदकस्यप्रतिपा राम

१०॥

दनेनीलोत्पलत्वमित्यत्रतादृशसामानाधिकरण्यस्येतिव्युत्पत्तिभेदकल्पनमपीति॰अत्रवदंति॰घटत्वमित्यादौलुप्तशक्तेरेवप्रकृतेनाद
शसामानाधिकरण्यज्ञानः। तत्रघटेतरावृत्तित्वेसतिसकलघटवृत्तित्वप्रकारेणघटत्वमुपस्थाप्यते। तत्रप्रकृतितएवघटस्यलाभः। इ
तरावृत्तित्वादौभावप्रत्ययस्यशक्तिः। नत्वापीतरवृत्तित्वंअभावःसाकल्यंवृत्तिमत्त्वेतिविशेषकलितमर्थः। इतरावृत्तित्वप्रतियोगिता
काभावस्यातिप्रसक्तत्वादितरवृत्तित्वत्वावच्छिन्नाभावस्याप्रसिद्धत्वात्घटत्वादौबाधाद्वविशिष्टस्यशक्यत्वासंभवात्॰व्युत्पत्तिवैचित्र्या
द्वैकपदोपात्तानामपितावतांपरस्परोपश्लेषेणबोधः। तत्रप्रकृतिजन्यबोधेयेनयेनसंबंधेनतत्प्रतिपाद्यतावच्छेदकधर्मस्यप्रकारतातेन
संबंधेनेतरावृत्तित्वंवृत्तिमत्त्वंचार्थः। तेनघटेतरस्मिन्कालादौकालिकसंबंधेनघटत्वस्यवृत्तावपिनक्षतिः। नवाघटत्वमित्यादौकंबुग्रीवा
दिमत्त्वादेर्भानं। नीलोत्पलत्वमित्यादौचनीलाभिन्नमुत्पलंप्रकृत्यर्थः। तत्रप्रकृत्यर्थतावच्छेदकंनीलाभिन्नोत्पलत्वं। तत्वनीलत्वसमवाय्यभि
न्नसमवेतमुत्पलत्वं॰तस्यचोपाधितयास्वरूपसंबंधेनैवप्रकृतिजन्यबोधेप्रकारतातेनसंबंधेनतद्व्यभिधानेवसामानाधिकरण्यस्या
पिभानं। अनेकांशस्याधिकस्यभानेपिनीलत्वसमवायिसमवायस्यभानादिति। प्रमेयत्वमित्यत्रचेतरावृत्तित्वांशोनभासते। अप्रसिद्धत्वात्।
किंतुसकलप्रमेयवृत्तित्वं। नचगुणान्यत्वविशिष्टसत्त्वमित्यादौविशिष्टस्यानतिरेकितयातदितरासमवेतत्वस्यमहत्त्वमित्यादौचसकल

महद्वृत्तित्वस्य परिमाणे बाधादनन्वयप्रसंग इति वाच्यं। तदितरत्वव्यापकात्यन्ताभावप्रतियोगितावच्छेदकतद्वृत्तित्वेनाभावप्रतियोगितानवच्छे
दकधर्मवत्त्वस्यैव तदुभयदलेन विवक्षितत्वात्। तदितरत्वव्यापकेति करणाद् घटत्वमित्यादौ न द्रव्यत्वादेर्भानमिति। अत्र नव्याः। एवं सत्येकत्वमित्या
दौ परिमाणादेः कथं न लाभः। न च प्रकृत्यर्थतावच्छेदकनिरूपितत्वविशिष्टसंबंधेनैव तदितरावृत्तित्वं तद्वृत्तित्वं च प्रतीयते। एकत्वनिरूपित
समवायेन च परिमाणादिकमवृत्तीति न तत्रैकपदबाध्यतेति वाच्यं। एवं सत्यनंतशक्तिकल्पनावश्यकत्वे घटत्वादिषु प्राप्तिस्विकरूपेणैव श
क्तिरस्तु किमितरावृत्तित्वादिगौरवेण। सहि तुल्यतया यद्धर्मत्वेनैव शक्तिरस्तु। प्रकृत्यर्थतावच्छेदकनिरूपितत्वविशिष्टसंबंधेन प्रकृत्य
र्थस्यान्वयः। तेन घटत्वमित्यादौ न द्रव्यत्वादेर्बोधः। अत एव गुणकिरणावल्यां पृथक्त्वमित्यादौ प्रकृत्यर्थतावच्छेदकानेव गुणान् भावप्र
त्ययः प्रतिपादयति। प्रतीतिस्तु तादृशरूपेण धर्मत्वेन वा इत्यन्यदेतत् इति दीधितिकृतः। विशिष्ट्यार्थकोच नीलत्वोत्पलत्वसामानाधिकरण्यं
प्रकृते भावप्रत्ययार्थः। नीलोत्पलस्य प्रकृत्यर्थस्य तादृशसामानाधिकरण्येऽवच्छेदकत्वेनान्वयः। घटपटत्वमित्यत्र द्वंद्वोत्तरस्येव नीलो
त्पलत्वमित्यत्र कर्मधारयोत्तरस्यापि भावप्रत्ययस्य सामान्यशक्त्योपस्थितयोर्नीलत्वोत्पलत्वयोः कर्मधारयोत्तरभावप्रत्ययत्वावच्छि
न्नया विशेषशक्त्योपस्थिते सामानाधिकरण्ये विशेषणेनान्वयः। नीलाभिन्नोत्पलस्य च प्रकृत्यर्थस्याधेयतासंबंधेन नीलत्वोत्पलत्व राम

योरवच्छेदकत्वसंबंधेन तत्सामानाधिकरण्ये वान्वय इत्यपि कश्चित्। बाधितेति। बाधिताबाधिततादृशसामानाधिकरण्यविषयकेत्य
र्थः। भ्रांतानुमितीति। भ्रांतेत्र मः। न च ह्रदो वह्निमानित्यादौ व्याप्तिविशिष्टत्वह्रदसामानाधिकरण्याप्रसिद्धा कथं तज्ज्ञानं भ्रम इति वाच्यं
तत्र ह्रदवृत्तित्वे व्याप्तिविशिष्टत्वसामानाधिकरण्यावगाहि ज्ञानमेव तदुभयसामानाधिकरण्यज्ञानपदार्थ इत्याशयात्। अत एवानेन दोषे
णैवेदं निराकरिष्यति। केचित्तु पर्वतो वह्निमान् धूलीपटलत्वादित्यादौ व्याप्तिविशिष्टत्वपर्वतवृत्तित्वसामानाधिकरण्यं यदालोकादौ प्रसिद्धं
तस्य धूलीपटले आरोपायथार्थानुमितिस्तत्र नाव्याप्तिः। भ्रांतानुमितिः। भ्रांतस्यानुमितिः। भ्रमजन्या यथार्थानुमितीत्यर्थ इत्याहुः। तत्तं
दर्शने विरोधादुपेक्षितं। नियमतइति। यत्र वह्निव्याप्यवान् वह्निव्याप्तिविशिष्टपर्वतवृत्तिधूमवांश्चेत्याकारकः परामर्शस्तत्र न तत्त्वं न वेपि
यत्र वह्निव्याप्यवानित्येव परामर्शस्तत्र तदभावादित्यर्थः। ननु तेन रूपेण हेतुतापहाय यत्र तादृशबाधाभावस्तत्रानुमितिरपलपनीये
त्यत आह गौरवेणेति। ननु सामानाधिकरण्यमेकाधिकरणसंबंधः। एवं च समूहालंबनाद्विशिष्टज्ञानस्य भेदानुपपत्त्या विशेषणप्रतियो
कविशेष्यानुयोगिकसंबंधो विशिष्टधीविषयत्वेनाभ्युपेयः। तथा च वह्निव्याप्यधूमवान् पर्वत इत्यत्र धूमे वह्निव्याप्तिर्विशिष्यानुयोगित्व
पर्वतवृत्तित्वप्रतियोगित्वरूपतदुभयसामानाधिकरण्यं भासत इत्यवेत्यत आह संबंधसंबंधेनेति। समूहालंबनाद्विशिष्टज्ञानस्य भेदान्यथा

नुपपत्याऽनुयोगित्वप्रतियोगित्वादिरूपसंबंधज्ञानवत्सामानाधिकरण्यज्ञानमपि न विष्यतीत्यतः संबंधेतीति कश्चित्। संबधसंबंधाविषयक
त्वेपि समूहालंबनव्यावृत्तस्य विशिष्टज्ञानत्वस्योपपादितत्वादित्यर्थः। समूहालंबने सर्वत्र विशेष्यता। विशिष्टज्ञाने विशेषणे प्रकारता संस
र्गे च संबंधता विशेष्ये विशेष्यतेत्यादि विषयतेति विषयावैलक्षण्येपि विषयतावैलक्षण्यादेव वैलक्षण्यं विशिष्टज्ञानस्येति भावः। ननु विषया
वैलक्षण्ये विषयताविशेषात् ज्ञानस्य वैलक्षण्ये जितं साकारवादिना। तथा चार्थेनैव धियां विशेष इत्यनुरोधात् समूहालंबनाविषयोऽनुयोगि
त्वं प्रतियोगित्वं च विशिष्टधीविषय इत्यभ्युपेयम् अत आह भ्रमस्थले चेति। हृदो वह्निमानिति भ्रमानुमितिस्थले चेत्यर्थः। नन्वसदेव सामाना
धिकरण्यं तत्राप्रसिद्धम् अत आह असदिति। असतोपि वैशिष्ट्यस्य सदुपरागेणापि भानस्य निरासादित्यर्थः। न च प्रतियोग्यप्रसिद्धिः। शुक्ति
विशेष्यत्वावच्छिन्नरजतत्वप्रकारकत्वस्य रजतत्वप्रकारतासामान्यस्य वा यत्किंचित्मात्रघटकप्रकारतानियामकसंबंधत्वनिरूपि
तत्वनियमवत्त्वेनार्थत्वस्य निरासात्। असद्वैशिष्ट्यभाने तु रजतत्वप्रतियोगिकशुक्त्यनुयोगिकवैशिष्ट्यस्य यत्किंचित्मात्रघटकप्रका
रत्वानियामकतया शुक्तौ रजतत्वप्रकारतायां तादृशसंबंधनिरूपितत्वाभावेन तादृशनियमभंगादिति। ननु पक्षवृत्तित्वे व्याप्तिविशि
ष्टत्वसामानाधिकरण्यावगाहिज्ञानेनैव व्याप्तिविशिष्टत्वपक्षवृत्तित्वसामानाधिकरण्यज्ञानपदप्रतिपाद्यं तत्र सामानाधिकरण्येऽव्या राम

१२

प्तिविशिष्टत्वपक्षवृत्तित्वयोरन्वयबाधेपि तादृशज्ञानान्वयेऽबाधात्। तथा च तादृशज्ञानजन्यत्वं लक्षणे नाव्याप्तम् अत आह अवांतरे
ति। तथा चैतादृशलक्षणं नैतादृशलक्षणवाक्यप्रतिपाद्यमिति भावः। लक्षणाव्याप्तिमुक्त्वा लक्षणवाक्यजन्यशाब्दबोधानुपपत्तिमा
ह अवांतरेतीति कश्चित्। विषाणी विषाणत्वावच्छेदेन शशसंबंधेति। शशविषाणे त्वत्र षष्ठ्यर्थलक्षणया शशसंबंधि विषाणमिति शाब्द
बोधे शशसंबंधित्वे दृश्यैव शशसंबंधाभावस्यापि निर्णयो विरोधीत्यर्थः। प्रमाणप्रस्तावादिति। प्रमाणतत्त्वमत्र विविच्यते इत्यतः
प्रमाकरणलक्षणस्यैव प्रस्तुतत्वेन तदर्थं प्रमाणलक्षणस्यैवौचित्यादित्यर्थः। प्रमेवेति। ननु प्रमाकरणलक्षणेऽपयोगिनी भ्रांति
रपीत्यर्थः। उपाध्यायमते पक्षतावच्छेदकसामानाधिकरण्येनैव साध्यं सर्वत्रानुमितिविषयः ननु पक्षतावच्छेदकावच्छेदेनापि। अ
वच्छेदकत्वस्य व्यापकत्वाघटकत्वेन साध्यस्य संबंधिविधया भानासंभवात्। तथा च गंधप्रागभावावच्छिन्नो घटो गंधवानित्यनु
मितिः प्रमैवेत्यत आह यदि चेति। पक्षतावच्छेदकावच्छेदेन साध्यभानस्यानुभविकत्वात् संसर्गाग्रहादिसामान्यसामग्रीसत्त्वादनु
मितावप्यवच्छेदकत्वं भासत एवेति भावः। चरमेति। प्रथमज्ञानपदस्य तत्परत्वे तत्रैवातिव्याप्तिरिति भावः। प्रमापरमिति। यावद्भ्रमभि
न्नत्वे प्रमात्वं अथ चेति। अव्याप्ये व्याप्यत्वावगाहिना पक्षधर्मेऽपक्षधर्मत्वावगाहिना परामर्शेनेत्यर्थः। वस्तुतो वस्तुगत्या साध्यवान्यः

पदस्तत्त्वगाहितया। ननु तस्यानुमितेर्लिंगोपधानांशे भ्रमत्वेनालक्षत्वमत आह लिंगोपहितेति। प्रमाणानावादिति भावः। ननु वस्तुग
त्यासाधनवान्यः पक्षस्तत्रेश्वरस्यैवतादृशज्ञानं प्रसिद्धमतस्तान्यत्वस्य तदनुमितौ सत्वान्नाव्याप्तिरत आह। ईश्वरेति। अतिप्रसंजकत्वा
दिति। तादृशपरामर्शत्वेन तस्य हेतुत्वाभावादुपादानप्रत्यक्षत्वेन तज्जन्यत्वस्य प्रमोत्रेऽतिप्रसक्तत्वादिति भावः। अत एव तादृशानुमिताव
व्याप्तेरेवातज्ज्ञानत्वेति। व्याप्तिविशिष्टेत्यस्य रूपधर्मताज्ञानमित्येवं रूपसप्तमीतत्पुरुषोपि नेत्यर्थः। पदार्थतावच्छेदकेति। न चैवं सरूपैकशेष
स्य द्वंद्वापवादकतानुपपत्तिरेकविषयत्वाभावादिति वाच्यं। पदजन्यप्रतीतिविशेष्यरूपस्य पदार्थभेदापेक्षया पदजन्यप्रतीतिविषय
भेदएव द्वंद्वस्य लाघवेन कल्पनात्। एवं च नीलघटयोरित्यत्र पदजन्यप्रतीतिप्रकारभेदात् घटाइत्यत्र विशेष्यभेदात् द्वंद्वस्य प्रसक्तिः। अप
रूपाइत्यादिना नार्थैकशेषस्य सार्थक्याय यथाश्रुतेपि नानुपपत्तिरिति। ननु नीलघटयोरभेद इत्यादौ द्विसंख्या न्वेतु। ननु तावद्वि
शेष्ये। तस्यैकत्वान्न विशेषणयोः पदार्थतावच्छेदकत्वेन निराकांक्षत्वात्। न च प्रकृत्यर्थवृत्तिसंख्यावाचकत्वं सुपां न तु तन्मात्रवृत्तिसंख्याबो
धकत्वं। अत एवैकस्मिन्न्यायःपरमाणौ आपइत्यत्र तद्गतगुणानादाय बहुवचनं समर्थितं वर्द्धमानेनेति वाच्यं। एकस्मिन्घटे एकौ घटाइत्यस
तोऽसाधुत्वज्ञानाभावदशायां शाब्दबोधप्रसंगात्। तत्र द्विवचनं पदसाधुत्वायैवेति चेत्तर्हि कर्मधारयएवास्तु किमर्थं पदार्थभेदमनादृत्य राम १३

द्वंद्वकल्पनमिति चेत्। नीलघटयोरित्यत्र कर्मधारये नीलाभिन्नघटत्वेनोपस्थितावभेदद्वयस्य नैराकांक्ष्यादनन्वयप्रसंगात्। ननु पदार्थ
योरभेदस्थलेपि द्वंद्वसाधुत्वे कर्मधारयः किमर्थं पृथगंगीक्रियत इत्यत आह। पदार्थद्वयेति। तथा च यत्राभेदसंसर्गकबोधे तात्पर्यं तत्र द्वंद्वा
साधुत्वात् कर्मधारयादेव तादृशबोध इति भावः। भेदाभेदोदासीनेति। भेदाभेदाविषयकेत्यर्थः। इदं च तादृशपदार्थद्वयबोधे विशेषणं। प
दार्थयोरभेदे कर्मधारयवत्पदार्थयोर्भेदएव द्वंद्व इत्यनुशासनस्वरससिद्धमतमनुसरन्नाह विशिष्टपदस्येति। यत्तु एकस्मिन्नेव चैत्र
चैत्रत्वसंबंधानां पदजन्यप्रतीतिविषयाणां भेदेन द्वंद्वापत्तिरतो विशिष्टेति। तदसत्। एकपदे द्वंद्वस्य तदपवादैकशेषस्य वापादयितु
मशक्यत्वात्। किं च समस्यमानप्रत्येकपदार्थयोरेव विशेषणविशेष्ययोर्भेद इति नायं पंथाः। धर्मपरतयेति। नपुंसके भावे क्त इत्य
नुशासनाद्व्याप्तिवैशिष्ट्यमेव व्याप्तिविशिष्टपदार्थस्तथा च व्याप्तिविशिष्टपक्षधर्मतापदयोर्द्वंद्व इति भावः। एतेन वैशिष्ट्यशक्तधातू
त्तरक्तप्रत्ययस्याश्रयोपस्थापकस्याश्रयत्वेन लक्षणायां व्याप्तिवैशिष्ट्यस्याश्रयत्वोपस्थितौ व्याप्तिवैशिष्ट्याश्रयत्वपक्षधर्मत्वज्ञानज
न्यत्वमर्थः स्यात्तथा च व्याप्यवानिति परामर्शस्य संबंधसंबंधाविषयकत्वात्तस्य व्याप्तिरिति परास्तं। एवमपि एकत्रधर्मिणि निर्विशेषणे
पि। मीमांसकेति। तथा च व्याप्यवानिति शाब्दपरामर्शस्थलीयानुमितेर्व्याप्तिः। धूमत्वावच्छिन्न व्याप्तिवैशिष्ट्यज्ञाने धूमत्वावच्छिन्न

पक्षधर्मताज्ञानं कारणमिति कारणताद्वयकल्पने गौरवं। गृह्यमाणव्याप्त्यवच्छेदकताकधर्मप्रकारकपक्षधर्मताज्ञानत्वेनैव हेतुत्वोक्तौ च
तत्कालीनत्वतत्पुरुषीयत्वादिप्रवेशादनन्तकार्यकारणभावापत्तिरिति। मिथ इति। तदुभयं। व्याप्तिविशिष्टस्य पक्षधर्मत्वोभयं। उपश्ले
षः परस्परसामानाधिकरण्यं। अव्यापकत्वात्। व्याप्यवावाविनिति परामर्शेन दसंनवात् इत्यर्थः। न च तदुभयेति। तदुभयविषयत्वनि
यतधर्मः परामर्शत्वं। परामर्शप्रत्यक्षे परामर्शत्वेन हेतुतायां मानाभावादित्याशयः। न च तत्प्रत्यक्षे तत्त्वेन हेतुत्वाद्वह्निव्याप्यो धूमोऽ
यं पर्वतवृत्तीति ज्ञानप्रत्यक्षेऽतिव्याप्तिरिति वाच्यं। अनेकवृत्तित्वेन धर्मस्य विशेषणात्तद्व्यक्तित्वस्यैकमात्रवृत्तित्वात्। विषय
स्यतत्वेन कारणत्वं नास्तीत्याशयेनेदमित्यपि कश्चित्। पक्षधर्मतेति। पक्षधर्मताविषयत्वनियतधर्मावच्छिन्नेत्युक्तौ च पक्षधर्म
तायाः पर्वतसंयोगादिरूपत्वाद्धूमाभावसहचरितवह्निमान्पर्वत इत्याकारकज्ञानत्वावच्छिन्नजनकतानिरूपितजन्यताश्रये
पर्वतो धूमवान्नवेति संशयेऽतिव्याप्तिः स्यादतस्तद्वारणाय व्याप्तिविषयकत्वमावश्यकं। न चैवमपि धूमव्याप्यधूमव्याप्याभावसह
चरितवह्निमानित्येवं साधारणधर्मवद्धर्मिज्ञानजन्ये पर्वतो धूमव्याप्यवान्नवेति संशयेऽतिव्याप्तिरिति वाच्यं। पक्षधर्मताविषय
त्वदलेनापि तद्वारणात्। तथा च व्याप्तिविषयत्वदलस्य संशयविशेषातिव्याप्तिवारकतया व्यावर्त्तकत्वमस्ति। ननु पक्षधर्मता

राम
९४

पदस्येत्याशयात्। धूमवत्पर्वतसंयोगप्रत्यक्षे संबंधितावच्छेदकधूमप्रकारकपर्वतज्ञानत्वेन हेतुत्वात्तत्रातिव्याप्तिरतः पक्षधर्म
तोपादानवैयर्थ्यमुक्तमित्यपि कश्चित्। व्याप्तिज्ञानत्वपरामर्शत्वावच्छिन्नकारणताद्वयलायव्याप्तिविषयत्वनियतत्वेविकाशतया
उक्तमित्यन्ये। वस्तुतस्तु पक्षधर्मताविषयत्वनियतेत्युपादाने धूमवान्पर्वतो नास्तीत्यभावलौकिकप्रत्यक्षे प्रतियोगितावच्छेदक
धूमप्रकारपर्वतज्ञानजन्येऽतिव्याप्तिः स्यादतो व्याप्तिवैशिष्ट्यविषयकत्वस्यावश्यकं। न च तथापि वह्निव्याप्यवान्पर्वतो नास्तीत्यभाव
प्रत्यक्षेऽतिव्याप्तिरिति वाच्यं। निकृष्टमते व्याप्तेरतीन्द्रियतया तदवच्छिन्नप्रतियोगिताकाभावस्याप्यतीन्द्रियत्वात्तेन रूपेण हेतुता
त्वभावलौकिकप्रत्यक्षस्यैव तथाहेतुत्वात्। एवं व्याप्तिपदस्याभावमात्रपरत्वेऽभावप्रकारकत्वनियतधर्मावच्छिन्नकारणता
प्रतियोगिककार्यताशालित्वविवक्षणेऽनुमितिमात्रेणैव लक्षणं याति। परंतु स्थलविशेषेऽव्याप्तिर्भवति। पक्षधर्मतोपादाने तु
ऽव्याप्तिरतिव्याप्तिश्चेत्यतोऽपि तद्वैयर्थ्यमुक्तमिति ध्येयं। वस्तुतस्तु विशिष्टवैशिष्ट्यबोधादावतिव्याप्तिवारणाय व्याप्यविषयकत्वे
न जन्यं ज्ञानं विशेषणीयमिति वस्तुगतिः। तथा च पक्षधर्मताविषयत्वनियतेत्यादिविवक्षणे धूमवत्पर्वतवानिति वैशिष्ट्यबोधे व्याप्ति
विषयकेऽतिव्याप्तिरतो व्याप्तिविषयकत्वनियतेत्याद्यावश्यकत्वे पक्षधर्मतोपादानवैयर्थ्यमेव। न च तत्सदनुपादाय तत्र पक्षधर्म
ताविषयकत्वेनैव जन्यं ज्ञानं विशेष्यतां तावतापि विशिष्टवैशिष्ट्यबोधादावतिव्याप्तिवारणसंभवादिति वाच्यं। तथा सत्यसंभवापत्तेः

पर्वतोवह्निमानित्यनुमितेरपिवह्निनिष्ठपक्षधर्मताविषयत्वात्हेतुतावच्छेदकरूपेणहेतुनिष्ठपक्षधर्मत्वाविषयत्वोक्तौच
वह्निव्याप्यपर्वतवानितिविशिष्टवैशिष्ट्यबोधेतिव्याप्तिः।व्याप्तिप्रकारकपक्षधर्मत्वाविषयत्वोक्तौचव्याप्यविषयत्वस्यैवलघु
त्वेनविवक्षणीयत्वादितितुसारं।व्याप्तिविशिष्टपक्षधर्मताज्ञानपदयोःकर्मधारयःविशिष्टपदंचप्रकारकपरमित्याशयेना
ह।व्याप्तीति।।यद्यपिवह्निव्याप्योधूमोद्रव्यवान्पर्वतइतिज्ञानस्यापिव्याप्तिप्रकारकत्वात्पक्षधर्मताज्ञानत्वात्तज्जन्यानुव्यव
सायेऽतिव्याप्तिः।उक्तरूपेणजनकत्वोक्तौचासंभवएव।वह्निव्याप्योधूमोधूमवान्पर्वतइतिज्ञानसाधारण्यात्।तथापिपक्ष
धर्मतांशेव्याप्तिप्रकारकत्वंविवक्षितं।तत्रपक्षनिष्ठविशेष्यतानिरूपितप्रकारतावच्छिन्नव्याप्तिप्रकारताकत्वं।धूमोवह्नि
व्याप्योधूमवान्पर्वतइत्यत्रपर्वतनिरूपिताधूमनिष्ठप्रकारतानव्याप्तिप्रकारतावच्छेदिका।किंतुधूमस्यमुख्यविशेष्यतैवे
तिनतत्साधारण्यमितिध्येयं।अत्रापिताद्दशविवक्षणेपि।वह्निव्याप्येन्धनवानित्युक्तौवह्निमदन्यावृत्तित्वरूपव्याप्तिप्रका
रकत्वसंभावनास्यादतोविशिष्याह इंधनसमानाधिकरणेति।वनानुमितेरिति।पूर्वंस्वमात्मकपरामर्शजन्यायांविषया
बाधेनभ्रमानुमितावेवाव्याप्तिरित्तेतिभावः।वृत्त्यनियामकसंयोगेनसाध्यतायांहेतुतायांचाकाशानुमितिःपरामर्शश्च राम
१५

भ्रमैवस्यादतोवृत्तिनियामकसंबंधेनहेतुतासाध्यताप्रतिपत्त्यर्थमाह।अत्रेति।सप्तम्याआधेयत्वप्रतिपादनात्-नितरामिति।साध्यव्याप
कत्वप्रकारकंसाधनेसामानाधिकरण्यप्रकारकमित्येवंव्याप्तिप्रकारत्वोक्तौपूर्वोव्याप्तिनिरासःस्यात्।अत्रतुव्यापकत्वसमानाधिकरण्य
योरुक्तयोरप्यप्रसिद्ध्याऽव्याप्तिवारणंनसंभवतीतिभावः।तया।व्याप्तिः।तावत्पदार्थानां।व्याप्तिशरीरनिविष्टपदार्थानां।तयाविधेति।व्या
प्तिभानेयत्रयस्ययेनसंबंधेनप्रकारता।तत्रतेनसंबंधेनतत्प्रकारकत्वमित्यर्थः।तद्वाधिकरणेहेतुप्रकारकेऽभावेनादृशाधिकरणवृत्तित्व
प्रकारकंप्रतियोगितायांतादृशाभावप्रकारकमित्यादिक्रमेणबोध्यं।नचव्यतिरेकिणीति।तत्रपक्षधर्मतांशेवह्न्यभावव्यापकाभावप्रतियोगि
धूमत्वस्यैवप्रकारत्वादितिभावः।ननुधूमव्यापकवह्निसमानाधिकरणधूमत्वस्यवह्न्यभावव्यापकाभावप्रतियोगिधूमत्वस्यचज्ञानेवह्न्यभाव
वद्वृत्तित्वरूपव्यभिचारधियंप्रतितयोराभावानवगाहित्वेनतद्व्याप्यानवगाहित्वेनवानप्रतिबंधकमतआह-नवतिहीति।तथाचतयावृत
त्याप्यनायत्यामणिमंत्रादिन्यायेनविरोधित्वंकल्प्यमित्याशयः।ननुधूमव्यापकवह्निसमानाधिकरणधूमसमानाधिकरणरासभवानि
तिज्ञानेधूमसमानाधिकरणत्वेतत्भावप्रतियोगितानवच्छेदकवह्नित्ववानितिज्ञानेचवह्न्यभाववद्वृत्तिर्धूमइतिव्यभिचारधीविरोधित्वसत्त्वा
तज्जन्यप्रसक्तेः।तिव्याप्तिः।उक्तरूपेणजनकत्वविवक्षणेत्वसंभवएव।उक्तरूपस्यतादृशधूमसमानाधिकरणरासभवानितिज्ञानसाधार
ण्यतयाजनकतानवच्छेदकत्वादित्यतआह।तयाविधेति।नतथा।नव्यभिचारधीविरोधिधीविषयः।रासभादाविति।तथाचयद्विशिष्टे

व्यभिचारधीविरोधिधीविषयधर्मप्रकारकं तद्विशिष्टपक्षधर्मतयाज्ञाते पक्षधर्मताज्ञाने तज्जन्यत्वमर्थः। उक्तज्ञानं नु पक्षधर्मतयाज्ञातेरा
सनत्वविशिष्टेन व्यभिचारधीविरोधि। धूमत्वविशिष्टतया ज्ञातेपि तस्य न पक्षधर्मतया ज्ञानमिति भावः। ननु धूमसमानाधिकरणेत्यादिव्याप्त्या
विवोक्तरूपव्यभिचारधीविरोधित्वेमानाभावः। केवलव्यतिरेकव्याप्तौ। न च वह्नित्वे धूमसमानाधिकरणाभावप्रतियोगितावच्छेदकं धूमाभा
ववत्ववह्न्यभावसमानाधिकरणाभावप्रतियोगितावच्छेदकमित्येवं समूहालंबनात्मकव्यभिचारधीविरोधित्वं वाच्यं। तथापि धूमव्यापक
वह्निकालीनधूमवत्पर्वतज्ञानस्य सामानाधिकरण्यविषयतयानुमित्यजनकस्य संग्राहकतया उक्तरूपस्यानुमितिजनकतान
वच्छेदकत्वात्। न च धूमव्यापकवह्निसमानाधिकरणधूमवान्पर्वतः वह्न्यभावव्यापकाभावप्रतियोगिधूमवान्पर्वत इति ज्ञानयोर
न्यतरत्वमेव हेतुतावच्छेदकमतस्तथैव लक्षणे निवेश्यमिति वाच्यं। अन्यतरत्वघटकभेदानां विशेषणविशेष्यभावे विनिगमनावि
रहेण नानाकार्यकारणभावावश्यकत्वे तदपेक्षया लाघवात्सत्वैकरूपेण हेतुत्वकल्पनाया न्याय्यत्वादित्याह व्यतिरेकसहचारेणेति।
भ्रमसंशयोत्तरेति। अत्र भ्रमसंशययोर्विपरीतज्ञानत्वेनानुगमः। विपरीतत्वं व्यावर्तकमात्रं। तेन नस्थाणुत्वभ्रमोत्तरस्य च पुरुषत्वप्रत्य
क्षस्य नासंग्रहः। न तु तरत्वं वा व्यवहितोत्तरत्वसंबंधेन तादृशविपरीतज्ञानवत्प्रत्यक्षनिर्णयत्वं। तेनाव्यवहितोत्तरत्वस्य तत्र घटित्वि

ननु मणिमंत्रादिन्यायेन विरोधित्वेमानाभावः क्वचित्क्लृप्तान्वयव्यतिरेकानुविधानस्य तादृशाभ्यासादौ पुनर्दोषपर्यायादिसत्वरसादाह व्यतिरेकसहचारेणेति कश्चित्तत्र। २
यकत्वेन

राम
१६

श्रांतत्वेपि न क्षतिः। न वा तत्संशयोत्तरसंशये व्यभिचार इति। उपाध्यायमते हि तन्निर्णयं प्रति तदभावज्ञानत्वेनैव विरोधिता
तत्र प्रामाण्यनिर्णयस्य च विशेषदर्शनादेरप्युत्तेजकत्वं। एवं व्यंजकान्धकारलीनत्वसंशयोत्तरनिर्णये व्यंजकग्रहालोक
समवधानमप्युत्तेजकं वाच्यं। न चैवं यत्र पर्वतो वह्निमान्न वेति संशयानंतरं वह्निव्याप्यधूमवान्पर्वतः नावबह्न्यनुमितिरप्र
माचेति समूहालंबनात्मकोपेक्षाबुद्ध्यात्मकभ्रमानंतरपरामर्शात्तत्तोः पर्वतो वह्निमानित्यनुमितिः। ततः पर्वतो वह्न्यभाववानि
ति लौकिकं प्रत्यक्षं तत्रापेक्षाबुद्ध्यात्मकतत्परामर्शेन पुनरनुमित्यापत्तिः एवमंधकारस्य घटसंशयानंतरमालोकसमवधाने
घटनिर्णयानंतरं पुनर्विशेषादर्शनप्रयुक्तघटसंशयानंतरं विनैव विशेषदर्शनं घटनिश्चयापत्तिः। पूर्वोत्तेजकस्यालोक
समवधानस्य सत्वादिति वाच्यं। तत्तत्कालावच्छिन्नविशेषदर्शनाद्यभावविशिष्टतद्विपरीतज्ञानाभावत्वेन तन्निर्णयत्वावच्छिन्नं
प्रतिहेतुत्वादिति। बाधनिश्चयस्य स्वातंत्र्येणविरोधितायां च विशेषदर्शने तत्कालावच्छिन्नत्वं न देयं। स्वमते च संशयोत्तरप्रत्यक्ष
त्वावच्छिन्नं प्रति विशेषदर्शनस्य न हेतुता। अंधकारस्य घटसंशयोत्तरप्रत्यक्षे व्यभिचारात्। न चैतादृशविपरीतज्ञानविरोधित्वेन
हेतुता विशेषदर्शनालोकादिसाधारणस्य विरोधित्वस्यैकस्याभावात्। किंतु विशेषादर्शनप्रयुक्तसंशयानंतरमालोकसमवधा

नस्यपुरुषांतरीयांधकारस्यघटसंशयविरोधिनःसत्त्वात्तत्प्रसक्तापत्तिः।तत्पुरुषीयतादृशविपरीतज्ञानोत्तरप्रत्यक्षंप्रतितत्पुरुषी
यतादृशविपरीतज्ञानविरोधित्वेनहेतुत्वस्योक्तौवातीवगौरवं।पुरुषांतरविशेषदर्शनस्यापितादृशविरोधिस्वरूपयोग्यत्वादतिप्रसं
गश्च।एवंतादृशविपरीतज्ञानवत्त्वस्यस्वरूपनिर्णयित्वेनकार्यतावच्छेदकेकार्यसमाजग्रस्तत्वात्।नचभ्रमसंशयानुत्तरनिर्णयसामग्री
सत्त्वेभ्रमसंशयोत्तरमपिसामान्यनिर्णयापत्तिर्दुर्वारैवातदनुत्तरप्रत्यक्षेपिसामग्र्यंतरकल्पनेऽतिगौरवंमानाभावः।एवंचविशेषदर्श
नमितरकोटिज्ञानविरोधितयासंशयोत्तरतादृशप्रत्यक्षेउपयुज्यतेइत्यभिसंधायाह हेतुतामानइति।नचसर्वमतएवविशेषदर्श
नस्यविशेषणधीत्वेनहेतुत्वात्हेतुतामानइतिनयुक्तं।विशेषदर्शनत्वेनैवतस्यहेतुतयापरामर्शत्वेनहेतुत्वविवरणेपितत्रातिव्याप्तिरि
तिपूर्वपक्षिणआशयात्।विशेषणधियोहेतुत्वाभिप्रायेणेदमित्यपिकश्चित्।तथाविधेति।व्याप्तिप्रकारकपक्षधर्मतानिश्चयत्वेनेत्य
र्थः।भ्रमादीति।अन्यथाव्यावर्तकधर्मदर्शनव्यंजकधर्मदर्शनालोकादिसाधारणाभावेनव्यभिचारप्रसंगादिति।श्वेतव्याप्यगौरव
त्ववानयमितिविशेषदर्शनंचनपीतत्वभ्रमविरोधीतिननतःश्वेतप्रत्यक्षं।केचित्तुविशेषदर्शनाद्यतिरिक्तयावत्कारणकालीन
तादृशसंशयोत्तरप्रत्यक्षंप्रतितादृशसंशयविरोधिदर्शनत्वेनव्यावर्तकधर्मदर्शनादिसाधारणरूपेणहेतुता।आलोकाभावप्रयु

क्तसंशयोत्तरप्रत्यक्षेआलोकसमवधानेहेतुरित्याहुः।अतएवतथाविधनिश्चयत्वेनहेतुत्वविवरणादेव।लिंगवत्त्वादिकंतल्लक्षणंस्वरूपंय
स्यैवंभूतोयोतिदेशवाक्यार्थस्तस्ययज्ज्ञानंवह्निव्याप्यधूमवत्पर्वतसदृशोमहानसपदवाच्यमित्याकारकंतज्जन्यायामित्यर्थः।तथाविधेति।
धूमवत्पर्वतसादृश्यविशिष्टमहानसपदवाच्यज्ञानत्वेनेत्यर्थः।न्यायार्थेति।पंचावयवैरेकवाक्यतयाबोधोजन्यतइतिचिंतामणिकारश
त्यादृशमुक्तं।स्वमतेतुउपनयार्थविशेष्यकनिगमनार्थविशेषणकशाब्दबोधेऽतिव्याप्तिर्बोध्या।ननूपनयेवह्निव्याप्यधूमस्यपर्वतेसाक्षा
त्प्रकारतयाभानेकिंतुमतुबर्थसंबंधिनोऽभेदसंबंधेनप्रकारतयाभानमिति।तादृशनिश्चयत्वेनतत्रहेतुत्वविवरणेपितत्रनातिव्याप्ति
स्तथावायमित्युपनयोऽसिद्धएवेत्यतआह तच्छब्देनेति।यत्रवह्निव्याप्यधूमवत्पर्वतमेवबुद्धिस्थीकृत्यसोस्तीतिशब्दोऽभिहितस्तत्रवह्निव्या
प्यधूमवत्पर्वतोपस्थित्यानंतरंवह्निव्याप्यधूमवान्पर्वतोऽस्तीतिशाब्दबोधेऽतिव्याप्तिः।ननुतच्छब्देनबुद्धिस्थत्वेनैवोपस्थितिःशाब्दबोधश्च
विशेषप्रकारधीश्रमानस्तीतिनतत्रातिप्रसंगइत्यतआह संकेतितेति।यत्रवह्निव्याप्यधूमवत्पर्वतएवघटपदस्यसंकेतग्रहस्तद्घटोऽस्तीति
वाक्येनवह्निव्याप्यधूमवान्पर्वतोऽस्तीतिबोधोजनितस्तत्रातिव्याप्तिरित्यर्थः।ननुमहावाक्यार्थज्ञानंनावांतरवाक्यार्थज्ञानजन्यमतःकथं
न्यायार्थज्ञानेऽतिव्याप्तिरतआह व्युत्पादयिष्यतइति।पदजन्यत्वस्येति।घटादिपदादाश्रयत्वादिसंबंधेनाकाशोपस्थितावपिशाब्दबोधा
नुदयात्।तस्यपदजन्यपदार्थोपस्थितित्वेनैवहेतुत्वमित्यर्थः।ननुघटशाब्दबोधंप्रतितत्तात्पर्येणोपस्थापकपदज्ञानत्वेनकारणता।तस्यात्वज

घटोपस्थितिर्व्यापारः। व्यापारस्य हेतुता च घटत्वप्रकारकज्ञानत्वेनैवावच्छिद्यते। न चैवं प्रसक्तोपस्थितेर्घटे घटोपस्थितिव्यापा
रके घटपदज्ञाने सति घटशाब्दबोधापत्तिः। घटशाब्दबोधे घटोपस्थितेरजनकत्वेनाव्यापारत्वात्। न चैवमपि घटपदजन्यघटोपस्थि
तौ सत्यां प्रकारान्तरेण घटोपस्थितेरपि घटशाब्दबोधजनकत्वापत्तिः। इष्टत्वात्। पदजन्यपदार्थोपस्थितिसत्त्वकाले शाब्दबोधानुद
यस्य तावतापि अनुपपन्नत्वात्। तथा च पदार्थोपस्थितेर्हेतुतायां पदजन्यत्वाप्रवेशात् तथैवातिव्याप्तिरत आह निश्चयत्वस्येति। उद्बो
धकविधया पदज्ञानस्य हेतुत्वात् पदजन्यपदार्थोपस्थितेरेव व्यापारत्वेन तस्य च स्वसमानरूपतया निश्चयभिन्नत्वासंभवेन तद्वारणाय
संशयान्यज्ञानत्वस्य प्रवेशानर्थक्यादिति भावः। केचित्तु पदार्थोपस्थितिकारणतायां पदजन्यत्वमधिकं निविष्टं निश्चयत्वं चानिविष्टमि
त्यतिव्याप्तिरसंभवप्रदर्शनार्थमिदमुक्तमित्याहुः। तथापि पदार्थोपस्थितिकारणतामादाय अतिवारणेपि। तादृशप्रसक्त इति। वह्नि
व्याप्यधूमवत्पर्वतवानिति प्रसक्त इत्यर्थः। शाब्दबोध इति। वह्निव्याप्यधूमवत्पर्वतं बुद्धिस्थीकृत्य तद्वानिति शब्दप्रयोगे वह्निव्याप्यधूमविशि
ष्टपर्वतस्य तच्छब्दार्थतया तादृशविशिष्टवैशिष्ट्यधीसंभवादित्यर्थः। तादृशविशिष्टवैशिष्ट्यावगाहिशाब्दे पदजन्यविशेषणतावच्छेदक
प्रकारकधियो विशिष्ट्य हेतुताकल्पनेपि तादृशविशिष्टवैशिष्ट्यबोधत्वावच्छिन्नं प्रति तादृशविशेषणतावच्छेदकप्रकारकनिश्चयत्वेन

नया हेतुता प्रसक्तसाधारणी तामादाय शाब्दबोधे प्रतिव्याप्तिरिति भावः। वकारात् वह्निव्याप्यवत्पर्वतवानित्यत्र पर्वतपदवाच्य इत्युपमिति संग्र
हः। ननु तत्कारणतायां निश्चयत्वं न निविष्टमत आह दंडी रक्तो न वेति। रक्तदंडवानिति ज्ञानं द्वेधा। एकं विशेष्ये विशेषणं तत्र च विशेषणा
न्तरमिति रीत्या। अन्यच्च विशिष्टस्य वैशिष्ट्यमिति रीत्या। तत्राद्यं पुरुषनिष्ठविशेष्यतानिरूपितदंडनिष्ठविशेषणतानिरूपितरक्तत्वविशे
षणताशालि। निरूपितत्वं विशेषणतायां स्वरूपसंबंधविशेषः प्रतीतिसाक्षिकः। दंडी रक्तो दंडवानिति ज्ञाने च दंडनिष्ठविशेषणतानि
रूपितानरक्तत्वविशेषणतेति तद्व्युदासः। कारणं च तत्तद्वह्निशेषणज्ञानमसंसर्गाग्रहश्च। अतएव निर्विकल्पकानन्तरं दंडी रक्तो न वे
ति संशयानंतरं च तादृशधीः सार्वलौकिकी। यदि च तादृशसंशयकाले विशेष्ये विशेषणमिति रीत्या रक्तदंडवानिति न धीः। न तादृशबो
धं प्रति रक्तो दंड इति निश्चयाभावविशिष्टस्तादृशसंशयः प्रतिबंधको वाच्यः। न च दंडी रक्तो न वेति संशयानंतरं इह भूतले रक्तो दंडो
नास्तीति मानसधीर्विशेष्ये विशेषणमिति रीत्या स्यात्। अभावे प्रतियोगितावच्छेदकविशिष्टप्रतियोगिनो विशेष्ये विशेषणमिति रीत्या
भानस्य प्रसिद्धत्वेन तदवच्छिन्नं प्रति प्रतिबंधकत्वकल्पनायां प्रयोगादिति वाच्यं। लौकिकप्रत्यक्षे इंद्रियसंबद्धविशेषणतायाः वा भा
वे रक्तदंडीयत्वासंसर्गाग्रहस्यापि अभावे रक्तत्वविशिष्टदंडत्वविशिष्टवैशिष्ट्यावगाहिबोधत्वस्यैव कार्यतावच्छेदकतया तादृशबोधवार

णात्। वस्तुतस्तु अभावनिरूपितदंडनिष्ठविशेषणतानिरूपितरक्तत्वनिष्ठविशेषणताशालित्वमेव विशेष्ये विशेषणमिति रीत्या तदव
गाहित्वं। तत्र रक्तदंडो नास्तीति विशिष्टवैशिष्ट्यबोधे प्रसिद्धं तदवच्छिन्नं प्रति तादृशनिश्चयाभावविशिष्टसंशयस्यैव प्रतिबंधकत्वात् न
संशयानंतरं निश्चये तादृशविशिष्टवैशिष्ट्यबोधानुपपत्तिः। अत एव विशेष्ये विशेषणमिति रीत्या विषयतैव विशिष्टवैशिष्ट्यबो
धसाधारणी प्रवृत्त्यादिजनकतावच्छेदिका। न च प्रवृत्त्यादिनियामिका विषयिता तथापि च विशेष्ये विशेषणमिति विशिष्टवैशिष्ट्य
मिति विशेषणताद्वयमिति वाच्यं मानाभावात्। विशिष्टवैशिष्ट्यबोधेऽपि विशेष्ये विशेषणमिति विषयतानियामकसत्त्वेन तदावश्य
कत्वे तत्र विशिष्टस्य वैशिष्ट्यमिति विषयतानियामकसामग्र्याः प्रतिबंधकत्वकल्पने तु गौरवात्। एवं खड्गी शूर इत्यादौ एकत्र द्वयमेक
विशेषणविशिष्टविशेषणं तद्वैशिष्ट्यमिति च विशेषणताद्वयं। तत्रापि उक्तरीत्या चरमबोधेऽनुयोगितावच्छेदप्रकारकधीर्हेतुः।
एकत्र द्वयमिति विषयता च व्यापिके सत्यस्माकीनः पंथाः। अधिकं च शब्दालोकसारमंजर्यां प्रपंचितमस्माभिः। रक्तदंडवानिति विशि
ष्टवैशिष्ट्यबोधे तु रक्तत्वविशिष्टदंडत्वविशिष्टनिष्ठा प्रकारता व्यासज्यवृत्तिरेका। रक्तत्ववैशिष्ट्यादिकं च वैज्ञानिकं। तेन रक्तवह्निमानि
त्यादौ न विशिष्टवैशिष्ट्यबोधासंभवः। अन्यथा व्यासज्यवृत्तिः रक्तत्वादिप्रत्येकनिष्ठाप्रकारताभावादापत्तेः रक्तत्वादिप्रकारकमिति व्य
ता

राम
१९

ग्रह:२

वहारः। तै रक्तविशिष्टदंडत्वविशिष्टप्रकारकज्ञानत्वावच्छिन्नं प्रति दंडत्वविशिष्टांशे रक्तत्वाभावाप्रकारकदंडत्वविशिष्टावच्छिन्नरक्त
त्वप्रकारकत्वस्य ज्ञानत्वकारणतावच्छेदकत्वेन न द्व्यं रक्तेन वा दंडो रक्त इति ज्ञानस्य तासंभवः। न वा रक्तदंड अप्रमेय इति ज्ञानस्य संग्रह
एवं दंडे रक्तवानिति बोधेऽपि रक्तत्वविशिष्टदंडत्वाभावाप्रकारकरक्तत्वविशिष्टावच्छिन्नदंडत्वप्रकारकज्ञानत्वेन हेतुतेति यथायथानु
नवमूह्यं। अत एव विशिष्टद्वयज्ञानमेव विशिष्टवैशिष्ट्यज्ञाने तत्त्वेन कार्यतावच्छेदकमार्यसमाजग्रस्तत्वादिनिमिश्रमतमपास्तं। र
क्तो दंड इति निश्चयानुविधायिज्ञाने विशेषस्यानुभवसिद्धतया दुरपह्नवत्वादिति। एवमनुमितावपि पर्वतत्वादिविशिष्टविशेष्यक
व्याप्यप्रकारकनिश्चयत्वेन हेतुत्वमिति तथा पविशिष्टपर्वतत्वविशिष्टवैशिष्ट्यबोधेऽतिव्याप्तिः। एवं पर्वतो वह्निव्याप्यवानित्येव निसंश
यवह्निव्याप्यवान् पर्वतो द्रव्यमिति ज्ञानानुदयादेकविशिष्टेऽपरवैशिष्ट्यबोधेऽप्यतिव्याप्तिर्बोध्या। दंडवानित्यादौ तु दंडत्वविशिष्टवैशि
ष्ट्यबोधे दंडत्वप्रकारकधीत्वेन हेतुत्वं तत्र धर्मितावच्छेदकाभिश्रितसंशयस्याप्रसिद्धा निश्चयत्वस्याप्रवेशात्। दंडो रक्तो न वेति संशया
नुव्यवसायश्च न रक्तत्वविशिष्टदंडीयत्वावगाही। किंतु रक्तत्वरक्तत्वाभावप्रकारकदंडधर्मिकज्ञानावगाही। विशेष्ये विशेषणमिति
रीत्यावारक दंडज्ञानवत्तावगाहीति न तत्र व्यभिचार इति भावः। विशिष्टविषयापधानेनेति। तत्ती पाप्रकारो घटमिघामी त्यादौ घटत्वविशिष्ट

MEMORIAL

विषयित्वरूपस्यैव तदुपधानस्येच्छादौ प्रकारत्वादिति। प्रतियोगिना सावत्त्ववद्विषयित्वप्रकारित्वादेरनुपस्थितस्यैव प्रकारत्वाभ्युपगमात्। तथा
च विषयितायां निरूपितत्वसंबंधेन घटत्वविशिष्टवैशिष्ट्यावगाहितादृशेच्छादिसाक्षात्कारे व्यभिचाराज्ज्ञानत्वं तादृशकारणतावच्छेद
कमिति भावः। विनश्यदवस्थज्ञानादिच्छाद्वेषयोः साक्षात्कारः संभवति। विनश्यदवस्थज्ञानजनितयोरिच्छाद्वेषयोः साक्षात्कारेणाभ्युपेय
त इत्यरुचेराह कृतेरिति। साक्षात्कारेऽत्र कृतित्वांशे निर्विकल्पकरूपः। कृत्यंशे सविकल्पकस्य विषयांशे सविकल्पककृतित्वांशे निर्वि
कल्पकत्वादेव संभवादिति। न च कृतिसाक्षात्कारपूर्वं प्रत्यासत्त्यर्थं विषयस्मृतेरावश्यकत्वे कथं व्यभिचार इति वाच्यं। सविषयसप्रकारक
दि६ त्वेनैव संस्कारादिसाधारणेन प्रत्यासत्तित्वोपपत्तेः। ननु तत्तद्विशिष्टबुद्धौ तत्तद्विशेषणधीत्वेन हेतुत्वात्कृतिसाक्षात्कारपूर्वं विशेषणधीनि
मित्तं विषयस्मृतेरावश्यकत्वे कथं व्यभिचार इत्यस्वरसात्तत्रापि ज्ञानत्वस्याप्रवेशं दर्शयति। विशेषणविषयकादिति। इदं च विशिष्टज्ञानका
रणतावच्छेदकप्रदर्शनाय। विशेषणविषयकत्वेनैव तत्र हेतुत्वात्। विशेषणविषयकसंस्कारेण न विशिष्टस्मृतिः। समानविषयकत्वे
नैव संस्कारस्मृत्योः कार्यकारणभावादतस्तदुपदर्शनाय। ह विशिष्टसंस्कारादिति। तद्विषयकगुणानां। तादृशविशिष्टविशिष्टविषयक
गुणानां। तत्र तादृशविशिष्टवैशिष्ट्यबोधे। अत्र च गुणानामिति निर्देशमात्रं विशेषणतावच्छेदकप्रकारकसंशयान्यत्वेन प्रकारितया विशेषण

राम
२०

सत्यर

णतावच्छेदकवत्संशयान्यत्वेन वा हेतुतेति ध्येयं। न च रक्तदंडांशेऽनुद्बुद्धसंस्कारवतः पुरुषांशे लौकिकसंनिकर्षवतो रक्तदंडवान्पुरुष इति वि
शिष्टवैशिष्ट्यबोधापत्तिः। ज्ञानस्य प्रत्यासत्तित्वेऽपि रक्तो दंडो न वेति संशयदशायां तादृशानुद्बुद्धसंस्कारसत्त्वात्तादृशबोधापत्तिः। एवं रक्तदंडांशे लौ
किकसंनिकर्षदशायामपीति वाच्यं। तत्तत्स्वरूपव्यक्तिविशेषं प्रति तत्तदुद्बोधकानामपि तत्तद्व्यक्तित्वेन हेतुत्वात्। न च तामपि तत्र तत्तदुद्बोध
कव्यक्तिविशेषाणां स्मृतिविशेषहेतुत्वस्यावश्यं कल्प्यत्वे संस्कारप्रयोज्यतादृशविशिष्टवैशिष्ट्यबोधपूर्वं स्मृतिव्यक्तिकल्पनाया एव गौरवप
राहतत्वात्। न च यत्र पुरुषसन्निकर्षदशायां नोद्बोधकसमवधानं किंतु तदभावदशायामुद्बोधकसमवधाने न स्मृतिः तत्र तादृशोद्बोधक
स्य प्रत्येकव्यक्तिं प्रत्यपि हेतुत्वकल्पनेऽपि गौरवं अकल्पने च पुरुषसन्निकर्षदशायां दंडगोचरानुद्बुद्धसंस्कारसत्त्वात्तादृशप्रत्यक्षापत्तिरि
ति वाच्यं। यत्र पुरुषसंनिकर्षदशायामेव तत्र तादृशोद्बोधकसमवधानेन तादृशविशिष्टवैशिष्ट्यप्रत्यक्षं जनितं तत्र तादृशसंनिकर्षाभाव
कालेऽद्बोधकासत्त्वदशायां स्मृतिवारणाय तादृशोद्बोधकव्यक्तेः स्मृतिहेतुत्वकल्पनाया भवतामपि तुल्यत्वादिति। अत एव तत्र संस्का
र एव प्रत्यभिज्ञायां हेतुरिति प्राचीनाः। मणिकारमते तु प्रतिबंधकाभावे सति वोद्बुद्धसंस्कारेऽवश्यं स्मृतिरिति तत्र स्मृतिरेव प्रत्यभिज्ञादौ
हेतुरिति। नन्वसंभवः। अनुमितावपि ज्ञानत्वस्य हेतुतावच्छेदकेऽप्रवेशादत आह इच्छादित इति। नन्विच्छादितोऽनुमितिरूपस्य(?) त एव स
रूपाद्ययां(?) तत्रावेनानुमित्यभावस्य निर्णेतुमशक्यत्वादत आह संस्कारा चेति। अत्र च स्थूलकालीनतर्जावे नानुमित्यभावः सुनिश्चय इति ना

माथानंदी २०
२१

वः ननु तथाप्यनुमितौ ज्ञानत्वेनैव कथं हेतुता। संस्काराद्यन्यत्वेनापि हेतुत्वस्य वक्तुं शक्यत्वात् अत आह संस्काराद्यन्यत्वस्येति। तत्रानुमितौ ज्ञानत्वे
वा हेतुतायां च निश्चयत्वघटकतया विषयत्वेनेति। अत्रेदं पश्यामीत्यनुव्यवसायसाक्षिको लौकिकत्वनियामको विषयताविशेष एव कार्यता
कारणतयोरवच्छेदकः। पदभावात्सुरभिचंदनमित्यादौ सौरभं न पश्यामीति धीः। अत एव कुसुमांजलिप्रकाशे साक्षात्कारित्वावच्छिन्नविषयता
घटितमेव लौकिकप्रत्यक्षलक्षणमुक्तं वर्द्धमानोपाध्यायैः। तत्र तादृशविषयतया प्रत्यक्षत्वं कारणतावच्छेदकं तेन न परमाण्वादिसाधारण
ता। तादृशविषयितावत्प्रत्यक्षत्वं कार्यतावच्छेदकं। तेन विषयाजन्यसर्वांशोपनीतभानव्यावृत्तिः। न च सर्वांशोपनीतभानासिद्धिः सर्वत्रास्य प्र
त्यक्षसामग्रीसत्त्वादिति वाच्यं। कामिनीजिज्ञासादिवशात् तस्याद्यविषयकत्वस्य संभवात्। तादृशप्रत्यक्षं विषयतासंबंधेन कार्यता। तादृशविषय स्य वर्द्
स्य च तादात्म्येन हेतुतेत्यतो न व्यभिचारः। तत्प्रत्यक्षे तद्विषयकप्रत्यक्षे। अवश्याभ्युपेयकार्यकारणभावेनैवातिप्रसंगभंगे ज्ञानप्रत्यक्षे ज्ञानत्वा
दिना हेतुत्वकल्पने मे वा प्रामाणिकमित्याशयेनाह कदाचिदिति। तत्तदितरत्वादिरिति। इदं घातरः प्रमाणत्वप्रत्ययः प्रत्येकान्वयी। तेन तत्त्व
तदितरत्वादिरित्यर्थः। तेन तत्त्वतदितरत्वादिना विषयस्य कारणता। तत्तद्विषयकत्वेन तत्त्वतदितरत्वादिधर्मवद्विषयकत्वेन प्रत्यक्षस्य कार्य
ता। तथा च व्याप्तिप्रकारकपक्षधर्मताविषयकसंशयान्यज्ञानत्वेन तादृशतद्विषयकप्रत्यक्षत्वेन न कार्यकारणभाव इति भावः। परामर्शत्व
घटकदलचतुष्टयस्य साम्यप्रदर्शनायाह मैत्राव लोकितेत्यादि। नीलेतरत्ववत्तद्विषयत्वादिना इत्यत्रापि द्रष्टा सत्त्वप्रत्ययस्य घटेनापि संबंधः राम

२१

ननु प्रामाणिकतया गौरवं न दोषायेत्यत आह। मानाभावादिति। ननु तादृशकार्यान्यथानुपपत्तिरेव मानमत आह। अन्यथोपपत्तेश्चेति। विशिष्टस्मरणे इ
ति। व्याप्तिप्रकारकपक्षधर्मतास्मरणे इत्यर्थः॥ यद्यप्यप्रामाण्यज्ञानास्कंदितेनापि स्मृतिजननात्तदनास्कंदितत्वं न स्मृतिजनकतावच्छेदकं पराम
र्शस्यानुमितिजनकतायां तु नदवच्छेदकमेवेति नातिव्याप्तिसंभावना तथापि तत्तज्ज्ञानीयाप्रामाण्यज्ञानाभावस्य सर्वत्र निश्चयकारणतावच्छेदकत्वे
विनिगमनाविरहेण स्वातंत्र्येण हेतुत्वस्यैवोचितत्वमित्याशयात्। अप्रामाण्यं भ्रमत्वं प्रामाण्याभावः। न चैवमेकस्मिन्नप्रामाण्यज्ञाने सति प्रतिबंधक
सत्त्वात्तदनास्कंदितज्ञानांतरादपि नानुमितिः स्यात् इष्टत्वात्। अत एवाप्रामाण्यज्ञानानामननुगमेऽपि न क्षतिः। यादृशाप्रामाण्यज्ञानसत्त्वे परामर्श
सत्त्वे नानुमितिस्तादृशज्ञानाभावकूटस्यैव हेतुत्वात्। अन्यथा तद्गुरुधीयाप्रामाण्यज्ञानाविषयपरामर्शत्वादिना हेतुत्वेऽनंतकार्यकारणभावकल्पना
पातात्। प्रमेयज्ञानमप्रमेत्यप्रामाण्यधीसत्त्वेऽनुमित्यनुदयप्रसंगात्। यत्र विषयविशेषे परामर्शेऽप्रामाण्यज्ञानाभावस्तदभिप्रायेणेदमित्यपि कश्चित्।
उपेक्षात्वं वेदेदं निर्वक्तुं शक्यते न तदा तदन्यत्वे न हेतुत्वं वक्तुं युज्यते इत्यत स्तदेव दूषयति उपेक्षात्वमिति। जातिसंकरेति। जगन्नाथादिवाक्यविषेऽउपेक्षा
त्वं विहाय वाक्यत्वं वाक्यत्वं विहाय उपेक्षात्वं वा दोवर्त्तमानं एकत्र वाक्यविषेऽपेक्षाज्ञाने संकीर्णमित्यर्थः। ननु वाक्यत्वादिव्याप्यं नानैवापेक्षात्वं
तावद्भेदकूटश्च कारणतावच्छेदकः तेन न दोष इत्यत आह। आंशिकत्वेनेति। एकमेव ज्ञानं किंचिदंशेऽपेक्षात्मकं किंचिदंशेऽपेक्षात्मकं वानुभूयते

उपेक्षात्वस्य ज्ञातित्वे तन्न स्यात्। जातेर्नांशिकत्वादिति भावः। प्रवृत्तिनिवृत्यजनकस्यापि जिज्ञासितविषयस्यानुपेक्षात्वादत आह अजिज्ञासितेति। तद्वि
षयकजिज्ञासाजनकज्ञानत्वमित्यर्थः। तेन कालांतरे जिज्ञासितविषयस्यापि तादृशज्ञानस्य नोपेक्षात्वक्षतिः। तादृशात्। तद्रूपावच्छिन्नात्। संस्काराजनकत्वं। उपे
क्षात्वमिति शेषः। तज्जनकतावच्छेदकेति। जनकतावच्छेदकापरिग्रहे जनकताग्रह एवासंभवी। जनकतावच्छेदकांतरं च नास्त्येवेति भावः। ननूपेक्षान्यत्वेनैव
तद्ग्रहस्तत्ताम् अत आह अन्योन्याश्रयादिति। संस्कारजनकभिन्नत्वरूपोपेक्षात्वज्ञाने उपेक्षान्यत्वेन संस्कारजनकत्वज्ञानं संस्कारजनकत्वे च ज्ञाते तदन्यत्व
रूपमुपेक्षात्वं ज्ञातव्यमित्यन्योन्याश्रय इत्यर्थः। रूपांतरापरिचयादिति पाठे अन्योन्याश्रयादित्यत्र हेतुः रूपांतरं उपेक्षान्यत्वादतिरिक्तं। ननु घटत्वप्रकारकै
तद्घटविषयकज्ञानस्य तादृशसंस्कारं प्रति तत्तद्व्यक्तित्वेन जनकताग्रहात् तादृशसंस्कारजनकयावद्भेदकूटवत्त्वमुपेक्षात्वं सुग्रहमेव। अत एव नांशिक
त्वक्षतिः। एतद्घटांशे उपेक्षात्मकस्यापि ज्ञानस्य पटादौ घटांतरे वा उपेक्षात्वसंभवात्। ननु घटत्वप्रकारकैतद्घटविशेष्यकसंस्कारत्वावच्छिन्नं प्रति तत्त
द्व्यक्तित्वेन प्रतिबंधकत्वं कल्प्यं। तथा सति उपेक्षाज्ञाने विद्यमाने उपेक्षात्मकज्ञानांतरादपि तादृशसंस्कारानुत्पत्त्यापत्तेः। तथा च घटत्वप्रकारकैतद्घटवि
षयकस्मृतिं प्रति घटत्वप्रकारकैतद्घटविषयकसंस्कारजनकयावद्भेदकूटवद्भिन्नत्वेन जनकत्वेन कोपि दोष इत्यत आह। संस्कारानुत्पत्त्येवेति। अपस्मर
णसंभवे उपेक्षाया स्मरणसंभवेन वा तदप्रवेशादुपेक्षान्यत्वाप्रवेशात्। न च स्मृतिं प्रत्येव तत्त्वेन हेतुत्वमस्तु संस्कारं प्रति सामान्यरूपेणैव तदस्त्विति
वाच्यं। तथा सत्युपेक्षास्थले संस्कारस्य तत्सन्नाशकस्य च कल्पनागौरवात्। नन्वेवं तु संन्यायतया संस्कारानुत्पत्त्येव संशयात्मस्मृत्यनुत्पत्तिसंभवे स्मृतिजनक राम

२२

तायां निश्चयत्वस्यापि न प्रवेश इति वाच्यं। अत्यंताजनकव्यावृत्तरूपेण संभवति तत्साधारणरूपेण कारणतायाः अन्याय्यत्वात्। अन्यथा
ज्ञानत्वेनैव हेतुतास्तु संस्काराभावादेव स्मृत्यभावस्यापि सुवचत्वात्। नन्वेवं तु अन्यायेनोपेक्षान्यत्वस्यापि प्रवेश इति वाच्यं। उ
पेक्षात्वस्य तावद्भेदकूटरूपस्य सर्वज्ञदुःपरिच्छेद्यतया तदन्यत्वस्य दुर्ज्ञेयत्वात्। तथा चेदंत्वावच्छेदेन घटत्वप्रकारकसंस्कारं स्मृ
तिं च प्रति इदंत्वावच्छेदेन विरोधसंबंधेन घटत्वाभावप्रकारकेदंत्वावच्छिन्नघटत्वप्रकारकज्ञानत्वरूपनिश्चयत्वं जनकता
वच्छेदकं। अत एव कंबुग्रीवो घटो न वा अयं घट इति समूहालंबनस्यायं घटः घटत्वाभाववान्वेति समुच्चयस्यापि संग्रहः। संशय
स्थले उक्तरूपजनकतावच्छेदकाभावात् तादृशसंस्कारस्मृत्योरनुत्पाद इति। यत्तु स्मृतिं प्रत्येवोक्तरूपेण हेतुता संस्कारं प्रतीदंत्वा
व७ वच्छेदेन घटत्वप्रकारकधीत्वेनैव हेतुता। अन्यथायं घटो न वेति संशयानंतरं केवलधर्मिस्मरणानुपपत्तिस्तथा च संशयस्य इदं
त्वावच्छेदेन घटत्वप्रकारकसंस्कारसत्वात्तथास्मृतिवारणाय तज्जनकतायां निश्चयत्वं निवेश्यत इति तन्न। धर्मिस्मरणान्यथा
नुपपत्त्या धर्मितावच्छेदकप्रकारेण धर्मिविषयत्वेपि संस्कारस्य धर्मितावच्छेदकावच्छेदेन घटत्वप्रकारकत्वकल्पने मानाभावात्।
अन्यथा संस्कार एव निश्चयत्वेन हेतुतास्तु स्मृतौ तज्ज्ञानत्वेनैव किं न स्यात्। शुद्धधर्मितावच्छेदकप्रकारकसंस्कारं प्रति शुद्धधर्मि
तावच्छेदकप्रकारकज्ञानत्वेन हेतुतायाः पृथगेव सर्वसंमतत्वेन च धर्मिस्मरणोपपादनात्। नन्वेवमयं घटो न वेति संशयात्केवलधर्मिण इव

केवलघटस्यापिस्मरणापत्तिस्तत्रापिधर्मितावच्छेदकामिश्रितघटइत्येवमाकारकघटत्वप्रकारकज्ञानानुरोधेनघटत्वप्रकारकज्ञा
नत्वेनसप्रकारकजन्यज्ञानत्वेनवापृथगेवहेतुतायाअवश्यवाच्यत्वादितिवाच्यंइष्टत्वात्‌ यदपिसंस्कारस्यापूर्वस्येसविषयत्वेमाना
भावःस्मृतित्वेनसंस्कारत्वेनैवकार्यकारणभावः।संस्कारत्वावच्छिन्नंप्रतिज्ञानत्वेनसप्रकारकजन्यज्ञानत्वेनैवाहेतुत्वात्‌।उपेक्षा व३
व्यावृत्तयेतत्तद्व्यक्तित्वेनहेतुत्वस्यानयमतेप्यादरणीयत्वाच्चनातिप्रसंगः।इदंत्वावच्छेदेनघटत्वप्रकारकस्मृतिंप्रतिइदंत्वावच्छेदे
नघटत्वाभावाप्रकारकइदंत्वावच्छिदेन्नघटत्वप्रकारकज्ञानत्वेसंस्कारद्वाराहेतुत्वाच्चनातिप्रसंगः।व्यापारव्यापारिणोरेक
मेवजन्यतावच्छेदकमित्यत्रमानाभावात्‌।केवलघटत्वादिप्रकारकस्मृतिंप्रतिघटत्वप्रकारकधीत्वेनहेतुत्वंनतुतत्रनिश्चयत्वस्या
पिनिवेशइत्युभयसिद्धमेव।नचज्ञानत्वेनस्मृतित्वेनैवकार्यकारणभावोस्तुसंस्कारस्यइदंत्वावच्छेदेनसुक्तरूपेणहेतुत्वान्नातिप्रसं
गइत्येवकिंनस्यादितिवाच्यं।संस्कारस्यसविषयकत्वासिद्धेःज्ञानसविषयकत्वस्यानुव्यवसायेनैवग्रहादित्याहुः।तन्नघटपद
समूहालंबनस्यपटांशेउपेक्षात्मकस्यघटांशेप्रेक्षात्मकस्यस्वजन्यसंस्कारसंबंधेनसत्त्वात्पटस्मरणापत्तिः।नचोद्बोधकाभावादस्म
रणं।यस्यपुरुषस्यपटसंस्कारानंतरंपटसदृशविलक्षणवस्तुज्ञानानंतरमेवपटस्मृतिस्तत्रतत्पुरुषीयस्मृतिंप्रतितादृशवस्तु
ज्ञानत्वेनहेतुत्वेउद्बोधकाभावस्यासंभवात्‌।एवमेकस्मिन्नेवघटेद्रव्यत्वघटत्वोभयप्रकारकज्ञानाद्घटत्वांशेउपेक्षात्मकाद्द्रव्यत्वांशे

प्रेक्षात्मकाद्द्रव्यत्वप्रकारकस्मृत्यापत्तिवारणायसंस्कारस्यसप्रकारतापिकल्पनीयेति।एवंचोक्तस्थलेतिप्रसंगवारणायसंस्कारस्यतत्प्रका
रकतद्विशेष्यादिघटितरूपेणजनकत्वस्यावश्यकत्वेज्ञानस्यज्ञानत्वेनस्मृतित्वेनैवकार्यकारणभावःकल्प्यतेनतुविशेषरूपेणापिप्रयोज
नाभावादितियुक्तःपंथाः।तथात्वंस्मृतिजनकत्वं।सकृदिति।असकृदनुभवेचएकसंस्कारनाशेपिसंस्कारांतरंसंभवतीतिभावः।ननु
संस्कारस्यफलनाश्यत्वेप्रथमस्मरणेनैवसमूहालंबनासंस्कारस्यानाशाद्‌नंतरंतद्विषयांतरस्मरणानुपपत्तिरतआह।समानाकार
स्येति।घटत्वप्रकारकसंस्कारंप्रतिघटत्वप्रकारकस्मृतित्वेनघटत्वप्रकारकसंस्कारंप्रतिपटत्वप्रकारकस्मृतित्वेननाशकत्वकल्प
नात्‌घटत्वप्रकारकस्मृतित्वेपिपटत्वप्रकारकस्मृत्यभावान्नदुभयप्रकारकसंस्कारानाशइत्यर्थः।अत्रचस्मृतिजन्यसंस्कारस्यक्ष
णिकत्वापत्तिवारणायतत्तत्स्मृतिजनकत्वंतत्तत्स्मृतिनाश्यतायांप्रत्यासत्तिरितिध्येयं।समूहालंबनादीत्यादिनाएकधर्मिविशेष्य
कानेकप्रकारकज्ञानग्रहः।ननुयत्रक्रमिकमेवस्मरणंनतुसमूहालंबनात्मकंतत्रतादृशसंस्कारस्यनाशापत्त्याकालादेरेवनाशक
त्वंकल्प्यं।तथाचफलस्यनाशकत्वेव्यभिचारःतत्तद्व्यक्तित्वेननाशकत्वकल्पनेचसकृदनुभूतस्यत्वेपिचरमफलमेवनाशकमस्तुवस्तुतः
कालादेरेवतत्तद्व्यक्तित्वेननाशकत्वे अनन्यगतिकत्वात्‌।स्मृतौतुसंस्कारनाशकतावच्छेदकत्वेनैकाजातिरेवचरमफलमात्रवृत्तिःस्मृ
तित्वव्याप्याकल्प्यते।तथाचोपधायकतासंबंधेनविजातीयस्मृतिविशिष्टसंस्कारनाशंप्रतिविजातीयस्मृतित्वेनहेतुता।अतएववि

जातीयस्मृतिजन्यसंस्कारस्य कालांतरे विजातीयस्मृत्युपधायकस्यापि क्षणिकता। तदानींतस्य तदुपधायकत्वाभावेन तद्विशिष्टत्वाभा
वात्। अत एवात्र नाश्यतायां तत्तत्स्मृतिजनकत्वमपि न प्रयोजकस्यैवानतिप्रसक्तत्वात्। अत आह जायते चेति। अस्ति हि झटिति स्मरणा
दिकार्येणानुमितो दृढतरत्वनामा संस्कारवृत्तिर्जातिविशेषः। तदवच्छिन्ने चान्वयव्यतिरेकाभ्यां पुनः पुनः स्मरणमेव कारणं। तत्र
पूर्वपूर्वस्मरणेन संस्कारद्वारा दृढतरत्वसाधनादेव। अत एव भावनायाः पटुतरभावनाजनकत्वं मेनिरे भाष्यकृतः। न च कस्यचित्स्मृतिद्वयेन
कस्यचित्स्मृतित्रयेण चरमसंस्कारदृढत्वानुगमः। तत्स्वरूपीयतादृशसंस्कारं प्रति तत्तत्स्मृतीनामपि तत्त्वेन हेतुत्वकल्पनादिति। स्मृतिनि
ष्ठाजातिविशेष एव तादृशसंस्कारजनकतावच्छेदक इत्यपि कश्चित्। ननु एकस्यैव संस्कारस्य पुनः पुनः स्मृतिजननानंतरं झटि
त्युद्बोधकसमवधानमेव दार्ढ्यं तावतैव झटिति स्मरणादिसंभवात्। न था वता दृढजातौ मानाभाव इत्यत आह परिसंख्ये चेति। अ
नुभवं विनापि स्मृतिनः संस्कारभावनया अनुभवत्वे संदिग्धव्यभिचारकं ज्ञानं विना संस्कारभावनाविरहाज्ज्ञानत्वं निश्चितव्यभिचा
रकमिति व्यभिचारज्ञानरूपप्रतिबंधकाभावात्तदवच्छेदेनैव हेतुतानिश्चय इति भावः। इदमेव। निश्चितव्यभिचारकत्वमेव। हेतुता
वच्छेदकत्व इति। कार्यतावच्छेदकं तु विशेषरूपमेव निश्चितव्यभिचारकत्वान्न तु संदिग्धव्यभिचारकसामान्यरूपं। अत एव वि
शेषणधीजन्यतावच्छेदकं विशिष्टानुभवत्वमित्युपाध्यायाः। न चायमपसिद्धांत इत्याह अभिहितं चेति। तत्र पूर्वपूर्ववर्णस्मृतिसहिता राम

त्यवर्णानुभवः पदप्रत्यक्षहेतुरस्तु इत्याक्षेपे स्मृतीनामित्यादिसमाधानफक्किका। स्वकार्येति। यः संस्कारस्तत्कृतो यो विरोधः विनाश्य
त्वकृतीनामित्यर्थः। अनुभवपरत्वादिति। केचित्तु। यत्रैकस्मिन्नेव घटे अयं घट इति ज्ञानानंतरं दिवसादिविलंबेन नायं घट इत्यनु प्रत्य
मित्यादिकमुत्पन्नं तत्र तादृशसंस्कारं प्रति निश्चयत्वेन हेतुत्वे विवक्षणेपि तादृशनिश्चयजनितसंस्कारद्वयसत्त्वात्। संशयात्मक
स्मृत्यापत्तिरतस्तथाविधस्मृतिवारणायेदंत्वावच्छेदेन घटत्वप्रकारकस्मृतिं प्रति इदंत्वावच्छेदेन घटत्वाभावप्रकारकस्मृतिसा
मग्र्या एवं तादृशघटत्वाभावप्रकारकस्मृतिं प्रति तादृशघटत्वप्रकारकस्मृतिसामग्र्याः प्रतिबंधकत्वमवश्यं वाच्यं। तथा च स्मृतिज
नकतायां संस्कारजनकतायां च निश्चयत्वाप्रवेशेपि न क्षतिः। न च तत्रानुमित्यादिना पूर्वसंस्कारो नाश्यते। अनुमित्यादेस्तादृशप्रत्य
क्षाविरोधित्वेपि न तज्जनितसंस्कारानाशकत्वादित्याहुः। साक्षात्तज्जन्यत्वं साव्यवहितप्राक्क्षणवृत्तित्वप्रत्यासत्त्या तादृशपरामर्शजन्य
त्वं। तेन सिषाधयिषादिकालीनेन विशेषणज्ञानतया परामर्शजन्येन धर्मांतरे वह्न्यादिप्रत्यक्षेण जनितायामनुमितौ नाव्याप्तिः। कस्याश्चित्
स्याव्यवहितप्राक्कालवृत्तिपरामर्शजन्यत्वसंभवेपि तत्र संस्कार एव प्रत्यासत्तिर्न तु तादृशप्राक्कालवृत्तित्वमिति नातिप्रसंगः। अत्रानुभव
त्वापेक्षया गौरवमेवास्वरसः। प्रकारांतरेणातिव्याप्तिवारणं दर्शयति। किं चेति। तदुभयवैशिष्ट्येति। व्याप्तिप्रकारेण धूमे पर्वतनिरूपि
ताधेयतायाः पर्वतत्वरूपेण पर्वते व्याप्यनिरूपिताधारतायाश्चावगाहित्वं वाच्यं। तेन प्रमेयमिति ज्ञानस्य व्याप्यपर्वत इत्यादेश्च वारणे

MEMORIAL

ता

आधाराधेयत्वयोश्चसमानसंवित्संवेद्यत्वाददोषः। व्याप्तिप्रकारेणधूमेपर्वताधेयत्वावगाहित्वस्यपर्वतरूपेणपर्वतेवह्निव्याप्याधारत्वावगा
हित्वस्यवान्यतरदेववाहेतुतावच्छेदकं। तद्रूपेणघटकमपीति। अन्यथासंभवापत्तेः। तदेवंतादृशवैशिष्ट्यावगाहित्वावच्छिन्नहेतुत्वमेव। ननुस्मृताव
प्युक्तरूपेणकुतोनहेतुत्वमतआह एकतरेति। पर्वतेवह्निव्याप्यइतिज्ञानात्सर्वतोवह्निव्याप्यवानितिस्मरणाभावादित्यर्थः अन्यथानुमितावपिस्य
तावपिउभयवैशिष्ट्यावगाहित्वेनैवहेतुत्वे। नियमेन। विशेष्यतानियामककार्यकारणभावरूपनियमविरहेण। एकविशेष्यकस्मृतिसामग्र्या
एवान्यविशेष्यकसामग्रीत्वात्नियमेननियमतउभयविशेष्यकतापत्तेरितिवार्थः। ननुतद्विशेष्यकतत्प्रकारकस्मृतिंप्रतितत्प्रकारकतद्विशेष्य
कधीत्वेनहेतुत्वमतएवस्मृतेर्नोभयविशेष्यकत्वं एवमुभयवैशिष्ट्यावगाहित्वेनापिसामान्यतोनहेतुतायद्विशेषयोरितिन्यायादतआह। समा
नप्रकारकत्वेनैवेति। तथाचैतादृशसामान्यहेतुतयैवयद्विशेष्ययोरितिन्यायस्यचरितार्थत्वान्नतथाप्तिवउभयवैशिष्ट्यावगाहित्वेनहेतुत्व
मितिभावः। केचित्तु। एकतरविशेष्यज्ञानादन्यतरविशेष्यकस्मृतिस्वीकारेसमानप्रकारकत्वेनज्ञानस्मरणयोःकार्यकारणभावभंगप्रसंगइ
त्याशयेनाहसमानप्रकारकत्वेनैवेतिव्याचक्रुः। तत्रस्मृतौ। विशिष्येवतत्प्रकारकतद्विशेष्यकत्वादिनैव। एवकारव्यवच्छेद्यमाह। नतूक्तरूपेणेति
उभयवैशिष्ट्यावगाहित्वेनेत्यर्थः। एवमुभयवैशिष्ट्यावगाहित्वेनेत्यर्थः हेतुत्वविवरणे। विशिष्टवैशिष्ट्यबोधादाविसादिनातादृशपदार्थोपस्थि
तिजन्यशाब्दबोधपरिग्रहः। हेतुतामतेचेसनेनपूर्वोक्तास्वरसःसूचितः। निरतामिति। नातिव्याप्तिशंकापीत्यनेनान्वयः। तत्रहेतुमाह तथैवेति। तादृश

राम २५

रूपावच्छिन्नहेतुत्वस्यैवेत्यर्थः। पर्वतेवह्निव्याप्यइत्यनुभवस्यपर्वतोवह्निव्याप्यवानितिस्मृतिसमानविषयत्वाभावात्तत्संभावनया
स्त्व्याप्तिशंकावित्यात्। वह्न्यभावव्यापकाभावप्रतियोगिधूमवान्पर्वतइत्यनुभवस्यवह्निव्याप्यवान्पर्वतइतिस्मृतिविभिन्नविषयकतया
तस्तदुत्पत्तेरसंभवेनवित्वेनस्मृतौउक्तरूपेणहेतुत्वस्यासंभवादतिव्याप्तिशंकास्यदमपिनेतिभावः। अतएवोक्तरूपेणहेतुत्वस्यनिवेशादे
व। व्याप्यवत्त्वादीत्यादिनापरविशिष्टव्याप्यस्यपरिग्रहः। व्याप्यविशेष्यकपरामर्शस्यहेतुतावादिनयेपर्वतेवह्निव्याप्यइतिज्ञानत्वेनैवहेतुत्वा
दितिभावः। येषांमतेविशिष्टवैशिष्ट्यबुद्धिंप्रतिविशेषणतावच्छेदकप्रकारकनिश्चयत्वेननहेतुत्वंतन्मतेप्यभावप्रत्यक्षेप्रतियोगितावच्छेदक
३ भाव प्रकारकप्रतियोगिनिश्चयत्वेनहेतुत्वंवाच्यं तथाचतदादायतादृशप्रत्यक्षेप्यतिव्याप्तिःस्यात्। सापिप्रकृतनिवक्षयानसंभवतीतिभावः। हेतु
त्वेपीत्यपिकारोऽस्वरससूचनाय। तद्दीजंतुप्रतियोगिधियोजन्यतायांनाभावप्रत्यक्षत्वमवच्छेदकं। इदंत्वादिनातत्प्रत्यक्षेव्यभिचारात्। नापिप्र
तियोगितासंबंधेनसप्रकारकाभावप्रत्यक्षत्वंतथा। पटाभावत्वेनघटाभावप्रत्यक्षेघटत्वप्रकारकधियोव्यभिचारात्। नापिघटत्वरूपेणप्रति
योगितासंबंधेनघटप्रकारकाभावप्रत्यक्षत्वंतथामानाभावात्। वस्तुतस्तु। प्रतियोगिज्ञानाभावदशायांतत्सत्वेपिवाअभावत्वावच्छेदेनघटीयत्वा
संसर्गग्रहेनेत्याकारकानुभवप्रसंगः तथाचतत्तदिंद्रियसंबद्धविशेषणतायाघटत्वविशिष्टवैशिष्ट्यावगाह्यभावत्वप्रकारकप्रत्यक्षत्वादिकंदू
दंत्वेनाभावप्रत्यक्षोपगमेयद्रूपत्वप्रकारकाभावप्रत्यक्षत्वंचनानैवकार्यतावच्छेदकमतएवविशेष्यविशेषणमितिन्यायेनापिनाभावधीः। अत

एवं विशिष्टवैशिष्ट्यबोधस्य मान्यहेतोरेव तदुपपत्तौ न पृथक्कार्यकारणभावकल्पनेति ध्येयं। नन्वाधेयताधारत्वयोः समानसंवित्संवेद्यत्वे मानाभावः।
तादृशान्यतरत्वं वा गौरवेण न जनकतावच्छेदकमतो वह्निव्याप्यवानयं पर्वतः पर्वते वह्निव्याप्य इति ज्ञानयोः प्रातिस्विकरूपेणैव हेतुत्वं वाच्यं तथा चाति
प्रसंगस्तदवस्थ एवेत्यत आह व्याप्यविषयकत्वेनेति। एतेन। व्याप्यविषयकत्वविवक्षणेनैव। जन्यविशिष्टज्ञानत्वावच्छिन्नं प्रति विशेषणधियो हेतु
त्वव्यवस्थापनेऽवश्यात्युपेयविशेषणज्ञानस्यैव विशेषणतावच्छेदकप्रकारकत्वसत्त्वात् तादृशविशिष्टवैशिष्ट्यबोधत्वावच्छिन्नं प्रत्यपि विशेषणता
वच्छेदकप्रकारकधियो हेतुत्वं व्यवस्थापितं स्यादित्याशयेन तत्रैव व्यभिचारं वारयति। स्मृतिमित्यादिना। क्वचित्त्वनः क्वचिद्व्यापारतो जन्यविशिष्ट
ज्ञानत्वावच्छिन्नं प्रति विशेषणज्ञानस्याव्यवहितपूर्ववृत्तित्वमित्यर्थः। विशेषणधियो हेतुत्वस्येत्यादि अवच्छेदकचतुष्टयस्य कल्पनादिसग्रे तेनेत्यन्व
यः। ननु संबंधभेदेन व्यापकताभेदाद्धेतुताभेदान्नैकं हेतुत्वं। संस्कारस्य व्यापारतापि न संभवति संस्कारभजनपित्वापि विशेषणज्ञानेन विशिष्टज्ञा
नजननादत आह। निर्विकल्पकात्मकस्येति। तथा च सर्वत्रैव विशेषणधियः साक्षाद्धेतुत्वमिति भावः। ननु समानप्रकारकसमानविशेष्यकत्वेनैव स्मृ
तिं प्रति कारणत्वं ज्ञानस्य स्वरूपं निर्विकल्पकस्मृतिं प्रति कारणतावच्छेदकान्तरस्य कार्यतावच्छेदकान्तरस्य च कल्पने गौरवमत आह। तत्र घटत्वांशे
न्याप्रकारकघटत्वविषयकस्मृतिं प्रति तादृशघटधीत्वेन संबंधविधया समवायविषयकस्मृतिं प्रति तादृशसमवायधीत्वेन घटविषयकस्मृतिं प्रति
घटधीत्वेन च कार्यकारणभावकल्पनाद्घटत्वप्रकारकघटविशेष्यकस्मृतित्वं न कार्यतावच्छेदकमतो निर्विकल्पकात्मकस्मरणं नानुपपन्नमिति वा राम ३६

च्यः। एकस्य घटस्य घटत्वेन घटान्तरस्य तद्व्यक्तित्वेनैव ग्रहे घटान्तरविशेष्यकघटत्वप्रकारकस्मरणापत्तेरत आह। अनुभवमिति। तथा च विशिष्टा
नुभवत्वं न तज्जन्यतावच्छेदकमिति स्मृतौ न व्यभिचार इति भावः। तस्याः विशेषणधियः। नियमतो विषयस्मृतेरिति। अपेक्षाबुद्ध्यात्मकज्ञाने नवे
च्छादिकं न जन्यत इत्याशयः। साध्यादेरित्यादिना पक्षहेतुहेतुतावच्छेदकसंबंधसाध्यतावच्छेदकसंबंधपरिग्रहः। देवादिति। तत्सर्वा वह्निव्याप्यानुमि
तौ व्याप्यं वह्निव्याप्यवान् वह्निव्याप्यवांश्च पर्वत इत्याकारकपरामर्शजन्यायां पर्वतो वह्निव्याप्यवान् वह्निमांश्चेत्यनुमितावित्यर्थः। तस्यां तद्व्याप्तिप्रका
रकपक्षधर्मतानिश्चयजन्यायां। साध्यव्याप्तिरपि। अनुभवत्वव्याप्यत्वं तन्न्यूनवृत्तित्वं तच्चानुभवनिष्ठभेदप्रतियोगितानवच्छेदकत्वं। एवमनुभवत्व
व्याप्यजातिमत्त्वविवरणे। अनुभवत्वव्याप्यत्वप्रवेशापेक्षया लाघवार्थमाह पर्वतवह्नीति। प्रागुक्तयुक्त्याऽनपेक्षवैशिष्ट्यावगाहित्वस्य जनकतानवच्छे
दकत्वादाह वह्निव्याप्यवत्पर्वतेति। प्रतियोगिकोत्तरसंतानका पूतायां विशेषणं। अवच्छेदकत्वं अवच्छेदकताश्रयत्वं। ननु अवच्छेदकतापर्याप्त्यधिकरण
त्वं अवच्छेदकताश्रयश्च तादृशविशिष्टशरीरघटकपदार्थस्तोम एव। तथा च पर्वतविशेष्यकवह्निप्रकारकानुमितित्वस्यावच्छेदकत्वे वह्निवादेर
पि तद्घटकतया तद्व्यतिव्याप्तिरतो ज्ञानवृत्तिरिति। ज्ञानसमवेतेत्यर्थः। आलोकादिलिंगकानुमितिव्यावृत्तस्य वह्निव्याप्यधूमवान् पर्वत इत्येतादृशप
रामर्शाव्यवहितोत्तरतादृशवह्न्यनुमितित्वस्य कार्यतावच्छेदकत्वे तद्घटकज्ञानत्वमादाय ज्ञानमात्रेऽतिव्याप्तिरत आह सामानाधिकरण्येनेति। ज्ञा
नत्वस्य कार्यतासामानाधिकरण्यसत्त्वेपि सामानाधिकरण्यसंबंधेन नावच्छेदकत्वं किंत्वव्यवहितोत्तरत्वपरिचायकपरामर्शघटकतया। अनुमिति

त्वस्यवतादृशसंबंधेनैवावच्छेदकत्वं तादृशानुमितिःकार्येतिकार्यताग्रहे सामानाधिकरण्येनैवतस्याअवच्छेदकत्वावगाहनादितिभावः।व्याप्यविषय
कत्यत्राखंडाभावतयाद्वैयर्थ्याभावेपितदपेक्षयालाघवायाह व्याप्तिज्ञानइति।व्याप्तिज्ञानेऽवश्यंसमानःसाध्यमपीतितद्विषयत्वोपादानेऽसंभवइत्यत
२. धीनास्तादृशानुमित्यविषयत्वमर्थः।तद्व्याप्तिपरामर्शानुमित्यविषयोघटादिस्तद्विषयकत्वेतादृशविशिष्टवैशिष्ट्यबोधेऽतिव्याप्तिरतःपूर्वप्रतीकं।नभाव
भावाविषयकहेतुविषयकत्वंवाच्यमित्यर्थः।ननुपर्वतोवह्निमानित्यनुमितित्वावच्छिन्नंप्रतिपर्वतोवह्निव्याप्यधूमवानितिपरामर्शत्वेननजनक
तावह्निव्याप्यैतद्रूपवान्पर्वतइतिज्ञानजन्येव्यभिचारात्।नापिवह्निव्याप्यधूमवान्पर्वतइतिपरामर्शाव्यवहितोत्तरतादृशानुमितित्वंतत्कार्यता
वच्छेदकं।अव्यवहितोत्तरत्वंहितादृशपरामर्शाधिकरणकालध्वंसाधिकरणत्वेसतितादृशपरामर्शध्वंसाधिकरणकालध्वंसानधिकरणत्वंत
च्चाप्रसिद्धं कालमात्रस्यैवतादृशपरामर्शध्वंसाधिकरणकालध्वंसाधिकरणत्वात्।अनादौसंसारेऽनेनानामेवतादृशपरामर्शपरामर्शानां
शात्तत्परामर्शव्यक्त्यधिकरणकालध्वंसाधिकरणत्वेसतितत्परामर्शव्यक्तिध्वंसाधिकरणकालध्वंसानधिकरणत्वरूपेऽव्यवहितोत्तरत्वेकार्यताव
च्छेदकस्यतत्तद्व्यक्तिमात्रविश्रांतत्वात्तत्तद्व्यक्तित्वमेवतत्तद्व्यक्तित्वावच्छिन्नजन्यतावच्छेदकमतःपरामर्शत्वस्यानुमितित्वस्यचकार्यकारणतयो
रवच्छेदकत्वमानाभावः।नचतत्तदव्यवहितोत्तरत्वसंबंधेनसामानाधिकरण्यविशेषितेनपरामर्शत्ववदनुमितित्वमेवतथा।तादृशानेकपदार्थघटित
व्यवहितोत्तरत्वस्यसंबंधत्वेमानाभावात्।नचैककालावच्छेदेनैकात्मवृत्तित्वप्रत्यासत्त्यापरामर्शानुमितित्वंतथा।क्षणद्वयात्मकःकालोधर्त्तव्योऽतो राम

नविनश्यदवस्थपरामर्शजन्यानुमित्यसंग्रहइतिवाच्यं।तद्रूपलिंगकवह्न्यनुमितिद्वितीयक्षणेतृतीयक्षणेवाधूमपरामर्शोत्पादेतादृशानु
मितावपितेनसंबंधेनधूमपरामर्शवदनुमितित्वसत्त्वेनतत्रचधूमपरामर्शस्याहेतुत्वेनव्यभिचारात्।स्वप्रागभावाधिकरणक्षणवृत्तिपरा
मर्शाधिकरणक्षणद्वयावच्छेदेनैकात्मवृत्तित्वस्यचसंबंधत्वेमानाभावइत्यस्वरसान्मूलोक्तलक्षणमुपेक्ष्यलक्षणांतरमाह यांकांचिदिति।केचि
त्तुयत्रविषयविशेषेणकेनव्याप्येनैवव्यापकस्यानुमितयस्तत्रतद्व्याप्यविशिष्टतादृशपक्षज्ञानत्वेनतत्पक्षकतादृशविषयविशेषानुमितित्वेन
कार्यकारणभावेबाधकाभावात्तदनुमितिमादायजातिघटितमूलोक्तलक्षणमनाकुलमित्याहुः।लिंगोपहितलैंगिकभानपक्षेवह्निव्याप्यधू
मवान्पर्वतइतिपरामर्शस्यवह्निव्याप्यधूमवान्पर्वतोवह्निमानित्यनुमितित्वमेवकार्यतावच्छेदकं।अतएवालोकपरामर्शजन्यानुमितौनव्यभि
चारः।तत्रवह्निव्याप्यालोकवान्पर्वतोवह्निमानित्याकारात्।लिंगानुपधानपक्षेपर्वतोवह्निमानित्यनुमितित्वेनकार्यता।वह्निव्याप्य
धूमवान्पर्वतइतिपरामर्शत्वेनजनकता।।वह्निमत्पर्वतस्यानुमितेश्चधूमलिंगकतत्तदनुमितिस्वरूपविषयतैवकार्यतावच्छेदकसंबंधः।
अव्यवहितोत्तरत्वापेक्षयालाघवात्।नचास्वरूपस्यसंबंधत्वेनक्लृप्तत्वाच्च।अतोनालोकादिलिंगकानुमितौव्यभिचारः।एवमालोकलिंगकानुमि
तावपीत्यपिवदंति।मानसत्वव्याप्यजातिविशेषमेवपरामर्शत्वं।अनुमितित्वावच्छिन्नजनकतावच्छेदकमितिकश्चित्।तन्न।कचिदेकदे
पक्षेकिंचिद्वत्साध्यमनुमितिविषयोनापरइत्यत्रनियामकालाभेनवह्निव्याप्यधूमवान्पर्वतइतिपरामर्शादपिघटानुमितिप्रसंगात्।नचघटानुमि
तौघटपरामर्शकारणं।तादृशपरामर्शेघटस्यापिविषयत्वसंभवात्।तदनुमितौतद्व्याप्यवत्पक्षज्ञानत्वेनविशिष्यहेतुत्वकल्पनेवाकिंपरामर्शत्वेनजात्या
नचानुमितित्वावच्छिन्नस्याकस्मिकतापत्तिः।ज्ञानत्वेनैवतदवच्छिन्नंप्रतिहेतुत्वस्यसुवचत्वादितितद्व्याहुरिति।भंगयाहिकयाऽनुमितिव्य

क्तिविशेषपरिग्रहः। समवेतांतमन्यांतमसमवेतांतं च धर्मविशेषणं। एतच्चान्यायैव धर्मपदं। तत्र प्रत्यक्षत्वादिवारणायाद्यं। प्रत्यक्षत्वादेर
पि कालिकसंबंधेनानुमितिवृत्तित्वात्समवेतेति। अनुभवत्ववारणाय द्वितीयं। अत्रानुभवत्वं तद्व्यक्तित्वेनोपादायतद्व्यक्तित्वावच्छिन्नप्र
तियोगिताकोभेदो विवक्षितः। अन्यथा अनुभवान्यासमवेतसकलानुभवसमवेतत्वरूपानुभवत्वविशिष्टसकलानुभवसमवेतत्वावच्छि
न्नप्रतियोगिताकभेदस्य विवक्षितत्वे सत्तादीनामपि वारणे अनुभवान्यासमवेतेत्यस्य वैयर्थ्यापातात्॥ ज्ञानत्वादिवारणाय तृतीयं वि
शेषणं। अनुभवत्वस्यापि कालिकसंबंधेनानुभवान्यस्मिन् कालादौ वृत्तेरप्रसिद्धिरतोऽसमवेतेति। तादृशधर्मस्य कालादावतिप्रसक्तत्वा
दाह समवायित्वमिति। तथा च समवायसंबंधेन तादृशधर्म एव लक्षणमिति भावः। स्वर्गादिशाब्दबोधादौ स्वर्गादिकमनुभवामीत्यनुव्यव
सायाभावादन्यत्वानुभवत्वं। स्मृतिव्यावृत्तोऽनुभवव्यवहारः स्मरणान्यज्ञानत्वनिबंधन इति नयेनाह। अनुभवत्वजातीति। तथा च निः
प्रयोजनकतयाऽनुभवत्वान्येति विहाय स्मरणान्यज्ञानान्यासमवेतत्वे गौरवात्स्मरणासमवेतत्वमेवोपादेयमिति भावः। यद्यपि अनु
भवत्वजात्यंगीकारेपि तद्व्यक्तिसमवेतप्रत्यक्षासमवेतधर्मसमवायित्वलक्षणे सुवचमेव तथापि प्रत्यक्षादिप्रमितिचतुष्कस्यैव लक्षणमनेनो
क्तं। तद्व्यक्तिपदेन प्रत्यक्षमितिव्यक्तिपरिग्रहे प्रत्यक्षमितेरेवं शाब्दव्यक्तिपरिग्रहे शाब्दस्याप्यनेन लक्षणकथनसंभवात्। एवमुपमि
तावपीति भावः। व्याप्तिज्ञानं करणं। परामर्शो व्यापारः। व्यापारव्यापारिणोरेकमेव जन्यतावच्छेदकं तथैव व्यापारिव्यापारभावसंभवादिति
मतानुसारेणाह। व्याप्तिज्ञानत्वावच्छिन्नेति। वह्निव्याप्यधूमवत्पर्वतवानिति विशिष्टवैशिष्ट्यबोधत्वावच्छिन्नकार्यतावारणाय व्याप्तिज्ञानत्वेत्या राम २८

त्यादि। व्याप्तिज्ञानत्वावच्छिन्नाया कारणतानिरूपितप्रतियोगिककार्यताया यदवच्छेदकं तदवच्छिन्नेत्यर्थः। व्याप्तिज्ञानत्वावच्छिन्नकारणताप्रतियोगिकप्रत्यक्ष
वृत्तिकार्यतावारणाय विशिष्टपरामर्शत्वावच्छिन्नेत्यादि। तत्र हि। व्याप्तिज्ञानत्वावच्छिन्नस्य कार्यतावच्छेदकं व्याप्तिविशिष्टज्ञानत्वं परामर्शस्य तु तादृशविशि
ष्टवैशिष्ट्यज्ञानत्वमिति नैकमुभयकार्यतावच्छेदकमिति तदादाय प्रत्यक्षादौ नातिव्याप्तिः। न च वह्निव्याप्तिज्ञानस्य नदव्यवहितोत्तरवह्न्यनुमितित्वं वह्निव्या
प्यधूमवान्पर्वत इति परामर्शस्य नदव्यवहितोत्तरपर्वतविशेष्यकवह्न्यनुमितित्वं कार्यतावच्छेदकमित्यत्रापि नैकमवच्छेदकमिति वाच्यं। वह्निव्याप्यो धूमः वह्नि
व्याप्यरूपविशेषवान्पर्वत इति समूहालंबनात्मकव्याप्तिज्ञानाव्यवहितोत्तरवह्न्यनुमितौ स्वजन्यपरामर्शसंबंधेन धूमीयव्याप्तिज्ञानस्य व्यभिचारितया कार
णत्वाभावेन तज्जन्यतायामपि तादृशधूमपरामर्शाव्यवहितोत्तरतादृशवह्न्यनुमितित्वस्यावच्छेदकत्वात्। यत्तु व्याप्तिज्ञानत्वावच्छिन्नकारणताप्रतियोगिक
कार्यतावच्छेदकं वह्न्यनुमितित्वं तदवच्छिन्नात् द्वितधर्मावच्छिन्ना पर्वतविशेष्यकवह्न्यनुमितित्वस्य परामर्शजन्यतावच्छेदकस्य वह्न्यनुमितित्वघटित
त्वादिति। तन्न व्याप्तिविशिष्टवत्पर्वतवैशिष्ट्यज्ञानत्वस्य तादृशपरामर्शजन्यतावच्छेदकस्य व्याप्तिविशिष्टज्ञानत्वरूपतादृशावच्छेदकघटितत्वादतिव्या
प्तिरिति। कश्चिदित्यस्वरसबीजं तु व्याप्तिशरीरघटकतावच्छेदार्थानां स्मृतो विशेष्ये विशेषणमिति रीत्या यत्र परामर्शस्तत्र व्यभिचारात् व्याप्तिज्ञानत्वेन का
रणत्वेवन। एवमव्यवहितोत्तरत्वस्य तत्तद्व्यक्तिविश्रांततया कार्यतानवच्छेदकत्वात् परामर्शत्वमपि न जनकतावच्छेदकमित्यादि। पक्षधर्मतेति। पक्षत्वविशि
ष्टपक्षे यद्धर्मताज्ञानं तज्जन्येत्यर्थः। पक्षत्वस्य विशेषणत्वं च विशेष्यान्वयिनान्वयित्वं। पक्षधर्मताज्ञाने तत्र च ज्ञानमेव पक्षतायाः परंपरया विशेष्यं तदन्व
यिनीया जन्यता तत्र पक्षतायाः अप्यन्वयः। तासर्यवशात् ज्ञाने साक्षादन्वितस्य धर्मतादेरविशेषणत्वेपि धर्मताविशेषणपक्षविशेषणीभूतपक्षताया अपि
विशेषणत्वेन जन्यतायामन्वयः। यथा लोहितोष्णीषा ऋत्विजः प्रचरंतीत्यादौ उष्णीषस्य प्राप्तत्वादविवक्षितस्यापि तस्य विशेषणीभूतं लौहित्यं विशेषणत्वे

नेष्टसाधनतान्वयीति भावः। पक्षधर्मतेत्यत्र लक्षणवाक्ये पक्षतासहकृतत्वसंबंधेन प्रथमज्ञानेविशेषणमित्यपि कश्चित्। यथोक्तायाः सिसाधयिषावि
रहविशिष्टसिद्ध्यभावरूपायाः कालाद्यतींद्रियपदार्थघटितत्वेनन प्रत्यक्षत्वमतोविशेष्येति। विशेषणवति विशिष्टाभावस्य विशेष्याभावरूपत्वात्। एवं वि
शेष्यवति विशिष्टाभावस्य विशेषणाभावरूपत्वात्। विशिष्टाभावस्यातिरिक्तत्वेपि यत्र विषयविशेषे सिसाधयिषाप्रयुक्ता नानुमित्यभावस्तत्र सिद्ध्यभा
वस्यैव पक्षतात्वात्। एवं यत्र सिद्धिकाले सिसाधयिषाप्रयुक्तैवानुमितिस्तत्र सिसाधयिषायाएव पक्षत्वात्। तस्याश्च प्रत्यक्षजनकत्वादनिव्याप्तिरिति पराम
र्शोपादानमिति भावः। तत्वेन। परामर्शत्वेन। तत्वेनेत्यस्य फलमाह बाधादीति। आदिनासत्प्रतिपक्षपरिग्रहः। तच्चानुमितिसामग्र्यभावप्रदर्शनाय। देवात्
सामग्रीवशात्। प्रतियोगीति। सिद्ध्यभावप्रतियोगिसिद्धिविषयकेनेत्यर्थः। अत्र च सिद्धित्वप्रकारकसिद्धिज्ञानत्वेन सिद्ध्यभावजन्यतावच्छेदकं तद्यौकिकप्रत्यक्ष
तावच्छिन्नत्वे प्रतिजनकत्वं मिश्रादीनां संमतं तेनैकावच्छेदेनेत्यस्यापि सत्वं सूचितं। एकावच्छेदेनेत्यस्य फलमाह। तदुभयसमूहालंबनइति। न च परामर्शप्रत्यक्ष
परामर्शत्वेन कारणत्वाभावादेकावच्छेदेनेति व्यर्थमिति वाच्यं। वह्निव्याप्यधूमवान्पर्वतो नास्ति सिद्ध्यभावश्चेति समूहालंबनेतात्पर्यात्। यदि च विशिष्टवैशिष्ट्यबो
धत्वावच्छिन्नं प्रति विशेषणतावच्छेदकप्रकारकधीत्वेन हेतुत्वं। उपनीतभानं प्रत्यपि प्रतियोगितावच्छेदकप्रकारकधीत्वेन हेतुत्वं तदा सुखव्याप्यदुःखवदा
त्मभिन्नमिदं सुखवानात्मेति सिद्ध्यभावश्चेति समूहालंबनेतिव्याप्तिर्दृष्टव्या। नचेत्यमिति। चिंतावीजं तु परामर्शजन्यतावच्छेदककोटौ तल्लिंगकत्वं निविष्टं पक्षताजन्य
तावच्छेदककोटौ तन्निवेशनमफलं। यदि च विषयितासंबंधेनावच्छेदकस्यैक्यं विवक्षितं तदा नायं दोषः। पर्वतो वह्निमानित्यनुमितित्वं सिद्ध्यभावकार्यतावच्छेदकं
वह्निव्याप्यधूमवान्पर्वत इति परामर्शस्य कार्यतावच्छेदकं धूमलिंगकपर्वतो वह्निमानित्यनुमितित्वं तथ्यपत्रैव वह्निमत्पर्वतस्य विषयतावच्छेदकत्वात्। न च पक्षतावच्छे
दकसामानाधिकरण्येन सिद्धेरभावस्य कार्यतावच्छेदकं पक्षतावच्छेदकसामानाधिकरण्यमात्रावगाह्यनुमितित्वं पर्वतत्वावच्छिन्नसामानाधिकरण्येन परामर्शस्य

राम

२९

तु पर्वतविशेष्यकवह्न्यनुमितित्वं पर्वतत्वावच्छेदेन वह्न्यनुमितिसाधारण्ये पर्वतत्वावच्छेदेन वह्निव्याप्यपरामर्शस्यापि तत्सामानाधिकरण्यावगाहित्वेन व्य
भिचारात्तावादिति वाच्यं। अवच्छेदकावच्छिन्नस्य सिद्ध्यभावसामानाधिकरण्यावगाहिपरामर्शयोरेव प्रकृते निवेशात्। पर्वतत्वसामानाधिकरण्येन वह्न्यनु
मितित्वस्य तदुभयजन्यतावच्छेदकत्वात्। अवच्छेदकावच्छेदेनानुमितावपि सामानाधिकरण्यावगाहित्वसत्वादिति दिक्। ।श्रीः।। ।। व्याप्तिज्ञानत्वं व्याप्तिप्र
कारकज्ञानत्वं। पक्षधर्मतांशे व्याप्तिप्रकारकत्वविनिश्चये न हेतुतायां व्याप्तिप्रकारकज्ञानत्वस्यापि निवेशात् व्याप्तिज्ञानत्वं व्याप्तिप्रकारकपक्षधर्मताज्ञानत्व
मिति वार्थः। व्याप्तिप्रकारकज्ञानत्वादेर्लघुव्याप्तिप्रकारकज्ञानघटितत्वात्तस्यैव तादात्म्ये न हेतुत्वमुचितमित्याशयेनाह। तादात्म्येनेति। ननु व्याप्तेः साध्यसाध
नभेदेनाननुगतत्वाद्व्याप्तिज्ञानजन्यतावच्छेदकतादृशजातिमत्करणत्वस्य सकलव्याप्तिज्ञाननिष्ठत्वाप्रामाणिकसिद्धिवारणमेवाधिकांशप्रयोजनं स्यादत आह। व्याप्ते
रिति। अधिकस्यातादृशजातिमत्करणत्वस्याभागासिद्धीति। तथा च व्याप्तिग्रहतोपयुपिकतया न तत्सार्थकत्वमिति भावः। फलायोगव्यवच्छिन्नं कारणं
कारणमिति लक्षणमभिप्रायेणाह। फलोपहितस्येति। तथा च फलानुपहितेपि व्याप्तिज्ञाने सत्वेन व्यभिचारान्न द्वारणाय तादृशजातिमत्करणत्वं फलोपधायक
पं हेतुकार्यमिति भावः। अनुमितिस्वरूपयोग्यस्यापि तत्सत्वेन रूतिरित्याशयेनाह करणत्वेति। तथा च यन्निष्ठेति न्यायाद्धर्मिभेदादवैयर्थ्यमिति भावः। आ
नत्वत्वादीत्यादिना ज्ञानत्वपरिग्रहः। यद्यपि व्याप्तिज्ञानत्वमेव करणत्वं तस्य च व्याप्तिज्ञानत्वत्वेनैव व्याप्तिग्रहसंभवः। तथापि व्याप्तिज्ञानांतरवृत्तिकरण
तांतरस्य प्रकृतविशेषणं विना व्याप्तिग्रहात्तस्य सार्थकत्वमिति भावः। स्वरूपसंबंधरूपकारणतानिन्नैव त्वपि वदेति। तादृशज्ञानत्वं परामर्शत्वं तस्य
करणत्वानात्मकत्वाद्धर्मिभेदइत्यन्ये। धूमप्रागभाववद्धर्मिभेदेपि वैयर्थ्यमिति मते नाह व्यतिरेकेति। हेत्वभावनिरूपितसाध्याभावनिष्ठव्याप्तिर्गृह्यते याहेतो
वैयर्थ्यशंकानवकाशादिति भावः। मित्यत्वपीति। यद्यप्यनितसमपि सर्वेन स्वरूपतः प्रत्यक्षोपजीवकं न व्याप्यदृष्टद्वारा। नित्समात्रस्यैव प्रत्यक्षोपजीवकत्वं

संभवतीति न थोक्तं। ज्ञानाकरणके। ज्ञानत्वावच्छिन्नकरणकत्वाभाववज्ज्ञानत्वे। ज्ञानकरणकत्वव्यभिचार्यनुभवत्वव्याप्यजातिमत्त्वेवार्थः। अत्रानुमितो
भिन्नसाक्षात्कारोत्पत्तिमिश्रस्यानुव्यवसायबलादनुमितिवैजात्यसिद्धेः तत्करणस्यापि वैलक्षण्यं सर्वजनीनमतो ऽनुमितावुक्तलक्षणातिव्याप्तिः फलवैजात्या
धीनप्रमाणान्तरकल्पनस्य नापवादिकैः स्वरसः कश्चिदित्यनेन सूचितः। सिद्धसिद्धिव्याघातादाह। अनुमानत्वेनेति। मुख्यार्थत्वेनानुमानपदं संगमय
ति। असदिति। तन्मते पदानामलीक एव शक्तिरनुगताकारमात्रस्यालीकत्वादिति। प्रमाणेतरविषयस्वलक्षणविषयकत्वरूपसंवादेन संभावना
यामलीकविषयिण्या मत आह संवादेति। यथा कृतस्यागेबीजमाह संभावितस्येति। असत्त्वे हेतुरनुगताकारस्येति। परमार्थसन्नयः स्वलक्षणः स्तन्मा
त्रविषयकेणेत्यर्थः। स्वमसाधारणमनेकदेशकालावृत्तिस्वालक्षकं तदेव लक्षणं व्यावर्त्तकं यस्य। तन्मते भेदे न धर्मधर्मिभावस्यानभ्युपगमात्। एते
न अनुगतधर्मसंबन्धेन तस्य व्यावर्त्तकत्वं न सदसत्संबन्धाभावात् कथं तस्य परमार्थसत्त्वमिति शंका निराकृता॥ ननु तन्मते नैतत्संवादलक्षणं पूर्वा
पराध्यक्षत्योरेकैकस्वलक्षणविषयकत्वात्। जगतः क्षणभंगित्वात्। किंच निरुक्तसंवादस्य परमार्थसद्विषयघटितमूर्त्तिकस्य विकल्पेनासंस्प
र्शात्। कथं भ्रमोपीत्यतस्तन्मते सिद्धसंवादमेवोपपादयति। अध्यक्षमूलकेति। शशविषाणादिविकल्पानामनादिवासनापरीपाकमात्रमूलकानां वारणार्थ
मध्यक्षमूलकेति। अत्र संभावितस्येत्यनुषज्यते। न चावसंभावितस्याध्यक्षमूलकविकल्पोल्लिखितत्वात् संभावनायामध्यक्षमूलकविकल्पोल्लिखितविषय
कत्वं संवाद इत्यर्थान्नपंचम्यनुपपत्तिः। समयसंभावनयैव शब्दो दीप्रवृत्तिः स्यादन्तरुक्तं निर्णयेति। आदिना आकांक्षादितात्पर्यनिर्णयपरिग्रहः। नाप्रस्तुतं प्रमा
णमिति। ति। तथा च स्वाभिमतस्य प्रसक्त्यतिरिक्तप्रमाणत्वाभावव्यवस्थापनस्यानुगुणत्वेनैवानुमानाप्रामाण्यसाधने चार्वाकस्येति भावः। अप्रमाणसाधर्म्य
स्य प्रमाणेपि सत्त्वात् प्रमाणसाधर्म्यत्वेन प्रमाणत्वाभावव्याप्यत्वेनासत्त्वमाह प्रमाणेतेति। प्रमाणताप्रयोजकमिंद्रियत्वं व्यभिचारनिश्चयत्वादिर्वैकतरसिद्धं। तथा च दृ

र्व्यभिचारशंकोपवर्णनं व्याप्तिनिश्चयाभावप्रदर्शनद्वारा प्रमाणताप्रयोजकरूपशून्यत्वसंपादनायैवेति भावः। दृष्टं साध्यसाधनवत्त्वयानिश्चितो
तस्य साधर्म्यं साध्यव्याप्यहेतुस्वरूपं तस्य दृष्टं ज्ञायमानं। अतीतत्वस्य विवक्षणात्। तथा च ज्ञायमानसाधर्म्यस्येति वार्थः। ज्ञानकरणतामाश्रित्य
पूरयति साधर्म्यदर्शनस्यैवेति। अभिहितमेवेति व्यवहारहेतुरित्यनेनान्वितं। तथा चानुमानप्रामाण्यं परकीयसंदेहादिकं च साधर्म्यदर्शनेन
संभाव्य तत्तद्व्यवहारोपपत्तिरित्युक्तकल्पमित्यर्थः। केचित्तु। अभिहितमेव साधर्म्यदर्शनं प्रमाणताप्रयोजकरूपशून्यत्वदर्शनं। संभावनो। अ
नुमानेः प्रामाण्यसंभावनो। ननु संभावनायां कथमप्रामाण्यव्यवहारः कथं वा परकीयसंदेहादिकमनिर्णीय तदुच्छेदाय शब्दप्रयोगः अतः आह
संभावनैवेति। तथा च परकीयसंदेहादिकमपि संभाव्यैव तादृशशब्दप्रयोग इत्यर्थ इति ध्यानकृतः। आपातत इति। यावदसत्ख्यातिर्न व्यवस्था
प्यत इत्यर्थः। नरसिंहोऽनुभ्रमस्यासत्ख्यातिरूपतया भ्रमजनकत्वसिद्धावपि नाप्रामाण्याभावसिद्धिरिति भावः। विषयबाधेति। अप्रामाण्या भा
वव्याप्रामाण्यप्रकारकत्वरूपभ्रमत्वस्य विशेष्यः प्रामाण्याभाववत्त्वं विनानुपपत्तेरिति भावः। संशयो हि रजतत्वप्रकारकत्वाप्रकारकरजतत्वप्रमा
भ्रमसाधारणधर्मदर्शनाद्विशेषादर्शनाच्च न वेत्। प्रकृते तच्च संभवतीत्यत आह। अनुगताकारसंस्पर्शिनीत्यादिना। अनेन साधारणधर्मवद्
मिज्ञाननिरासः। परमार्थसदित्यनेन विशेषादर्शनस्य निरासः। तादृशस्वलक्षणविषयकत्वस्यैव व्यावर्त्तकविधया संशयविरोधित्वादिति।
कोटिरूपविशेषनिश्चयमपि दर्शयति स्वसंवेदनेति। स्वेन स्वात्मकेन संवेदनेन संविदितं विषयीकृतं प्रामाण्यं यस्येति। सविकल्पके संशयका
रणोपपत्तिमाह परं त्विति। प्रत्यक्षे प्रामाण्यशंकाविरहे कथमिंद्रियार्थसंनिकर्षानंतरमुत्पन्ने ज्ञाने प्रामाण्यसंशयानुभव इत्यत आह तदुत्तरेति।

३१ समुच्छ्रिखितो विषयीकृतोऽनुगताकारो येन तत्र। सन्मात्रेति। असद्विषयकत्वे सति सद्विषयकत्वं सन्मात्रावलंबनत्वं। तच्च निर्विक-
ल्पकविषयः। असद्घटितमूर्त्तिकत्वाद्विषयितानवस्थापाताच्चानवतदपि संभावनीयं। तथा सति प्रत्यक्षे सन्मात्रावलंबनत्वप्रा-
१६००० माण्यादौ नामप्रामाणिकत्वापातात्। संभावनायां प्रमात्वाभावादिति भावः।। संगत्यनुमित्यनुमानप्रामाण्यसाधनानि।।

राम ३१

सुतश्रीरत्नशर्मणाम् १

राम[illegible]यनमः

भवानंदी० १ दि०टी०अ०

जातं २

॥श्रीगणेशायनमः॥सर्वमिदं।अनुमानप्रामाण्यसाधनं॥समारब्धेति।समारब्धायाअनु
मानप्रामाण्यपरीक्षायांतत्कारणीभूतंयद्व्याप्तिग्रहोपायप्रतिपादनंतस्यनिदानमित्यर्थः॥व्या
प्तिस्वरूपज्ञानेहिव्यभिचारज्ञानाभावोऽव्यभिचारग्रहेसहचारग्रहश्चसमानाधिकरणवृत्ति
धूमत्वस्वरूपव्याप्तौसहचारस्यविशेषणतयातज्ज्ञानेउपयोगित्वेनप्रतिपादयितुंशक्यते
नान्यथेतिभावः॥अव्याप्येति।कपिसंयोग्येतद्वृक्षत्वादित्यर्थः॥साध्यवद्भिन्नोयःसाध्याभाववा त्साध्यवि
निति कर्मधारयेसाध्याभाववदित्यस्यवैयर्थ्यमित्यतःसप्तमीतत्पुरुषंव्याचष्टे।साध्यवद्भिन्न तत्पु
इति॥नचसाध्यवद्भिन्नत्वेनसमंअवृत्तित्वस्यान्वयाभावाद्यथासंनिवेशेनवैयर्थ्यमितिवाच्यं॥अ १

यत्किंचिद्विशेषणमनेकत्वेन

ब

भेदेनसाध्यवद्भिन्नान्वितसाध्याभावसंबंधिनोवृत्तित्वेऽन्वयेसाध्याभाववत्वस्याव्यावर्त्तकत्वे
नवैयर्थ्यात्॥अभेदेनसाध्यवद्भिन्नोपावृत्तित्वस्यैवसम्यक्त्वादिति॥नचाधिकरणभे
देनाभावभेदपक्षेएवैतल्लक्षणमितिसाध्यवद्भिन्नेयोऽभावस्तेतावतैवसामंजस्येसा
ध्यपदवैयर्थ्यमितिवाच्यं।व्याप्याव्याप्यवृत्तित्वविरुद्धसंसर्गेणद्रव्यवृत्तिसंयोगाभावा धर्म४
दि वद्गुणेवृत्तिसंयोगाभावस्यैवभिन्नत्वोपगमात्।नतुघटत्वाभावादेरप्यधिकरण
भेदेनभेदाभ्युपगमः।मानाभावात्।यदिचाभावमात्रस्यैवाधिकरणभेदाद्भेदइतिम
तेभेदेतदपिसाध्याभाववत्यत्राभावत्वेनाभावाभावसाधारणमुपात्तं।अन्यथाघटत्वाभाव

वान्घटत्वादित्यादौ अभावसाध्यकेभावभिन्नसाध्याऽप्रसिद्ध्याऽव्याप्तिः स्यात्। तथाच भा२
व२ साध्यवद्भिन्नेवर्ततियोद्रव्यत्वस्तोद्रव्यत्वाभावाभावस्तद्वत्ति धूमादेर्हेतुत्वेनासंभवो
ऽव्याप्तिर्वास्यादतः साध्येति। साध्याभाववत्त्वं च साध्यवत्ताग्रहविरोधिग्रहविषयसं
बंधेन। तेन कालिकतयाऽत्मत्वस्याभावे दैशिकतया साध्ये आत्मत्वादिहेतौ नाव्याप्तिः
। कर्मादाविति। तथाच साध्यवद्भिन्ने गुणादौ यः कपिसंयोगाभावः स एव द्रव्येऽपीत्यव्या
प्तिः। इदमुपलक्षणं। घटत्वघटाकाशसंयोगान्यतराभाववत् आकाशत्वादित्या
दावव्याप्तिः। तत्र हि साध्यवद्भिन्ने घटे यस्तादृशसंयोगरूपः साध्याभावस्तद्वत्त्वाका शा२

विषयत्वे
त्वस्यसत्त्वेः॥ न च साध्यवद्भिन्नवृत्तित्वविशिष्टो यः साध्याभावस्तद्वद्वृत्तित्वमित्युक्तौ ना
यं दोष इति वाच्यं। साध्याभावपदवैयर्थ्यात्॥ सिद्धिकर्मत्वं साध्यमित्यभिप्रायेणोक्तं सा ल
ध्यवत्पदेति॥ अव्याप्तेरिति॥ व्यासज्यवृत्तिधर्मानवच्छिन्नप्रतियोगिताकत्वेना
वि ४ न्योन्याभावविशेषणे एतद्रूपवानेतद्धसादित्यादावेव लक्षणगमनादसंभवो न सं
भवतीति भावः॥ साध्याभाववतीति साकल्यप्रवेश एव साध्ये साकल्यं सार्थकमि
ति प्रथमं साध्याभाववतीत्यत्र साकल्यं व्याचष्टे॥ साध्याभाववतीति॥ साध्याभावे साकल्य
दा१ दानेतु धूमवान्वह्नेरित्यादौ तिव्याप्तिः॥ तन्नतत्तत् द्वृत्तित्वावच्छिन्नाभावघटित
व१

साध्याभावस्याभस्य प्रतियोगिवैयधिकरण्यावच्छिन्नस्याधिकरणे गुणादौ वह्न्यादेरभाव
सत्वादव्याप्तिश्च॥पृथिवीत्वाभाववान्जलत्वादित्यादौ तत्र तत्तद्व्यक्तित्वावच्छिन्नाभावघ वृत्तित्वा२।।
टितसाध्याभावस्याधिकरणस्याप्रसिद्धेरिति तन्नरस्तं॥ननु वह्निमत्यपि सकलवह्न्यभा
वसत्वादव्याप्तिः॥व्यासज्यवृत्तिधर्मानवच्छिन्नप्रतियोगिताकत्वेन साध्याभावविशेषणेगु
जातिमान्सत्वादित्यादावव्याप्तिः॥तत्र पूर्वक्षणवृत्तित्वविशिष्टसकलजात्यभावस्य जाति
मत्यपि सत्वात्॥न च सकलसाध्यस्य तत्तद्व्यक्तित्वाभावेनिवेश्यः॥गुणान्यत्वविशिष्ट वच्छिन्ना ३
जातिमान्सत्वादित्यादावतिव्याप्तिः॥तत्र सकलसाध्यांतर्गतायाः सत्तायास्तद्व्यक्तित्वाव
च्छिन्नाभाववतिजात्यादौ सत्तायाअभावसत्वादतः साध्यतावच्छेदकेति॥व्याप्यवृत्तीति॥

कपिसंयोगीएतद्वृक्षत्वादित्यादिहेतोरव्याप्यवृत्तित्वे तु लक्षणाभावसत्वेन नाव्याप्तिरिति
भावः॥यद्यपि हेत्वभावेपि प्रतियोगिव्यधिकरणत्वस्यावश्यकत्वादव्याप्यवृत्तिसद्धेता
वव्याप्तिः संभवति तथापि यथाश्रुतस्य नाव्याप्तिरिति व्याप्यवृत्तीत्युक्तं॥व्यभिचारि
णीति॥पृथ्वीकपिसंयोगादित्यादौ॥अभावद्वयेसाध्याभावेहेत्वभावे च॥प्रतियो
गिवैयधिकरण्यंसाध्यतावच्छेदकसंबंधेन हेतुतावच्छेदकसंबंधेन यथायथं बोध्यं॥तेन
द्रव्यत्वप्रकारकैतत्प्रमावान्द्रव्यत्वात् आत्मा ज्ञानादित्यादौ नातिव्याप्तिरव्याप्तिर्वा
॥द्रव्यत्वप्रकारकयत्प्रमायां गुणादिकं न विषयः॥सैव प्रमा एतत्पदेन धर्त्तव्या॥तेन द्रव्याणि या
वंति सर्वप्रमेयं रतिसमूहालंबनद्रव्यत्वप्रमाविषयतायाः केवलान्वयित्वेन समवायेनतद

भवानंदी

टि॰दी॰अ॰

प्रतियोगितावच्छेदकावच्छिन्नत्वहेतुतावच्छेदकावच्छिन्नत्वयोः॥ ५

भावसमसंबंधसामान्येन प्रतियोगिव्यधिकरणत्वासंभवेऽपि न क्षतिः॥ हेत्वभावोपीत्यपिना साध्याभावोपि प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिव्यधिकरणो बोध्यः॥ तेन गुणान्यत्व-विशिष्टसत्तावान् ज्ञानेरित्यादौ नातिप्रसंगः॥ नच साध्याभावोपीत्येव वक्तुमुचितं॥ अपि नाहेत्वभावसमुच्चय इति किन्नकृतं॥ तथा सति तत्प्रतियोगित्वमित्यत्र तत्पदेन हेत्वभावपरा-मर्शानुपपत्तेः॥ हेत्वभावप्रतियोगित्वमित्युक्तौ च शब्दगौरवादिति॥ क्रमेण विशेषणयोः फ-लमाह॥ तेनेत्यादिना॥ अत्र च निरुक्तप्रतियोग्यनधिकरणवृत्तित्वविशिष्टसाध्याभाववत्त्वं सकल-निष्टनिरुक्तप्रतियोग्यनधिकरणवृत्तित्वविशिष्टाभावप्रतियोगित्वं हेतौ ग्राह्यं॥ तेन कपिसंयोगा-एतद्वृक्षत्वात् कपिसंयोगाद्यैसादौ प्रतियोगिसमानाधिकरणभिन्नस्य हेत्वभावस्य चाप्रसिद्धत्वेपि प्र-

भा२

अव्याप्तिरप्रथिवीकपिसंयोगादित्यादौ २

४

तियोग्यनधिकरणवृत्तिर्यः कपिसंयोगाभावस्तद्वृत्तित्वे एतद्वृक्षत्वाभावस्यासत्वेपि न क्षतिः॥ साध्ये साकल्याप्रसिद्धेः॥ साध्याभाववृत्तिसाकल्याप्रसिद्धेः॥ हेत्वभावे सकलसाध्याभाववद्वृत्तित्वाप्रसिद्धेः॥ क्रमेण व्याप्तिं श्रेणीमाह॥ यत्रेत्यादिना॥ तत्र साध्यतावच्छेदकावच्छिन्नसाध्याभावविवक्षणे साध्य-साकल्यप्रवेशादाह॥ विपक्षो वेति एकव्यक्तिक इति विपरिणतेनान्वयः॥ ईश्वरभिन्नत्व-दित्यादावित्यर्थः॥ तत्राव्याप्तिरित्यन्वयः॥ ननु साकल्यमिहाशेषरूपं व्यापकत्वपर्यवसितम-तआह॥ निर्धूमत्वादीति॥ निर्धूमत्वस्य धूमत्वावच्छिन्नसामान्याभावस्यैकव्यक्तिकत्वात्साकल्याप्रसि-द्धेरेव दोष इत्यतो वा पृथेति॥ ताद्दशव्याप्यस्य जलत्वादेस्तद्रूपेण साध्यतायां निर्वह्नित्वस्य व्यभिचारि-त्वात्सद्धेतुत्वार्थमाह॥ तत्त्वेनेति॥ व्याप्यत्वेनेत्यर्थः॥ ननु साध्यवत्प्रतियोगिकान्योन्याभावासामान-

DR. BHAU DAJI MEMORIAL
डाक्टर भाऊदाजी स्मारक संग्रह

धिकरणमित्येतस्य दोषेणेदमपि दुष्टमत आह अत्रेति॥साध्यवदन्येसत्त्रेत्यर्थः॥तत्रतु यत्किंचि
त्साध्यवद्व्यक्तिभेदोपिसाध्यवत्प्रतियोगिकान्योन्याभावोवेत्नेतील व्याप्तिर्वह्निमान्धूमादित्यादावपी
तिभावः॥स्युत्पत्तीति॥अत्रचसाध्यवत्त्वेनलक्षणपासाध्यवत्त्वावच्छिन्नप्रतियोगिताकोभिधीयते॥
तस्यचान्यशाब्दार्थैकदेशेभेदेअभेदेनान्वयः। घटोनेत्यादौचघटतदभावयोर्घटत्वावच्छिन्न
प्रतियोगिताकत्वसंबंधः ननुविशेषणीभूतघटतादेरभावेनसमंतत्प्रतियोगितावच्छेदकत्वंस
सर्गः।तथासत्यभावोघटीयोघटइत्याकारकापत्तेः एवंघटत्वस्येतरविशेषणतयापदार्थैकदे
शतयाचा भावेऽन्वयासंभवाच्चेतिध्येयं॥अत्रचघटत्वविशिष्टोपस्थापकपदसमभिव्याहृतस्य नञ्प
दस्यघटत्वावच्छिन्नप्रतियोगितासंबंधेनघटप्रकारकाभावशाब्दबोधत्वंकार्यतावच्छेदकं॥नील ५

साकांक्ष घटोपस्थापकपदसमभिव्याहृतनञ्पदस्य नीलघटत्वावच्छिन्नप्रतियोगितासंबंधेननी
लघटप्रकारकाभाववशाब्दत्वंलभ्यः॥नीलोघटोनास्तीत्यादौचघटत्वावच्छिन्नप्रतियोगितासंबंधेन
न्वयबोधाभावःतात्पर्याभावात्॥विशेषणंतस्साकांक्षत्वेनास्तीत घटत्वावच्छिन्नोपस्थापकपदस
मभिव्याहृतनञ्पदत्वादिनावाघटत्वावच्छिन्नप्रतियोगिताकबोधजनकत्वंवाच्यं॥घटादन्यइत्यादौ
चपंचम्या अवधित्वे अवधिमत्त्वेवाशक्तिस्तत्रचघटत्वावच्छिन्नवृत्तित्वंघटत्वावच्छिन्नवृत्तिर्निरू.. रूपितसंबं
संसर्गः॥कंबुग्रीवादिमान्नास्तीत्यादौतुअयोग्यतानिश्चयशून्यानांभ्रमात्मकःशाब्दबोधः॥घटत
दभावयोर्घटत्वावच्छिन्नप्रतियोगितायाएवसंबंधत्वेनकंबुग्रीवादिमत्त्वावच्छिन्नप्रतियोगितायाएवसं
बंधत्वेनकंबुग्रीवादिमत्त्वावच्छिन्नप्रतियोगित्वस्यासंबंधत्वात्॥नचात्रभ्रमोकंबुग्रीवादिमत्त्वस्याव
३ एवंघटस्याभावइत्यादौप्रतियोगित्वेअनुयोगित्वेवाषष्ठ्यर्थेघटत्वावच्छिन्नवृत्तित्वादिकंसंबंधः ३

छेदकत्वेतस्याप्रकारत्वात्॥नापिकंबुग्रीवादिमत्वावच्छिन्नप्रतियोगितासंबंधेनघटस्याभावेतादृशप्र
तियोगितायाअलीकत्वादितिवाच्यं॥कंबुग्रीवादिमत्वावच्छिन्नत्वप्रतियोगितानामेवसंबंधतयाज्ञानात्॥अ
वं३ भावस्यघटत्वावच्छिन्नप्रतियोगितयैववासाधितयाकंबुग्रीवादिमत्वावच्छिन्नप्रतियोगितासंबंधेनघटस्यसंबंधि
तयाचतेनसंबंधेनघटप्रकारकत्वादिति॥भूतलेघटपटौनेत्यत्रभूतलवृत्त्यभावेघटपटयोरुभयत्वावच्छिन्नप्र स्त ४
तियोगितासंबंधेनान्वयः॥स्तइतिद्विवचनप्रयोगस्साधुत्वार्थः॥दाराःसंतीतिवत्॥भूतलवृत्त्यभावस्यघटपटो
भयत्वावच्छिन्नप्रतियोगितासंबंधेनघटपटयोरन्वयः॥तथाचभूतलवृत्त्यभावीयौघटपटौस्तइत्यन्वयइतिकेचि
त्॥भूतलाधेयत्वस्यसप्तम्यर्थस्याभावेघटपटत्वोभयसामानाधिकरण्येनेत्यपिकश्चित्॥तस्मजातौनयत्ताप्र
त्यवगुणत्वेनसत्यत्रगसभावः॥घटपटौनस्तइत्यादौचघटत्वंपटत्वमुभयत्वंचपरस्परसामानाधिकरण्याप
न्नंप्रतियोगितावच्छेदकंनतूभयत्वमात्रंकेवलंघटत्वंवापटत्वं॥यत्किंचिदुभयवतिकेवलघटवतिकेवलपटवति

वाघटपटौनस्तइतिप्रत्ययात्॥तादृशप्रतियोगितावच्छेदकावच्छिन्नंघटपटोभयमेवा
तस्तदुभयवत्येवनतादृशप्रत्ययः॥एवंचदंडपुरुषौनास्तीत्यादावपिविशेषणविशेष्य
भावापन्नंतत्पुरुषत्वंदंडत्वंचप्रतियोगितावच्छेदकमूह्यं॥लक्षणयोःपौनरुक्त्यमाशं
क्याह॥साध्यमिति॥समानाधिकरणेतदनधिकरणाधिकरणत्वंतदधिकरणानधि
करणत्वंवाअभावस्तावान्द्रव्यत्वादित्यादौअव्याप्तिः॥सत्तायांद्रव्यत्वानधिकरणा
धिकरणस्यसत्वादतआह॥यदधिकरणेति॥साध्यअसमानाधिकरण्यस्येत्यत्रसमानाधिकर
णभिन्नसाध्यस्ययत्पदार्थसंबंधोलभ्यते॥तच्चबाधितंअविवक्षितंचेत्यतोपरितिकश्चित्॥अत्रापयाश्रुतेय पि ३
पत्वतत्त्वाननुगमादाह॥साध्यनिष्ठेति॥साध्यनिष्ठाभावप्रतियोगिवृत्तित्वनिरूपकाधिकरणताप्रतियोगित्वंसा॥
ध्यनिष्ठाभावीयवृत्तित्वनिष्ठप्रतियोगितायांनिरूपकतासंबंधेनावच्छेदकंयदधिकरणंतद्वृत्तित्वमितियावत्॥द्रव्यं

सत्वादित्यत्रद्रव्यत्वेसाध्येगुणवृत्तित्वाभावस्यसत्वात्साध्यनिष्ठाभावीयवृत्तित्वनिष्ठप्रतियोगितायां
सत्वात्२ निरूपकतासंबंधेनावच्छेदकोगुणस्तद्वृत्तित्वस्यसत्तायांनातिव्याप्तिः॥ननुवह्निमान्धूमादित्यादाव
प्ययोगोलकीयवह्नौपर्वतीयवह्नौवामाहानसवृत्तित्वाभावस्यसत्वात्तादृशनिष्ठाभावप्रतियोगिवृत्तित्व
निरूपकमधिकरणंमहानसंतद्वृत्तित्वस्यधूमेसत्वादव्याप्तिः।किंचसाध्यनिष्ठस्यसामानाधिकरण्यमित्यत्र
वृत्तित्वंसाध्यतावच्छेदकसंबंधेनबोध्यम्।अन्यथासुखवानात्मत्वात्महाकालान्यतरत्वादित्यादावतिव्याप्तिः
।तथाचसंयोगेनद्रव्यसामान्यस्यसाध्यतायांसमवायेनहेतौद्रव्यत्वेऽव्याप्तिः।तत्रसंयोगेनगुणवृत्तित्वस्याप्र
सिद्धतयासाध्यनिष्ठसामानाधिकरण्यप्रतियोगित्वस्यगुणत्वादावप्रसिद्धेराहसाध्यनिष्ठाधेयत्वमिति।सा सा०
ध्यनिष्ठाधेयत्वंसाध्यतासंबंधेनबोध्यंतेनसुखवानात्मत्वात्महाकालान्यतरत्वादित्यादौसंबंधसामान्येनसु

खनिष्ठाधेयत्वानिरूपकाधिकरणगगनादाववृत्तौनातिव्याप्तिः।समवायेनवह्निनिष्ठाधेय
त्वानिरूपकाधिकरणपर्वतादिवृत्तौधूमेनाव्याप्तिर्वा॥वृत्तित्वमपिहेतुतावच्छेदकसंबंधेन।तेन
संयोगेनवह्निनिष्ठाधेयत्वानिरूपकधूमावयवसमवेतेधूमेनाव्याप्तिः।नन्वेवंसत्तावान्द्रव्यत्वादि
त्यत्रसमवायेनहेतौद्रव्यत्वेद्रव्यंघटादित्यत्रसंयोगेनहेतौघटेचाव्याप्तिः।समवायेनसाध्यनिष्ठाधेय
त्वानिरूपकाधिकरणसामान्यादौगुणादौचहेतुतावच्छेदकसंबंधेनसमवायेनवृत्तेरप्रसिद्धिरतआह संयोगेनच।
साध्यनिष्ठेति।अत्रचव्यापकताहेतुतावच्छेदकसंबंधेनहेतुतावच्छेदकावच्छिन्नहेत्वधिकरणतात्वाव
च्छिन्नाभावत्वेनबोध्या।तेनवह्न्यधिकरणत्वाभावस्यप्रमेयत्वादिनाधूमनिष्ठाधेयत्वानिरूपकाधिक
रणत्वव्यापकत्वेपिनक्षतिः।आर्द्रेंधनजवह्न्यधिकरणताभावस्यतादृशाधिकरणत्वव्यापकत्वादाह।सा

भवानंदी०
र

मान्येति॥ वह्न्यधिकरणतासामान्यस्य अयोगोलकीयवह्न्यधिकरणतासाधारण्यस्य तादृशप्रतियो
गित्वाभावान्नातिव्याप्तिरिति॥ साध्यनिष्ठाधेयत्वानिरूपकाधिकरणत्वव्यापकतावच्छेदकं हेतुतावच्छे
दकसंबंधनिरूपितहेतुतावच्छेदकावच्छिन्नाधिकरणतात्वावच्छिन्नाभावत्वकत्वमितितु निष्कर्षः॥ तेन
व्यासज्यवृत्तिधर्मावच्छिन्नप्रतियोगिताकस्य वह्न्याद्यधिकरणत्वाभावस्य धूमनिष्ठाधेयतानिरूपकाधिकरण पत्रा४
त्वव्यापकत्वेपि नाव्याप्तिः। अत्र च व्यापकतायां प्रतियोगिव्यधिकरणत्वं न निविष्टं॥ तेन संयोगेन वह्न्यधि
ण१ करणत्वस्याव्याप्यवृत्तितया तदभावस्य केवलान्वयित्वेऽपि नातिव्याप्तिः॥ अनतिप्रयोजनकतयेति हे
तुतावच्छेदकावच्छिन्नहेत्वधिकरणत्वाभावस्य घटकत्वे हेतुतावच्छेदकावच्छिन्नाभावस्यानिवेशाद्यथा संनि
वेशे अवैयर्थ्येऽपि अनतिप्रयोजनकत्वादित्यर्थः॥ साध्यं यदधिकरणं [redacted]धिकरणं यस्य तत्साध्याधिकरणान
धिकरणं तद्भावः॥ साध्याधिकरणानधिकरणत्वं तदभावः। चरमनञर्थस्य तद्धितार्थः प्रतियोगीवृत्ति। श्री०

धा॥ भूतल

वैचित्र्या तन्नञर्थत्वासाद्द्वितीयेपि स एव प्रतियोगी। वस्तुतस्तु घटानधिकरणं भूतलमित्यादौ भूतले घटा
धिकरणत्वावच्छिन्नभेदः प्रकारतया भासते। तत्र घटानधिकरणेत्यत्राधिकरणपदं घटपदसम
भिव्याहारबलाल्लक्षणया घटाधिकरणोपस्थापकं घटपदं तात्पर्यग्राहकमात्रं अन्यथा घटपदे
म४ न समं नाधिकरणपदस्य षष्ठीतत्पुरुषसमासे घटसंबंध्यनधिकरणमर्थः स्यात्। तथा च बाधः। अधि
करणत्वावच्छिन्नभेदस्य भूतलेऽभावादन्वयितावच्छेदकावच्छिन्नप्रतियोगिताकत्वस्य व्युत्पत्तिबलल
भ्यतयाऽनधिकरणपदेन घटाधिकरणत्वावच्छिन्नभेदस्य प्रत्याययितुमशक्यत्वात्॥ एवं प्रतियो
ग्यनधिकरणेत्यादौ प्रकृतेप्येषैव रीतिरनुसंधेया। साध्यनिष्ठाधेयत्वानिरूपकत्वं हि साध्यनिष्ठाधेय
त्वनिरूपकत्वसामान्याभावो यत्किंचित्साध्यनिष्ठाधेयत्वनिरूपकत्वं वा। आद्ये केवलान्वयीति। के

भवानंदी ०९

प्रि०टीका२५१

वत्तान्वयिसाध्यक इत्यर्थः। अव्याप्तेर्हेतुं पूरयति साध्यनिष्ठेति। द्वितीयेनाह नेति। वह्निमान्धूमादि
त्यादौ साध्ये दोषांतरमाह। क्वचिदिति। गुणान्यत्वविशिष्टसत्तावान्जातेरित्यादौ सत्तारूपसाध्य
निष्ठाधेयत्वानिरूपकत्वस्य सामान्याभावेवसत्त्वेन तत्र जात्यधिकरणत्वाभावस्य सत्त्वादिति।
भावः। तदा केवलान्वयि। नातिः यद्यपि सत्तावान्द्रव्यत्वादित्यादौ अव्याप्तिस्तथापि स्वयत्साध्यवद्भि
न्नयदधिकरणत्वाभाव इत्युक्तौ तदव्याप्तिवारणं संभवतीति तन्नोक्तं। नानाधिकरणकेति। एतद्रूपवाने
तद्रसादित्यादौ द्वित्वावच्छिन्नसाध्यवद्भेदस्य साध्यवति संभवेपि प्रतियोग्यवृत्तित्वस्य भेदविशेषणत्वेना
व्याप्तिः संभवतीति नानाधिकरणकेत्युक्तं। सर्वत्रान्वयिनि व्यतिरेकिणि च हेतुतावच्छेदकेति। हेत्वधि
करण इति सप्तमी अवच्छेदकतायां हेत्वधिकरणावच्छेदेनेत्यर्थः। तेनैव हेतुतावच्छेदकसंबंधेनैवेत्याद्यदल

श्री०

त्रिर

व्यावृत्तिमाह। संयोगो नेति। अवृत्तित्वेपीत्यनेनान्वयः। वह्निमती सत्यापि संयोगेनेत्यनुषज्यते। तत्रयो
जनं च समवायेन वह्नेः साध्यतायां संयोगेन हेतौ धूमादावव्याप्तिवारणं। संबंधांतरेणेति। आकाशा
भेदेन: दावेव तस्य प्रसिद्धिरिति संबंधेन वर्तमानपर्यंतानुधावनं व्यर्थमिति वाच्यं। आकाशादेरवृत्ति
त्वेन तद्वृत्तिसाध्यवद्वृत्तित्वाभावे हेत्वधिकरणावच्छिन्नत्वासंभवात्। यद्यपि पर्वतरूपादावपि
वह्निमत्संयुक्तत्वाभावस्य न पर्वतादिदेशावच्छिन्नत्वं रूपादेः कुत्रापि संयोगाभावे न स्वरूपेणै
व तथा संभवेन गुणाधिकरणवत्यां स्वयमेव व्याप्यवृत्त्याभावावच्छेदकनिरासाच्च। तथापि पर्वते रूपे
न वह्निमत्संयुक्तत्वमिति प्रतीतिबलात् विलक्षणमेवावच्छेदकत्वं पर्वतादेरस्वीकार्यमिति भावः। नन
धूमवत्कपाले समवेतघटस्य वह्निमत्पर्वते संयोगेन वृत्तित्वाद्धेत्वधिकरणकपालावच्छेदेन तद्वृत्ति

Dr. BHAU DAJI MEMORIAL

त्वाभावस्याव्याप्यवृत्तित्वाद्व्याप्यवृत्त्यावच्छेदकास्वीकारेऽपिनक्षतिरितिवाच्यं।एतद्रूपवानेतद्रूपा
दित्यादौएतद्रूपाधिकरणावच्छेदेनएतद्रूपवत्समवेतत्वाभावस्यएतद्रूपवदसमवेतएवसंभवे
नअव्याप्यवृत्तित्वासंभवादिति।ननुद्रव्यंसत्त्वादित्यादौहेत्वधिकरणेद्रव्यत्ववद्वृत्तित्वाभावस्यस
त्तादावेवसत्वेनतत्रतद्वृत्तित्वाभावाधिकरणभिन्नत्वमत्वादतिव्याप्तिरतआहव्यभिचारिण्यस्त्वि
ति।तादृशी।हेतुतावच्छेदकसंबंधेनहेत्वधिकरणेतादृशोऽभावः।हेतुतावच्छेदकसंबंधेनसा।
ध्यवद्वृत्तित्वस्याभाव।ननुसाध्यवद्वृत्तित्ववतिव्यभिचारिणिकथंतदभावइत्यतःमतौ।तिंप्रमाण
यति।सत्तायामिति।एवंसत्तायांद्रव्यत्ववद्वृत्तित्वाभावेविशिष्टसत्त्वेगुणकर्मान्यत्वविशिष्टसत्त्वे
शि० १ ऽतिरिक्तत्वादितियद्यपिहेतुतावच्छेदकावान्नहेत्वधिकरणइतिविवक्षायांऽपावश्यकत्वाद्व्या।

चेविशिष्टस्यातिरिक्तत्वानुधावनंनिःफलं।अन्यथादं ईस्पर्शवत्त्वमूर्तत्वमूर्तत्वाभयादित्यादावव्याप्त्या
पत्तेः।केवलहेत्वधिकरणस्याकाशादेर्मूर्तत्वादिनिष्ठस्पर्शवद्वृत्तित्वाभावावच्छेदकत्वात्।तथापि।
करणतापा३ सार्वभौमेनविशिष्टनिरूपितावृत्तिंपतिरिक्तापाऽपनभ्युपगमेनगुणादेरपिविशिष्टसत्ताधिकरण
त्वमित्यभिप्रायेणविशिष्टस्यातिरिक्तत्वाभ्युपगमेनैवसर्वसामंजस्यमितिकृतस्तथाविवक्षणीयमि
त्यभिप्रायेणैववातथाभिधानात्।नचोक्तमूर्तत्वंमूर्तत्वोभयाव्याप्तिउभयस्यापिएकविशिष्टापरत्वरूप
त्वेनअपाकाशादिवृत्तिमूर्तत्वादेरुभयान्यत्वादितिविशिष्टस्यातिरिक्तत्वंसार्वभौममतमुपन्यस्तं।ननु
प्रकारांतरेणव्याप्तिनिरासएवनभवतीतितथोक्तमितिकश्चित्तद्वितीयलक्षणेति।तत्रवैयधिकरण्य
पदार्थमभेसाध्यवद्भेदस्यघटकत्वात्तदप्रसिद्धौचाव्याप्तिरितिभावः।द्रव्यत्वेगुणइतिद्रव्यत्वस्यगुणगह

प० २२

त्विन गुणावच्छेदेन तादृशवृत्तित्वाभावस्यासंभवात् तादृशसामानाधिकरण्यावच्छेदकत्वाभावस्यैव विषय-
त्वादिति। ननु तादृशप्रतीत्या सामानाधिकरण्यस्यैव प्रतियोगित्वं विषयीक्रियते न तदवच्छेदकत्वस्येत्या-
तत्राह। परम्परासंबंधेनेति। स्वनिरूपकयावदाश्रयव्यक्तिरूपस्वावच्छेदकत्वसंबंधेन द्रव्यत्वसामानाधिक-
रण्यं द्रव्येणैव वर्तते। न गुणे तादृशतदभाववत्त्वमिति भावः। ननु द्रव्यवृत्तित्वाभावो द्रव्यत्वं न द्रव्यवृत्तित्वाभा- वृत्तित्वं
ववतीति प्रत्ययस्य विषयस्तच्चाव्याप्यवृत्त्येवेति कुतो विरोधः। द्रव्यवृत्तित्वाभाववद्भेदप्रत्ययस्त्वसिद्ध एवे-
त्यत आह। द्रव्यवृत्तित्वाभाव इति। न च द्रव्यवृत्तित्वाभावो न सत्तावृत्तिरिति प्रतीत्या द्रव्यवृत्तित्वाभावे सत्ता-
वृत्तित्वाभावो विषयीक्रियते तस्य गुणावच्छेदेन सत्तावृत्तितया द्रव्यावच्छेदेन सत्तावृत्तित्वाभावो न विरुध्य-
त इति वाच्यं विरुद्धस्वभावयोर्भावाभावयोरेकत्र प्रतीतेरवच्छेदकभेदमादायैवसंभवात्प्रकृते च गुणाद्य-

व्यादिरूपावच्छेदकाप्रतीतावपि द्रव्यवृत्तित्वाभावो न सत्तावृत्तिरिति प्रत्ययात्। नन्वेवं संयो-
गाभावोऽव्याप्यवृत्तिर्न स्यात्। मूले न संयोग इत्यादिप्रतीतेर्मूले संयोगावच्छेदकत्वाभावस्यैव विषय-
त्वमित्यस्यापि सुवचत्वादित्यत आह। बाधकाभावादिति। तत्र संयोगाभावो न द्रव्यवृत्त्य प्रत्यु। त्तिरि
पादिति भावः। ननु द्रव्यवृत्तित्वाभावो न सत्तावृत्तिरिति प्रत्ययो विवादग्रस्त इत्यत आह। अतीन्द्रिये-
ति। अन्यतरस्यैन्द्रियकतायां कदाचित्साध्यवद्वृत्तित्वाभावस्य हेतौ कदाचित्साध्यवद्वृत्तित्वे हेतुवृत्तित्वा-
भावस्य वा प्रत्यक्षसंभव इत्युभयस्यातीन्द्रियत्वोपादानं। इदं गुरुत्ववत् आकाशाभाववादित्यत्रैव स्पष्टः। ननु प्र-
त्यक्षासंभवेऽप्याकाशाभावो गुरुत्ववद्वृत्तित्वाभाववान् गुरुत्वाभाववद्वृत्तित्वात् रूपाभाववदित्यनुमानं संभ-
वतीत्यत आह। नचेति। तत्रातीन्द्रिये व्यभिचारिणि। तत्र। तद्वदवृत्तित्वं। तद्वदिति। गुरुत्ववद्वृत्तित्वभिन्नत्वस्य वा

भवानंदी १२

संयोगर

व्याप्यवृत्तित्वाभावादाकाशाभावादौ साधनाव्यापकत्वरूपाभावादौ च साध्यव्यापकत्वमिति भावः। नन्वे
मतींद्रियस्याव्याप्यवृत्तित्वानुपपत्तिः। तथा प्रत्ययाभावात्। अनुमानस्याप्रयोजकत्वात्। किंचातींद्रियसाध्य
के व्यभिचारनिर्णयएव कुतोऽनुमानादिति यदि तदा तन्मते वह्न्यवृत्तित्वाभावो प्यनुमीयतां अप्रयोज
कत्वादिशंका या उभयत्र तुल्यत्वादत आह। किंचेति। इदमित्यादि। कालिकसंबंधेनेत्यपि। कालो घटत्वा
वपत्र्यादिस्वत्र कालिकसंबंधेन पत्राधिकरणे कालेतेन संबंधेन साध्यवद्वृत्तित्वस्याभाववतो ऽप्रसि
द्धेः संबंधांतरेण कालवृत्तेरपि कालिकसंबंधेनापि सद्वृत्तित्वात्। अपवृत्तेरभावस्य चानवच्छिन्नत्वादिति
भावः। एतेन महाकालस्यापि तादात्म्येन स्वसंबंधितया तत्र साध्यवद्वृत्तित्वाभावस्य प्रसिद्धिरिति प वत्व
रास्तं। तादात्म्यसंबंधस्यावच्छेदकत्वानियमाच्च। अत्र केचित्। साध्यवद्वृत्तित्वाभावे यद्धेत्वधिकरणावच्छि
न्नत्वयद्धेतुवृत्तित्वाभावस्य स्वविवक्षणीये तेन कालिकसंबंधेन हेतुतायामवृत्तित्वनिष्ठस्य साध्यवद्वृत्तिता
भावे हेत्वधिकरणकालावच्छिन्नत्व हेतुवृत्तित्वोभयाभावसत्त्वान्नाव्याप्तिः। व्यभिचारिणि व्यभिचा

कृत्वार

रनिरूपके हेत्वधिकरणावच्छिन्नत्वहेतुवृत्तित्वोभयस्यसत्त्वे तादृशवृत्तित्वाभावस्यासत्त्वान्नातिव्याप्तिरित्या
हुस्तन्न। वह्निमान्धूमादित्यत्र स्वावयवावच्छेदेन धूमवृत्तिसाध्यवद्वृत्तित्वाभावस्यैव रूपादिनिष्ठ
स्य हेत्वधिकरणावच्छिन्नत्वेनाव्याप्तिरिति। हेत्वधिकरणावच्छिन्नत्वस्याव्याप्यवृत्तित्वेन तदभावो
पपादनेपि व्यभिचारिण्यतिप्रसंगात्। अपरे तु स्वनिष्ठसाध्यवद्वृत्तित्वाभावानवच्छेदकहेतुताव
च्छेदकसंबंधीयहेत्वधिकरणकत्वविवक्षया न दोषः। न च वह्निमान्धूमादित्यादौ स्वनिष्ठयत्सा
मानाधिकरण्यं रूपादिनिष्ठस्य तदभावस्यैव पर्वतादेरवच्छेदकत्वादव्याप्तिरिति वाच्यं। स्वनिष्ठ
यः सामानाधिकरण्याभावः तदनवच्छेदकत्वस्योक्तत्वात्। यद्यपि धूमवृत्तितदभावस्यापि रूपा
दिनिष्ठतदभावाभिन्नस्यावच्छेदकमेव हेत्वधिकरणं पर्वतादि तथापि तदभावस्य रूपादि

शि० भवानंदी
१३

~~विषयक~~त्ताभावाभिन्नवृत्तित्वएवावच्छेदकं पर्वतादिनतु धूमादिवृत्तित्व इति नोक्तदोषः। न
च पर्वतीयधूमस्यापि कालिकसंबंधेन महानसवृत्तितया महानसे पर्वतीयधूमेन वह्नि
मद्वृत्तित्वमितिप्रत्ययात्। हेतुवृत्तितदभावस्यावच्छेदकमेव महानसादिकं हेत्वधिकरणमि
त्यव्याप्तिरिति वाच्यं। स्ववृत्तितदभावानवच्छेदकस्वाधिकरणकत्वस्य विवक्षितत्वात्। प्रकृ
ते च पर्वतीयधूमवृत्तितदभावस्यानवच्छेदकमेव हेतुतावच्छेदकसंबंधेन पर्वतीयधूमा
धिकरणं पर्वतादिकमित्याहुः। अत्रास्मद्गुरुचरणाः। रूपे पार्थिवपरमाणुत्वाभाववत्परमाणुत्वा
भावादित्यादावव्याप्तिः। तत्र परमाणुत्वाभावस्य कालिकादिसंबंधेनाधिकरणे कालादौ तस्य दै
शिकसंबंधेनापि वृत्तित्वेन तादृशसाध्यवद्वृत्तित्वाभावस्य हेतुवृत्तित्वाभावात् परमाणौ च कालि
कादिसंबंधेनापि तस्यावृत्तेः परमाणोः कालोपाधित्वाभावात्। न मूर्तमात्रस्य दिगुपाधित्वा

त् परमाणौ दिगुपाधितया परमाणुत्वाभावाधिकरणत्वात्तदवच्छेदेन परमाणुत्वाभावे पार्थिव
वद्वृत्तित्वाभावप्रसिद्धिर्वेति वाच्यं। कालिकसंबंधवद्दैशिकसंबंधस्यातिरिक्तस्याभावात् क्लृप्ताना
मेव संयोगादीनामिहेतिप्रत्ययनियामकत्वात् परमाणौ च परमाणुत्वाभावस्य क्लृप्तसंबंधा
नामभावात्। यदि च कालिकसंबंधदैशिकसंबंधोप्यतिरिक्तोभ्युपेयते तदापि यस्य यत्र
यथाप्रतीतिस्तस्य तत्रैव तादृशसंबंधः कल्प्यते। न चेह परमाणौ परमाणुत्वाभाव इति प्रती
तिरस्ति। यदि च घटत्वाभाववदिति प्रतीत्यभावेपि इदानीं घटत्वाभाववदिति प्रतीत्या यथा घटेपि घट
त्वाभावो विषयीक्रियते तथा परमाणौ परमाणुत्वाभाववदिति प्रतीत्यभावेपीह परमाणुत्वा
भाववदिति प्रतीत्या परमाणावपि दैशिकविलक्षणसंबंधेन परमाणुत्वाभावो विषयीक्रियत इ
त्युच्यते तदापि आकाशत्वाभाववदात्माकाशान्यतरत्वाभावादित्यादावव्याप्तिर्वज्रलेपायि
तैव। आकाशस्याजन्यत्वेनामूर्तत्वेन च केनापि संबंधेन हेतोरनधिकरणत्वादित्याहुः।

मथानेरी १४

ना२

पक्षे तु हेतुतावच्छेदकसंबंधेन हेतुमद्वृत्तिर्यः साध्यवद्वृत्तित्वाभावस्तदनवच्छेदकत्वं हेत्वधिकरणस्ये।
ति वाच्यं। तेन पार्थिवपरमाणुत्वाद्व्यवदित्यादौ पार्थिवपरमाणुरा तोघटत्वाभावे वर्तमानस्य पार्थिवपर
माणुत्वाभाववद्वृत्तित्वाभावस्यानवच्छेदकमेव परमाणुत्वाभावरूपहेत्वधिकरणमिति न कोपि दोषः। ए
वं घटाकाशत्वाभाववदित्यादावपि। न चोक्तक्रमेण धूमादावव्याप्तिः। हेतुतावच्छेदकसंबंधेन हेतुमद्वृत्ति
र्यस्तदभावस्तदनवच्छेदकहेतुतावच्छेदकसंबंधेन तस्य हेतोराधिकरणमि[illegible]: वह्नित्वात्। न वति हि
महानसावच्छेदेन पर्वतीयधूमे यस्तदभावः तदनवच्छेदकं पर्वतीयधूमाधिकरणं। एवं तादृशघटाभावा
चप७ धिकरणस्य हेतुभूतपरमाणुत्वाभावाधिकरणस्य च यदेः पार्थिवपरमाणुत्वाभाववद्वृत्तित्वाभावानव
च्छेदकत्वात्तत्राव्याप्तिः। पक्षस्वाधिकरणावच्छिन्नस्ववृत्त्यभाववत्वावच्छेदेन साध्यवद्वृत्तित्वाभावावच्छिन्नप्र
तियोगिताकत्वाभाववत्वं। स्वाधिकरणावच्छिन्नस्ववृत्त्यभावप्रतियोगितानवच्छेदकसाध्यवद्वृत्तित्वत्वकत्वं वा
विवक्षितं। परमाणुत्वाभावादौ च स्वाधिकरणीभूतपटाद्यवच्छिन्नघटवृत्तित्वाभावे पार्थिवपरमाणुत्वाभा
ववद्वृत्तित्वत्वावच्छिन्नप्रतियोगिताकत्वाभावान्नाव्याप्तिः। व्यभिचारिवृत्त्यभावांतरस्य साध्यवद्वृत्तित्वत्वावच्छिन्न

धूमस्य पर्वते वृत्तित्वात्तत्कालावच्छेदे न तत्र साध्यवद्वृत्तित्वाभाव इति तन्न। घटो गंधवान्पृथिवीत्वादित्यादौऽव्याप्ति
कत्वावच्छेदेन
प्रतियोगिताकत्वाभावादवच्छेदेनेति। यद्यपि उत्पत्तिकालावच्छेदे पर्वते वह्निमद्वृत्तित्वाभावो धूमे प्रसिद्धः पर्व
तेऽत्पत्तिकाले न वह्निमद्वृत्तित्वमित्यनुभवात् तथापि हेत्वधिकरणमात्रावच्छिन्नहेतुवृत्त्यभावो इति विव
क्षणीये पक्षभूते तदुत्पत्तिकालस्यावच्छेदकत्वाव्याप्तिः। एतदुत्पत्तिकालावच्छेदेन घटस्तत्र पृथि
वीत्वदवच्छेदेन गंधवद्वृत्तित्वप्रसंगाद्व्याप्तिः। तस्माद्घटादौ वह्निमत्संपर्केतु पर्वते रूपे वह्निमत्सं
युक्तत्वं नास्तीति प्रतीतिबलात्पर्वतादेरवच्छेदकत्वविषयीक्रियते तत्र पर्वतरूपयोरपि सम
वायसंबंधविधयावच्छेदकः। अन्यथा पर्वतादिपदार्थनिष्ठवह्निमद्वृत्तित्वाभावे पर्वतस्यावच्छे
दकत्वापत्तेः। अत एवोक्तसंबंधांतरेण वर्तमाने सुलभम् इति। तथा च हेतुतावच्छेदकसं
बंधेन पक्षे त्वधिकरणनिष्ठहेतुतावच्छेदकसंबंधेसाध्यवद्वृत्तित्वावच्छेदकत्वाभावस्तद्धेतुत्वम् भावा
कलक्षणार्थः। महानसे पर्वतीयधूमे न वह्निमद्वृत्तित्वमिति प्रतीतिबलात्पर्वतीयधूमे वह्नि
मत्संयुक्तत्वाभावे महानसस्यावच्छेदकत्वं तत्र महानसपर्वतीयधूमयोः कालिकसंबंध एव कस्ये

BHAU DAJI MEMORIAL

भावानंदी १५

बंधविधयावच्छेदकः न तु संयोग इति नाव्याप्तिः। व्याप्तिघटितेति तु व्याप्तिघटकनिरूपकाधिकरणसंबंध
स्यैव तादृशस्य साध्यवद्वृत्तित्वाभावावच्छेदकत्वान्नातिव्याप्तिः। शेषं दर्शितदिशावसेयमित्याहुः। नन्व
स्वच्छिन्नादयमपीत्यादिव्यवहारस्येश्वरेच्छाधीनतयेश्वरेच्छाया एव वाच्यत्वं सा चेश्वरसमवेता समवायिनी चेति त्वादेर
तः कथं समवायितं च तद्व्यधिकरणधर्मस्य तत्राह। वाच्यत्वं यदीति। वाच्यत्वं तेश्वरेच्छामात्रं। ईश्वरं दूषयतो
मविशाद्बोधोदयादतिप्रसंगात्। किं तु पदार्थान्तरं तच्च समवेतं अभावादौ अपि सत्त्वात्। किं तु विशिष्टस्व
नातिरिक्तसंबंधेन वर्तत इति भावः। यत्तु वाच्यत्वं नेश्वरेच्छामात्रं घटशब्दस्यापि पटे शक्तत्वप्रसंगात्। किं
तु घटशाब्दकरणकत्वविशिष्टघटबोधविषयकेच्छा सा च विशिष्टा न समवायिनी समवेतेति। न चैवं केव
लान्वयित्वानुपपत्तिः। तस्य तादृशवाच्यत्वस्य तथात्वादिति तन्न। एकस्यैव समवायस्य पृथिव्यावच्छेदेन रूपा
दिसंबंधतावच्छेदकस्य एवेच्छायां घटत्वविशिष्टावच्छेदेन घटादिपदसंबंधसंभवादिति। स्वपदवत्समाधानं
स्वपरसाधारणयावद्वृत्तिषु प्रमेयसाध्यके व्यधिकरणधर्मावच्छिन्नाभावं प्रदर्शयति। भावत्वेनेति। तत्र यद्यपि
घटत्वेन घटाभाववत्त्वाभावमादायोक्तं प्रथमलक्षणं वाच्यत्वेन यदभावमादाय पद्धतौ पञ्चमं तमेव तथापि स्मा। ग २१
ध्यतावच्छेदकसमनियतप्रतियोगिताकाभावघटितत्वं सार्वभौमोपलक्षणं साधारणं पञ्चमं समयेत्यतः इति
भावः। तत्राभाववदन्यावृत्तिवान्यावप्रमेयत्वादित्यत्र भावत्वसमनियतप्रतियोगिताकाभावं दर्शयति भावत्वेति।

वा २

नेत्यादिना। यद्वा प्रमेयत्वावच्छिन्नसाध्यके एव समनियताभावैकमते भावत्वेन यो ऽभावः स एवाभा
वत्वेन भावाभाव इति। न च निमेयत्वसमनियतप्रतियोगिताक इति भावः। ननु समनियताभावैक्यम
ते वह्निमान् धूमादित्यत्र वह्नित्वसमनियतप्रतियोगिताकाभावस्याप्रसिद्ध्याऽलक्षणाव्याप्तिः। घटत्वे
न वह्न्यभावस्यापि पटत्वेन घटाभावाभिन्नत्वात् तदेकावच्छेदकावच्छिन्नप्रतियोगिताकत्वेन समनैय
त्यवाच्यं। तथा च कथं भावत्वाभावत्वरूपावच्छेदकद्वयावच्छिन्नप्रतियोगिताभावाय संगच्छतीत्यरुचे
स्तथैवाह। वह्नित्वेनेति। जलह्रदे वह्नित्वेन किमपि प्रमेयं नास्तीति प्रतीत्या प्रमेयमात्रस्य अभावप्रति। वा ६
योगित्वावगाहनादिति भावः। ननु प्रमेयवान् वह्नेरित्यत्रोक्ताभावो न यत्नसमानाधिकरण इत्या
हा वृत्तीति। गगनस्यापि कालिकादिसंबंधेन यत्रादिवृत्तित्वादाह अवृत्तिमात्रवृत्तीति। तथा चावृत्तिमा
त्रवृत्तितानियामकसंबंधप्रतियोगितावच्छेदकतावच्छेदकीकृत्य तथा भावो ग्राह्य इति भावः। गगनत्वेन कि
मपि प्रमेयं नास्तीति प्रतीतिसूचनाय गगनत्वादिनेति। ननूक्तप्रतीत्या प्रमेयमात्रस्य प्रतियोगित्वावगाहनं
न सर्वत्र न सिद्धं तथात्वेपि प्रमेयवान् वाच्यत्वादित्यादौ वह्नित्वह्रदत्वादिना व्यधिकरणधर्मावच्छिन्नप्रतियोगिताका
भावसमुदायाधिकरणप्रसिद्ध्या व्याप्तिघटकस्वन्यूनवृत्तित्वस्य समानाधिकरणधर्मावच्छिन्नप्रतियोगितायाः न
साध्यतावच्छेदकसमनियतत्वं विवक्षणीयमवश्यं तथा च कथमेवं विधाभावमादाय लक्षणगमनमत आह वि।

व्या०नं०दी०

रूद्धेतिघटत्वपटत्वोभयोरपिकालिकसंबंधेनसामानाधिकरण्यसत्त्वादतआह विरुद्धेति।विशेषितानि
पामकसंबंधेन दे०प्रतियोगितावच्छेदकतावच्छेदकत्वव्यापकंइदमुपलक्षणं।घटत्वादिकमपिसंयोगेनसम
यसामान्यामाहनीतितेनसंबंधेनघटत्वाद्यवच्छिन्नप्रतियोगिताकप्रमेयसामान्याभावोपिबोध्यः॥ ॥
पारिभाषिकमेवेत्येवकारेणयोगार्थानादरः।यदिति।यत्पदंहेतुतावच्छेदकावच्छिन्नपरं।तेनायमात्मा
घटान्यत्वेसत्यात्मघटसंयोगादित्यत्रहेतुसमानाधिकरणात्मत्वाद्यभावस्यस्वविशिष्टहेतुतावच्छेद
ईवपि कावच्छिन्नहेत्वधिकरणाप्रसिद्धावव्याप्तिः।नचज्ञानादिवृत्तेरात्मत्वाद्यभावस्यस्वाश्रयसमवायाद
संबंधेनात्मवृत्तित्वात्स्वविशिष्टहेत्वधिकरणस्यनाप्रसिद्धिरितिवाच्यं विशिष्टप्रतीतिनियामकविशेषस्यैव
संबंधत्वात्।नचतेनैवसंबंधेनात्मन्यात्मत्वाभावविशिष्टधीरस्ति।अतएवस्फटिकादिनिलेसन्नपिस्वा लौहित्यस्य
श्रयसंयोगोनसंबंधः।किंतुस्फटिकादावेवेति।एतेनैककालीनत्वैककज्ञानविषयत्वादिनासंबंधेनसर्वस्ये
वसर्वत्रसंबद्धत्वाद्यत्समानाधिकरणइत्यस्यवैयर्थ्यमितिप्रत्युक्तं।नचसाध्यसमानाधिकरणइतिकथं।
नोच्यतांसत्ताभावात्मत्वात्प्रमेयवानात्मत्वादित्यादौगुणकर्मान्यत्वविशिष्टसत्ताभावस्यसमवायावच्छिन्नप्र
मेयाभावस्यैतादृशस्यस्वविशिष्टहेत्वधिकरणाप्रसिद्ध्याऽव्याप्तिरितितन्नोक्तं।अत्रसाध्यनिष्ठव्याप्यतासंबंध
सामान्येनबोध्या।नचसमवायेनज्ञानसाध्यकेद्रव्यत्वादिहेतावतिव्याप्तिःविषयतयातस्यकेवलान्वयित्वे

नकेवलान्वयिनिष्ठप्रतियोगितायाएवतद्व्यापकतावच्छेदकत्वेनतादृशाभावस्यप्रतियोगिसमानाधिकरणत्वा
दितिवाच्यं।प्रतियोगिसामानाधिकरण्यदलेसाध्यतावच्छेदकसंबंधेनसाध्यनिष्ठायाव्याप्यतायास्तन्निरूपितव्या
पकताघटकयावत्संबंधेनप्रतियोगिसामानाधिकरण्यस्याविवक्षितत्वेनैवानतिप्रसंगात्समवायेन
ज्ञानव्यापकस्येच्छाज्ञानादेरभावस्यसमवायेनहेत्वधिकरणावच्छेदेनप्रतियोगिसामानाधिकरण्यात्
त५ वांछ्यादिचसंयोगसमवायादिसाधारणेसंबंधत्वनैकं।अन्यतमत्वेनतादृशसंबंधानांप्रवेशेगौरवं।यत्किं
चित्संबंधेनसाध्यनिष्ठव्याप्यताभिधानेचायमात्माज्ञानादित्यत्रकालिकसंबंधेनात्मत्वस्यव्यापकंतन्यम
हाकालान्यतरत्वंतदभावस्यहेतुसमानाधिकरणस्यप्रतियोगिनःसमवायेनात्मत्वेव्याप्यकं [illegible] तनिरूपि तिष्ठ
तव्यापकताघटकसंबंधाप्रसिद्ध्याव्याप्तिरिति।किंत्वाव्यतेलदासाध्यतावच्छेदकसंबंधेनैवव्याप्यताबोध्या।एवंच
साध्यतावच्छेदकसंबंधेनसाध्यतावच्छेदकावच्छिन्नसाध्यवद्वृत्त्यभावप्रतियोगितानवच्छेदिकायदभावप्रति
योगितातादृशाभावाद्वृत्त्यर्थः।तेनगुणकर्मान्यत्वविशिष्टसत्तावान्जातेरित्यादौद्रव्यत्वाद्यभावस्यतादृशस्यप्रति
योग्यसामानाधिकरण्यान्नातिव्याप्तिः।धूमवान्वह्नेरित्यादौधूमनिष्ठप्रतियोगितायाःस्वरूपसंबंधात्मकतत्त
द्व्यक्तिस्वरूपायाःधूमव्यापकतानवच्छेदकत्वेपयोगोलकान्यत्वाघेकव्यक्तिनिष्ठप्रतियोगितायाएवतथात्वाद।अयो

अनाने दी१२

गोलत्वाद्यन्यत्वाभावादेः प्रतियोग्यसमानाधिकरणत्वादेव नातिव्याप्तिः। वह्निमान् धूमादित्यादौ च घटत्वावच्छि-
न्नद्रव्यत्वाभावमादाय लक्षणसमन्वयः। घटत्वावच्छिन्नद्रव्यत्वाभावप्रतियोगित्वेन पर्वतो नास्तीत्यादिक्रमेण
प्रतियोगितामात्रस्यैवाधिकरणतया साध्यवन्निष्ठाभावप्रतियोगितावच्छेदकतया साध्यवन्निष्ठाभावप्र-
तियोगितानवच्छेदकप्रतियोगिताया अप्रसिद्धिवारणाय साध्यवन्निष्ठाभावप्रतियोग्यधिकरणत्वं देयं। तदर्थ-
न श्चैवं प्रतियोगिसमानाधिकरणभिन्नत्वं। गोत्वत्वेन गोत्वाभावादेरपि गोत्वत्वेन किमपि प्रमेयं नास्तीति प्रतीतिसि-
द्धाभावस्य समनैयत्येन तदाभकतया प्रतियोगिसामानाधिकरण्यभिन्नाभावाप्रसिद्धेः। नापि प्रतियोगितावच्छे-
भिन्नई दकावच्छिन्नसमानाधिकरणत्वाव्यापकत्वस्य संबंधविशेषानियंत्रितत्वात् येन संबंधेन प्रतियोगितावच्छेदकावच्छिन्नसमा-
नाधिकरणाभिन्नस्य साध्यवन्निष्ठाभावस्य प्रतियोगितानवच्छेदकप्रतियोगितासत्त्वव्यापकताघटकसंबंधो वाच्यः। तथा च
संयोगेन द्रव्यत्वमपि वह्निव्यापकं स्यात्। वह्निमन्निष्ठस्य संयोगेन द्रव्यत्वाभावस्य संयोगेन द्रव्यत्वाधिकरणाप्रसिद्ध्या प्रति-
योगिव्यधिकरणाभावात्। तथा च तेन संबंधेन द्रव्यत्वाद्यभावस्य प्रतियोगिसमानाधिकरणाभावादसंभव इति।
न च संयोगेन स्वप्रतियोगितावच्छेदकावच्छिन्नसमानाधिकरणं यत्तद्भिन्नत्वं द्रव्यत्वाभावे वर्तत एवेति वाच्यं। संयोगेन द्रव्यत्वा-
भावस्यापि घटत्वेन वह्न्यभावाभिन्नतया घटत्वावच्छिन्नसमानाधिकरणत्वेन तद्भिन्नत्वाभावात्। न चैवं संयोगेन न २

प्रतियोगि १

न द्रव्यत्वाद्यभावस्यापि वह्निरूपसमानाधिकरणत्वान्नासंभव इति वाच्यं। एवमपि सत्तावान् जातेरित्यत्रो-
क्तक्रमेण सत्तां प्रत्यपि संयोगेन द्रव्यत्वादेर्व्यापकत्वे तदभावस्य गुणादौ हेत्वधिकरणे संयोगेन प्रतियो-
त्वा३ गिसामानाधिकरण्याभावादव्याप्तेः। व्यापकीभूतस्य तेन संबंधेन वृत्तिमत्त्वविवक्षणेऽपि संयोगादे-
रपि सत्तां प्रति व्यापकतया गुणादौ तदभावस्य प्रतियोगिसामानाधिकरण्याभावात् सत्तावान् जातेरि-
त्यादावव्याप्तेरपरिहारात्। तस्माद्यत्संबंधसामान्ये यादृशप्रतियोगितावच्छेदकविशिष्टप्रतियोगिक-
साध्यवद्वृत्तिकिंचिदधिकरणानुयोगिकत्वाभावस्य तत्प्रतियोगितावच्छेदकभिन्नाया येन संबंधेन यादृशप्र-
तियोगितावच्छेदकविशिष्टानधिकरणं यत्साध्याधिकरणं तादृशप्रतियोगितावच्छेदकभिन्नाया तेन संबं-
धेन वृत्तिमन्निष्ठाभावीयप्रतियोगितासा तेन संबंधेन व्यापकतावच्छेदिका। वस्तुतस्तु साध्यवन्निष्ठाभाव-
यत्र६ प्रतियोगितायाः संबंधावच्छिन्नायाः सामानाधिकरण्येनानवच्छेदिका या प्रतियोगिता सा तेन संबंधेन तथेति
वाच्यं। साध्यवन्निष्ठ[illegible]त्वं चाभावस्य दैशिकविशेषणताविशेषेण तेनायं घटः एतद्घटान्यतरत्वादित्यादौ
व्यभिचाराधिकरणे तत्पटान्यत्वादेरभावस्य कालिकसंबंधेन घटे सत्त्वेऽपि नैतत्पटान्यत्वस्य घटत्वव्याप

भवानंदी० १८

४ क

१ अवच्छेदकत्वेन   २ घटाभेदवत्त्वेन।

कत्वकृतिः। अनवच्छेदकत्वं चावच्छेदकत्वावच्छिन्नावच्छेदकभेदः तेनैव घटनिष्ठप्रतियोगितायामवच्छेदकत्वे
पि न क्षतिः। न च घटत्वावच्छिन्नद्रव्यत्वाभावप्रतियोगितया द्रव्यत्ववद्भिन्नेऽस्तीति प्रतीतिसिद्धाभावप्रति
योगितायाः सामानाधिकरण्येनावच्छेदकत्वात् तादृशप्रतियोगितानां कथं व्यापकतावच्छेदकत्वमिति।
वाच्यं अवच्छेदकपदेनावच्छेदकतापर्याप्त्यधिकरणस्य विवक्षितत्वात्। तत्पर्याप्तिश्च न प्रकृतप्रतियोगिता
यां। अन्यथा तादृशप्रतियोगितावच्छेदकावच्छिन्नद्रव्यत्ववति तदभावप्रत्ययप्रसंगात्। किंतु तत्प्रतियो ५५
गितायां द्रव्यत्ववह्निवृत्तिभिन्नत्वे चेति बोध्यं यथा चैवं स्वविशिष्टपदं न व्यर्थं तथा तत्रैव प्रपंचयिष्यते। याव
त्पदं विनातिव्याप्तिरेव संभवति नाव्याप्तिरसंभवो वेति प्रदर्शयितुमाह सर्वत्रेति। सर्वत्र सर्वाधिकर
णावच्छेदेन। तथा च स्वविशिष्टहेत्वधिकरणावच्छेदेनेत्यस्यापि सत्त्वं दर्शितमिति भावः। तथात्वात्। प्र
तियोगिसमानाधिकरणत्वात्। ननु साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकसाध्यतावच्छेदकव्याप
कप्रतियोगिताकाभावो वा कथं नोक्त इत्यत आह। अत एवेति निरुक्ताभावे यावत्त्वविशेषणादेवाननु
नूतत्वं बहिरिंद्रियग्राह्यजातीयविशेषगुणवत्त्वं तस्य चोत्पत्तिकाले घटाद्यभावात् प्रतियोग्यधिकर

णत्वाघटितं साध्यव्यापकत्वं न संभवतीत्यत आह मनोऽन्यत्वेति केचित्तु साध्याप्रतियोगिकमभाव
मादायापि नातिव्याप्तिरिति कैमुतिकन्यायेनाह मनोऽन्यत्वेतीत्याहुः। गोत्वाभावस्य साध्याभावे स
त्त्वेनैव वारणादाहृतत्वास्यात्रेति) वह्निमान्धूमात् ज्ञातिमान्सत्त्वादित्यादौ तत्तद्व्यक्त्यभावस्य तत्तज्जा
त्यभावस्य वा स्वविशिष्टहेत्वधिकरणावच्छेदेन प्रतियोगिसामानाधिकरण्याभावाद व्याप्तिरित्यर्थः॥
साध्यतावच्छेदकावच्छिन्नव्यापकप्रतियोगिकेत्युक्तावपि तथा तत्तद्व्यक्तेः प्रमेयत्वादिना वह्नित्वावच्छिन्न
व्यापकत्वात्। न च तत्तत्प्रतियोगितानां प्रमेयत्वादिना व्यापकतावच्छेदकत्वमपि। तादृशाभावप्रतियो
गितावच्छेदकेतत्त्वाभावस्य केनापि रूपेण संभवादिति। वह्निमान्धूमादित्यत्र च समक्रियाघटाभावाभा
वस्य धूमाधिकरणमहाकालवृत्तेर्निरुक्तरूपशालिनः स्वसमक्रियाघटात्मकस्य परमाणुमहाकालादेः।
संयोगेन धूमाधिकरणत्वसंभवेन स्वविशिष्टहेत्वधिकरणावच्छेदेन प्रतियोगिसामानाधिकरण्यसंभवा
दात्मत्वसाध्येत्युक्तं। न च परमाण्वादिकं न संयोगेन धूमाद्यधिकरणं तत्संयोगस्य हेत्वनियामकत्वादि

तिवाच्यं। परमाणौ धूमइत्याद्यनुमानिकप्रतीतिसत्वात्। न चानुमानमप्रयोजकमितिवाच्यं। तथाप्यव्याप्ते
रनिर्णयेन तत्प्रकारकविशेषणता नोचितेत्यादिति। केचित्तु साध्याभाववत्साध्यवृत्तेः प्रतियोगिसामानाधिकर
णपरत्वात्तन्मादाय नाव्याप्तिः। संजवतीत्यात्मत्वे साध्ये रसुक्तमित्याहुः। ननु सुखवानात्ममहाकालान्यत
रत्वादित्यादावतिव्याप्तिः। सर्वेषामेव तादृशाभावानां स्वविशिष्टदेत्वधिकरणीभूतमहाकालावच्छेदेन का
लिकसंबंधेन प्रतियोगिसमानाधिकरणत्वात्। न चात्मनोपि तादात्म्येन सुखादिव्यापकतया आत्माभा
वस्यापि तादृशत्वात्तस्य च कालेआत्मसामानाधिकरण्याभावान्नातिव्याप्तिरितिवाच्यं। आत्मनोपि का
लेवृत्त्यनियामककालिकसंबंधेन सत्त्वात्। अन्यथा आत्मादौ नाम्यूदात्तमत्वकारणत्वादिकं न स्यात्तस्य का
लवृत्तित्वघटितत्वात्। एवमपि सुखवानात्मघटान्यतरत्वादित्यत्रातिव्याप्तिः। अत्र घटादौ संयोगेनात्मनो वृत्तेरि
सतत्राह। दत्वांतरैरितिसाध्यतावच्छेदकसंबंधेन साध्यतावच्छेदकावच्छिन्नसाध्यनिष्ठव्याप्यतानिरूपितव्याप
कताघटकसंबंधप्रतियोगिसामानाधिकरण्यघटकसंबंधयोरैक्यविवक्षितमित्यर्थः। धूमवान्धूमकालीनवह्नेरि
त्यादौ अयोगोलकान्यत्वाभावादेरपि संबंधसामान्येन धूमनिष्ठव्याप्यतानिरूपितव्यापकताघटकसंब

धसामान्येन। एवं यत्किंचित्संबंधसामान्ये व्याप्यतानिरूपितव्यापकताघटकेन कालिका
दिसंबंधेन वा स्वविशिष्टहेत्वधिकरणावच्छेदेन प्रतियोगिसामानाधिकरण्यसत्त्वेपि
नातिव्याप्तिः॥ नवीनस्तावद्गुणवत्त्वादित्यादौ विशिष्टसत्ताव्यापकतावच्छेदकप्रतियोगि
ताकस्य द्रव्यत्वाभावस्य कालिकसंबंधेन हेतुसमानाधिकरणस्य प्रतियोगिनि द्रव्यत्वे शु
द्धसत्तानिष्ठव्याप्यतानिरूपितव्यापकताघटकसंबंधाप्रसिद्धाः व्याप्तिः। वस्तुतस्तु साध्यता
वच्छेदकसंबंधेन साध्यतावच्छेदकविशिष्टसाध्यवन्निष्ठाभावीयययसंबंधावच्छिन्नप्रति
योगितानवच्छेदकप्रतियोगिकाययेभावास्तेनैतेन संबंधेन प्रतियोगिसमानाधिकरणं
इत्यर्थात्। व्यापकताघटकत्वेन संबंधानामननुप्रवेशादिति। पयत्संबंधेतिकरणाच्चइ
दमीश्वरज्ञानमीश्वरसविषयकत्वादित्यत्र व्यभिचाराधिकरणीभूतेध्वान्यत्वादेर्विषयितया। दैशिकेवि

वी

३ विशिष्ट

आत्मात्वाश्रयसंबंधता घटकत्वमिथ्याग्राह्यः तेन

श्रीराम

BHAU DAJI MEMORIAL

न. दी. प. २०

शेषणतया चेद्व्यवस्थानत्वव्यापकत्वेन तदभावस्य घटाभावव्यापकताघटकविषयितया प्रतियो
गिसामानाधिकरण्येपि दैशिकविशेषणतया ऽतथात्वान्नातिप्रसंगः। साध्यतावच्छेदकसंबंधे
नव्यापकतातेनैव प्रतियोगिसामानाधिकरण्यमित्युक्तौ च सर्वत्र वाच्यत्वाद्यभावस्येतिग्रंथवि
रोधः। यत्र महाकालान्यत्वविशिष्टघटत्वं कालिकसंबंधेन साध्यं कालत्वादिति हेतुस्तत्र ताद
शाभावानां कालिकसंबंधेन महाकाले प्रतियोगिसामानाधिकरण्यादतिव्याप्तिः। अस्म
द्विवक्षायां तु महाकालान्यस्यैव दैशिकतया व्यापकत्वात्तदभावस्य तेन संबंधेन महाकाले प्र
तियोगिसामानाधिकरण्याभावान्नातिव्याप्तिरिति। वस्तुतस्तु। महाकालान्यत्वविशिष्टघ
टत्वमपि महाकाले कालिकतया वर्तत इति व्यवस्थापयिष्यते। तथा चैतद्रूपान्यत्वविशिष्ट
सत्ताभावात्सत्वादित्यादौ समवायेन साध्यतायामुक्तक्रमेणातिव्याप्तिर्द्रष्टव्या॥ केचित्तु प्रतियोगि श्रीराम

२०

तावच्छेदकसंबंधेन व्यापकतातेनैव प्रतियोगिसामानाधिकरण्यं। समवायेन वह्निव्यापकतावच्छे
दकप्रतियोगिताकस्यापि संयोगेन द्रव्यत्वाभावस्य प्रतियोगितावच्छेदकसंबंधेन संयोगेन द्रव्य
त्वासामानाधिकरण्याद्व्याप्तिरतस्तेन संबंधेन व्यापकत्वमुक्तं। न चैवं वाच्यं प्रमेयत्वादित्यत्र
प्रतियोगितावच्छेदकसंबंधेन व्यापकतावच्छेदकप्रतियोगिताकस्याभावस्याप्रसिद्धिः। व्यधिक
रणधर्मावच्छिन्नाभावस्य प्रतियोगितावच्छेदकसंबंधस्वीकारे मानाभावेन घटत्वेन वाच्यत्वाद्य
भावस्यातथात्वादिति वाच्यम्। वाच्यत्वघटत्वोभयाभावस्य घटादिवृत्तित्वविशिष्टवाच्यत्वाद्यभावस्य
वा तादृशस्य प्रसिद्धेरिति। न चैवं व्यधिकरणधर्मावच्छिन्नाभावं विनैव लक्षणसमन्वये प्रतियो
ग्यवृत्तित्वस्यादेरवतरणं न स्यादिति वाच्यम्। व्यापकत्वेलक्षणे व्यधिकरणधर्मावच्छिन्नाभाव
वारकस्य [redacted] सामानाधिकरण्येनादि विशेषणस्य तदनुपगमे मंतरेण वैयर्थ्यापत्त्या

भा.न.ॐ
२१

प्रतियोग्यवृत्तित्वविशेषणादेरवतारणस्योभयसमाधेयत्वादिति वस्तुतस्तु व्यधिकरणधर्मावच्छिन्नाभाव
स्यापि प्रतियोगितावच्छेदकसंबंधोऽनुभवबलादाश्रीयते। कथमन्यथा घटत्वस्य पटेऽभ्रमदशायां
घटत्वविशिष्टपटसंयुक्तत्वेन यदा भूतले प्रतीयते तेन दा भूतले घटत्वेन पटो नास्तीति धीः संयोगेन
भवति ४ न भवति तु समवायेनेति उपपद्यते ज्ञानत्वप्रमेयत्वत्वेन वाच्यत्वेनास्तीत्यभावस्यापि प्रमाविष
यत्वीयस्वरूपसंबंधावच्छिन्नतया द्वितीयलक्षणस्यापि संगतिः अन्यथा विशिष्टवाच्यत्वाभावा
भावादर्थत्वलक्षणे [illegible]पपादने पि द्वितीयलक्षणस्याऽप्रतीकारादित्याहुः। परे तु। विशेष
णेन विशेषेण व्यापकतानैव च प्रतियोगिसामानाधिकरण्यं। विशेषणेन विशेष्याभावीयः
प्रमाविषयत्वीयो वा वाच्यः। अभिचारिणि तु व्यभिचारनिरूपकाधिकरणं यत्तदन्यत्वस्य तत्प्रकारक
प्रमाविशेष्यत्वस्य वा ग्रमादाय नातिव्याप्तिः अव्याप्यवृत्तिप्रमाविषयत्वमव्याप्यवृत्त्येव। तेन न स्वावि २२

शिष्टप्रदवैयर्थ्यमासत्तावान्वृत्तेरित्यादौ सत्ताप्रकारकप्रमाविषयत्वस्य गुणकर्मान्यत्वविशिष्टस्या
भावेहेत्वधिकरणावच्छेदेन प्रतियोगिसामानाधिकरण्याभावाद्धातत्पदामित्याहुः। ननु रूप
सामान्याभाववान्पृथिवीत्वादित्यत्र प्राचीनमते विरुद्ध इति व्याप्तिः। पृथिवीत्वात्सामान्यवदेः स्वमते रूपसा
मान्याव्यापकत्वात्तदभावमादाय [illegible]तिव्याप्तिवारणसंभवात्। अपलक्षणत्वे लिङ्गत्वाभावमुपपाद
यति। रूपेति। केचित्तु साध्यतावच्छेदकावच्छिन्नसाध्याभावेषु केभूतत्वमूर्तत्वोभयवृत्तित्वादि ५ मू
त्यत्रैव रूपसामान्याभाववान्पृथिवीत्वादित्यत्राप्यतिव्याप्तिः स्यात्। रूपसामान्याभावाभावस्य रू
पस्य स्वविशिष्टहेत्वधिकरणावच्छेदेन तत्र रूपविशेषप्रागभावध्वंसादिरूपप्रतियोगिसमा
नाधिकरणत्वात्। अपलक्षणत्वे किं नोदाहृतमतस्तस्य लक्षणत्वमेवा[illegible]हेति व्याचख्युः। अपि च नती ३
श्वरवस्यस्यैव रूपप्रतिबंधकत्वोपगमे रूपनाशोत्पत्तिकालावच्छेदेनैवोत्तररूपोत्प[illegible]का २८।
ले परमाणौ रूपसामान्याभावासंभवादाह प्रलयइति। महाप्रलय इत्यर्थः। परमाणौ। पार्थिवपरमाणौ

भवानंदी॰

२२

रूपसामान्याभावसाध्यकसद्धेतौ नात्यन्ताभावोऽवगाहतरत्याशयेनाह प्रतियो।
र्यादिति। ।गीति

तत्सत्वात्। रूपसामान्याभावस्य सत्वात्। प्रतियोगिवदिति। षष्ठीसप्तम्योर्विभक्त्योः। तद्ध्वंसप्रागभा
वयोः। प्रतियोगिध्वंसप्रागभावयोः। अननुप्रत्येरूपसामान्याभावस्य सत्वेप्यनाभावः प्रत्यक्षस्यासंभवात्
ऽनुमानस्याप्रयोजकत्वात्। प्रत्युत ध्वंसप्रागभावप्रतियोगिकातिरिक्तात्यंताभावकल्पनागौरवप्रतिकू
लतर्कसत्वाच्च। एवमुत्पत्तिकालावच्छेदेन तत्सत्वेमानाभावः। प्रत्यक्षस्येन्द्रियसंयुक्तविशेषणतादिरह
णासंभवात्। नचकपालसमवेतेरूपाद्यभावप्रत्यक्षे इंद्रियसंयुक्तसमवेतविशेषणतयादितत्वग्र
हात् तस्याग्र उत्पत्तिकालावच्छिन्ने घटेपि सत्वमिति वाच्यम्। द्रव्यवृत्त्यभावप्रत्यक्षे संयुक्तविशेषण
तायाअपि ऽपात्मवृत्त्यभावस्येहेतुत्वेन विनिगमनाविरहेण उभयहेतुतायामपि प्रकृतेऽसिद्धेर
नुपाहा। एतदेवेति। ध्वंसप्रागभावयोरत्यंताभावविरोधित्वेमानाभावादेवेत्यर्थः। अंतराश्यामपूर्वाप
रकालेरक्तमध्यदशायाम्। श्यामइत्यर्थः। ध्वंसप्रागभावयोः सामान्याभावमतेपि यत्किंचिद्विशेषप्राग
भावयत्किंचिद्ध्वंसवतितदसंभवइतिसूचनार्थमंतराश्यामइत्यनुधावनं। एवंरक्तंरूपंनास्तीतिप्र। राम २२

ध्वं१

त्ययः। ध्वंसादीति। अनादिनातत्प्रागभावपरिग्रहः। पूर्वापरेति। रक्तमध्वंसवति अपरे रक्तम
प्रागभाववतीत्यर्थः। तथाप्रत्ययेति। रक्तंरूपंनास्तीति विलक्षणविषयताशालिप्रत्यय इत्यर्थः।
नचनत्र रक्तरूपवत्ताज्ञानमेवप्रतिबंधकमतस्तदशायांनजायमानतयाःप्रतीतेःप्रमात्वापातात्। न
चरक्तत्वावच्छिन्नप्रतियोगिताकत्वंध्वंसस्याव्याप्यवृत्तीति रक्ततादशायांध्वंसे तदसत्वादेवत
थाप्रत्ययइतिवाच्यम्। प्रागभावएवतदव्याप्यवृत्तिः किंनस्यादित्यत्रविनिगमकाभावात्। ना
प्युभयत्रैवतदस्तु। तथापिनध्वंसप्रागभावसमनियतस्पर्शरसादिध्वंसप्रागभावादीनाम
पिविनिगमनाविरहेणैतत्कल्पनापत्तेः। तथाचानंतानांतद्ध्वंसप्रागभावादीनांरक्तत्वावच्छिन्न
प्रतियोगिताकत्वस्यतदव्याप्यवृत्तित्वस्यांतराश्यामेरक्तंरूपंनास्तीतिप्रतीतेरनेकध्वंसादि
विषयकत्वस्यचकल्पनामपेक्ष्यरक्तत्वावच्छिन्नप्रतियोगिकात्यंताभावस्यैवांतराश्यामारोपसं
बंधःकल्प्यतेलाघवादित्येतत्सूचनार्थमुक्तं। अंतराश्याम इति। स्वविशिष्टेति। यत्राभावेप्र

तियोगिसामानाधिकरण्यंप्राप्यतदेवस्वतद्विशिष्टंपक्षहेतुतावच्छेदकसंबंधेनहेतुतावच्छेदकवि
शिष्टहेत्वधिकरणंतदवच्छेदेनेत्यर्थः।तेनवह्निमान्धूमादित्यादौकालिकसंबंधेनधूमाधिकर
द्रव्य३ णक्रियावच्छेदेनघटत्वेनवाच्यत्वाद्यभावस्यप्रतियोगिसामानाधिकरण्याभावेपिनक्षतिः।नवाद्वयं
विशिष्टसत्त्वादित्यत्रघटवृत्तित्वविशिष्टद्रव्यत्वाभावस्यनिरुक्तरूपशालिनःस्वविशिष्टसामानाधिकरण
विरहेपि गुणादौद्रव्यत्वरूपप्रतियोगिसामानाधिकरण्येक्षतिरितिधूमवान्वह्नेरित्यत्रधूमाधिकरणायाव
नेतरंवक्ष्य द्वसौधिकरणोत्पत्तिसंभावनायांचरमधूमाधिकरणध्वंसस्यकालिकतयापदधिकरणंदेशिकतयाच
पदधिकरणंतदन्यतत्त्वावच्छिन्नभेदस्यदेशिकतयाधूमव्यापकस्याभावेचरमधूमाधिकरणध्वंसात्मकेव्या
पकताघटकदेशिकतयास्वप्रतियोगिसामानाधिकरण्याभावान्नातिव्याप्तिनिर्णयःसंभवतीतितदुपेक्षा
हगोत्वेति।पर्वतादेःकालोपाधितास्वीकारेऽयोगोलकान्यत्वाद्यभावस्यपर्वताद्यवृत्तित्वात्तत्रातिव्याप्ति
र्नसंभवतीतितन्नोक्तमितिकश्चित्।सर्वत्रैवसाध्यताकालिकसंबंधेन।तेनगोःसाध्यतायांतद्व्यापकतावच्छे

दकरूपावच्छिन्नाभावमादायापिनातिव्याप्तिवारणंसंभवतीत्येतस्यदर्शनायतेनतेनरूपेणसाध्य
तामाह।जन्यद्रव्यत्वमितिव्यभिचारित्वसंपादनायजन्येतिनक्षतिःकालेगवादिमतिकालेगवाद्यधि न२
करणधर्म्यवच्छेदेनगवादेरभावस्यहानावपीतियोजना।देशिकतयाप्रतियोग्यधिकरणेदेशेदे
शिकसंबंधावच्छिन्नप्रतियोगिताकाभावस्यदैशिकतयासत्त्वौकालिकतयाप्रतियोग्यनाधिकरणका
लस्येवकालिकतयाप्रतियोगिनाधिकरणेकालेकालिकसंबंधावच्छिन्नप्रतियोगिताकाभावस्यकालि देशि५
कतयाहत्तौप्रतियोग्यनधिकरणदेशस्यावच्छेदकत्वादहेदानीगोर्नास्तीतिप्रत्ययात्।नचतस्येतत्काला
वच्छेदेनेदहेशगवाद्यत्यंताभावोविषयःपदेहेशेदैशिकतयाकदापिनगोसत्त्वापत्याप्रत्ययानुपपत्तेःतत्रचदेशिकत
यागवाद्यभावस्यव्याप्यवृत्तित्वेनैवतत्कालस्याप्यवच्छेदकत्वात्कल्पनादितिहायस्तुप्रतियोगिनोधिकरणेका
लेकालिकसंबंधावच्छिन्नप्रतियोगिताकाभावस्यकालिकतयाहत्तौप्रतियोग्यनधिकरणदेशोवच्छेदकइति
तत्तुच्छम्।विरोधितानियामकसंबंधेनहत्तावेवावच्छेदकानुसरणं।अविरोधितानियामकस्वदेशिकविशेषणता

प्र.वा.नं.दी

२५

विशेषणत्वात्। अन्यथा घटवति भूतले घटाभावस्य कालिकतयाऽत्रावच्छेदकं स्यादिति। साध्यव्यापकचरम
ध्वंसप्रतियोगिकाभावाभावस्य चरमध्वंसात्मकस्य तद्धिकाले प्रतियोगिसामानाधिकरण्याभावात् तदा महाका
लेवेति। तादृशध्वंसस्य महाकाले कालिकसंबंधेन वृत्तेः। अभावस्य वृत्तौ संबंधविशेषो न विवक्षित इति भावः।
परंतु अभावस्य दैशिकविशेषणताविशेषविरहेपि प्रलयावृत्तित्वरूपेण साधनतायामतिव्याप्तिः। तदवच्छि
न्नाभावस्य प्रलयमात्रवृत्तेः प्रलयात्मकतया स्वप्रतियोग्यधिकरणप्रदेशकतया वृत्तेः न तु प्रलयावृत्तेः कालिकतया
भावस्याकाशवृत्तेः कथं प्रलयात्मकत्वमिति वाच्यम्। प्रलयमेदस्यापि प्रलयावृत्तितया विशेषणतया तदभावस्य प्रल
यमात्रवृत्तित्वात्। अत एव दैशिकविशेषणताकालिकादिसाधारणसंबंधत्वस्यैकस्याभावात्। अन्यतमत्वस्य प्रवेशे
२ मि प्रल चातिगौरवात्। अभावस्य दैशिकविशेषणतानिवेशनीये तु प्रलयमात्रं व्याप्तिवारणाधिकरणं प्रतिपादयितुं प्रलयावृ
त्तित्वेन साध्यं निर्दिष्टवान्। पूर्वं साध्यं कालिकसंबंधेन। चरमं तु दैशिकविशेषणताविशेषेणैवेति। अत्र प्रलया वृ:
न्यत्वाभावोपि न प्रलयात्मा। अन्यथा तस्य चरमदुःखादिध्वंसरूपतया प्रलयात्मतयापि वृत्तेः तत्रापि प्रलयान्यत्वाभावप्रलयप २५

ग

२४

MEMORIAL

प्रसंगादिति वाच्यम्। स्वरूपतस्तस्याऽप्रलयात्मत्वे वृत्तावपि प्रलयान्यत्वाभाववत्वविशिष्टस्य स्वस्मि
न्नि वृत्तेः प्रतीतिबलेन तथैव कल्पनात्। अन्यथा तस्यातिरिक्तत्वेन तदन्यत्वाभावस्यापि तथात्वाद
२प२ नवस्था स्यात्। अत एव बौद्धाधिकारे अभावाधिकरणकाभावप्रसंगेनानवस्थाचक्रकान्योन्याश्रया
पत्तयः। तन्माश्रयस्यैव लघुत्वात् स एव दीधितिकृता स्वीकृत इत्याहुः। संयोगसामान्याभावस्य द्रव्ये
प्राचामस्वीकारादाह। रूपीति। प्रतियोगिवैयधिकरण्यघटितं संयोगाभावस्यापि संयोगाभाव
व्यापकत्वमुक्तौ प्रतियोगिवैयधिकरण्याघटितव्यापकतायामपि संयोगाभावव्यापकस्याकाशाभा
वस्याभावे आकाश एव प्रमेयसामान्यस्य समवायेनाभावे हेत्वधिकरणावच्छेदेन प्रतियोगिसामा
नाधिकरण्याभावात्। ध्वंसनाबान्तातिरिक्तादौ सत्वावच्छिन्नाभावस्य कालिकतया नित्यत्वविशि
ष्टसत्त्वावच्छिन्नाभावस्य दैशिकतयापि हेतुसमानाधिकरणस्य हेत्वधिकरणीभूतनित्यद्रव्यगुणयो
रवृत्तेः स्वविशिष्टपदमिति। अत एवोक्तकपिसंयोगादीति किंचित्तु। व्यापकतायामभावस्य वृत्तिनाश्यभा
वीयस्वरूपसंबंधेनैव विवक्षिता। सा च भावाभावसाधारणी। न यामे संयोगाभावसमानाधिकरणाये

घटाभावादयस्तत्प्रतियोगितानवच्छेदकमेव कपिसंयोगाभावनिष्ठप्रतियोगित्वं कपिसंयोगत्वाभा
वीयसंसर्गेण कपिसंयोगाभावसामानाधिकरण्यान्वयिताऽन्वयग्रन्थः साधुः। न चैवं घटत्वात्यन्ताभावस्या
पि कपिसंयोगाभावप्रमेयत्वादिव्यापकतया तदभावस्य घटत्वादेः स्वविशिष्टहेत्वधिकरणावच्छेदेन घटत्वाभा
वात्मकप्रतियोग्यसमानाधिकरणत्वात् तद्रूपेणासंभव इति वाच्यम्। घटत्वाभावप्रकारकप्रमाविशेष्यत्वा
भावस्याभावप्रतियोगितयाऽनतिरिक्तस्य घटत्वसमनियततया घटत्वाभावादेरपि तत्प्रतियोगित्वेन व्या
पकत्वाभावात्॥ संयोगाभावप्रकारकप्रमाविषयत्वं च संयोगाभाववन्निष्ठमस्तीति तदभावस्य न
संयोगेन समनैयत्यमिति संयोगाभावो न तत्प्रतियोगीति न तस्य व्यापकत्वक्षतिरित्याकूतः॥ ननु धूमाभा
वे जलत्ववृत्तित्वविशिष्टगोत्वाभावो नास्तीति धी धूमाभावे न विक्रियते। अभावप्रतियोगिकाभावाधिक
रणातिरिक्ताभावानभ्युपगमात्। तथा च धूमवान् वह्नेरित्यत्राऽतिव्याप्तिः। धूमाभावस्य गोत्वाभावरूप
प्रतियोगिसामानाधिकरण्यस्य स्वविशिष्टहेत्वधिकरणावच्छेदेन सत्त्वात्। न च यथावद्व्यापकतामर्थधनि
विष्टसंयोगेनातथात्वान्नातिप्रसंगः। धूमाभावे जलत्ववृत्तित्वविशिष्टगोत्वाभावसंयोगस्यान्तरन्तासत्ति राम

२५

प्रतीतिबलेन संयोगिसामान्यस्यैव तत्प्रतियोगित्वेन तस्यापि संभवात्। एवमयोगोलकान्यत्वाभा
वस्याप्युक्तक्रमेण गोत्वाभावादिरूपप्रतियोगिसामानाधिकरण्यमतः प्राह जलादिवृत्तीति
जलादौ वपीति। यद्यपि धूमाभावस्वरूपत्वेऽपि तदभावस्य जलादौ तदभावत्वेन न वृत्तिः किंतु
धूमाभावत्वेनैव। यथा घटात्यन्ताभावे पटो नास्तीति हेतु। अप्यनतिरिक्ताभावविषयत्वमते
घटात्यन्ताभावस्यैव पटात्यन्ताभावतया पटत्वविशिष्टाभावतया न वृत्तिः किंतु घटात्यन्ताभाव
तयेति कथमतिप्रसंगः। तथापि लाघवगुरुकल्पनेऽगौरवात्। अन्यत्र क्लृप्तस्य जलत्वाभावस्यै
व तदभावत्वे कल्पने लाघवादिति भावः। ननु धूमवान् वह्नेरित्यादावतिव्याप्तिः। धूमवृत्तित्व
विशिष्टगोत्वाभावसयोग्यन्यतराभावस्य धूमत्वेन प्रमेयसामान्याभावस्य धूमाभावाभिन्नतया
अयोगोलकान्यत्वत्वेन प्रमेयसामान्याभावस्यायोगोलकान्यत्वाभावाभिन्नतया धूमवृत्ति
त्वेन प्रमेयसामान्याभावस्य धूमाभावाभिन्नतया तेषां च व्यापकताघटकतत्तत्संबंधेन स्व

२८ भवानंदी

भवानंदी
२६

विशिष्टहेत्वधिकरणावच्छेदेन यत्किंचित्प्रतियोगिसामानाधिकरण्यात्। न च व्यधिकरणवृधे
दिकयायाः प्रतियोगिताप्रत्येकेतत्तदाश्रयसामानाधिकरण्यं वक्तव्यम् प्रकृते चायोगोलकान्य
त्वत्वावच्छिन्नप्रतियोगिताकादेरपि तथात्वात् तदाश्रयायोगोलकान्यत्वासमानाधिकरणत्वात् ना
तिव्याप्तिरिति वाच्यम्। एवं सति जलवृत्तित्वविशिष्टेत्यादिग्रंथविरोधात्। अभावे साध्यतावच्छे
दकावच्छिन्नेत्यादिविशेषणवैयर्थ्यप्रसंगात्। अभावादेरपि गोत्वत्वेन प्रमेयाभावाभिन्नतया तद्घट
त्वे सादेरपि तद्घटसकालावच्छेदेन तद्घटसंबद्धवृत्तित्वेन प्रमेयाभावाभिन्नतया तादृशप्रतियोगि
ताश्रयसमानाधिकरण्यसत्त्वात्। अतः समनियताभावभेदाभिप्रायेण प्रथमलक्षणमुक्त्वा स
मनियताभावैक्याभिप्रायेणाह। यत्समानाधिकरणेनाभित्यादि। तथा च तत्रातिव्याप्तिवार
णाय प्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यं वाच्यम्। तथा चासंभवः। वह्निमान्धूमा
ज्जातिमान्सत्त्वादित्यादौ जलवृत्तित्वविशिष्टद्रव्यत्वाभावस्य गुणान्यत्वविशिष्टजात्यभावस्य चैत राम २६

द्दशस्य च विशिष्टहेत्वधिकरणावच्छेदेन प्रतियोगितावच्छेदकावच्छिन्नसमानाधिकरणत्वाभा
वात्। तो व्यापकतावच्छेदकरूपावच्छिन्नेत्यादि। जलादिवृत्तित्वविशिष्टद्रव्यत्वं तु स्ववह्नित्वावच्छिन्न
प्रतिव्यापकतानवच्छेदकत्वात् तदभावमादाय न दोषः। यत्तु वह्नित्वेन रूपद्रव्यत्वीविशिष्टहेत्वधिकरणा
वच्छेदेन प्रतियोगिसमानाधिकरण्याभावाद्व्याप्तिरतः प्रतियोगितावच्छेदकावच्छिन्नेति। रूपद्रव्यत्व
रूपाभावस्य हेत्वधिकरणे प्रतियोगितावच्छेदकावच्छिन्नासमानाधिकरणत्वाद्दोषः स्तो व्यापकतावच्छेदक
रूपावच्छिन्नेति। तदसत्। वह्नित्वेन रूपद्रव्यत्वीपिरूपद्रव्यत्वेन वह्न्यभावाभिन्नतया प्रतियोगितावच्छेदकावच्छिन्ना ति ५ त
यत्नावस्था ५ न्यांसामानाधिकरण्यसंभवात् शेषमिति। हेतुतावच्छेदकसंबंधेन हेतुतावच्छेदकविशिष्टहेत्वधिक
रणं साध्यतावच्छेदकसंबंधेन साध्यतावच्छेदकविशिष्टसाध्यनिरूपितव्याप्यतानिरूपितव्यापकतावच्छेदकसं
बंधेन साध्यतावच्छेदकसंबंधेन वा प्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यम्। महानसीयान्यत्ववि
शिष्टघटत्वकालान्यत्वादिसत्त्वप्रतियोगितावच्छेदकविशिष्टसामानाधिकरण्ये चानतिप्रसंगात्। इदं च भा ता २

मावादी ॥

व्यापकतापि साध्यतावच्छेदकसंबंधेनैव व्याहेतुतावच्छेदकावच्छेदकसंबंधेन हेतुतावच्छेदकविशिष्टा
धिकरणं यद्व्यक्तिविशिष्टं तदवच्छेदेन तादृशसामानाधिकरण्यमित्यादेर्व्याप्तिलक्षणपूर्वमेव प्रपंचितेति।
अत्र केचित्तु वह्नित्वेन धूमकालावच्छेदेन धूमवद्वृत्तित्वविशिष्टस्याभावो धूमाभाववत्वाद्व्यावृत्तित्वेन
धूमत्वगुरुत्वान्यतरस्याभावो धूमभेदस्य वा। अयोगोलकभिन्नवृत्तित्वेनायोगोलकभेदायोगोलकान्यभेदा
न्यतरस्याभावो ऽयोगोलकान्यत्वस्याभावः। एतेषां वाभावानां हेत्वधिकरणावच्छेदेन वह्नित्वरूपध
वृत्तित्वायोगोलकभिन्नवृत्तित्वरूपप्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्याद्धूमवान्व
ह्निरित्यादावतिव्याप्तिरिति। न च साध्यतावच्छेदकं यद्यत्प्रतियोगितावच्छेदकं प्रत्येकं तत्तदवच्छिन्न ४८
सामानाधिकरण्यं वाच्यं। प्रकृते च धूमत्वायोगोलकान्यत्वत्वादीनामपि तादृशत्वात्तदवच्छिन्नसा
मानाधिकरण्याभावान्नातिव्याप्तिरिति वाच्यम्। साध्यतावच्छेदकावच्छिन्नेत्यादिविशेषणस्य वैयर्थ्या
त्। गोत्वाभावादेरपि प्रमेयत्वेन गोवृत्तिकिमपि नास्तीति धीविषयाभावाभिन्नतया प्रतियोगितावच्छे श्रीराम

दकावच्छिन्नसमानाधिकरण्यात्। किं चैवमभावेयावद्विशेषणवैयर्थ्यापत्तेः। न च प्रमेयत्व
त्वेन घटाभावमादाय धूमवान्वह्नेरित्यत्रातिव्याप्तिः। प्रमेयत्वत्वेन घटाभावस्यापि धूमत्वेन घटा
भावाभिन्नतया हेत्वधिकरणावच्छेदेन प्रतियोगितावच्छेदकावच्छिन्नसमानाधिकरण्यादे
वानतिप्रसंगादिति। अत्र गुरवः। वह्नित्वेन धूमवद्वृत्ति किमपि प्रमेयं नास्तीति प्रतीतौ वह्नेर्न पु
रुषो नास्तीत्यत्रेव विशिष्टधर्म एव प्रतियोगितावच्छेदकतया भासते। न तु शुद्धवह्नित्वमात्रम्
अन्यथा ऽप्रतीतौ वह्नेरपि प्रतियोगित्वेन प्रतियोगितावच्छेदकविशिष्टप्रतियोगिमत्त्वयोगोलके
तदप्रत्यक्षप्रत्ययप्रसंगात्। न च धूमवद्वृत्ति किमपि नास्तीत्यंशे तादृशस्य निखिलस्यैव प्रतियोगिता
वगाहेनात्यांशे वह्नित्वविरहेण शुद्धवह्नित्वस्यैवावच्छेदकत्वमिति वाच्यं। धूमवद्वृत्तित्वविशिष्टव
ह्नित्वस्यैव तादृशांशे समानाधिकरणतयांशान्तराधिकरणतयावच्छेदकत्वसंभवादित्याहुः।
परे तु स्वन्यूनवृत्तिसमानाधिकरणधर्मानवच्छिन्नायाः प्रकृताभावप्रतियोगितायास्तदवच्छेदकावच्छि

भवानंदी
भवानंदी

न्नसामानाधिकरण्यं वाच्यम्। वह्नित्वेन धूमवद्वृत्तिकिमपि नास्तीत्यत्र प्रकृतप्रतियोगितान्यूनवृत्तिसमा पं०२
नाधिकरणतयैव वह्नित्वमवच्छेदकमिति तदुदासः। तादृशेऽधिकरणं चेति। न च धूमाभावादेरपि धूमत्वे
न प्रमेयसामान्याभावाभिन्नतया धूमत्वमपि न तादृशावच्छेदकमिति वाच्यम्॥ प्रमेयसामान्याभावप्रति
योगितातो धूमत्वावच्छिन्नधूमाभावप्रतियोगितायाविलक्षणत्वात्॥ तस्याः स्वन्यूनवृत्तिधर्मानवच्छिन्ना श्री राम
त्वेन तदवच्छेदकधूमत्वावच्छिन्नासमानाधिकरणत्वेनैवानतिप्रसंगादितिदिक्। चक्रवर्तिलक्षणमाह॥
केचित्त्विति॥ ॥इदं कपिसंयोगिएतत्त्वादित्यत्राव्याप्तिवारणाय व्याप्यवृत्तेरिति। वह्नित्वेन घटाभावस्य प्र
तियोगितावच्छेदकमेव वह्नित्वम्। अतः साध्येति। समवायेन वह्न्यभावस्य धूमादिसमानाधिकरणस्य प्र
तियोगितावच्छेदकत्वाद्वह्नित्वादेरसंग्रहवारणाय अतः साध्यतावच्छेदकसंबंधावच्छिन्नप्रतियोगिताकत्वम्॥
साध्यतावच्छेदकसंबंधातिरिक्तसंबंधानवच्छिन्नत्वं वा अभावे देयम्। तेन व्यधिकरणधर्मावच्छिन्नाभा स्यप्रति
योगितावच्छेदकसंबंधानंगीकारेपि न क्षतिः। अत्र प्रतियोगिव्यधिकरणपदं दा नेदं वाच्यं संयोगत्वादिना

२२
श्रीराम

भवानंदी
भवानंदी

त्र प्रतियोगिव्यधिकरणसाध्याभावाप्रसिद्धिरिति तन्नोक्तम्। व्याप्यवृत्तित्वं च हेत्वधिकरणे बोध्यम्। तेन क
पिसंयोगी एतत्त्वादित्यत्र कपिसंयोगाभावस्य गुणे व्याप्यवृत्तित्वेपि न क्षतिः। तच्च हेत्वधिकरणीभूतया
त्किंचिद्व्यक्तिवृत्त्यभावप्रतियोगितायाः सामानाधिकरण्येनावच्छेदकं यदभावव्यक्तित्वं तत्त्वम्। यत्किंचित्त्वनि न३
वेशाच्च संयोगाभावव्यक्तित्वस्य सत्त्वाधिकरणगुणनिष्ठाभावप्रतियोगितानवच्छेदकत्वात्तगुणे हि संयो
गाभावस्य व्याप्यवृत्तित्वमिति संयोगी सत्त्वादित्यादौ नातिव्याप्तिः॥ सर्वस्यैवाभावव्यक्तित्वस्य व्यधिकरणधर्मा
वच्छिन्नाभावप्रतियोगितावच्छेदकत्वादप्रसिद्धिवारणाय सामानाधिकरण्येनेति। शेषं पूर्वोक्तदिशावसेयं। ननु
वह्नित्वावच्छिन्नघटाभावस्य घटत्वावच्छिन्नवह्न्यभावाभिन्नतया साध्याभावस्य प्रतियोगितावच्छेदकमेव वह्नि
त्वम् अतः समनियताभावैक्यमते लक्षणमाह। हेतुसमानाधिकरणेति। ननु यत्किंचिद्व्यक्तित्वं नैकम्। तथा च हेत्व
धिकरणवृत्तीःसंग्राहकयोपादाय तत्तद्व्यक्तिवृत्तित्वं ताभावप्रतियोगितानवच्छेदकं यद्यदभावव्यक्तित्वं तत्त
दभावप्रतियोगितानवच्छेदकं वक्तव्यम्। तथा चातिगौरवं मे किंचाकाशाभावस्य कालिकसंबंधेनाभावे साध्ये रा मं जी

ग३

अात्मत्वदेशाव्याप्तिः। तत्र हेतुसमानाधिकरणस्य दैशिकतया आकाशाभावात्मकाभावस्य व्याप्यवृत्तेः प्रतियोगि
तायाअवच्छेदकत्वात्तादृशाभावाभावत्वस्येत्यत आह। प्रतियोगिव्यधिकरणस्येति ॥ केचित्तु ॥ भावाभावसाधारण
व्याप्यवृत्तित्वं नैकम्। भावनिष्ठव्याप्यवृत्तित्वस्य संयोगादिसंबंधावच्छिन्नप्रतियोगिताकाभावाप्रतियोगित्वात्मकत्वादभाव
निष्ठव्याप्यवृत्तित्वस्य च विशेषणताविशेषसंबंधावच्छिन्नप्रतियोगिताकाभावाप्रतियोगित्वात्मकत्वादत आह• प्रति
योगिव्यधिकरणस्येति व्याचक्रुः। प्रतियोगिव्यधिकरणत्वं च न प्रतियोगिसमानाधिकरणभिन्नत्वम्। घटत्वेन किं
मपि प्रमेयं नास्तीति प्रतीतिसिद्धाभावमादाय समनियताभावैक्यमते निखिलस्यैवाभावस्य प्रमेयमात्रप्रतियोगिकतया
तादृशाभावाप्रसिद्धेः। नापि प्रतियोगितावच्छेदकावच्छिन्नासमानाधिकरणत्वम्॥ संयोगी सत्त्वादित्यत्रातिव्याप्तेः। व्यधिक
रणधर्मावच्छिन्नाभावस्य तेनैव वारणे सामानाधिकरण्येनेत्यस्य वैयर्थ्यापत्तेश्च॥ न च साध्यतावच्छेदकसंबंधेन प्र
तियोगिताश्रयानधिकरणहेत्वधिकरणं तदनवच्छेदकत्वं निरुक्तलक्षणार्थः। वह्नित्वेन हृदे नास्तीत्यभावप्रतियोगि
ताश्रयहृदानधिकरणधूमाधिकरणवृत्त्यभावीयतादृशप्रतियोगितावच्छेदकत्वाद्वह्नित्वस्याव्याप्तिरतः सामानाधिकरण्ये

घटाभावस्य

Dr. BHAU DAJI MEMORIAL

श्रीराम

२९

नेति वाच्यं गुणकर्मान्यत्वविशिष्टसत्तावान् जातेरित्यत्रातिव्याप्तेः। न च तत्र प्रतियोगिताविशिष्ट एव पर्याप्ता न तु स
त्तायामेवेति वाच्यम्॥ मानाभावात्॥ तस्माद्यादृशप्रतियोगितावच्छेदकविशिष्टप्रतियोग्यनधिकरणं हेत्व
धिकरणं तादृशप्रतियोगितानवच्छेदकत्वं वाच्यम्। अत एव द्रव्यत्वाभाववान्सत्त्वादित्यत्र द्रव्यत्वरूपाभा
वस्यानित्यत्वादिविशिष्टद्रव्यत्वाभावरूपप्रतियोगिसामानाधिकरण्येऽपि नातिव्याप्तिः। द्रव्यत्वाभावत्वावच्छि
न्नानधिकरणत्वस्य हेत्वधिकरणेऽसत्त्वेन द्रव्यत्वाभावत्वस्य तादृशप्रतियोगितावच्छेदकत्वात्। यादृशप्रति
योगितावच्छेदकविशिष्टप्रतियोग्यनधिकरणत्वं तु प्रतियोग्यंशे प्रकारतापन्नतत्प्रतियोगितावच्छेदकावच्छिन्न
प्रतियोगितावच्छेदकताकप्रतियोगिमद्भेदवत्त्वम्। भवति चैवं व्यधिकरणधर्मावच्छिन्नाभावोऽपि प्रतियोगिव्यधिक
रणः। धूमवति वह्नित्वेन घटो नास्तीतिवत् धूमवान्न वह्नित्वेन घटवानिति प्रतीतिबलेन प्रतियोगिनि प्रकारीभूतधर्मा
वच्छिन्नधर्मावच्छिन्नप्रतियोगितावच्छेदकताकभेदस्याप्युपगमात्। अत एव समवायेनापि यावाकत्ववद्भेदः स्वीकृतो मिश्रैः
। तथा च तादृशप्रतियोगित्वाद्वह्नित्वादेरव्याप्तिरतः सामानाधिकरण्येनेति। वह्नित्वेन वह्निधूमोभयं नास्तीत्यभावप्रतियो

तावच्छेदक१

भावानंदी
३०

गितावच्छेदकतापर्याप्तिस्तु न वह्नित्वे किंतु वह्निधूमत्वोभयत्वेपीत्युक्तमतो नाव्याप्तिः। तादृशप्रतियोगिता
या अन्यूनवृत्तित्वे सति यदवच्छेदकं तदन्यत्वेन रूपं वा। अवच्छेदकपदं दानाच्च महानसीयवह्न्यभावप्रतियोगि
ताया अन्यूनवृत्तित्वेपि न क्षतिरिति केचित्। तादृशप्रतियोग्यनधिकरणत्वं च साध्यतावच्छेदकसंबंधेन वा
च्यम्। तेन ज्ञानवान् द्रव्यत्वादित्यादौ समवायेन साध्यतायां नातिव्याप्तिः। महाकालो घटवान् कालपरिमाणादित्य
त्र कालिकसंबंधेन प्रतियोग्यधिकरणे घटत्वेन घटाभाववत्त्वं महाकाले न घटत्वेन पटत्वाभावेति प्रत्ययात्। के
चित्तु साध्यतावच्छेदकसंबंधेन यादृशप्रतियोगिताश्रयः यादृशप्रतियोगितावच्छेदकविशिष्टसामान्याधिकरणे
त्वधिकरणं तादृशप्रतियोगितायाः साध्यतावच्छेदकसंबंधसामान्येपरत्वाभावस्य तादृशप्रतियोगिताश्रयप्रति
गिकत्व यादृशप्रतियोगितावच्छेदकविशिष्टप्रतियोगिकत्वदत्त्वधिकरणीभूत पक्षे किंचिदत्यनुयोगिकत्वे तत्त्रि
तयाभावस्य तादृशप्रतियोगितायाः वा अनवच्छेदकत्वं वाच्यम्। वह्नित्वावच्छिन्नाहृदवृत्तिप्रतियोगितायां वह्नित्वा
दिरवच्छेदकतया व्याप्तिवारणाय सामानाधिकरण्येन साध्यः। तद्भिन्नस्य। प्रतियोगिभेदेन प्रतियोगिताभेदे वह्निमा राम

३०

१ प्रतियोगिता

न् धूमादिसत्त्वमहानसीयवह्निनिष्ठायां तदाश्रयवह्नित्वविशिष्टस्य यानधिकरणत्वस्य धूमाधिकरणे
पर्वतादौ सत्त्वादुत्पत्तिकालावच्छिन्नवह्न्यभावस्यापि प्रतियोग्यधिकरणत्वादव्याप्तिः स्यात्। प्रतियोगिभेदे विप्र
तियोगितावच्छेदकैक्ये न प्रतियोगितायाऐक्यं तु वह्नित्वेन वह्निर्नास्तीत्यभावस्य वह्निनिष्ठाधिकरणव
ह्नित्वावच्छिन्नैकैव प्रतियोगिता सैव वह्नित्वेन हृदो नास्तीत्यादिना प्रतीयते। न तु हृदमात्रवृत्तिरन्या गौरवात्। वह्नि तथा च ४
भिन्नस्य पक्षस्य चिद्वह्नित्वावच्छिन्नस्य वोऽनयस्याधिकरणमेव धूमाधिकरणमिति व्यधिकरणधर्मावच्छिन्नाभा
वस्य प्रतियोगिवैयधिकरण्यमिति सामानाधिकरण्येनेति व्यर्थमेव स्यादिति। न च घटत्वेन वह्निर्नास्तीत्यभावप्र
तियोगितायां वैयधिकरण्येन घटत्वमिव सामानाधिकरण्येन वह्नित्वमप्यवच्छेदकमित्यस्याव्याप्तिरिति वाच्यं। नाभा
वात्मप्रतियोगितावच्छेदकस्य यद्धर्मविशिष्टावृत्तित्वं तद्धर्मविशिष्टप्रतियोगिविषयमेव व्यधिकरण
धर्मावच्छिन्नाभावमानम्। तेन घटत्वेन घटत्वेन प्रमेयं नास्तीत्याकारेण न घटत्वावच्छिन्नवह्न्यभावमा
नमिति। एवं चेति। तथा चाव्यभिचारस्य पारिभाषिकत्वान्निर्वचनेपि न क्षतिः। तदिति। पर्याप्तिस्वरूपेति

भावानंदी

पन्नेतद१

शेषणविशेष्यभावानापन्नेत्वयथा वह्निघटौ नस्तः महानसीये। वह्निर्नास्तीत्यत्र प्रथममेव वह्नित्वघटत्वे
व परस्परविशेषणविशेष्यभावानापन्ने तस्यायोग्यः। महानसीयत्वे तु विशेषणविशेष्यभावापन्ने विशि
ष्ट इति भेदः। विशिष्टवह्न्यभावस्य महानसीयत्वविशिष्टवह्न्यभावस्य। ननु विशिष्टस्यातिरिक्तत्वमते
वह्नित्वमनवच्छेदकमेव। नातिरिक्तत्वमतेपि महानसीयत्ववह्नित्ववैशिष्ट्यमेव परंपरासंबंधेन तद
वच्छेदकमिति नोक्तदोष इत्यत आह। इदं तेनाननुहृदत्ववह्नित्वेन यान्यो वह्निर्नास्तीत्यभावस्य प्रति
योगिता या पर्याप्तद्वुनयमवच्छेदकं तत्तत्सामानाधिकरण्येन तदुभयत्वावच्छिन्नस्य प्रतियोगिताधिकरण
वृत्तित्वात्। शुद्धवह्नित्वस्य तत्सामानाधिकरण्येपि तस्यावच्छेदकत्वोक्तौ। लक्षणे तथैव विवक्षणात्। यद्वा
तत्सामानाधिकरण्येनेत्यस्य। तत्प्रतियोगितासमानाधिकरणपर्याप्तवच्छेदकान्यत्वमात्रस्योक्तौ उक्तदो
षेण तथाविवक्षणात्। वस्तुतस्तत्सामानाधिकरण्येनावच्छेदकत्वविवक्षणेपि वह्निह्रदोभयं नास्तीत्यभा
भावे वह्नित्वह्रदत्वादीनां सामानाधिकरण्येनैव प्रतियोगितावच्छेदकत्वात् तदभिप्रायको ग्रंथः। ननु संयोगी

त्व

घटकत्वाद्

राम

३ कुं तद

३९

त्व१

सत्त्वादित्यत्रातिव्याप्तिः। संयोगाभावस्याव्याप्यवृत्तितया व्याप्यवृत्त्यभावांतरप्रतियोगितानवच्छेदकत्वात्संयोगस्येस
त्त्वाद्धा सत्त्ववतीति व्याप्यवृत्तिरिति। तथा च हेत्वधिकरणीभूतयत्किंचिद्व्यक्तौ इत्यादिना निरुक्तहेत्वधिकरणे व्याप्य
वृत्तित्वं बोध्यमित्यर्थः। इदमुपलक्षणम्। प्रतियोगिव्यधिकरणोपि बोध्यः। ननु गुरुधर्मेण साध्यतायां व्याप्तिवारिणेपि व्या
प्तिवारणाय पारिभाषिकमवच्छेदकत्वमवश्यं वाच्यम्। तथा च व्याप्यवृत्तित्वं च प्रतियोगिव्यधिकरणत्वं चाभावे विशेषणं व्य
र्थमित्याशयेनाह॥ वक्ष्यमाणेवेति। सिद्धांतलक्षणे वक्ष्यमाणमित्यर्थः। तच्च हेतुसमानाधिकरणाभावप्रतियोगितायाः सामा
नाधिकरण्येनावच्छेदकं पर्याप्तिविशिष्टसंबंधिनिष्ठाभावप्रतियोगितायाः सामानाधिकरण्येनानवच्छेदकं तत्पारिभाषिकमवच्छेदकं
तदन्यत्वं साध्यतावच्छेदके वाच्यमित्यर्थः। तेन सत्तावान् जातेरित्यत्र जात्यधिकरणगुणादिनिष्ठाभावप्रतियोगितावच्छेदकवि
शिष्टसत्तात्वानतिरिक्तवृत्तित्वेपि सत्तात्वस्य न क्षतिः। न वा तादृशाभावप्रतियोगितावच्छेदके यत्तदवच्छिन्नाभाववदसंबद्धं यद्वि
शिष्टसामान्यं तत्पारिभाषिकमवच्छेदकमित्युक्तौ सत्तावान्प्रमेयत्वादित्यत्र तादृशावच्छेदके सत्तात्वं तदवच्छिन्नाभाववति सा
मान्यादौ समवायसंबंधेन तस्याप्रसिद्धा तस्य पारिभाषिकावच्छेदकत्वरूपनिः। जात्यधिकरणगुणनिष्ठाभावप्रतियोगितावच्छेदा
कविशिष्टसत्तात्वस्य समवायविशिष्टसंबंधिनिष्ठाभावप्रतियोगितानवच्छेदकत्वाभावात्। मेयत्वाधिकरणसामान्यनिष्ठा

भावानंदी
३२

भावप्रतियोगितावच्छेदकसत्तात्वस्य सत्तात्वविशिष्टसंबंधिनिष्ठाभावप्रतियोगितानवच्छेदकत्वाच्चेति । तत्र प्रति
योगितयोरेकसंबंधावच्छिन्नत्वे विशेषणताविशेषावच्छिन्नत्वे वा तात्पर्यम् । तेन साध्यतावच्छेदकसंबंधेनाभावस्य वि
वक्षणे संयोगेन साध्यतायां तादृशावच्छेदकाप्रसिद्धिर्न भवतीति । इत्थं च धूमसमानाधिकरणाभावप्रतियोगितायां वि
शेषणताविशेषावच्छिन्नायाम् अवच्छेदकं घटप्रकारकप्रमाविषयत्वत्वं तद्घटत्वविशिष्टसंबंधिनिष्ठाभावीयतादृश
प्रतियोगितानवच्छेदकमतो घटत्वादेव तादृशमवच्छेदकं तदन्यत्वस्य वह्नित्वादौ सत्त्वान्नातिप्रसंग इति । धूमवान्व
ह्निरित्यादौ तु वह्निमन्निष्ठाभावीयतादृशप्रतियोगितावच्छेदकं संयोगित्वकालान्यत्वप्रकारकप्रमाविशेष्यत्वत्वं तद्ध
र्मत्वविशिष्टसंबंधिनिष्ठाभावीयतादृशावच्छेदकमतो न तत्रातिप्रसंग इत्यधिकं चाग्रे प्रपंचयिष्यामः । ननु गुणत्व
मादाय संयोगत्वस्य न पारिभाषिकावच्छेदकत्वं गुणसामान्याभावस्योत्पत्तिकालावच्छेदेनावयविनि वर्तमानतया गु
णत्वस्य संयोगत्वविशिष्टसंबंधिनिष्ठाभावप्रतियोगितानवच्छेदकत्वाभावात् । अत आह गुणेति । गुणहेतो
भावः संयोगवति नास्ति उत्पत्तिकालेपि गुणवृत्तिद्रव्यत्वादिजातेः सत्त्वादिति भावः । न्विदं संयोगिगुणान्यत्वविशि
ष्टसत्त्वादित्यत्र गुणाद्यसत्त्वाभावो न हेतुसमानाधिकरण इत्यतः संयोगस्याप्रकृष्यत्वे वारितमाचीयादृशानां समारोप

प्रतियोगितानवच्छेदकमतो धूमत्वेन तादृश
६
राम

नातिव्याप्तिस्तं दर्शयति । द्रव्येति । द्रव्यसमवेतत्वं गौरवेण न प्रतियोगितावच्छेदकं तथात्वेपि वा तदवच्छिन्नाभावो न गुणा
दौ सत्तायास्तत्र सत्त्वादतो मात्रेति । द्रव्यान्यासमवेतत्वं तदर्थः । व्याप्यवृत्तीति । तथा च संयोगत्वविशिष्टसंबंधिनिष्ठाभावप्र
तियोगितावच्छेदकत्वं न तस्येति न संयोगत्वस्य पारिभाषिकावच्छेदकत्वक्षतिरिति भावः । यत्तु यत्किंचिदधिकरणावच्छेदेन व्याप्य
वृत्तित्वनिर्वचने गौरवादाह । वस्तुमात्रेणेति । तथा च सामान्यतएव व्याप्यवृत्तित्वं निवेशनीयमित्युक्तिभावः । शेषं पूर्ववदिति । तत्र
साध्यतावच्छेदकसंबंधेनाभावस्य विवक्षणे तादृशावच्छेदकाप्रसिद्धिः । तादृशव्याप्यवृत्त्यभावप्रतियोगितावच्छेदकस्य गगनत्व
स्य घटत्वादिविशिष्टसंबंधिनिष्ठतादृशाभावप्रतियोगितायामवच्छेदकत्वात् । साध्यतावच्छेदकसंबंधेन गगनत्वविशिष्टसं
बंधिनश्चाप्रसिद्धेर्गगनत्वादौ तादृशावच्छेदकत्वासंभवादिति दिक् ॥ प्राग्भावीयलक्षणमाह । साध्येति । गुणान्यत्वविशिष्ट
सत्तावान् जातेरित्यत्र जातिसमानाधिकरणयावदभावानां सत्तारूपसाध्यसमानाधिकरणत्वादतिव्याप्तिरतः साध्यतावच्छेदा
३ स्व काविच्छिन्नेति । तदर्थं । साध्यतावच्छेदकसंबंधेन साध्याधिकरणे दैशिकविशेषणतया वृत्तित्वमतो न समवायेन साध्यतायां सत्ता
नवान् द्रव्यत्वादित्यादौ नातिप्रसंगः । न वा संयोगकालपरिमाणवान् प्रमेयत्वादित्यादौ सर्वेषामेव साध्याभावानां कालिकसं
बंधेन वृत्तेरतिप्रसंगः । न चैवं कालिकसंबंधावच्छिन्नप्रतियोगिताकप्रकाशाभावस्य प्रभावसाध्ये प्रमेयत्वादिहेतावतिव्याप्तिः

भावानंदीय
३३
२ स्य

तत्र साध्याभावस्य … कालानावात्मकस्य दैशिकविशेषणतया सर्वत्र सत्त्वादिति वाच्यम्। दैशिकविशेषणतया कालिकभिन्न
वृत्तित्वविशिष्टस्य योऽभावस्तस्यापि साध्याभावात्मकेकालमात्रवृत्तितया साध्यसामानाधिकरण्याभावात्। अवच्छेदकत्वं चानतिरि
क्तवृत्तित्वं। तेन धूमवान्वह्नेरित्यादौ अधिकरणधर्मावच्छिन्नस्य साध्याभावस्य धूमसमानाधिकरणत्वेपि न क्षतिः। अस्यैति। हेतुतावच्छे
दकावच्छिन्नहेतोर्हेतुतावच्छेदकसंबंधेन … यदधिकरणं दैशिकवि … तयात द्वृत्तित्वमर्थः। तेन द्रव्यं गुणकर्मान्यत्वविशिष्टसत्त्वादयमा
साज्ञानात् जातिमान्सत्त्वादित्यादौ हेतुतावच्छेदकसमवायसंबंधेन सत्ताधिकरणे स्पन्दादौ कालिकतया वर्तमानस्य समवायेन जातिसा
मान्याभावस्य निरुक्तसाध्यसामानाधिकरण्याभावेपि नाव्याप्तिः। धूमवान्वह्नेरित्यादौ च विशेषणतया योगोलकावृत्तेरभावस्यापि
साध्याभावतया धूमसामानाधिकरण्याभावादेव नातिव्याप्तिः। यत्समानाधिकरणेति। यत्समानाधिकरणा ये साध्याभावास्तत्प्रमासा
मान्य इत्यर्थः। तेन अधिकरणधर्मावच्छिन्नसाध्याभावप्रमायाः साध्यवत्त्वज्ञानाप्रतिबंधकत्वेपि धूमवान्वह्नेरित्यादौ नातिव्याप्तिः। प्रमात्वं
च यावद्भ्रमभिन्नत्वं। तेनाव्याप्यवृत्तेः साध्याभावस्याव्याप्यवृत्तित्वभ्रमदशायां अधिकरणधर्मावच्छिन्नाभावस्य साध्यतावच्छेदकावच्छिन्ना
साध्याभावत्वभ्रमदशायां च साध्यवत्ताज्ञानप्रतिबंधकत्वेपि न क्षतिः। साध्यवत्ताज्ञानविरोधितं च देशाधिकरणमात्रवृत्तिपदार्थितावच्छे
दकं तदवच्छेदेन यत्साध्यवत्ताज्ञानप्रतिबंधकत्वम्। तेन वह्निमान्धूमादित्यादौ हेतुत्वनिरूपतावच्छेदेन धूमसमानाधिकरणस्यैव व
त

रामजी
33

तएवा ३
दे१
…भावस्य ह्रदादौ प्रमायाः साध्यवत्ताज्ञानविरोधित्वेपि न क्षतिः। हेतुतावच्छेदकावच्छिन्नत्वादेः संबंधभेदा
दे विवक्षणात्तत्प्रयोजनं च पूर्ववद्बोध्यम्॥ सर्वत्रेति॥ तादृशसामानाधिकरण्यावच्छेदकत्वसमाना
धिकरणत्वकृत्वमित्यादि धूमस्य यत्समानाधिकरणप्रमातावच्छेदेनतद्देशा[illegible]प्रतिबंधकं तेनास्ती
२यतएव३ तिद्वितीयस्य सम्यक्त्वादिति। प्रथमलक्षणे साध्यतावच्छेदकावच्छिन्नप्रतियोगिसामानाधिक
रण्यं। द्वितीये साध्यतावच्छेदकावच्छिन्नप्रतियोगिमत्ताज्ञानं वाच्यम्। इत्थं च हेतुसमानाधिकरणघटाभावेन सामान्यं च
वह्नित्वावच्छिन्नघटस्याप्रसिद्ध्या तत्सामानाधिकरण्यसतत्ताज्ञानप्रतिबंधकत्वस्याग्रहाद संभव इत्युभयत्र साध्या
भावपदं। अवच्छेदकत्वे चानतिरिक्तवृत्तित्वरूपे साध्यतावच्छेदकावच्छिन्नप्रतिसामानाधिकरण्याभावस्याखंडस्यैव
प्रतिबंधकत्वे च कार्यानुत्पत्तिनियतत्वरूपे साध्यतावच्छेदका … वच्छिन्नप्रतियोगिमत्ताज्ञानाभावस्याखंडस्यैव नि
वेशान्नोभयत्र प्रतियोगिपदवैयर्थ्यमिति तु केचित्। साध्याभावपदं सार्थकीकृत्य प्रकारान्तरेण दूषयितुं तस्यैव लक्षणमुप
न्यस्यति। यत्वेति। यद्वत्तो। यन्निष्ठता दृशावृत्तित्वसामान्ये। तेन अधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वस्य व्यभिचारिहे
तुनिष्ठस्याविरोधित्वेपि न क्षतिः। विरोधित्वं च ज्ञाननिष्ठविरोधितायां विषयतयावच्छेदकतापर्याप्त्यधिकरणत्वं व्यभिचारिहे

गादाधरी०
राम
३५

त्ति९

पिनहृत्तिः। यत्तु अनुमितिविरोधित्वं अनुमितिप्रतिबंधकत्वं। तच्च न व्यभिचारइत्यत: प्रकृते विरोधित्वे
तुनिष्ठकेवलवृत्तित्वस्य तत्पात्वात्साध्याभाववतीति। नैनैवमपि व्यभिचारिण्यपि व्याप्तिः। साध्यतावच्छेदकावच्छिन्नसाध्याभा
ववद्वृत्तित्वज्ञानत्वेनैव विरोधितया साध्याभाववद्वृत्तित्वस्य तथात्वादिति वाच्यम्। एतस्य दूषणस्य स्वयमेवोद्भावनीयत्वादि
ति। व्यभिचारिणि साध्याभाववद्वृत्तित्वेनासाधकत्वानुमितिजननाद् अनुमितिसामान्यविरोधित्वं न संभवतीत्यत उक्तं प्रा
क्प्रकृते ति। साध्यतावच्छेदकसंबंधेन तत्साध्यकतत्साधनकानुमितिकारणीभूतज्ञानविरोधित्वमित्यर्थः। तेन समवाया
वच्छिन्नप्रतियोगिताकवह्न्यभाववति धूम इति ज्ञानस्य समवायेन वह्न्यनुमितिविरोधित्वेपि व्यभिचारधियोऽनुमित्यविरो
धित्वेपि विशेषणम्। तथा चानुमितिकारणीभूतज्ञानप्रतिबंधकज्ञानविषयत्वं प्रकृतानुमितिविरोधित्वं। एवं च व्यभिचारिणो
साध्याभाववद्वृत्तिहेतुरित्याकारकपक्षहेतुविषयकज्ञानसामान्येनुमितिकारणीभूतज्ञानप्रतिबंधकत्वाभावस्तत्फलि
तोर्थः। तेन घटाभाववद्वृत्तिप्रमेयत्वमिति ज्ञानस्य घटानुमितिविरोधित्वादसंभव इत्यत उक्तं पक्षधर्मो साध्याभाववतीति वि
२ प्रयोजनं शेषणान्तरं पूर्वं बद्धिति। तन्नेत्येवमपि। साध्याभाववद्वृत्तिर्हेतुर्घटाभाववद्वृत्तिश्चेति ज्ञानस्य घटानुमितिविरोधित्वेनासं
भवात्। न च साध्याभाववद्वृत्तिहेतुत्वं न प्रतिबंधकतायां विषयतावच्छेदकम्। साध्याभाववद्वृत्तिहेतुत्वमेव पक्षघटानुमितौ

राम

३५

BHAU DAJI MEMORIAL

संभवात्१

हेतुतावच्छेदकं तत्र तथात्वस्यापि न च तत्रावच्छेदकतया न पर्याप्तिरिति वाच्यम्। तथा सति केवलवृत्तित्वविशिष्टहेतौ वस्तुपर्याप्त्यभावेन
साध्याभाववतीत्यस्योक्तव्यावृत्तिदानस्यासंगतेरिति दिक्। अनुमित्यविरोधित्वज्ञानस्येति। अनुमितिविरोधित्वम्। अनुमितिकार
णीभूतज्ञानविरोधित्वमित्युक्तमानत्कारणं चेह प्रकृतव्याप्तिज्ञानं। तद्विरोधि च न साध्याभाववद्वृत्तित्वज्ञानं व्याप्तिप्रतियोगिकाभा
४ विरोधि ववद्वृत्तिर्धूम इति ज्ञाने सत्यपि उक्तव्याप्तिग्रहात्। किं त्वनुमितेः साध्याभाववद्वृत्तित्वज्ञानं तथा [illegible] नादृशविरोधित्वघटितलक्षणकर ए
णे संभवः। सद्धेतौ प्रकृतानुमितिविरोधिसाध्याभाववद्वृत्तित्वाभावात्। इतरथा तु व्यभिचारिण्यपि व्याप्तिरिति भावः। यद्यनुमितिपदं
प्रकृतव्याप्त्यनुमितिपरं तदा साध्याभाववद्वृत्तिर्हेतुरित्याकारकं। तथा च पक्षहेतुनिष्ठतत्प्रतियोगितावच्छेदकावच्छिन्नप्रतियो
गिताकसाध्यतावच्छेदकसंबंधावच्छिन्नसाध्याभाववद्वृत्तित्वसामान्ये साध्याभाववद्वृत्तिर्हेतुरित्याकारकज्ञानविरोधिज्ञानवि
षयतावच्छेदकत्वाभावस्तत्त्वं व्याप्तिरित्यर्थः क्रियते तदा नायं दोष इति स्मर्तव्यं मोमि प्रलक्षणमेव परिष्कृत्य दर्शयति केचित्त्विति
तद्व२ । साध्याभावसंवादृशत्वं तद्वृत्तिधर्मवत्त्वम्। तादृशधर्मश्च तत्तीयायोन्वेति। तत्तीयार्थश्चाभेदः धान्येन धनवानित्यत्र तत्तथा आह्लादकत्वे
न चंद्रसदृशं मुखमित्यत्राह्लादकत्वाभिन्नचंद्रवृत्तिधर्माश्रयो मुखमिति शाब्दबोधः। एवं च तादृशान्यतररूपेणाभाववत्साध्या
भाववत्तातीयादृशत्र तादृशान्यतररूपाभिन्नत्वं साध्याभाववद्वृत्तिधर्मवत्त्वमित्यर्थः। तथा च व्यतिरेकिसाध्यके व्याप्तिः। तत्र तादृ

साध्याभावव(त्)वृत्त्यभाव(स्य) साध्याभाववद्वृत्त्यन्यतररूपस्याप्रसिद्धेरतः प्रत्येकमिति। तेन च तत्तदभावानां प्राप्तिस्विकरूपेणासाध्यनिरूपकतालभ्यते।
यावतामभावानां प्रत्येकं निरूपितं यत्साध्याभाववत्तेष्वेकोऽप्यभावो यत्तरे कियान् कइत्यत्रतत्तदिति। तेन प्रत्येकवृत्तित्वाभावस्य प्रत्ये
कसाध्याभावसजातीयत्वं तस्मिन्। तदधिकरणे तत्रकेवलेन तत्पदेन पावकविशिष्टसाध्याभावानुकर्षणे वह्निमान् धूमादित्या
दौ तत्समूहवृत्तित्वावच्छिन्नप्रतियोगिताकाभावानां तत्तद्दमूत्रवृत्तीनां यावत्तामधिकरणं नप्रसिद्धमतस्तत्तदधिकर
णेति। पावत्पदादाधेयाधिकरणधर्मावच्छिन्नाभावसजाती[redacted]तद्वृत्तित्वाभावस्याव्यभिचारिणि सत्त्वादतिव्याप्तिर्न तु पाल
म्।समानाधिकरणधर्मा साध्याभाववद्वृत्तित्वस्यापि व्यधिकरणधर्मावच्छिन्न[redacted]भावं सत्त्वात्व्यभिचारिण्यतिव्याप्ति
रतः सजातीया इति। तस्याप्यभावत्वादिना सजातीयत्वात्तथैवातिव्याप्तिरतः प्राह। स्वनात्यंचेति। समानेति। समानं च
असमानं च समानासमाने ते अधिकरणे ययोस्तौ समानासमानाधिकरणौ ताभ्यामवच्छिन्ना प्रतियोगिता ययोरभा
वयोस्तत्त्वमित्यर्थः। तेन साध्याभावनिष्ठं यत्स्वप्रतियोगितासमानाधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वस्वप्रतियो
गित्वासमानाधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वान्यतररूपं तद्वत्त्वं तादृशवृत्तित्वाभावे लभ्यते। स्वप्रतियोगिता
समानाधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वं च स्वप्रतियोगितासमानाधिकरणधर्मावच्छिन्नप्रतियोगिताकापेयत

हल
तादधर्मि

भावाद ५
४ स्पष्ट
त्तर

द्रव्यत्वत्वस्य प्राणं स्वप्रतियोगित्वासमानाधिकरणधर्मावच्छिन्नप्रतियोगियोगिताकत्वं च स्वप्रतियोगितासमानाधि
करणधर्मावच्छिन्नस्वप्रतियोगितासमानाधिकरणसंबंधावच्छिन्नप्रतियोगिताकापेयेतद्भेदकूटवत्त्वं। तेन न स्वा
त्माननुगमदोषः। समनियताभावैक्यपक्षे सर्वत्रैव व्यधिकरणधर्मावच्छिन्नाभावस्य समवायसंबंधावच्छिन्नाकाशाभा
वघात्मकसमानाधिकरणधर्मावच्छिन्नाभावाभिन्नतया तद्भेदकूटवदभावस्याप्रसिद्धेः चरमे स्वसमानाधिकरण
संबंधावच्छिन्नत्वमपि प्रतियोगितायां विशेषणम्। वस्तुतस्तु समनियताभावैक्यमते पाकाशाभावत्वाकाशाभावभि
न्नत्वान्यतररूपेण सजातीयत्वमेव वाच्यं लाघवादिति प्रथमापूर्वोक्तद्वितीयेति। प्रथमरीतौ वह्निमान् आकाशान्नयाभावस्य
नलवृत्तित्वविशिष्टद्रव्यत्वाभावस्य च तादृशस्य सजातीयो यस्तद्वद्वृत्तित्वाभावस्तस्य धूमादावसंभवः स्यादिति भावः। अवस
ध्यतावच्छेदकसंबंधेन व्यापकत्वाभावस्य च विवक्षणे स्वाधिकरणीभूतयत्किंचिद्व्यक्तिवृत्त्यभावप्रतियोगितावच्छेदकविशेषणता
विशेषावच्छिन्नाया साध्यतावच्छेदकावच्छिन्नाभावव्यक्तित्वं तत्त्वं व्याप्यवृत्तित्वे बोध्यम्। तेन संयोगेन साध्यतायां व्यधिक
रणधर्मावच्छिन्नाभावस्यैव समानाधिकरणावच्छेदेन व्याप्यवृत्तितया तज्जातीयतद्वद्वृत्तित्वाभावस्याव्यभिचारिण्यसत्त्वेऽपि नातिव्याप्तिः
तद्वृत्तित्वाभावेऽपि व्याप्यवृत्तित्वानिरूपकाधिकरणवृत्तित्वाभावो बोध्यः। तेन वह्निमान् धूमात्कपिसंयोगी एतत्त्वादित्यादौ वह्न्यभाव।

भा॰वी॰
३९

स्यकपिसंयोगाभावस्य च जलेगुणत्वादौ व्याप्यवृत्तेः केवलान्वयितया तद्वृत्तित्वस्य व्यापकप्रतियोगिताकस्य सजातीयस्याभा
वस्य धूमादावसत्त्वेपि नाव्याप्तिः। व्यापकताघटकसंबंधेनाभावस्य विवक्षणे तु व्याप्यवृत्तित्वं यत्किंचिन्निष्ठवृत्तित्वाभावत्वेन न
वाच्यम्। धूमवान्वह्नेरित्यादौ संयोगेन कालत्वाभावस्य व्याप्यवृत्तेः सजातीयस्य तद्वृत्तित्वाभावस्य तस्य वह्नौ सत्त्वादेवाति
व्याप्तेर्नवकाशात्। ननु कालिकसंबंधावच्छिन्नप्रतियोगिताकस्याकाशाभावस्याभावे घात्मत्वादिहेतावव्याप्तिः। उक्तसाध्याभा
वस्याकाशाभावस्याव्याप्यवृत्तेरधिकरणे घात्मत्वस्य वृत्तेरत आह प्रतियोगीति। प्रतियोगितावच्छेदकसंबंधेन साध्यव्यापकता
वच्छेदकीभूतयत्किंचित्प्रतियोगितावच्छेदकावच्छिन्नप्रतियोग्यनधिकरणवृत्तित्वविशिष्टत्वं चेह प्रतियोग्यधिकरण
त्वं ज्ञानवान्मेनोमहाकालान्यतरत्वादित्यादावात्मत्वाद्यभावरूपस्य तादृशसाध्याभावस्य कालिकसंबंधेन प्रतियोगिस
मानाधिकरणत्वात्तत्प्रतियोग्यधिकरणवृत्तित्वविशिष्टतदधिकरणमाकाशादेव तद्वृत्तित्वाभावस्य हेतौ सत्त्वादतिव्याप्तिरतः
प्रतियोगितावच्छेदकसंबंधेनेति। वह्निमान्धूमादित्यादौ तद्धूमसंयोगस्य वह्निव्यापकतावच्छेदकतद्धूमसंयोगाभावत्वावच्छि
न्नप्रतियोगिताकस्य गुणसामान्याभावत्वरूपयत्किंचित्प्रतियोगितावच्छेदकावच्छिन्नानधिकरणवृत्तित्वविशिष्टस्याधिक
रणे धूमस्य वृत्तेरव्याप्तिरतः साध्यव्यापकतावच्छेदकीभूतेति। गुणसामान्याभावत्वस्य वह्निव्यापकतावच्छेदकत्वाभावान्न तत्र

दोषः। सर्वस्यैवाभावस्य यत्किंचिदधिकरणवृत्तित्वविशिष्टपूर्वक्षणवृत्तित्वविशिष्टाभावात्मकत्वात्तादृशप्रतियोग्यधिकर
णवृत्तित्वात्तादृशाभावाप्रसिद्धिरतो यत्किंचिदिति। केवलान्वयिसाध्यके सर्वस्यैव तादृशाभावस्य साध्य
३ ता व्यापकतावच्छेदकप्रमेयत्वत्वाद्यवच्छिन्नसमानाधिकरणत्वात्प्रतियोगितावच्छेदकेति। प्रतियोगिप
दोपादानमप्येतदर्थमेवान्यथा घटादेरिति। प्रतियोगितावच्छेदके वा लत्वाद्यवच्छिन्नसमानाधि
करणत्वात्सर्वाभावाप्रसिद्धेः। स्वत्वरूपप्रतियोगितावच्छेदकावच्छेदकेन तदवच्छिन्नतत्प्रतियोगिता
श्रयानधिकरणवृत्तित्वबोधकम्। तेन समनियताभावैक्यनये ज्ञेयत्वेन घटाभावस्यापि घटत्वेन ज्ञेयत्वाभावाभिन्नतया
ज्ञेयत्वत्वरूप सर्वस्यैवाभावस्य तादृशप्रतियोगितावच्छेदकावच्छिन्नज्ञेयत्वरूपप्रतियोगिसमानाधिकरणत्वात्केवलान्वयिसाध्यके नाप्रसि
द्धिः। इत्थं च ज्ञेयत्वत्वावच्छिन्नघटानधिकरणत्वं चक्रवर्तिलिखने कदिशाबोधम्। न च तादृशप्रतियोगितावच्छेदकावच्छिन्नसमा
नाधिकरणं यत्तद्भिन्नत्वं वाच्यम्। एतद्भावाभिन्नं प्रमेयत्वादिमत्वाति व्याप्तिः। स्वाभावसमानाधिकरणकाभावस्यातिरिक्तस्यान
वस्थानेन नानंगीकारेण तत्रैव तदभाव नेदाभावस्यैव तदभावात्मकतया तादृशप्रतियोगितावच्छेदकावच्छिन्नसमानाधिकरणत्वनियमे
न व्यधिकरणधर्मावच्छिन्नाभावस्यैव तादृशप्रतियोग्यसमानाधिकरणतया तत्सजातीयवृत्तित्वाभावस्य प्रमेयत्वे सत्त्वादिति। अस्मद्धि त६८१

वह्न्यादौ तु एतद्भावभेदानधिकरणवृत्तित्वविशिष्टैतद्भावभेदाभाववद्वृत्तित्वाभावस्य प्रमेयत्वेऽसत्त्वान्नातिव्याप्तिरिति। केचित्तु प्रति १ नेतद्भावएतत
योगितावच्छेदकसंबंधेन स्वप्रतियोगितावच्छेदकावच्छिन्नाभावरूपप्रतियोगिसमानाधिकरणं पदार्थभिन्नत्वं वा ऽर्थः। ज्ञानवानात्म
महाकालान्यतरत्वादित्यादौ आत्मत्वाद्यभावानां कालप्रतियोगिसमानाधिकरणत्वात् द्रव्यत्वप्रकारकप्रमाविशेष्यत्वकालत्व
प्रकारकप्रमाविशेष्यत्वान्यतराभाव एव तादृशसाध्याभावस्तद्वृत्तित्वाभावस्य हेतौ सत्त्वादतिव्याप्तिरतः प्रतियोगितावच्छेदकसंबं
धेनेति समनियताभावैक्यमते गोत्वाभावादेरपि गोत्वत्वेन प्रमेयाभावसमनियततया द्रव्यत्वाभावादेरपि गुणकर्मान्यत्ववि
शिष्टसत्त्वाभावसमनियततया ज्ञेयत्वत्वेन प्रमेयाभावसमनियततया ज्ञेयत्वत्वेनाकाशाभावस्यापि आकाशत्वेन ज्ञे
यत्वाभावाभिन्ननियततया तत्प्रतियोगिसमानाधिकरणत्वाभावाप्रसिद्धेरतः प्रतियोगितावच्छेदकावच्छिन्नेति।
सर्वस्यैवाभावस्य पूर्वरूपवृत्तित्वविशिष्टाभावात्मकस्वप्रतियोगिसमानाधिकरणत्वाद्भावेति। आकाशाभावाद्येन घटा
भावस्यापि ज्ञेयत्वत्वेन घटाभावाभिन्नतया स्ववृत्तित्वस्यैवाधिकरणधर्मावच्छिन्नाभावस्य ज्ञेयत्वत्वावच्छिन्नाभावसमानाधि
करणत्वात् केवलान्वयिनि तादृशाभावाप्रसिद्धिरतः प्रतियोगीति। साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपा
वच्छिन्नप्रतियोगिताकाभावोऽपि नाभिन्नो ग्राह्यः। तेन वह्निमान्धूमादित्यादौ तद्धूमसंयोगाभाववत्तद्धूमसं राम

योगस्य निरूपकप्रतियोग्यधिकरणत्वशालिनोऽधिकरणवृत्तित्वाभावस्य धूमादावसत्त्वेऽपि न क्षतिरित्याहुः। तच्चिन्त्यम्। कपिसं
योगाभावभिन्नं प्रमेयत्वादित्यादौ पूर्वोक्तरीत्या कपिसंयोगाभावभेदाभावस्य कपिसंयोगाभावात्मकतया तस्य च कपिसंयोगरूपता
दृशप्रतियोगिसमानाधिकरणतया तद्भिन्नत्वाभावेनातिव्याप्तिवर्जनेऽपि लेपत्वात्। आकाशाभावस्य कालिकसंबंधेनाभावे साध्ये आ
त्मत्वादिहेतावव्याप्तिः। तत्राकाशाभावात्मकस्य साध्याभावस्य निरूपकप्रतियोग्यधिकरणत्वशालिनोऽधिकरणे आत्मत्वादेर्वृ
त्तित्वादिति दिक्। साध्याभावश्च साध्यतावच्छेदकसंबंधेन बोध्यः। तेन वह्निमान्धूमादित्यादौ समवायेन वह्न्यभाववति धूमादेर्वृत्तावपि ना
क्षतिः। इत्थं च साध्यतावच्छेदकावच्छिन्नव्यापकतापि तेनैव संबंधेन वाच्या। तेन कालिकसंबंधेन वह्निव्यापकस्य घटस्य संयोगेनाभाववव
ति धूमस्य वृत्तावपि न क्षतिः। अत एव प्रतियोग्यधिकरणत्वं व्यापकतायां निवेश्य कपिसंयोगाभावादेरपि व्यापकतावच्छेदकरूपाव
च्छिन्नत्वमुपपाद्य पुनस्तद्धर्मस्यैव व्याप्यवृत्तित्वादिविशेषणं प्रकाशनाद्धीति न्यायमनुसरतीति दूषणं प्रत्युक्तम्। प्रतियोग्यधिक
रणत्वगर्भतां विना संयोगेन व्यापकत्वस्यैव दुर्वचत्वात्संयोगेन तस्याप्रसिद्ध्यापत्तेः। केचित्तु व्यापकतावच्छेदकसंबंधेनाभावो वक्तव्यः।
एवं च संबंधविशेषेण व्यापकता न विशेषणीयेत्याहुः। साध्याभावस्याधिकरणतायां च संबंधभेदो न निवेशनीयः। कालः कालपरिमाण
वान्कालत्वादित्यादौ कालिकसंबंधावच्छिन्नप्रतियोगिताकाकाशाभावाभाववानात्मत्वादित्यादौ हेत्वधिकरणस्य कालस्य कालिक च १

व्य सा धा भा ना व १

तथा तादृशसाध्याभावात्मककालपरिमाणाभावाधिकरणत्वेपि आत्मनो दैशिकतया तादृशसाध्याभावात्मकआकाशाभावाधिकरण
त्वेपि काले आत्मनि च तादृशाभावद्वयस्य तादृशप्रतियोग्यनधिकरणवृत्तित्ववैशिष्ट्याभावान्ना[illegible]व्याप्तिरित्यलमतिविस्तरेण। साध्या
भावत्वरूपेणाभावप्रवेशे निर्विकृ वृत्तित्वाभाववद्वृत्तित्वव्यापकप्रतियोगिताकत्वाभावात्समानाधिकरणधर्मावच्छिन्नाभावसत्ता
तीयस्य साध्याभाववद्वृत्तित्वव्यापकप्रतियोगिताकाभावस्य धूमादावभावादाह तत्तदिति। तत्र साध्याभाववद्वृत्तित्वव्यापि
का व्यासज्यवृत्तिधर्मानवच्छिन्ना च या प्रतियोगिता तादृशप्रतियोगिताकाद्यर्थः। व्यक्तिविशेषेति। धूमाभाववज्जलवृत्तित्वस्य
वह्न्यभावसत्वादित्यर्थः। तत्तद्योगोलकावृत्तित्वावच्छिन्नप्रतियोगिताकस्य तत्तद्योगोलकमात्रवृत्तेः साध्याभावस्य यदधिकरणं तद्वृ
त्तित्वाभावस्य वह्न्यादावसत्वादिति व्याप्तेरभावादाह। पार्थिवेति। पार्थिवत्वविशेषितं यन्निर्धूमवृत्तित्वं तद्वद्वह्नौ नास्ति वह्नेस्तेजस
त्वादिति भावः। व्यासज्यवृत्तिधर्मानवच्छिन्नेत्यस्य व्यावृत्तिमाह। द्वित्वाद्यवच्छिन्नेति। निर्धूमवृत्तित्वधूमवद्वृत्तित्वोभयत्वावच्छि
न्नविरहस्य तत्तत्साध्याभाववद्वृत्तित्वविषमव्यापकप्रतियोगिताकस्य निर्धूमवृत्तित्वनिर्धूमवह्न्यधिकरणवृत्तित्वोभयाभाव वह्न्यधिकरण
स्य तत्तत्साध्याभाववद्वृत्तित्वसमनियतप्रतियोगिताकस्य वह्न्यादौ सत्वादित्यर्थः। तादृशवृत्तित्वाभावोपि व्याप्यवृत्तिर्बोध्यः। तेन संयो
गात्मकवृत्तित्वाभावस्याव्याप्यवृत्तेः पूर्वक्षणवृत्तित्वविशिष्टाभावस्य च व्यभिचारिणि वह्न्यादिहेतौ सत्वेपि नातिव्याप्तिः। न च वृ

३८

त्तित्वत्वेन निर्धूमवृत्तिसामान्याभावस्य तत्तत्साध्याभाववद्वृत्तित्वव्यापकप्रतियोगिताकस्य वह्न्यादौ सत्वादतिव्याप्तिरिति
२स्व २३मीर वाच्यम्। स्वन्यूनवृत्तिसमानाधिकरणधर्मानवच्छिन्ना या प्रतियोगिता तत्त्वस्य तत्साध्याभाववद्वृत्तित्वव्यापकव्यासज्यवृत्तिध
र्मानवच्छिन्नत्वस्य विवक्षणात्। तादृशी च प्रतियोगिता स्वन्यूनवृत्तिधर्मावच्छिन्नस्वाधिकरणधर्मावच्छिन्ना च न भवतीति नैतादृ
शाभावमादाय दोषः। इत्थं च संबंधसामान्येन वृत्तित्वाभावविवक्षणेऽव्याप्तिरभिहिता। यदि च संबंधत्वेनैकं मिलित्वा कुंचित्संबं
धेन तादृशवृत्तित्वाभावो विवक्षणीय इत्युच्यते तदा व्यभिचारिण्यतिव्याप्तिरेव दुष्टत्वात्तुल्यं हेतुतावच्छेदकसंबंधेन निवृत्त्वाविव
क्षणे च। वर्तमानः। व्याप्यवृत्तितया वर्तमानः। तेन संयोगेन द्रव्यसामान्याभावस्य द्रव्यवृत्तेरव्याप्यवृत्तितानिरूपकाधिकरणगु
५ न णादौ संयोगेन हेतोरप्रसिद्धावपि न क्षतिः। साध्यतावच्छेदकसंबंधेन व्यापकत्वस्याभावस्य च विवक्षणे वह्निमान्धूमादित्यादौ ता
त्त्वावच्छिन्नाभावो वानलरूपघटकः। संयोगेन द्रव्यसामान्याभावस्य तथात्वेपि उत्पत्तिकालावच्छेदेन तस्य द्रव्यवृत्तितया व्याप्य
३ व वृत्तितानिरूपकाधिकरणपर्यन्तानुसंधाने नैव व्याप्तिनिर्णयः संभवतीति तदुपेक्षा। जातिमानिति। समवायेन साध्यतायामेवाभा
भावमादायाप्रसिद्धिर्यद्यपि तथापि साध्यतावच्छेदकावच्छिन्नसाध्याभावाधिकरणे हेतुतावच्छेदकसंबंधेन हेतोरप्रसिद्धेः प्रतिपा
दनाय जातित्वरूपेण साध्योक्तिरवः द्रव्यं जातिमान्सत्वादित्यादौ अधिकरणधर्मावच्छिन्नाभावमादाय हेतुसंगतिर्बोध्या। ननु द्रव्यं

गुणकर्मान्यत्वे सति सत्त्वादिस्तत्रापि व्याप्तिः। विशिष्टस्यानतिरिक्ततया द्रव्यत्वावच्छिन्नप्रतियोगिताकद्रव्यत्वाभाववद्वृत्ति
त्वस्य सत्तायां सत्त्वेन तदभावासत्त्वात्। न चैवं गुणकर्मान्यत्वविशिष्टसत्ता गुणे वर्त्तत इति प्रतीतिः स्यादिति वाच्यम्। गुणकर्मान्य
त्वविशिष्टत्वावच्छेदेन गुणवृत्तित्वस्य सत्तायामभावात्। तादृशविशिष्टरूपेणावच्छेदकत्वानवगाहिप्रत्ययस्येष्टत्वादत्रा
प्रतियोगिव्यधिकरण स्य द्वेति। तादृशः व्याप्यवृत्तयः। प्रतियोगितावच्छेदकावच्छिन्नाभावाः साध्याभावाः। साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदक
रूपावच्छिन्नप्रतियोगिताकाभावाः। तेषामिति। तस्य च तस्य च तस्य च तेषामिति सरूपैकशेषेण तत्तदभावसजातीयत्वला
भः। अत्रापि यावत्त्वे कतत्त्वत्वा नो व्याप्यवृत्तित्वस्य द्वितीयस्य साध्याभावस्य च प्रयोजनं पूर्ववद्बोध्यम्। धूमत्वावच्छिन्नधूमा
भावव्यापकस्य वह्नित्वेन वह्न्यभावस्य प्रतियोगितावच्छेदकेन वह्नित्वावच्छिन्नप्रतिव्यापकत्वादतिव्याप्तिरतः सजातीयस्ये
ति। धूमाभावसजातीयस्य वह्न्यभावस्य प्रतियोगितावच्छेदकेन वह्नित्वेन वह्नित्वावच्छिन्नं प्रति व्यापकत्वादतिव्याप्तिरतो व्यापकी
भूतस्येति। व्यापकत्वं तु तदभावमात्रवृत्तिधर्मेण दैशिकविशेषणतया च बोध्यम्। तेन वह्न्यभावस्याभावत्वादिना धूमाभावव्यापकत्वे
पि न क्षतिः। न वा महाकालभिन्नः का ज त्वादित्यादौ कालनिष्ठाभावस्य कालिकतया महाकाले तदभावव्यापकत्वेपि क्षतिः। संयोगेन द्र
व्यस्य व्याप्यवृत्तिताम्मते धूमवान्वह्नेरित्यादौ वह्न्यभावस्यापि धूमाभावव्यापकत्वात् रूपवान्कपिसंयोगादित्यादौ च कपिसंयोगाभाव

Dr. BHAU DAJI MEMORIAL

स्यापि रूपाभावव्यापकत्वादतिव्याप्तिरतो व्याप्यवृत्तेरिति। अत्र च तादृशाभावस्य हेतुतावच्छेदकसंबंधावच्छिन्नाया प्रति
योगितायाः तदवच्छेदकधर्मेण हेतुतावच्छेदकसंबंधेन हेतुतावच्छेदकावच्छिन्नं प्रति व्यापकत्वं बोध्यम्। तेन स्वरूपसंबंधेन व
ह्न्यभावस्य संयोगेन द्रव्यत्वाभाववान्भिन्नस्य केवलान्वयिनो धूमाभावव्यापकतया स्वरूपसंबंधावच्छिन्नतत्प्रतियोगितावच्छे
दकीभूते [illegible]न वह्नित्वेन वह्नित्वावच्छिन्नप्रति संयोगावच्छिन्नतत्प्रतियोगितावच्छेदकीभूतद्रव्यत्वत्वेन वह्नित्वावच्छिन्नं प्र
ति समवायेन च व्यापकत्वेपि न क्षतिः। हेतोर्व्याप्यतापि हेतुतावच्छेदकसंबंधेन बोध्या। तेनायमात्मा ज्ञानादित्यत्र विषयतासं
बंधेन हेतुतायां आत्मविषयकज्ञानत्वेन तादृशाभावप्रतियोगितावच्छेदकेन समवायसंबंधावच्छिन्नज्ञानं प्रति विषयतया व्याप
कत्वेऽपि न क्षतिः। किंचित्तु यत्प्रतियोगितावच्छेदकीभूतो यो धर्मस्तत्प्रतियोगितावच्छेदकसंबंधेन व्यापकता बोध्या। यत्तादितिकरणा
त्स्वरूपसंबंधेन वह्न्यभावस्य संयोगेन द्रव्यत्वाभाववान्भिन्नतया तत्प्रतियोगितावच्छेदकीभूतसंयोगेन वह्नेर्वह्नि व्यापकत्वेपि न क्षतिरि
त्याहुः। तादृशेति। तादृशसाध्याभावव्यापकीभूतसजातीयव्याप्यवृत्त्यभावप्रतियोगित्वमित्यर्थः। तदवच्छेदकमित्यत्र तत्पदस्य वा
च्यतोक्तप्रतियोगित्वपरामर्शः। तत्करणयोः क्रमेण दोषमाह द्रव्यमित्यादिना तादृशाभावेति। द्रव्यत्वाभावव्यापकसजातीयव्याप्यवृत्त्य
भावेत्यर्थः। समवायेन प्रमेयसामान्याभावे प्रमेयत्वमपि प्रतियोगितावच्छेदकमतस्तादृशेति। प्रकृतसाध्याभावसजातीयाभावप्रति

तेत्पर्यः। एतएवकेवलान्वयिसाध्यकपर्यंतानुधावनम्। तत्र अधिकरणधर्मावच्छिन्नस्यैवसाध्याभावस्यसंभवात्। प्रमेयत्वस्याधिकर
णप्रतियोगित्वस्याप्रसिद्धा। प्रमेयत्वस्यतथानवच्छेदकत्वादितिभावः। नचकालिकसंबंधेनप्रमेयत्वस्याभावृत्तित्वयात तत्संबंधेप्र
टी२ तियोगितावच्छेदकतावच्छेदकीकृत्यप्रमेयत्वेनाभावानास्तीतिप्रत्ययविषयीकृतमभावंप्रमेयत्वस्यापिअधिकरणतया। एवच्छेदक मादाय २
त्वमितिवाच्यम्। हेतुतावच्छेदकसंबंधेनप्रतियोगितावच्छेदकत्वस्यावश्यंवक्तव्यत्वात्। अन्यथाधूमवान्वह्नेरित्यादौविषयितया।
वह्नित्वविशिष्टस्यज्ञानादेरभावस्यधूमाभावव्यापकस्यप्रतियोगितावच्छेदकमेववह्नित्वमित्यतिव्याप्तिः। प्रमेयत्वादिसत्त्वतादृशसं
बंधोविषयत्वाघस्वरूपसंबंधः। नचतेनसंबंधेनप्रमेयत्वंनयेतिभावः। सज्ञातीयादिपदपरित्यागेनैकेनलक्षणांतरमाहयद्वेति। तादृशी[redacted]
साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकः। साध्याभावइतिस्वरूपकथनम्। एतत्रचव्याप्यवृत्तित्वमपि
साध्यम्। निःप्रयोजनत्वात्। अतिरेकिसाध्यकेयावत्साध्याभावीयप्रतियोगितावच्छेदकस्याप्रसिद्धेराहप्रत्येकमिति। एतत्रचतादृशा
भावस्यसाध्यतावच्छेदकसंबंधावच्छिन्नायाप्रतियोगितातदवच्छेदकधर्मेणतेनैवसंबंधेनहेतुतावच्छेदकावच्छिन्नेप्रतिव्यापकत्वं श्रीराम
बोध्यम्। तेनकालत्वप्रकारकप्रमाविषयोद्रव्यत्वादित्यत्रकालिकसंबंधेनप्रमेयत्वाभावस्यस्वरूपसंबंधावच्छिन्नसाध्याभावस
समनियतत्वस्यात्प्रतियोगितावच्छेदकीभूतप्रमेयत्वत्वेनस्वरूपसंबंधेनद्रव्यत्वव्यापकत्वेपिनक्षतिः। प्रमेयत्वत्वस्यसाध्यतावच्छे

दकीभूतस्वरूपसंबंधावच्छिन्नप्रतियोगितानवच्छेदकत्वात्। नवायंघटएतद्घटएतद्घटपटान्यतरत्वादित्यत्रतादृशाप्र ३१
तियोगितावच्छेदकीभूतघटत्वत्वादिनाकालिकतयाहेतुव्यापकत्वेप्यतिव्याप्तिः। साध्यतावच्छेदकीभूतसमवायसंबं
धेनाव्यापकत्वात्। स्थिचेतादृशसाध्याभावस्यतादृशसाध्यव्यापकत्वेचसाध्यतावच्छेदकसंबंधेनबोध्यम्। तेनवह्निमा
न्धूमादित्यादौसमवायेनवह्न्यभावस्यसाध्यतावच्छेदकसंबंधावच्छिन्नप्रतियोगित्वाप्रसिद्धावसंयोगेनद्रव्यत्वा। ६४
भावस्यप्रतियोगितावच्छेदकीभूतद्रव्यत्वत्वेनसंयोगेनाव्यापकत्वेपिनक्षतिः। केचित्तुस्वप्रतियोगितावच्छेदक
संबंधेनसाध्यव्यापकता। तेनसंयोगेनद्रव्यत्वाभावनिरासः। एतत्संबंधावच्छिन्नप्रतियोगितावच्छेदकंयत्तेनसंबंधे
नव्यापकताबोध्या। कालत्वप्रकारकप्रमाविषयोद्रव्यत्वादित्यादौपूर्वोक्तरीत्यानातिव्याप्तिरित्याहुः। सार्वभौमल
४ क क्षणसमुदायपर्दा[redacted]दानेतद्दोषाणामसंभवेतित्याशयेनसमुदायपदानंतर्भावेनैतल्लक्षणमाहपरेत्विति। सा २४
ध्याभाववद्वृत्तित्वंचहेतुतावच्छेदकसंबंधेनेत्यस्यपूर्वोक्तत्वात्तदनुक्तावृत्तिमद्वृत्तित्वस्यव्याख्यानेसवलितं। प्र
योजनमाहतेनेत्यादिना। अत्रवृत्तिमद्वृत्तिपदादानेऽसंजवोनाप्तितादात्म्यसंबंधेनविषयितासंबंधेनच[redacted]
हेतुतायोअधिकरणधर्मावच्छिन्नतादृशसाध्याभाववद्वृत्तित्वव्यापकप्रतियोगिताकस्यअधिकरणधर्मावच्छि

साकांक्षदो राम

न्नप्रतियोगिताकाभाववत्त्वस्यैव संभवात्तादात्म्येन विषयितया च सर्वस्यैव सत्त्वादिति ध्येयम्। आलोकादाविसनेन
वृत्तिमत्त्विष्टत्वेन तदभावस्य दर्शितम्। पूर्ववदिति। साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छि-
न्नप्रतियोगिताकाव्याप्यवृत्तिश्च। प्रथमरीत्या वह्निमान् धूमादित्यादौ सत्त्वाभावाद्रूपत्वादित्यादौ च साध्याभावीयतादृशो भि-
त्वावच्छिन्नाभाववद्वृत्तित्वाभावस्य पृथिवीवृत्तित्वविशिष्टसत्ताभाववद्वृत्तित्वाभावस्य च धूमे द्रव्यत्वे च सत्त्वादसंभ-
वः। स्यात्। व्याप्यवृत्तित्वोपादानाच्च कपिसंयोगाभाववान् द्रव्यत्वादित्यादौ तादृशसाध्याभावात्मककपिसंयोग-
वद्वृत्तित्वाभावस्य गुणत्वादिनिष्ठस्य द्रव्यत्वाद्यवृत्तित्वेऽपि न क्षतिः। साध्याभावस्य साध्यतावच्छेदकसंबंधेन साध्यव्या-
पकताघटकसंबंधेन वाऽभावो बोध्यः। वह्निमान् पर्वतत्वादित्यत्र संयोगेन साध्यतायां समवायावच्छिन्नवह्न्यभाववत्समवे-
अव्याप्तिः तत्वाभावस्य पर्वतत्वादिनिष्ठस्य तादृशसत्त्वेऽपि न क्षतिः। अत्र च पूर्वोक्ततत्तत्साध्याभाववद्वृत्तित्वव्यापक[illegible]व्या-
सज्यवृत्तिधर्मावच्छिन्नप्रतियोगिताकत्वविवक्षणे आलोकावृत्तित्वावच्छिन्नाभावतादृशस्य पर्वतं प्रति तस्य धूमेऽस-
त्त्वाद[illegible]व्याप्तिरिति तदुपेक्ष्यादौ स्वप्रतियोगितानवच्छेदकं यत्तत्साध्याभाववद्वृत्तित्वत्वं तद्व्यापकप्रतियोगिताकत्वस्य पर्व-
सेति प्रतियोगिताव्यापकसाध्याभाववद्वृत्तित्वत्वव्यापकप्रतियोगिताकत्वविवक्षणे आलोकावृत्तिवृत्तित्वत्वावच्छिन्नाभाव-

क्रि ४

६७

स्य वह्नित्वादवच्छिन्नप्रकृताभाववद्वृत्तित्वत्वव्यापकप्रतियोगिताकस्य निरुक्तसाध्याभाववद्वृत्तित्वत्वव्यापकप्रतियोगि-
ताकस्यालोकवत्त्वे धूमादावभावाद्व्याप्तिरतो व्यापकतावच्छेदके तत्तदिति। तथा च तादृशाभावे संयोगाद्यादिके योपादा-
यतद्वृत्तित्वत्वस्य प्रतियोगिताव्यापकत्वं बोध्यम्। आलोकावृत्तिवृत्तित्वाभावप्रतियोगिताव्यधिकरणधर्मावच्छिन्न-
वह्न्यभाववद्वृत्तित्वत्वव्याप्या। न तु व्यापिका। समानाधिकरणधर्मावच्छिन्नवह्न्यभाववद्वृत्तित्वत्वव्यापिका न तु व्या-
प्येति तादृशाभावनिरासः। धूमवान् वह्नेरित्यादौ साध्याभाववद्वृत्तित्वत्वव्यापकप्रतियोगिताकस्य व्यधिकरणधर्मावच्छि-
न्नप्रतियोगिताकाभावस्यैव वह्निनिष्ठस्य संभवादतिव्याप्तिः। व्यधिकरणधर्मावच्छिन्नाभावस्यापि साध्याभावत्वे यात्तत्र-
थारणस्याध्याभाववद्वृत्तित्वत्वे प्रतिनिर्धूमवृत्तित्वाभावप्रतियोगितायाः अव्यापकत्वादतो व्यापकतावच्छेदकेऽपि तत्त-
दिति। वह्निमान् धूमादित्यादौ व्यधिकरणधर्मावच्छिन्नसाध्याभाववत्संयोगित्वत्वसमनियतप्रतियोगिताकस्य पर्वत-
संयोगित्वतदन्यसंयोगित्वोभयत्वावच्छिन्नाभावस्यालोकवृत्तेः सत्तावान् द्रव्यत्वादित्यादौ व्यधिकरणधर्मावच्छिन्नसाध्या-
२ महानसीयवह्निविशिष्ट भाववत्समवेतत्वत्वसमनियतप्रतियोगिताकस्य घटसमवेतत्वपटान्यसमवेतत्वोभयावच्छिन्नाभावस्य घटत्वादिवृत्तेः प्रसि-
द्धेराधनाबाद। एवं तद्रूपवान् तद्द्रव्यत्वादित्यादौ तादृशसाध्याभाववत्समवेतत्वत्वसमनियतप्रतियोगिताकस्येतद्रूपत्व

भपवीज

౮౫౦౦౪

भावानंदी शाम

पा

प्र६४

छिन्नएतद्द्रव्यसमवेतत्वेन दन्यरूपेणावच्छिन्नसमवेतत्वेन यावच्छिन्नाभावस्यै दिवृत्तेर्हि तावभावाप्रसंभवः। तादृश
प्रतियोगितायां व्याप्यवृत्ति धर्मानवच्छिन्नत्वविशेषणेपि धूमत्वव्याप्तिवृत्तित्वत्वरूपेण वृत्तित्वसाध्यान्याभावस्याधि
करणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वत्वसमनियतप्रतियोगिताकस्य गोकादिवृत्तेर्धूमाद्यवृत्तित्वादसंभवदूरमतस्त
त्तत्साध्याभाववद्वृत्तित्वत्वेति। धूमवान्वह्नेरित्यादौ समानाधिकरणधर्मानवच्छिन्नप्रतियोगिताकस्याधिकरणधर्मावच्छि
न्नप्रतियोगिताकवृत्तित्वाभावस्य हेतौ सत्वादतिव्याप्तिरतोऽतिरिक्तांतमत्रापि साध्याभाववद्वृत्तित्वत्वातिरिक्तसमा
भाव नाधिकरणधर्मानवच्छिन्नप्रतियोगिताकस्याधिकरणधर्मावच्छिन्नस्यैव संभवात्तथैवातिव्याप्तिरतस्तत्सदिति। केवला
न्वयिसाध्यके अधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वत्वातिरिक्तधर्मानवच्छिन्नप्रतियोगिताकस्याभावस्याप्रसिद्धिः
। तादृशसाध्याभाववद्वृत्तित्वत्वस्य गुरुतया तदपेक्षया वृत्तित्वत्वस्यैव लघुतयावच्छेदकत्वे सः समानाधिकरणेनेति। अतएव साध्या
भाववद्वृत्तित्वत्वावच्छिन्नप्रतियोगिताकेप्यपि न क्षतं। न चैवं वृत्तिमद्वृत्तिपदं व्यर्थम्। अत्र कल्पेऽदत्वात्। केचित्तु तादात्म्येन विष
यितया वह्नेतुतायां अधिकरणधर्मावच्छिन्नसाध्याभाववत्तादात्म्यस्य केवलान्वयितया तदवच्छिन्नप्रतियोगिताकस्याभावस्या
प्रसिद्धिरतो गुरुधर्मस्यावच्छेदकत्वेपि समानाधिकरणेनैतस्मैवैयर्थ्यम्। अतएव वृत्तिमद्वृत्तिपदमप्यत्र कल्पे सार्थकमित्या

सर्वसाधर्म्यस्य साध्या
भाववद्वृत्तित्वत्वाति
रिक्तधर्मत्वादित्यभावः
कल्पे ५

शाम

५२

मित्याहुः। वस्तुतो विशिष्टस्यानतिरिक्ततया महानसवृत्तित्वत्वादिकमपि न साध्याभाववद्वृत्तित्वत्वातिरिक्तं। अतस्तदवच्छिन्नाभा
२ अपत: भावमादायप्रसंभवो वा सम्भवः। स्वाविषयकप्रतीतिविषयत्वं तत्साध्याभाववद्वृत्तित्वत्वकत्वं तत्साध्याभाववत्तित्वत्वातिरिक्तत्वं
निर्वाच्यमतो वृत्तित्वत्वमपि न तादृशसाध्याभाववद्वृत्तित्वत्वातिरिक्तम्। वृत्तित्वत्वाविषयकप्रतीत्या तादृशसाध्याभाववद्वृत्ति
त्वत्वस्याविषयीकरणात्। एवं च वृत्तित्वत्वावच्छिन्नवृत्तित्वाभावमादाय पूर्वोक्ताव्याप्तिवारणायैतत्कल्पे वृत्तिमद्वृत्तिपदं सा
र्थकम्। अत्र च तत्तत्साध्याभावं प्रतियोगितावच्छेदकाद्यवेशेषितं तत्तद्व्यक्तित्वेनोपादाय तद्वृत्तित्वे स्वाविषयकप्रतीतिवि
षयत्वं ग्राह्यम्। तेनालोकव्यावृत्तित्वेनालोकावृत्तेरभावस्य वह्नित्वावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकत
या आलोकावृत्तित्वावच्छिन्नप्रतियोगिताकतद्वृत्तित्वस्यालोकावृत्तित्वाविषयकप्रतीत्यविषयत्वेपि आलोकावृत्तित्वावच्छिन्ना
भावमादाय नातिव्याप्तिः। तादृशवृत्तित्वाभावप्रतियोगितासमानाधिकरणत्वापेक्षया लाघवादाह। वृत्तित्ववृत्तिनावेति। ता
दात्म्येन विषयितया च हेतुतायां केवलान्वयिनि विरुद्धघटत्वपटत्वाभ्यामेव तादृशवृत्तित्वाभावः सुलभः। साध्याभाववद्वृत्तित्वत्वा
तिरिक्तवृत्तित्ववृत्तिधर्मानवच्छिन्नप्रतियोगिताकस्य धूमत्वाद्यभावस्य धूमादावभावाद्व्याप्तेर्वारणाय तद्वृत्तित्वाभावदलेनेनतद्वृ
त्तित्वप्रतियोगिताकत्वमभावे विशेषणं। ननु धूमत्वाभावधूमनिष्ठवृत्तित्वाभावयोः समनैयत्यात् धूमत्वाभावोपि वृत्तित्वप्रतियोगि

साकल्येनैव व्याप्तिः। न चैवं तत्साध्याभाववद्वृत्तित्वातिरिक्तेन वृत्तित्ववृत्तिना धूमनिष्ठवृत्तित्वत्वेनावच्छिन्नप्रतियोगिताकत्वा
त्यन्ताभावो लक्षणघटक इति वाच्यम्। तथा सति केवलान्वयिन्यप्रसिद्ध्यापत्तेः। घटत्वेन तादृशवृत्तित्वाभावस्यापि वृत्तित्वत्वेन घटाभावा
वृत्ति भिन्नत्वात्। न च तत्र साध्याभाववद्वृत्तित्वातिरिक्तवृत्तित्वधर्मानवच्छिन्नापि घटत्वेनावच्छिन्ना प्रतियोगितास्त्येति वाच्यम्। प्रकृतेपि
तुल्यत्वात्। धूमनिष्ठवृत्तित्वाभावेपि साध्याभाववद्वृत्तित्वत्वातिरिक्तवृत्तित्वधर्मानवच्छिन्नधूमत्वावच्छिन्नप्रतियोगितायाः सत्त्वादिति चेन्न
साध्याभाववद्वृत्तित्वातिरिक्तवृत्तिवृत्तिधर्मेणानवच्छिन्नवृत्तित्वनिष्ठप्रतियोगिताकाभावस्य विवक्षितत्वात्। धूमत्वाभावस्य धूमनिष्ठवृ
त्तित्वत्वरूपतादृशधर्मानवच्छिन्नवृत्तित्वनिष्ठप्रतियोगिताकत्वेनेति तमादाय नाव्याप्तिः। न च धूमत्वत्वेन धूमत्वनिर्वह्निवृत्तित्वान्यतरा
वस्य तादृशस्य धूमावृत्तितया व्याप्तिरिति वाच्यम्। तत्र पूर्वोक्तरीत्या धूमत्वत्वविशिष्टतादृशान्यतरत्वस्यैव प्रतियोगितावच्छेदकत्वेन
तस्य च साध्याभाववद्वृत्तित्वातिरिक्ततादृशवृत्तित्ववृत्तित्वात्। स्वभिन्नवृत्तिसमानाधिकरणधर्मानवच्छिन्नत्वेन प्रतियोगिताया
विशेषणाद्वा। स्वव्यापकेत्यस्य फलमाह। पाञ्जोकाद्यवृत्तित्वेनेति। निर्वह्निवृत्तित्वं तु घटादिसाधारणम्। पाञ्जोकाद्यवृत्तित्वाभाव वच्छिन्ना
प्रतियोगितायां न व्यापकमिति भावः। तादृशवृत्तित्वत्वव्यापकप्रतियोगितेत्यस्य फलमाह यथेति। वह्नित्वावच्छिन्नव्यापकतावच्छेदक
वच्छिन्नो रूपाभावप्रदर्शनाय इन्धनत्वेति। साध्यतावच्छेदकसंबंधावच्छिन्नत्वप्रदर्शनाय वह्न्यभावेत्युक्तम्। महानसवृत्तित्वाभावस्य पर्वतीयवृ त्वम

मादौ सत्त्वेपि धूमत्वावच्छेदेनासत्त्वात्। न व्याप्तिर्धूमवृत्तित्वाभावस्याद्रेंधनजवह्नौ सत्त्वादतिव्याप्तेः। तथा चासंभव इति भावः। म
हानसावृत्तिहेतुस्थले महानसवृत्तित्वाभावस्य सत्त्वात्तमादायासंभवस्य स्फुटत्वान्नस्यादतोऽसंभवमेव स्फुटीकर्तुं साधारणशब्दे
नाह स्वनिष्ठेति। स्वनिष्ठं यत्साध्याभाववद्वृत्तित्वं तद्भिन्नहेत्वस्यार्थः। प्रमेयहेतुकस्थलेप्येकप्रमेयनिष्ठतादृशवृत्तित्वस्य प्रमेयान्तरेऽभावस्य
स्यतत्प्रमेये सत्त्वादसंभव इत्येतत्सूचनाय प्राह हेत्वन्तरवृत्तेरिति। हेतुतावच्छेदकसंबंधेन वृत्तिमद्वृत्तित्वप्रदर्शनाय हेत्वन्तरहेते
रिति तु केचित्। कृतिः। अव्याप्तिः। असंभवश्च। यत्तु तत्र साध्यसमानाधिकरणत्वं हेतौ विशेषणम्। तेन ज्ञात्यभाववान् सत्त्वादि
त्यादौ ज्ञात्यभाववत्समवेतत्वस्यैव तादृशाभावो व्यधिकरणधर्मावच्छिन्नाभावः। तस्य च सत्त्वादौ सत्त्वेपि नातिव्याप्तिरिति तन्न। घटा
वृत्तित्वादेरपि ज्ञात्यभावव्यापकतावच्छेदकतया तदवच्छिन्नाभावस्य समवेतत्वाभावस्य घटादिहेतौ सत्त्वाप्यसंभवादेवातिव्या
प्त्यनवकाशात्। परं त्ववृत्तिसाध्यकवृत्तिहेतुके वातिव्याप्तिवारणाय साध्यसमानाधिकरणत्वं हेतौ साध्ये हेतौ वा तादृशवृत्तिमत्त्वं
विशेषणमित्युचितम्। न च अपि महाकालान्यत्वादिसाध्यककालिकसंबंधेन हेतौ व समानतिव्याप्तिर्दुर्लक्ष्या। कालिकसंबंधेन वृत्ति
मद्वृत्तिमहाकालान्यत्वाभाववद्वृत्तित्वाभावस्याधिकरणधर्मावच्छिन्नस्यैव संभवात्। परं तु तदतिरिक्तदोषाणामप्रसंभव इति कृत्वैव
परैस्तितिकेत्येव स्पलक्षणस्य परयुपन्यास इति ध्येयम्। असंभवेति। प्रमेयं घटत्वादित्यादौ साध्याभावसमुदायाधिकरणसमवेतत्वत्व

भावानंद

समुदायपदव्यावृत्तिरात्र संगच्छत इत्याशयेन प्रथमलक्षणं ३

समनियतप्रतियोगिताकस्य समवेतत्वत्वावच्छिन्नसमवेतत्वाभावस्याभावादिवृत्तेर्हेतावभावादव्याप्तिरतो वृत्तिमद्व्यमिति। तद
र्थस्त्वपूर्ववद्बोध्यः। यदधिकरणधर्मावच्छिन्नप्रतियोगिताकसाध्याभावसमुदायाधिकरणवृत्तित्वाभावस्य व्यभिचारिणि सत्त्वादतिव्या
प्तिरत उक्तं यावदिति। साध्याभाववद्वृत्तित्वत्वव्यापकप्रतियोगिताकत्वविवक्षणे एवैतादृशवृत्तित्वाभावं व्यावर्त्य तादृशेति। स्वव्या
पकेति। स्वप्रतियोगितास्वव्यापकं यत्साध्याभाववद्वृत्तित्वत्वं तद्व्यापकप्रतियोगिताक इत्यर्थः। उक्तप्रायमिति। वह्निमान्धूमादित्यत्रालो
प्रतियोगिताकस्य वक्तव्य कावृत्तित्वावच्छिन्नाभावसमुदायाधिकरणवृत्तित्वाभावस्य धूमेऽसत्त्वात्त्वव्यापकतादृशवृत्तित्वत्वेति। तादृशवृत्तित्वत्व
व्यापकप्रतियोगिकेत्यस्य व्यावृत्तिरुक्ता न वह्निमान्धूमादित्यादौ तत्र महानसादेः साध्याभावसमुदायाधिकरणत्वाभावात्। किंतु प्रमे
यं घटत्वादित्यत्र साध्याभावसमुदायाधिकरणीभूतघटसमवेतत्वाभावस्य घटे सत्त्वात्तादृशवृत्तित्वत्वव्यापकत्वं प्रतियोगिताया अभि
तिव्याधिकरणधर्मावच्छिन्नाभावेति। निर्धूमवृत्तित्वाभावप्रतियोगिता न साध्याभाववद्वृत्तित्वत्वव्यापिका। साध्याभावत्वेन साध्या
भावस्य केवलान्वयितया तद्वृत्तित्वस्य धूमादिनिष्ठवृत्तित्वेपि सत्त्वादतस्तादृशवृत्तित्वाभावो व्यधिकरणधर्मावच्छिन्नप्रतियोगि
ताक एव वृत्तिमति संभवतीति भावः। प्रतियोगिताव्यापकता तादृशवृत्तित्वत्वेत्यत्र समुदायपदव्यावृत्तिरुक्ता ... लोकावृत्तित्वं तार
त्वी सत्त्वाभावस्य धूमादिवृत्तेरव्याप्तिवारणाय पूर्वदलमिति ... न च व्यापकदले समुदायपदत्यागे धूमवान्वह्नेरित्यादौ नातिव्या

(साध्याभावाधिकरणजगद्वृत्तित्वत्वव्यापकप्रतियोगिताकस्य)
(साध्याभावसमुदायाधिकरणनिर्वह्निवृत्तित्वत्वव्यापकप्रतियोगिताकस्य)

DR. BHAU DAJI MEMORIAL

५

१ प्रि॥ जगद्वृत्तित्वाभावप्रतियोगितायाः साध्याभावकूटाधिकरणवृत्तित्वत्वसामान्यव्यापकत्वात्। निर्धूमवृत्तित्वाभावप्रतियोगितायाः साध्या
भाववद्वृत्तित्वत्वाव्यापकत्वात् च तादृशाभावाप्रसिद्धेः। किंतु वह्निमान्धूमादित्यत्राव्याप्तिरुक्तक्रमेणेति भावः॥ व्यापकदलेऽपि समु
दायपदादाने प्रागुक्तालोकावृत्त्यभावस्य साध्याभाववद्वृत्तित्वत्वव्यापकप्रतियोगिताकत्वाभावात्समादाय व्याप्तिरसंभवेन स्वव्यापके
त्यादि पूर्वदलमेव न देयम्। तथा च वह्निमान्धूमादित्यादौ व्यधिकरणधर्मावच्छिन्नाभावमादायैव लक्षणगमनात्। किंत्वतिव्याप्ति
रेव। अत एव पूर्वदलं परित्यज्य साध्याभाववद्वृत्तित्वत्वव्यापकप्रतियोगिताकस्येत्येव लक्षणमुक्तम्। व्यापदिशि समुदायपदप्रवेशेना
लोकावृत्त्यभावोऽपि तादृशसमुदायाधिकरणवृत्तित्वत्वव्यापकप्रतियोगिताक इति तमादाय व्याप्तिसंभवेन पूर्वदलं सप्रयोजनकमिति भा
वः। धूम इत्यादि सप्तम्यंतत्रयं नातिव्याप्तिरित्यनेनान्वितम् अतिव्याप्तेः। साध्यत्वेन नु समवायेन वह्निमति धूमस्य वह्नेस्तरस्य च संयोग
सत्त्वेपि तस्य वृत्त्यनियामकत्वात्तादृशसाध्ये धूमावयववत्त्वं च विरुद्धम्। तच्च साध्यसामानाधिकरण्यविशेषणेनैव वारणी
यम्। गगनाकाशादिसाध्यकविरुद्धादिवारणाय तद्विशेषणस्यावश्यकत्वादाह। पर्वतवह्न्यवयवसंयोगे चेति। समवायेन संयो
गेन च साध्यत्वेपि पर्वतवह्न्यवयवसंयोगो व्यभिचारी। इदमुपलक्षणम्। कालत्वेनिर्लिप्तात्मत्वादित्यत्र दैशिकसंबंधावच्छिन्नका
लभेदाभावकालिकसंबंधावच्छिन्नकालभेदाभाववद्व्याधिकरणाप्रसिद्धा प्रमेयं ... त्मत्वादित्यत्र कालिकसंबंधावच्छिन्नप्र त्र२
मेयत्वाभावघटितकूटाधिकरणं कालादिभिन्नमेव तद्वृत्तित्वाभावस्यात्मत्वेऽसत्त्वादव्याप्तिरपि द्रष्टव्या। संबंधद्वयेति

भाव

पर्वतस्य संयोगावच्छिन्नवह्न्यभावानधिकरणत्वे वह्निव्याप्यवत्त्वसमवायावच्छिन्नवह्न्यभावानधिकरणत्वमिति बोध्यम्। प
र्यवसितं कालावच्छेदे नोभयोरभावद्वयाधिकरणत्वमेव तथापि संयोगी सत्त्वादित्यत्राऽतिव्याप्तिवारणाय विवक्षणीयस्य
तावदभावस्य व्याप्यवृत्तित्वनिरूपकाधिकरणत्वस्य पर्वते वह्न्यभावे चासंभवदुक्तप्रायेणेदं। वस्तुतस्तु तत्तदधिकर
णसाध्यतावच्छेदकसंबंधेन स्वप्रतियोगितावच्छेदकविशिष्टसाध्यवत्ताग्रहविरोधितावच्छेदकसंबंधेन वसाध्याभावाधिकर
णता वाच्या। न तु संबंधसामान्येन दैशिकसंबंधेन वा। अन्यथा द्रव्यं गुणादित्यादौ कालिकसंबंधेन साध्याभावकूटाधिक
रणे काले गुणस्य वृत्तेः। कालिकसंबंधावच्छिन्नप्रतियोगिताकआकाशाभावस्याभावे साध्ये तदभावस्य आकाशत्वाभाव
स्य दैशिकतया अधिकरणे आत्मनि आत्मत्वादेर्वृत्तेरव्याप्तिस्तथा संयोगी सत्त्वादित्यत्रापि नातिव्याप्तिः। संयोगाभावस्य व्याप्
द्रव्यवृत्तितायाः संयोगवत्ताग्रहाविरोधित्वेपि गुणवृत्तितायाविरोधित्वात्। गुणे च सत्तायाः सत्त्वात्। केवलान्वयिनि च ताद
शप्रतियोगितावच्छेदकविशिष्टसाध्यवत्ताज्ञाने तन्नमरूपमेव प्रसिद्धं न तु घटत्वेन वा अत्वेनास्तीत्यभाववत्ताज्ञाने नियम
तो घटत्वविशिष्टवाच्यत्ववत्ताधीप्रतिबंधः। तथा च व्याप्यवृत्तितानिरूपकाधिकरणत्वं स्वातंत्र्येण विशेषणं नदेयं। अतएवाह पर्व
तस्य वह्निव्याप्यवत्त्वसंबंधद्वयावच्छिन्नाभावद्वयानधिकरणत्वेपीति ध्येयम्। कपिसंयोगाभाववान् [illegible] मेयत्वादित्यादौ कपिसंयो

न

गघटिततादृशसाध्याभावकूटस्य प्रतियोगितावच्छेदकविशिष्टसाध्यवत्ताग्रहविरोधिग्रहविषयसंबंधाप्रसिद्ध्याव्याप्तिरतो व्या
प्यवृत्तित्वमभावे विशेषणमावश्यकं। कपिसंयोगस्तु यत्किंचिदधिकरणेपि न व्याप्यवृत्तिरिति तत्र अधिकरणधर्मावच्छि
न्नाभावमादायैव लक्षणसमन्वय इति। अत्र च संप्रदायमते वृत्तिमत्त्वमप्यभावे विशेषणं देयम्। तेनाकाशाभाववसाध्यके
नाव्याप्तिः। वस्तुतस्तु व्याप्यवृत्तित्वविशेषणदानेनैव वृत्तिरूपोऽभावो वारित इति ध्येयम्। अत्र पूर्वोक्तरीत्या साध्याभा द्वितीय
वे उक्ते नानाविपक्षप्रायश एवाव्याप्तिः। तत्तद्विपक्षावृत्तित्वावच्छिन्नाभावकूटाधिकरणाप्रसिद्धेरतोऽन्यथा साध्याभावं
निर्वक्ति। तथेति। स्वेति। स्वप्रतियोगितातद्व्यापकीभूतं यत्साध्यतावच्छेदकं तद्व्यापकाभावप्रतियोगितातादृशाभाव
इत्यर्थः। स्वव्यापकेत्यस्य व्यावृत्तिमाह। पृथिवीत्वाभावादाविति। वह्निमान् धूमादित्यादौ संयोगावच्छिन्नतत्तद्धूमावृ
त्तित्वा[illegible]वच्छिन्नप्रतियोगिताकाभावकूटाधिकरणं गुणादेव प्रसिद्धम्। अतस्तत्र कूटाधिकरणाप्रसिद्ध्या नाव्या
प्तिः। किंतु कूटाधिकरणे हेतुतावच्छेदकसंबंधेन हेतोरप्रसिद्ध्या। तादृशाव्याप्तिस्तु निरुक्तसाध्याभावविवक्षणेपि सत्ता
वान् जातेरित्यादौ न विघटते इति तन्नोदाहृतम्। पृथिवीत्वाभावस्य विपक्षः पृथिवी तदवृत्तित्वा[illegible]वच्छिन्नाभावस्य
पृथिवीवृत्तित्वात् कूटाधिकरणस्याप्रसिद्धिरतस्तन्नदिति। तत्र वह्नौ नाव्याप्तिरित्यग्रेतनेनान्वयः। पा।

भावानंदीराम
श्रीरामायनमः

साह।

वतामैकाधिकरण्पेसंभवतिइतिविवक्षायामप्युक्ताव्याप्तिरुद्धर्तुंशक्यतइत्यतआह।पृथिवीत्वादाविति।जा
तित्वावछि न्नाभावस्यसाधनसमानाधिकरणत्वेनसाध्याभावेविशेषितेपिवारणसंभवादाह।आदीति।त
थाचजलाद्यवृत्तित्वावच्छिन्नाभावस्यतेजोवृत्तित्वावच्छिन्नाभावस्यचतादृशस्यकूटाधिकरणेजात्यादावप्रवृत्ते
रतिव्याप्तिर्दुष्परिहरा।समवायेनहेतुतायांतादृशसाध्याभावकूटाधिकरणेजात्यादौसमवायेनहेतोरप्रसि
४ तिव्याप्तिवि द्धेर्मुखे ।द्रव्यत्वप्रकारकेति।सर्वंद्रव्यमितिभ्रमविषयत्वस्यजात्यादावपिसत्वादाह।प्रमेति।साध्याभाव
५रहाद्रव्यस्त्व स्यसाधनसमानाधिकरणत्वविशेषणेपिप्रतियोगितायाःसाध्यतावछेदकव्यापकत्वविवक्षणेप्रयोजन
माह।नाप्यभावत्वादिनेति।आदिनाप्रमेयत्वेनप्रमेयादिःसाध्यताग्रहः।एवंचात्रअधिकरणधर्मावच्छिन्न
प्रतियोगिताकोभावत्वेनाभावाद्यभावएवलक्षणघटकइतिध्येयम्।तत्साध्येति।घटत्वाभावस्यघटत्वा
३ पटत्वस्य स्यपटत्वाभावाभावस्यचैकाधिकरण्याभावेनतद्घटि तकूटाधिकरणाप्रसिद्धेरितिभावः।यावतामेकाधिक वाता ४
रण्पसंभवतीतिविवक्षायामपिअधिकरणधर्मावच्छिन्नाभावसमूहेनघटत्वस्यैकाधिकरण्पसंभवात्तद्घटि
२ स्पहेतौ॰प तकूटाधिकरणघटवृत्तित्वाभावेभावादव्याप्तिरेव।अतएवमूर्तत्वमूर्तत्वान्यतराभावेवान्यस्पर्शवदन्यत्वा

राम

46

७७

भावइत्युक्तार

त्वादिसाध्यकेतिव्याप्तिवारणाययादृशसाध्याभावकूटाधिकरणेसाधनाधिकरणेतादृशाकूटवद्वृत्तित्वंविवक्षितव्या
त्वा२ प्तिरेवेतिध्येयं।नचप्रमेयसाध्यकेघटाभावत्वेनप्रमेयसामान्याभावस्यसाध्यतावछेदकसमनियतप्रतियोगिता
कस्यतादृशअधिकरणधर्मावछिन्नाभावेनसमंसंभवदैकाधिकरण्पस्याधिकरणेघटादौप्रमेयत्वादिहेतोर्वृ
त्तेरव्याप्तिरितिवाच्यम्।स्वन्यूनवृत्तिसमानाधिकरणधर्मानवछिन्नप्रतियोगितायाःसाध्यतावछेदकसमनियतत्व
विवक्षणात्।घटवत्प्रमेयनिष्ठप्रतियोगितायाःन्यूनवृत्तिसमानाधिकरणमिवघटत्वाभावत्वादीतितदवछिन्नप्रमे
यसामान्याभावस्यलक्षणाघटकत्वात्।अत्रचतदभावनिरूपितायाःयत्किंचित्प्रतियोगितायाअक्षेःसमनैयत्यंवा
च्यं।तेनवह्निमान्धूमादित्यादौवह्नित्वावछिन्नवह्न्यभावप्रतियोगितायावह्निध्वंसप्रागभावनिष्ठायाघटत्वे
नवह्न्यभावस्यापिवह्नित्वेनघटाभावाभिन्नतयाघटादिनिष्ठायाःस्वीयनिष्ठायाअधिकरणधर्मावछिन्नाभाव विशिष्टाभाव
प्रतियोगितायाअव्यापकत्वेपिवह्नित्वस्यनक्षतिः।इदंतुप्रतियोगिभेदेपिप्रतियोगितावछेदकैक्येनप्रतियो
गितैक्यमतेउक्तम्।प्रतियोगिभेदेनप्रतियोगिताभेदेतुयदभावीययत्किंचिदवछेदकाव   वछिन्नप्रति
योगितात्वेनसाध्यतावछेदकसमनैयत्यंवाच्यम्।तेननानाव्यक्तिसाध्यकसंग्रहः।नचप्रमेयंवाच्यत्वादित्यादौ

भावानंदीय

घ२

घटत्वेन प्रमेयत्वाद्यभावस्यापि घटत्वेन वाच्यत्वाद्यभावाभिन्नतया घटत्वावच्छिन्नप्रतियोगितात्वेनापि न प्रमेयत्वत्वा
२ मिति समनियतत्वं वा अमू। प्रमेयत्वभिन्नत्वेन प्रमेयत्वं नास्तीति धीबलात् प्रमेयत्वभेदस्यापि तादृशाभावप्रतियोगितावं
च्छेदकत्वात् तादृशाभावप्रतियोगितायाः प्रमेयत्वमात्रनिष्ठतया प्रमेयत्वत्वसमनियतत्वात्। एवं वह्निभिन्नत्वेन व
ह्निर्नास्तीति धीबलात् तादृशावच्छेदकावच्छिन्नप्रतियोगितायाः वह्नित्वसमनियतत्वात् तदभावोत्तिदूषणं घटकोभ पि४
वतीति ध्येयम्॥ पृथिवीसमवेत   प्रमेयत्वादित्यत्र पृथिवीसमवेतत्वगुरुतया प्रतियोगितानवच्छेदक
त्वेऽपि पृथिवीसमवेतमितिधीविशेष्यतावच्छिन्नप्रतियोगिताकः पृथिव्यवच्छिन्नप्रतियोगिताको वाऽभावः साध्य
तावच्छेदकसमनियतप्रतियोगिताक इति तत्र व्याप्तिरिति। ननु स्वव्यापकसाध्यतावच्छेदके स्वस्य स्वावच्छेदक
समानवृत्तिकस्वव्यापकीभूतसाध्यतावच्छेदकेत्यर्थः। तथा च नेदं दूषणम्। साध्यतावच्छेदकीभूतोभयत्वस्य व्या
सज्यवृत्तितया प्रत्येकपर्यवसितवृत्तिकतादृशप्रतियोगितावच्छेदकीभूतान्यतरत्वासमानवृत्तिकत्वादत आह॥
अपि चेति। द्रव्यत्वत्वादीत्यादिपदात् जलत्वादिवृत्तित्वविशिष्टद्रव्यत्वत्वादीनामवच्छेदकानां संग्रहः। ननु सार्वभौम
मते विशिष्टमतिरिक्तमेवेति द्रव्यत्वत्वावच्छिन्नाभाव एवोक्तसाध्यतावच्छेदकसमनियतप्रतियोगिताकः। परं तु

रामः

४७ 47

वत्र

रेके तु परंपरया पृथिव्यन्यत्वद्रव्यत्व   संबंधस्यैव साध्यत्वान्नोक्तदोष इत्यत आह। किंचेति। केचित्तु विशिष्टप
र्याप्त्यैव विशिष्टाभावप्रतियोगिता तथा च समनैयत्यं समनियतावच्छेदकत्वं द्रव्यत्वाभावप्रतियोगिता तु पृथिव्य
वच्छेदेनापि द्रव्यत्वे वर्त्तते न तु तदवच्छेदेन तत्र पृथिव्यन्यत्वविशिष्टद्रव्यत्वत्वमिति द्रव्यत्वाभावे नोक्तसाध्यतावच्छेदक
४ वच्छेदकक समनियतप्रतियोगिताक इत्यतः किंचेत्याहुः। परे तु प्रतियोगितावच्छेदकावच्छिन्नसाध्यतावच्छेदकावच्छिन्नयोः स
५ संग्रहः। मनैयत्यं वा अमू। तेन द्रव्यत्वत्वाद्यवच्छिन्नाभावः। द्रव्यत्वत्वावच्छिन्नपृथिव्यन्यद्रव्यत्वत्वावच्छिन्नयोः समनैयत्याभावा
त्। वह्निमान् धूमादित्यत्र वह्नित्वेन घटाभावे वह्नित्वावच्छिन्नवह्न्यभावे वा दायलक्षणसमन्वयः। प्रमेयवान् अभिधेयात्
त्वादित्यादौ स्वरूपसंबंधेन समवायेन च साध्यतायां वाच्यत्वत्वादिना सत्तात्वादिना घटाभावमादाय लक्षणसमन्वयः। त
था च स्वव्यापकसाध्यतावच्छेदके त्यादेः स्वस्वावच्छेदकावच्छिन्नव्यापकतावच्छेदकसाध्यतावच्छेदकावच्छिन्नव्यापकतावच्छे
दकरूपावच्छिन्नप्रतियोगिताकेत्यर्थः। अत एव विशिष्टाभावनिरासः। अत एवात्र स्वन्यूनेत्यादि न देयमित्याहुः। तन्न प्रमेय
वान् अभिधेयादित्यादौ तादात्म्येन साध्यतायां तादृशसमनियतप्रतियोगिताकाभावाप्रसिद्धेरति प्रसिद्धिरिति। कालः।

स्य सकलरूपाधिकरणत्वेपि साध्यवत्ताग्रहविरोधिसंबंधेनानधिकरणत्वादिति पूर्वोक्तरूपानुपपत्त्या तस्या
वश्यं वाच्यत्वादिति ध्येयम्। संयोगाभावसाध्यके संयोगरूपस्य साध्याभावस्य यत्किंचिदधिकरणेऽव्याप्यवृ
त्तित्वाभावाभावात् तादृशसाध्याभावाव्यधिकरणधर्मावच्छिन्नाभाव एव तत्कूटाधिकरणाप्रसिद्ध्याभावाद्रूपाभावानुस
रणम्। रूपस्याव्याप्यवृत्तित्वेपि जलादिपरमाणुरूपाणां व्याप्यवृत्तित्वात्तत्कूटाधिकरणप्रसिद्धिर्वेद्या। यावत्ताभि
ति। तथा च व्यधिकरणधर्मावच्छिन्नाभावमादायैव संभवदेकाधिकरण्यस्य तत्तद्रूपस्याधिकरणेऽवृत्तित्वस्य प्रसिद्धि
संभवान्नाव्याप्तिरिति भावः। पृथिवीति। पृथिवीपदं एतत्पृथिवीपरम्। अन्यथा घटवायुद्वित्वघटवायुद्वित्वयोः वायोः सं
भवदेकाधिकरण्ययोरधिकरणत्वस्य वायावेव संभवात्तद्वृत्तित्वाभावस्य हेतावसत्त्वादतिव्याप्तेरभावात्। नन्विदं
पृथिवीवृत्तिगुणत्वव्याप्यं वायुत्वादिति सद्धेतुरेव जन्यवायोरुत्पत्तिकालावच्छेदेन नित्ये च महासत्तयावच्छेदेन पृथिवीवृत्ति
गुणसामान्याभावसत्त्वादत आह सत्तान्येति। समवेतत्वावच्छिन्नाभावसाध्येनातिव्याप्तिसंभवनासंभवदेकाधिक
रण्यापन्नसमवेतकूटस्याधिकरणे वायौ हेतोर्वृत्तेः। पृथिवीसमवेतप्रतियोगिताकाभावत्वेन साध्यत्वे यो सद्धेतुत्वे
पृथिवीसमवेतत्वावच्छिन्नाभावस्याप्रसिद्धत्वान्न साध्यत्वाघवेन तदभावप्रतियोगितायाः समवेतत्वमात्रावच्छेद्य

रा म

४८

अप्रतिबाध्यस्य सत्त्वात्

त्वात् पृथिव्यवच्छिन्नाभावस्य संभवेपि समवेताभावसमनियततया समवेतमात्रस्यैव तदभावतया तद्घटित
कूटाधिकरणत्वस्य च वायौ संभवादतः पृथिवीति। सत्तान्येति च। अत्रापि पृथिवीपदं एतत्पृथिवीपरं। पृथिवी
वृत्तिपदं पृथिवीपर्याप्तवृत्तिकपरं। तेन न पूर्वोक्तरीत्या वायोरपि तादृशाभावकूटाधिकरणतेति ध्येयम्। वायु
त्वस्य विरुद्धतया साध्यसामानाधिकरण्यविशेषणेनैव वारणादाह। रूपवदन्यत्वादिति। रूपाभावस्योत्पत्तिकालेपृथिव्यामा
विरुद्धत्ववारणायाह पि सत्त्वादाह अन्यत्वादिति। एतस्य हेतोर्गुणत्वे प्रकृतसाध्यसामानाधिकरण्यमिति मंतव्यं। ननु सत्तान्यपृथिवीसमवेताभाव
स्य सत्तान्यद्रव्यसमवेताभावाभिन्नतया सत्तान्यद्रव्यसमवेतमात्रस्यैव तदभावतया संभवदेकाधिकरण्यापन्नवायु
मात्रसमवेततदभावाधिकरणे वायौ हेतोर्वृत्तेर्नातिव्याप्तिरित्यस्वरसादाह वस्तुत इति। तादृशाभावो व्यधिकरणधर्मा
वच्छिन्नप्रतियोगिताकाघटत्वादिना रूपसामान्याभावः। तथा च सर्वाण्येव रूपाणि तादृशाभावसहस्त्रेणसंभवदेकाधि
करण्यानीति तदधिकरणाप्रसिद्ध्याव्याप्तिर्दुर्वारैवेति भावः। ननु यादृशसाध्याभावस्यैव न समानाधिकरणो या
दृशसाध्याभावस्तादृशकूटवद्वृत्तित्वाभावो यावत्तस्य हेतुत्वं विवक्षितं। प्रकृते च तत्तद्रूपस्य व्यधिकरणधर्मावच्छिन्नाभा

वस्तोमसमानाधिकरणस्याधिकरणे तत्तद्रूपाधिकरणमेव प्रसिद्धं तद्वृत्त्यभावस्य वायुत्वे सत्त्वादेवनाव्याप्तिरतः किं
चेति एकाधिकरणावच्छेदकयावत्त्वावच्छिन्नाधिकरणत्वं निरुक्तसमुदायाधिकरणत्वं वा अस्य। निखिलरूपवृत्तिया
वत्त्वं तु नैकाधिकरण्यावच्छेदकम्। अपि तु तत्तद्रूपव्याधिकरणधर्मावच्छिन्नाभाववृत्तियावत्त्वमिति तदवच्छिन्नाधिकर
णं प्रत्येकरूपाधिकरणमेव प्रसिद्धमतः किंचेत्तीति कश्चित्। यत्तु। साध्यतावच्छेदकसमनियतप्रतियोगितात्वव्यापकं
यदधिकरणवृत्त्यभावप्रतियोगितात्वं तदेव निरुक्तसमुदायाधिकरणं वा अस्य। प्रकृते रूपसामान्याभावनिष्ठायाः
तद्रूपनिरूपितायाः प्रतियोगितायाः एकत्वात्तत्तद्रूपाधिकरणनिष्ठाभावप्रतियोगितात्वे तादृशप्रतियोगितात्वव्या
पकमेवेति तत्तद्रूपाधिकरणमेव तादृशाकूटाधिकरणं प्रसिद्धमतः किंचेतीति तन्न। प्रथमत एव तथाविवक्षणे भूतत्व
मूर्त्तत्वान्यतराभाववान् स्पर्शवदन्यत्वादित्यत्र वक्ष्यमाणातिव्याप्तेरङ्गकतापत्तेः। तत्रापि तादृशान्यतराभावनिष्ठायाः प्र
तियोगिताया एकत्वान्मनोनिष्ठाभावप्रतियोगितात्वस्य तादृशप्रतियोगितात्वव्यापकत्वान्मनसो कूटाधिकरणत्वेनातिव्या
प्तेरभावात्। साध्याभावसमुदायाधिकरणेऽसमवेतत्वात्तादिनाभावः संबंधत्वेन वा। आद्यधूमादावित्ति। तादृशसर्वाभा

राम

४७

ननु वृत्तम
ध्वंसाभिन्नं
पाकाद्य
भावादि
त्यादौ

वकूटवत्समवेतत्वाभावस्य संयोगेन वृत्तिमति परमाणौ वर्तमानस्य धूमाद्यभावाभावादित्यर्थः। अन्ते। साध्यतावच्छेदकेत्यादि
।कालस्य वृत्तिमन्मात्राधिकरणत्वात् साध्यस्याभाव एव तत्र कथमतः साध्यतावच्छेदकसंबंधेनेति। तथा च कालिकसंबंधेन
साध्यसत्त्वेऽपि साध्यतावच्छेदकसंबंधेन तदभावो न विरुद्धः। लक्षणघटकेन संबंधेनाभावस्यैव निवेशादिति भावः। कालादावि
त्यादिनाऽदैशिकतया विषयितया च सर्वाधिकरणीभूतदिक्सर्वविषयकज्ञानादिसंग्रहः। व्यभिचारिणि। धूमवान्वह्नेरि
त्यादौ तादृशसाध्याभावकूटवद्भूरमध्ये समवेतत्वाभावस्य घटादिप्रागभावात्मकवृत्तिमद्वृत्तेर्हेत्वभावादिति। सत्तादौ त्या
दिनासमवायेन संयोगेन वा प्रमेयसामान्यादेः साध्यतायाः संग्रहः। साधनसमानाधिकरणत्वेनेति। इत्थं च सर्वत्र सद्धेतौ व्या
धिकरणधर्मावच्छिन्नाभावस्यैव तादृशस्य साधनसामानाधिकरण्यात् समादायैव लक्षणसंगतिः। व्यभिचारिणि तु व्यभि
चारनिरूपकाधिकरणवृत्तिसमानाधिकरणधर्मावच्छिन्नाभावस्यैव तादृशत्वे तं समादायैव नातिव्याप्तिः। इत्थं च यथा साध्यता
वच्छेदकसमनियतप्रतियोगिताकत्वस्य व्याप्तिस्तथा पूर्वमेव बोधितमनेन चैवामपि सत्तावाञ्जातेरित्यादौ गुणान्यत्वविशि
ष्टसत्ताभावस्य कर्मान्यत्वविशिष्टसत्ताभावस्य च तादृशत्वात् सद्धेतौ कूटाधिकरणसामान्याद्यसमवायेन वृत्तेरप्रसिद्ध्याऽ
व्याप्तिरिति वाच्यम्। विशिष्टस्यातिरिक्तत्वे न गुणान्यत्वविशिष्टसत्तात्वस्य गुरुतया ताद्घवेन गुणान्यत्वस्यैवावच्छेदकतया
ननु साधनसमानाधिकरणत्वेन साध्याभावविशेषितत्वे व्यापकत्वस्य पूर्वं ... स्य मसंगतं जातिसामान्याभावस्य इत्थं च प्रकारद्वयेन प्रमावि
शिष्यतासत्त्वाद् समानाधिकरणत्वादनुग्राहक इत्थं चेतिबोधितानामिलितानां समवेता ... नो प्रत्येकसाधनसमानाधिकरणकूट

ऽकरणसामान्यादौ हेतोः प्रसक्त्यादिति भावः

गुणान्यत्वविशिष्टद्रव्यत्वाद्यवच्छिन्नतादृशाभावप्रतियोगितायाः सत्तात्वसमनियतत्वाभावात्॥ ननु मूर्तत्वं बहिरिन्द्रियग्रा
ह्यजातीयविशेषगुणवत्त्वम्। मूर्तत्वपरिच्छिन्नपरिमाणवत्त्वं। तच्च तादृशविशेषगुणपरिमाणपर्यवसितम्। तथा च स्पर्शव
दन्यत्वसमानाधिकरणयद्भूतत्वं मूर्तत्वं च शब्द मनःपरिमाणरूपं तच्च न पृथिव्यादाविति कथमतिव्याप्तिरत आह—आद्य इति। मूर्त
त्वे दमूर्तत्वे दन्यतराभाववान् मूर्तत्वामूर्तान्यतरत्वादित्यादावित्युभयत्रादिपदार्थः। मूर्तत्वमूर्तत्वोभयाभावे साध्ये स्पर्शवदन्यत्वा
दिके सद्धेतुरेवेत्यतोऽन्यतरत्वेनेति। स्पर्शसामान्याभावस्योत्पत्तिकालावच्छेदेन पृथिव्यादावपि वृत्तेरन्य त्वेनेति। तादृशसाध्या
भावसमुदायवति। मूर्तत्वमूर्तत्वाद्यात्मकसाधनसमानाधिकरणसाध्यतावच्छेदकसमनियतप्रतियोगिताकाभावसमुदायवति का
।ननु यावत्त्वं फलतस्तादृशप्रतियोगिताकत्वविशेषणं। तथा च साधनाधिकरणे स्वाश्रयद्वारकसंबंधेन संबद्धं यावत्साध्यतावच्छे
दकसमनियतप्रतियोगिताकत्वं स्वाश्रयद्वारकसंबंधेन यत्तदधिकरणे तद्वृत्तित्वाभावोऽर्थः। मूर्तत्वमूर्तत्वोभयनिष्ठं च तादृशान्य
तराभावत्वावच्छिन्नप्रतियोगिताकत्वमेकमेव तत्प्रतियोगितायाश्चैक्यात्। तस्याप्येवंचनि रूपकतासंबंधेन प्रतियोगिताक
त्वात्। तथा च मूर्तत्वनिष्ठं यदन्यतराभावत्वावच्छिन्नप्रतियोगिताकत्वं यच्च व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वं स्प
र्शवदन्यत्वसमानाधिकरणे तदधिकरणं मणौ नैव तद्वृत्तित्वाभावस्य च स्पर्शवदन्यत्वे सत्त्वादेव नातिप्रसंगः। साधनसमा श्रीराम
५

नाधिकरणाभावनिरूपिता यावती साध्यतावच्छेदकसमनियता प्रतियोगिता प्रत्येकं तन्निरूपकाभावाधिकरणं य
त्तदेव कूटाधिकरणम्। भवति हि तादृशान्यतरत्वावच्छिन्नाभावत्वावच्छिन्नप्रतियोगितानिरूपकमूर्तत्वात्मकाभावघटि
तकूटाधिकरणमनोपीति नातिप्रसंगः। इत्थं च पृथिवी द्रव्यत्वप्रकारकप्रमाविषयत्वात् भाववान्प्रमेयत्वादित्यादौ चा
तिव्याप्त्यव्याप्त्योर्वारणाय प्रतियोगितायाः साध्यतावच्छेदकव्याप्यत्वव्यापकत्वविवरणमपि संगच्छते। न चैवमपि विशिष्ट
५ न स्यातिरिक्तत्वमते पृथिव्यन्यत्वविशिष्टद्रव्यत्ववद्द्रव्यत्वादित्यादावतिव्याप्तिः। प्रसाम्यत्वा[illegible]विशिष्टद्रव्यत्वाभावपृथिव्य
न्यत्वविशिष्टद्रव्यत्वाभावयोरपि साधनसमानाधिकरणतादृशाभावतया तद्घटितकूटाधिकरणत्वस्य गुणएव संभवा
दिति वाच्यम्। साध्यतावच्छेदकविशिष्टसाध्यवद्वृत्तित्वसाध्यतावच्छेदकव्यापकीभूतस्वसमानाधिकरणधर्मावच्छिन्नप्र
तियोगिताकत्वोभयाभावरूपेण प्रतियोगिव्यधिकरणत्वेनाभावविशेषणात्। पृथिव्यन्यत्वविशिष्टद्रव्यत्ववद्द्रव्यत्वा
दित्यत्र पृथिव्यन्यत्वविशिष्टद्रव्यत्वाभावस्य द्रव्यत्वरूपसाध्यवद्वृत्तित्वसाध्यतावच्छेदकव्यापकीभूतधर्मावच्छिन्नप्रतियो
गिताकत्वोभयत्वान्नोक्तप्रतियोगिव्यधिकरणत्वं। तथा च साधनसमानाधिकरणतादृशप्रतियोगिव्यधिकरणोऽभावो।
अधिकरणधर्मावच्छिन्नाभाव एव तद्वृत्तित्वाभावस्य व्यधिकरणधर्मावच्छिन्नाभावस्यैव वृत्तिमद्वृत्तित्वादतिव्याप्तिरतः

साध्यतावच्छेदकविशिष्टेति। सद्धेतौ साधनसमानाधिकरणाभावमात्रस्यैव साध्यवद्वृत्तित्वात् तादृशाभावाप्रसिद्धि
रतः प्रतियोगितावच्छेदकत्वांतं। प्रमेयसाध्यके साध्यतावच्छेदकविशिष्टसाध्यवद्वृत्त्यधिकरणधर्मावच्छिन्नाभावस्याकाशा
त्मकसाध्यवत्साकाशत्वावच्छिन्नप्रतियोगिताकत्वात्तादृशाभावाप्रसिद्धिरतो व्यापकीभूतेति। प्रमेयत्वव्यापकीभूतधर्मा
वच्छिन्नप्रतियोगिताकत्वं तु समवायसंबंधेन प्रमेयसामान्याभावे प्रसिद्धम्। वह्निमान्धूमादित्यादौ घटत्वेऽवच्छिन्नाभावस्यापि
वह्नित्वेन घटाभावाभिन्नतया तादृशाभावाप्रसिद्धिरतः स्वसमानाधिकरणेति। नचैवमपि वृत्तित्वाभावस्याव्याप्यवृत्तित्वा
नंगीकारे संयोगी सत्त्वादित्यत्रातिव्याप्तिः तत्र संयोगसामान्याभावे संयोगवद्वृत्तित्वसंयोगत्वव्यापकस्वसमानाधिकरण
धर्मावच्छिन्नप्रतियोगिताकत्वाभावस्य सत्त्वेन निरुक्तप्रतियोगिव्यधिकरणत्वस्याधिकरणधर्मावच्छिन्नाभाव एव सत्त्वादिति
वाच्यम्। तादृशसाध्यवद्वृत्तित्वस्य किंचिदनवच्छिन्नस्य विवक्षितत्वात्तस्य च संयोगाभावेऽसत्त्वात् संयोगाभावस्य द्रव्यवृत्तितायां
उत्पत्तिकालादेरवच्छेदकत्वात्। नचैवमपि संयोगाभाववान्मेयत्वादित्यादौ संयोगस्यापि निरुक्तप्रतियोगिवैयधिकरण्या
दव्याप्तिरिति वाच्यम्। तादृशप्रतियोगिवैयधिकरण्यविशिष्टस्य हेत्वधिकरणेऽनवच्छिन्नवृत्तिस्तादृशाभावस्य साधनसमा
नाधिकरणाभावत्वेन विवक्षितत्वात् संयोगरूपाभावस्य हेत्वधिकरणे किंचिदनवच्छिन्नवृत्तिकत्वाभावादेव नाव्याप्तिः। संयोगा

समनियताभावे। व्याप्यकाशत्वस्य प्र। तियोगितासमाना। धिकरणत्वात्तादृशा। भावस्य तादृशवृत्तित्व प्रतियोगितासमाना। धिकरणधर्मावच्छि। न्नप्रतियोगिताकत्वा। भावाभावा रित्यर्थः

श्रीराम

५२

भावस्य गुणादावनवच्छिन्नवृत्तिकत्वाद्द्रव्ये वच्छिन्नवृत्तिकत्वाच्च संयोगी सत्त्वाद्द्रव्यत्वादित्यादौ नातिव्याप्तिरव्याप्तिर्वा। इत्थं च
साध्याभावस्याधिकरणता साध्यवत्ताग्रहविरोधिग्रहविषयसंबंधेनापि विवक्षणीया। कालिकसंबंधावच्छिन्नप्रतियोगिताक
स्याकाशत्वाभावस्याभावे साध्ये तदभावस्याकाशत्वाभावरूपस्यात्मनि निरुक्तप्रतियोगिवैयधिकरण्यविशिष्टत्वाभावादेवाव्या
प्तेरभावात्तदर्थनिर्गलितोऽर्थः। निरुक्तप्रतियोगिवैयधिकरण्यविशिष्टानवच्छिन्नवृत्तिकहेत्वधिकरणवृत्त्यभावनिरूपि
पिता यावती साध्यतावच्छेदकसमनियतप्रतियोगिता प्रत्येकं तन्निरूपकाभावस्यानवच्छिन्नवृत्त्यधिकरणे यत्सद्वृत्तित्वा
भावाभाववत्तावत्तिमद्वृत्तित्वम्। पृथिव्यन्यत्वविशिष्टद्रव्यत्ववद्द्रव्यत्वादित्यादौ अन्यान्यत्वविशिष्टद्रव्यत्वाभावमादायाति
व्याप्तेः। संयोगाभाववान्मेयत्वादित्यादौ संयोगरूपाभावे सत्तावान्जातेरित्यादौ सत्तात्वावच्छिन्नाभावं वादाय व्याप्तेश्च वार
णाय विशिष्टोक्तेर्वृत्तिकांतं वस्तुतोऽभावविशेषणम्। संयोगी सत्त्वादित्यादौ निरुक्तप्रतियोगिव्यधिकरणहेत्वधिकरणे
ऽनवच्छिन्नवृत्तिर्यः संयोगाभावस्तन्निरूपितप्रतियोगितानिरूपकाभावस्याधिकरणे जगदेव तद्वृत्तित्वस्य समनियतप्रति
योगिताकोऽभावो व्यधिकरणधर्मावच्छिन्नाभाव एव वृत्तिमद्वृत्तिरतोऽनवच्छिन्नेत्यास्तीति। तादृशवृत्तित्वाभावश्च तादृश
वृत्तित्वत्वव्यापकव्यासज्यवृत्तिधर्मानवच्छिन्नप्रतियोगिताको ग्राह्यः प्रमेयं सत्त्वादित्यत्र घटसमवेतत्वघटान्यसमवेत

२ रित्यव्याप्ति

त्वोभयाभावस्य तादृशावृत्तित्वव्यापकप्रतियोगिताकस्य पटत्वादिवृत्तेः सत्त्वाभावनावात्पूर्वोक्तरीत्यासेन वस्य वारण
यानवच्छिन्नान्तम्। साधनसमानाधिकरणतादृशाभावकूटवद्वृत्तित्वत्वव्यापकत्वस्यालोकावच्छिन्नाभावप्रतियोगिताया
मभावात्साध्याभाववद्वृत्तित्वत्वव्याप्यत्वं प्रतियोगितायां न देयमेवेति। अयं दर्शितदिशावसेयमत आह किं चेति। किंचि
त्तु स्वनिष्ठसाधनसमानाधिकरणतादृशसाध्याभावकूटाधिकरणसाधनाधिकरणवृत्तितादृशयावदभाववत्त्वं नि
रुक्तसमुदायाधिकरणत्वं। मूर्तत्वमूर्तत्वान्यतराभाववान्स्पर्शवदन्यत्वादित्यादौ च तादृशं स्वमनोपि। तिलद्वृत्तेः स्पर्श
वदन्यत्वेनातिप्रसंगः। अत्र साधनसमानाधिकरणपदादानेन निर्वह्निनिष्ठसाध्याभावकूटस्य वह्नित्वावच्छिन्नवह्न्यभा
वघटितस्याधिकरणे साधनाधिकरणत्वाभावात्स्वनिष्ठसाध्याभावकूटाधिकरणसाधनाधिकरणवृत्तियावत्साध्याभावव
द्वह्निमदेव तद्वृत्तित्वाभावस्य धूमादावभावादव्याप्तिः स्यादतः साधनसमानाधिकरणेति। साधनाधिकरणपदानेन धूमाभाव
वान्वायुत्वास्तावान्ज्ञानेरित्यादौ च स्वनिष्ठसाधनसमानाधिकरणतादृशसाध्याभावकूटाधिकरणवृत्तेर्यावद्रूपघटि
तयावत्साध्याभावस्य यदधिकरणं तस्य हेतुतावच्छेदकसंबंधेन तद्वृत्तित्वस्य चाप्रसिद्धिः। सद्धेतौ चैतादृशं स्वं गगनदेवव्य
तिचारिणि विपक्ष एवमूर्त्तत्वेगादित्यादौ अमूर्त्तनिष्ठं यन्मूर्त्तत्वगंधत्वोभयाभावमूर्त्तत्वपृथिवीत्वोभयाभावादिघटि

तस्यैव स्वपदेना ... तादृशस्य हेतोरधिकरणपदं ताघवृत्तित्वात्। न चैहेत्वधिकरणवृत्तेः साध्यतावच्छेदकसमनियतप्रतियोगिता ... श्रीराम
कस्य यदधिकरणं ... तादृशाभाववद्वृत्तित्वं ... समनियतप्रतियोगिताकस्य ... तद्वृत्तित्वाभावस्य हेतावप्यभावादव्याप्तिरिति वाच्यं। तादृशकूटाधिकरणस्य
वृत्तित्वसमनियतप्रतियोगिताकाभावस्यैव तन्मते विवक्षितत्वात्। न च साधनसमानाधिकरणपददानेपि ... वह्निमत्तादृशकूटाधिकरणस्य ... तादृशकूटाधिकरणत्वेन वह्निमद्
वृत्तित्वावच्छिन्ना ... अत एव तादृशतादृशाय ... वह्निरेव ... देयं।

तनादृशसाध्याभावकूटवत्त्वं तस्य हेत्वधिकरणे सत्त्वात्स्वनिष्ठसाधनसमानाधिकरणसाध्यतावच्छेदकव्यापकप्रतियोगि
ताकाभावकूटाधिकरणसाधनाधिकरणवृत्तिसाध्याभावकूटाधिकरणे मूर्त्तमेव तद्वृत्तित्वाभावस्य हेतावभावादव्या
प्तेः। मूर्तत्वाभावमूर्तत्वाभावान्यतरवान्स्पर्शवदन्यत्वादित्यादौ पृथिव्यादिनिष्ठमूर्तत्वमूर्तत्वघटितसाध्यतावच्छेद
कव्याप्यप्रतियोगिताकाभावकूटवत्त्वस्य साधनाधिकरणेऽभावात्। तादृशं स्वं पृथिव्यादिभिन्नमेव तद्वृत्तित्वाभाव
स्य हेतावभावादव्याप्तिश्च वारणाय साध्यतावच्छेदकव्याप्यत्वव्यापकत्वे प्रतियोगिताविशेषणे। मूर्त्तमनस्त्वादित्यादौ
पृथिव्यादेः स्वनिष्ठसाधनसमानाधिकरणसाध्यतावच्छेदकसमनियतप्रतियोगिताकाभावकूटाधिकरणसाध
नाधिकरणवृत्तिर्मूर्त्तत्वमनोन्यत्वाभावादिघटितसाध्यतावच्छेदकव्यापकप्रतियोगिताकाभावकूटानधिकरणत्वे
न तादृशं स्वं पृथिव्यादिभिन्नं तद्वृत्तित्वाभावस्य हेतावभावादव्याप्तिः। मूर्तत्वाभावमूर्तत्वाभावान्यतरवान्स्पर्शवदन्य
त्वादित्यादौ वा आदौ न स्वनिष्ठसाधनसमानाधिकरणतादृशसाध्याभावकूटाधिकरणसाधनाधिकरणवृत्ति मूर्त
त्वादिघटितसाध्यतावच्छेदव्याप्यप्रतियोगिताकाभावकूटवत्त्वं तादृशं च स्वं मूर्त्तादिकमेव तद्वृत्तित्वाभावस्य हेतावभा
वात् व्याप्तिर्वारणाय द्वितीयदले प्रतियोगितायां साध्यतावच्छेदकव्याप्यत्वव्यापकत्वे विशेषणे। एवं च तादृशं यत्स्वं ता

वह्निविशेष्यकधीविशेष्यवृत्तित्वत्वसमनियतप्रतियोगिताकत्वं वाच्यम्। तेन वह्निमान्धूमादित्यादौ पर्वतादिरूपतादृशस्व
वृत्तित्वत्वसमनियतप्रतियोगिताकाभावासत्त्वेपि न क्षतिः। न च संयोगिसत्त्वादित्यत्राव्याप्तिरिति वाच्यम्। साध्याभा
३ ता वकूटाधिकरणतायाः किंचिदनवच्छिन्नवर्ति निरूपितायाविवक्षितत्वात्। तादृशी चाधिकरणता न द्रव्ये। न चैवं संयो
गाभाववान्मेयत्वादित्यादौ संयोगघटितस्य नवच्छिन्नाधिकरणतायाअप्रसिद्धेरव्याप्तिरिति वाच्यम्। साधनसमाना
धिकरणसाध्याभावस्य प्रतियोगिव्यधिकरणत्वेन विशेषितत्वात्। साध्यतावच्छेदकसंबंधेन प्रतियोग्याधेयतायो यदभाव
ग्यत्वधिकरणीभूतयत्किंचिद्व्यक्तिनिरूपितत्वयदभावप्रतियोगितावच्छेदकावच्छिन्नत्वोभयाभावस्तादृशाभावएवाभा
वतार्थः। प्रमेयघटादित्यादौ समवायित्वसाधनसमानाधिकरणसाध्याभावकूटाधिकरणसमवेतत्वोभयाभावस्य घट
त्वादिनिष्ठस्य घटेऽभावात् वृत्तित्वत्वव्याप्यत्वं प्रतियोगितायां विशेषणमित्यस्वरसादाह। किंचेत्यादि। तन्न। समवे
३ प्रकारक तवान् व्यत्वैःप्रमाविशेष्यत्वादित्यादावव्याप्तिः। समवायिजात्यादिनिष्ठं यद्घटमात्रसमवेतघटत्वविच्छिन्नसमवे
४ मात्र ४ तोभयाभाव घटान्यसमवेतघटसमवेतोभयाभावादिघटितसाध्यतावच्छेदकसमनियतप्रतियोगिताकाभा
वकूटवत्त्वं तस्य हेत्वधिकरणेऽसत्त्वात्। तादृशस्वसाध्यवदवृत्तित्वाभावस्य जातित्वप्रकारकप्रमाविषये वेते श्रीराम

५३

हेतावभावात्। एवं वह्निमान्धूमादित्यत्राप्यव्याप्तिः निर्वह्निनिष्ठतद्भिन्नतद्भिन्नवस्तुत्वोभयाभावघटितकूटवत्त्वस्य
हेत्वधिकरणेवृत्तेः। तादृशधूमजनकवह्निमतोपर्वतमहानसादेर्नोवक्षवयवमादायापि वह्निद्वयवत्त्वादेकमा
त्रवह्निमतो धूमाधिकरणस्याप्रसिद्धेस्तादृशस्ववह्निमदवृत्तित्वाभावस्य धूमेसत्त्वात्। किंचतावह्निविशेष्यक
धीविशेष्यवृत्तित्वत्वसमनियतेत्यत्र तावन्मात्रविशेष्यकधीविशेष्यतावह्निविशेष्यकबुद्धिविशेष्यवावाच्यम्। आद्यो
५ मद सन्नवः। मदतो जगत एव तादृशत्वेन मात्रर्थावर्त्याप्रसिद्धेः। अंते व्यभिचारिण्यतिव्याप्तिः। तादृशविपक्षमें स्ववि क
शेष्यकसर्वमितित्वान विशेष्यत्वस्य केवलान्वयित्वात्तद्वृत्तित्वत्वव्यापकप्रतियोगिताकस्य व्यधिकरणधर्माव
५ एवं च्छिन्नाभावस्यैव वृत्तिमतिसत्त्वादितिप्रमेयसत्त्वादित्यत्राव्याप्तिः [redacted] घटसमवेतत्वघटान्यसमवेतत्वोभयत्वावच्छि
न्नाभावस्य तादृशवृत्तित्वत्वसमनियतप्रतियोगिताकस्य घटत्वादिवृत्तेः सत्त्वादभावाभावादित्यलमसद्रदेणा। यत्तु स्व
निष्ठसाध्याभावकूटाधिकरणसाधनाधिकरणवृत्तिसाध्याभावकूटवद्वृत्तित्वाभावः साध [redacted] नाधिकरणवृत्तिमद्
न्योन्याभावे तत्त्वद्धत्वंवक्तव्यम्। द्रव्यत्वप्रकारकप्रमाविषयः सत्त्वादित्यत्र स्वनिष्ठसाध्यतावच्छेदव्यापकप्रतियोगि
ताकगुणवृत्तिद्रव्यत्वाभावोभयाभावकर्मवृत्तिद्रव्यत्वाभावोभयाभावघटितकूटस्याधिकरणंसाधनाधिकर

भावानंदी राम

णं तद्वृत्तेरभावकूटस्याधिकरणं स्वं द्रव्यमेव। एवं स्वनिष्ठगुणत्वस्याभावघटितस्य साध्याभावकूटस्याधिकरणं
यत्साधनाधिकरणं तद्वृत्तेरभावकूटस्याधिकरणं स्वं गुण एव। एवं स्वनिष्ठकर्मत्वस्याभावघटितस्य साध्याभावकूटस्या
धिकरणं यत्साधनाधिकरणं तद्वृत्तेरभावकूटस्याधिकरणं स्वं कर्मैव तथा च तादृशस्वं सत्तावन्मात्रमेव तद्भिन्नत्वस्य
मनियतप्रतियोगिताकस्य वृत्तिमद्वृत्तिव्यधिकरणधर्मावच्छिन्नाभावस्यैवं संभवादिति व्याप्तेः। भूतत्वमूर्त्तत्वोभयवान् भा॰ ४
भूतमूर्त्तान्यतरत्वादित्यत्र स्वनिष्ठसाध्यतावच्छेदकव्याप्यप्रतियोगिताकघटान्यत्वविशिष्टमूर्त्तत्वाभावघटितकूट
स्याधिकरणं यत्साधनाधिकरणं तद्वृत्तेरभावकूटस्याधिकरणं स्वं घट एव। एवं स्वनिष्ठपटान्यत्वविशिष्टमूर्त्तत्वा
भावघटितकूटस्याधिकरणं यत्साधनाधिकरणं तद्वृत्तेरभावकूटस्याधिकरणं स्वं पट एव। तथा च तादृशं स्वं मूर्त्त
मात्रं मूर्त्तमात्रं च हेत्वधिकरणवृत्तिमद्वृत्तेस्तादृशस्य वृत्तित्वाभावस्य व्यधिकरणधर्मावच्छिन्नाभावस्यैव संभवा
दतिव्याप्तिस्तद्वारणाय साध्यतावच्छेदकव्याप्यत्वव्यापकत्वे प्रतियोगितायां विशेषणे। पृथिवी द्रव्यत्वप्रकारकप्र
माविषयत्वादित्यत्र स्वनिष्ठतादृशाभावाधिकरणसाधनाधिकरणवृत्तिसाध्यतावच्छेदकव्यापकप्रतियोगिताकजला
दस्याभाववत्तेजोऽवत्त्वाभावघटितकूटवत्त्वस्य साधनाधिकरणवृत्तेस्तादृशकूटाधिकरणं स्वसामान्यादेव तद्वृत्तित्वा श्री राम

५४

२ नेपादेय २ प्रभाववान्मे

भावस्य हेतोः सत्त्वादतिव्याप्तिर्वारणाय चरमदले साध्यतावच्छेदकव्याप्यत्वं प्रतियोगितायां विशेषणम्। अत्र च साध्यता
वच्छेदकव्यापकत्वं प्रतियोगितायां विशेषणीयं। घटत्वादिसाध्यके घटत्वपटत्वात्मकस्य साध्यतावच्छेदकव्याप्यप्रतियोगिताकस्य वक्ष्य
माणप्रतियोगिव्यधिकरणत्वाभावादेवाप्रसिद्धिसंपादकत्वाभावादिति ध्येयम्। द्रव्यं गुणादित्यत्र स्वनिष्ठसाध्याभावकूटा
धिकरणं यत्साधनाधिकरणं तद्वृत्तिसाध्याभावकूटाधिकरणं साधनाधिकरणं तद्वृत्तिसाध्याभावकूटाधिकरणं स्वं
द्रव्यमेव। गुणादिनिष्ठसाध्याभावकूटस्य द्रव्यत्वत्वावच्छिन्नाभावघटितस्य साधनाधिकरणावृत्तेः द्रव्यवृत्तित्वाभावस्य
गुणत्वादिवृत्ते गुणेऽसत्त्वादव्याप्तेर्वारणाय साधनाधिकरणवृत्तिमद्वृत्तय इति। तादृशावृत्तित्वाभावो व्यधिकरणध
(प्रतियोगिताक) र्मावच्छिन्नाभाव एव। पृथिव्यन्यद्रव्यत्ववत्त्वद्रव्यत्वादित्यत्र स्वनिष्ठसाध्याभावकूटाधिकरणसाधनाधिकरणवृत्तिसाध्या
भावकूटाधिकरणं स्वं सर्वमेव द्रव्यं। स्वनिष्ठपृथिवीत्वविशिष्टद्रव्यत्वाभावघटितकूटाधिकरणसाधनाधिकरण
वृत्तिसाध्याभावकूटाधिकरणं स्वं पृथिव्यन्यद्रव्यमेव स्वनिष्ठपृथिव्यन्यत्वविशिष्टद्रव्यत्वाभावघटितसाध्याभावकू
टाधिकरणसाधनाधिकरणवृत्तिसाध्याभावकूटाधिकरणं स्वं पृथिव्येव। एवं च द्रव्यवृत्तिवृत्तिस्तादृशकूटाधिक
रणीभूतद्रव्यवृत्तित्वाभावो व्यधिकरणधर्मावच्छिन्नाभाव एवेत्यतिव्याप्तिरतः प्रथमदले प्रतियोग्यधिकरणेति

तदर्थश्च स्वविशिष्टहेत्वधिकरणावच्छेदेन यत्साध्यतावच्छेदकाश्रयधर्म्याश्रयवृत्तित्वं यश्च साध्यवृत्तिधर्मावच्छिन्ना
प्रतियोगिताकत्वं तदुभयाश्रयान्यत्वं म। एवं च पृथिव्यन्यद्रव्यत्वद्रव्यत्वादिसाध्ये व्यधिकरणधर्मावच्छिन्नाभावस्यैव स्वनि
ष्ठतादृशाभाववत्त्वात्सा[illegible]नाधिकरणतानाविपक्षस्यैव स्वनिष्ठतादृशसाध्याभाववदधिकरणसाधनाधिकरणवृत्तित
द्विपक्षान्यवृत्तित्वविशिष्टद्रव्यत्वत्वावच्छिन्नसाध्याभाववदधिकरणं स्वमेव सिद्धमेव। एतस्यापि पृथिव्यन्यद्रव्यत्वद्रव्यत्वा
दिसाध्ये च तादृशं स्वं एतस्यापि येव तद्वृत्तित्वाभावस्य द्रव्यत्वेः सत्त्वान्नातिव्याप्तिः। साध्यतावच्छेदकसंमतेनैयत्यविशेष
णसाफल्याय परं अखण्डाभावघटकं हेत्वधिकरणावच्छेदेनेति। तथा च पृथिवीत्वविशिष्टद्रव्यत्वाभावादिरपि न तथा हे
त्वधिकरणावच्छेदेन साध्यवद्वृत्तिरतः स्वविशिष्टेति। द्रव्यं गुणादित्यादौ स्वनिष्ठतादृशसाध्याभाववदधिकरणसाध
नाधिकरणवृत्तिसाध्याभाववदधिकरणत्वं न कुत्रापि घटनिष्ठतादृशसाध्याभाववदधिकरणसाधनाधिकरण
घटनिष्ठघटान्यवृत्तित्वविशिष्टद्रव्यत्वाभावघटितकूटस्य घटे वृत्तेः घटनिष्ठतादृशसाध्याभाववदधिकरणसाध
नाधिकरणघटवृत्तिघटान्यवृत्तित्वविशिष्टद्रव्यत्वाभावघटितकूटस्य घटे वृत्तेरित्यव्याप्तेर्वारणाय चरमदलेपि प्रति
योगिव्यधिकरणत्वमभावविशेषणम्। तदर्थस्तु साध्यतावच्छेदकविशिष्टसाध्यवद्वृत्तित्वविशिष्ट्यवृत्तिधर्मा[illegible]वच्छि

श्रीराम

५५

न्नप्रतियोगिताकत्वाभावः यावन्नाथवत्त्वं॥ पटान्यत्वविशिष्टद्रव्यत्वाभावस्य गुणादावेव तादृशप्रतियोगिवैयधिक
रण्यसत्त्वेपि तद्विशिष्टस्य तादृशसाधनाधिकरणवृत्तित्वाभावान्नाव्याप्तिः। पृथिव्यन्यद्रव्यत्वद्रव्यत्वादित्या
दित्यादौ पृथिव्यन्यत्वविशिष्टद्रव्यत्वाभावस्य साध्यद्रव्यत्ववत्तद्(वृत्तित्व)द्रव्यत्ववृत्तिधर्मावच्छिन्नप्रतियोगिताकत्वेन
यप्रतियोगिताकत्वान्नोक्तप्रतियोगिवैयधिकरण्यं। तथा च स्वनिष्ठतादृशसाध्याभाववदधिकरणघटादिवृत्ते साधनाधिकरण
नि रुक्तप्रतियोगिवैयधिकरण्याश्रयव्यधिकरणधर्मावच्छिन्नप्रतियोगिताकयावदभावाधिकरणं स्वं द्रव्यमात्र
तद्वृत्ति(वृत्ति) तादृशवृत्तित्वाभावो व्यधिकरणधर्मावच्छिन्नप्रतियोगिताक एव तस्य च द्रव्ये सत्त्वादतिव्याप्तेर्वारणाय सा त्वे
ध्यतावच्छेदकविशिष्टेति। तादृशकूटाधिकरणवृत्तित्वाभावश्च तादृशकूटाधिकरणवृत्तित्वं व्यासज्यवृत्तिध व्यापक
र्मानवच्छिन्नप्रतियोगिताको बोध्यः। तेन वाच्यं द्रव्यत्वमादित्यादौ तादृशकूटाधिकरणवृत्तित्वसमनियतप्र
तियोगिताकस्य घटवृत्तित्वविशिष्टस्य वृत्तित्वाभावस्य स्यात् यन्न समानाधिकरणघटत्वादिवृत्तेर्द्रव्यत्वे सत्त्वेपि
नाव्याप्तिरिति तदपि न साधीयः। वृत्तित्वाभावस्याव्याप्यवृत्तित्वानभ्युपगमे। प्रतियोगिसत्त्वादित्यत्रातिव्याप्तिः त

(तथा च संयोगिसत्त्वादित्यत्र नास्ति व्याप्तिरिति भावः)

त्र संयोगाभावे द्वितीयदलेन निरुक्तप्रतियोगिव्यधिकरणत्वाभावेन व्यधिकरणधर्मावच्छिन्नाभावस्यैव तादृशाले
न तद्रूपाधिकरणवृत्तित्वाभावस्य वृत्तिमद्भिन्नत्वेऽधिकरणधर्मावच्छिन्नाभावस्यैव संभवात्॥ प्रथमतएव वृत्ति
त्वाभावस्यौ योग्यवृत्तित्वाभ्युपगमे च किंचेत्यादिना वक्ष्यमाणदोषाजन्यकतापातात्। किंच तादृशं यत् स्वत्वावच्छिन्ना
त्र विशेष्यकधीविशेष्यवृत्तित्वाभावः तावद्विशेष्यकधीविशेष्यवृत्तित्वाभावो वाच्यः। तथा च तावन्मात्रविशेष्य
कोक्तौ प्रमेयं वाच्यत्वादित्यत्राप्रसिद्धिः। जगत एव तादृशस्वत्वेन मात्रपदव्यवच्छेद्याप्रसिद्धिः। मात्रपदानेतर्भावे व्यभि
चारि एपति व्याप्तिस्तत्र जगत एव विषयतात्मकतादृशस्वविशेष्यकसर्वमितिधीविशेष्यत्वाज्जगद्वृत्तित्वस्य व्यापक
प्रतियोगिताकाभावस्य व्यधिकरणधर्मावच्छिन्नाभावस्यैव वृत्तिमद्भिन्नत्वादिति दिक्। कालान्यत्वे साध्ये कालिक
संबंधेन हेतुर्विरुद्ध एव तत्कारणं च साध्यसमानाधिकरणत्वेनैवातो महेति। तेन संबंधेन कालिकविशेषण
ताविशेषेण। एवमिदमेतद्रूपाभिन्नं गुणत्वादित्यादौ समवायेन विषयिता च हेतावव्याप्तिस्तादृशरूपा
धिकरणीभूतैतद्रूपभिन्नसमवेतत्वसमनियतप्रतियोगिताकस्यैतद्रूपभिन्नविषयत्वसमनियतप्रतियोगि
ताकस्य व्यधिकरणधर्मावच्छिन्नाभावस्यैव वृत्तिमद्भिन्नत्वादिति। वृत्तित्वाभावस्याव्याप्यवृत्तित्वमते हेतुतावच्छेदक राम

संबंधेन हेत्वधिकरणावच्छेदेन वृत्तिमद्भिन्नतादृशवृत्तित्वाभावसमुदायवत्त्वं वाच्यं। एवं महाकालान्यो घटात् ए
तद्रूपाभिन्नं गुणत्वादित्य [gap] त्र खंडकालावच्छेदेन घटादिवृत्तेस्तादृशरूपाधिकरणमहाकालवृत्तित्वाभावस्यैतद्रूपावच्छे
देन गुणत्वादिवृत्तेस्तादृशरूपाधिकरणैतद्रूपभिन्नसमवेतत्वाभावस्य च हेत्वधिकरणमहाकालानवच्छेद्यत्वाद्धे
त्वधिकरणे तद्रूपाभिन्नानवच्छेद्यत्वाच्च नातिव्याप्तिः॥ वृत्तिमद्भिन्नत्वं च हेतुतावच्छेदकसंबंधेन यद्यत्केयद
धिकरणं तदवच्छेदेन तद्यत्किंवृत्तित्वम् [gap] । तेन वह्निमान्धूमादित्यादौ द्रव्यं गुणादित्यादौ च महाकालादेर्हेतुता
वच्छेदकीभूतवृत्तिनियामकसंयोगेन समवायेन वा घटाद्यनधिकरणत्वेन महाकालाद्यवच्छेदेन घटादिभि
न्नस्य साध्याभावरूपाधिकरणसंयुक्तत्वत्वसमवेतत्वत्वव्यापकव्यासज्यवृत्तिधर्मावच्छिन्नप्रतियोगिताकस्य ता
दृशसंयुक्तत्वत्वावच्छिन्नप्रतियोगिताकस्य तादृशसमवेतत्वत्वावच्छिन्नप्रतियोगिताकस्य चाभावस्य हेत्वधिक
रणावच्छेदेनासत्त्वेऽपि न क्षतिः। वृत्तित्वाभावस्याव्याप्यवृत्तित्वनयेऽपि तादृशसाध्याभावरूपाधिकरणवृत्तित्वस्या
वच्छेदकतासंबंधेन योऽभावो हेतुतावच्छेदकसंबंधेन यत्किंचित्पदार्थाधिकरणवृत्तिस्तादृशयावदभाववत्त्वं य
द्धेत्वधिकरणावच्छेदेन तत्त्वं व्याप्तिरिति। महाकालान्यो घटादित्यत्र तादृशसाध्याभावरूपाधिकरणीभूतमहाकाल

वृत्तित्वस्यावच्छेदकतासंबंधेनाभावः खंडकालेवर्त्ततेनतुमहाकालइतिहेत्वधिकरणावच्छेदेनासत्त्वान्नातिव्या
प्तिः।इत्थंचप्रमेयघटत्वादित्यत्रसाध्याभावकूटाधिकरणीभूतजगत्त्वमेवेतत्त्वत्वस्यावच्छेदकतासंबंधेनाभावोत्
त्पादौतस्यचघटत्वरूपहेत्वधिकरणावच्छेदेनसत्त्वादव्याप्तिरतोहेतुतावच्छेदकसंबंधेनयत्किंचित्पदार्थाधिक
रणवृत्तीति।लक्षणस्थवृत्तिमद्वृत्तिपदस्यापिसएवार्थः।शेषंपूर्वोक्तदिशावसेयमिति।एतेनेत्यादि।एतेनम
हाकालान्यत्वादिसाध्यकेकालिकविशेषणताविशेषेणहेतावतिव्यापकत्वेन।एवमीश्वरज्ञानभिन्नघटादित्या
त्रापिविवक्षितयाहेतावतिव्याप्तिर्बोध्या।एतद्रूपाभिन्नगुणत्वाज्ज्ञानाद्वेत्यादौतुसाध्यव्यापकतावच्छेदकतत्ता
द्विपदार्थवृत्तित्वावच्छिन्नप्रतियोगिताकाभावकूटाधिकरणस्याप्रसिद्धेर्यादृशसाध्याभाववत्त्वोमाधिकरणंसाध
नाधिकरणंतादृशत्वोमवद्वृत्तित्वाभावस्यात्मनोचतादृशत्वोमवद्वृत्तित्वस्यगुणत्वेसत्त्वान्नातिव्याप्तिः।अतएव
पृथिव्यन्यद्रव्यत्ववद्द्रव्यत्वादित्यादौघटान्यत्वविशिष्टद्रव्यत्वाभावपटान्यत्वविशिष्टद्रव्यत्वाभावाभावनपिसाध
नसमानाधिकरणतादृशसाध्याभाववत्तयातादृशकूटाधिकरणगुणादिवृत्तित्वाभावस्यद्रव्यत्वेसत्त्वेऽपिना
तिव्याप्तिः।तत्रघटान्यत्वविशिष्टद्रव्यत्वाभावघटितत्वोमाधिकरणंसाधनाधिकरणंघटएवतद्वृत्तित्वाभा

४२ राम

वस्यद्रव्यत्वेऽसत्त्वात्।।सत्तावान्ज्ञानेरित्यादौचविशिष्टसत्ताभाववादीनांहेतुसमानाधिकरणानांसाध्यव्यापकतावच्छे
दकरूपावच्छिन्नप्रतियोगिताकत्वाभावादेवनाव्याप्तिः।अभावःसाध्यतावच्छेदकसंबंधेनबोध्यः।।तेनसमवाये
नवह्न्यभाववतिधूमस्यवृत्तावपिनदोषः।इत्थंचसाध्यव्यापकतापितेनैवसंबंधेनबोध्या।तेनकालिकसंबंधे
नवह्निव्यापकस्यघटादेःसंयोगेनाभाववतिधूमस्यवृत्तावपिनक्षतिः।योग्यवृत्तित्वंकिंचिदनवच्छिन्नायावृत्ति
स्तद्वत्त्वंध्येयं।तेनेनवान्वह्नेरित्यादौधूमाभावस्याप्ययोगोलकेकिंचिदनवच्छिन्नवृत्तिकत्वाद्व्याप्यवृत्तित्वमात।
द्विशिष्टस्यसाधनसमानाधिकरणत्वेतद्विशिष्टतादृशसाध्याभाववद्वृत्तित्वाभावश्चबोध्यः।तेनसंयोगिघटा
५ हूरस्य दित्यत्रसाधनसमानाधिकरणसंयोगाभावघटितस्वोव्याप्यवृत्तित्वविशिष्टाधिकरणंगुणएवतत्रहेतुतावच्छे सा ५
दकीभूतसंयोगसंबंधेनवृत्तेरप्रसिद्ध्यानाव्याप्तिः।नवासंयोगेनधूमाभावस्यकेवलान्वयितयातद्वृत्तित्वव्या
पकप्रतियोगिताकस्यव्यधिकरणधर्मावच्छिन्नाभावस्येववह्निमद्वृत्तित्वाद्धूमवान्वह्नेरित्यादावतिव्याप्तिः
पृथिवीद्रव्यत्वप्रकारकप्रमाविषयत्वादित्यादौजलत्वस्याभावेनोवत्स्याभावघटितस्यसाध्यव्यापकतावच्छेदक
रूपावच्छिन्नप्रतियोगिताकस्यसाधनसमानाधिकरणस्यसाध्यतावच्छेदकसमवायसंबंधावच्छिन्नप्रतियोगिता

कालाभावकूटस्याधिकरणे ज्ञात्वादौ हेतोरवृत्त्या तिव्याप्तिरतः कूटतापन्नस्य साधनसमानाधिकरणत्वं वाच्यमू
तदर्थश्च यादृशसाध्याभाववत्त्वोभाधिकरणे साधनाधिकरणे तादृशत्वमवद्वृत्ति। तदभावः। इत्थं च तत्तदभावत्वमा
वघटितत्वोभाधिकरणे साधनाधिकरणे नत्वमेवतद्वृत्तितदभावस्य द्रव्यत्वप्रकारकप्रमाविषयत्वेः सत्त्वादेवना
तिव्याप्तिः। वह्निमान्धूमादित्यादौ तत्तत्संयोगाभावत्वरूपसाध्यव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिता
कस्य तत्तत्संयोगात्मकात्मकाभावस्य साध्यतावच्छेदकसंबंधावच्छिन्नत्वाभावान्नाव्याप्तिर्घटः तदितितदुपसंसं
योगाभाववान्मेयत्वादित्यत्राव्याप्तिवारणाय व्याप्यवृत्तित्वमिति दर्शयति केवलान्वयिनि इति। व्याप्यवृत्तित्ववि
शिष्टतादृशाभाववद्वृत्तित्वविवक्षायाः फलं दर्शयितुं यत्किंचिदधिकरणे व्याप्यवृत्तिसाध्याभावमादाय।
व्याप्तिं प्रसज्य निषेधति एवं साध्यस्येति। गुणसामान्याभावस्य गुणादौ व्याप्यवृत्तित्वेऽपि तद्विशिष्टस्य द्रव्यत्वाधि
करणेऽवृत्तेर्गुणवद्द्रव्यत्वादित्यादौ नाव्याप्तिरित्यर्थः। केचित्तु। व्याप्यवृत्तित्वं किंचिदवच्छिन्नवृत्तिकभिन्नत्वे
देशिककालिकाव्याप्यवृत्तिभेदेनोदाहरणद्वयं संयोगाभाववान्मेयत्वाद्गुणवद्द्रव्यत्वादिति। अभावश्च साध्य
व्यापकतावच्छेदकसंबंधेन बोध्यः। तेन कालत्वप्रमाविषयः कालत्वादित्यादौ साध्यस्य कालिकसंबंधेनव्या

प्रकारकर

रा म

५२

पकं अभावत्वाभावत्वसत्त्वकर्मत्वगुणत्वादितेषां च दैशिकसंबंधावच्छिन्नप्रतियोगिताकाभावानां साधनसा
मानाधिकरणानां कूटाधिकरणस्याप्रसिद्धावपि नाव्याप्तिः। इत्थं च धूमवान्वह्नेः पृथ्वीद्रव्यत्वप्रकारकप्रमावि
षयत्वादित्यादौ नानाविपक्षके व्यभिचारिणि विशेषणताविशेषेण तद्विपक्षावृत्तित्वात्मकसाध्यव्यापकता
वच्छेदकरूपावच्छिन्नप्रतियोगिताकाभावकूटस्य साधनसमानाधिकरणस्याधिकरणाप्रसिद्ध्या नातिव्याप्ति
रित्याहुः। न च विपक्षद्वयेऽपि कालिकसंबंधावच्छिन्नप्रतियोगिताकात्मत्वाभावे साध्ये आत्मत्वादिहेतावव्या
प्तिस्तत्रात्मत्वघटिततादृशाभावकूटवदात्मवृत्तित्वाभावस्यात्मत्वेऽभावादिति वाच्यम्। साध्याभाववत्त्वावच्छेद
कसंबंधेन साधनाधिकरणवृत्तित्वस्याभावे विवक्षणेनात्मत्वाभावस्यावच्छेदकस्यात्मत्वे कालिकसंबंध
स्यात्मन्यभावादेवाव्याप्त्यनवकाशात्। अप्रसिद्धेति। रूपाभाववान्वायुत्वादित्यादौ कूटाधिकरणाप्रसि
द्धिः सत्तावान्जातेरित्यादौ च सत्तात्वावच्छिन्नाभावस्याधिकरणे जात्यादौ हेतुतावच्छेदकसंबंधेन वृत्तेरप्रसि
द्धिः। आदिना सत्ताप्रथ्वीसमवेतरूपान्यरूपवदन्यत्वादित्यादौ पृथिवीमात्रसमवेततादृशाभावमादाय पृथिव्या
एवकूटाधिकरणत्वेन तद्वृत्तित्वाभावस्य हेतौ सत्त्वादतिव्याप्तिरित्यस्य परिग्रहः। तादृशकूटाधिकरणवृत्तित्वाभा

भावत्वाए

२भावस्याद वेत्यत्र तादृशाकृत्यधिकरणवृत्तित्वस्य हेतुतावच्छेदकसंबंधावच्छिन्नत्वविवक्षणएव वह्निमद्वृत्तिपरस्या
व्याप्तिः संगच्छते। अन्यथा तादात्म्यादिसाधारणवृत्तित्वत्वव्यापकप्रतियोगिताकस्याधिकरणधर्मावच्छिन्न
प्रतियोगिताकस्येवोंवह्निमात्रवृत्तित्वोंद्व्याप्तेरभावौतदस्तरेवप्रथमतोद्युपातिः। तादृशसमुदायाधिकरण
वृत्तित्वेति। तादृशवृत्तित्वाभावश्चतादृशवृत्तित्वत्वव्यापकव्यासज्यवृत्तिधर्मानवच्छिन्नप्रतियोगिताको बो
ध्यः। तेन प्रमेयं द्रव्यत्वादित्यत्र साध्याभाववद्वृत्तित्वसमनियतप्रतियोगिताकस्य घटवृत्तित्वघटान्यवृत्तित्वो
भयत्वावच्छिन्नप्रतियोगिताकस्य वह्निमान्धूमादित्यत्र पर्वतसंयुक्तपर्वतान्यसंयुक्तत्वोभयत्वावच्छिन्नाभा
वस्यैतद्रूपवानेतद्रसादित्यादौ चैतद्रूपावच्छिन्नेतद्रसनिष्ठवृत्तित्वेतदन्यरूपावच्छिन्नवृत्तित्वोभयाभाव
स्य च तत्रैतावसत्त्वेऽपि नासंभवः। धूमनिष्ठवृत्तित्वत्वेन वृत्तित्वसामान्याभावस्वीकारे तु स्वन्यूनवृत्तिधर्मान
वच्छिन्नत्वमपि प्रतियोगितायां देयम्। यत्तु तादृशकूटाधिकरणवृत्तित्वातिरिक्तवृत्तित्ववृत्तिधर्मानवच्छिन्नवृ
त्तित्वप्रतियोगिताकोऽभावो बोध्यः। वह्निमान्धूमादित्यादौ तादृशवृत्तित्ववृत्तिधर्मेणानवच्छिन्नप्रतियोगिताक
स्य धूमत्वाद्यभावस्य धूमादावभावाद्वृत्तित्ववृत्तिप्रतियोगितेति। तन्न। धूमवान्वह्नेरित्यादावतिव्याप्तेः। न

DR. BHAU DAJI MEMORIAL

राम

तत्र निर्धूमवृत्तित्वत्वापेक्षया तादृशाकूट्यधिकरणवृत्तित्वत्वस्य गौरवेणानवच्छेदकत्वाद्यधिकरणधर्मा
वच्छिन्नाभावस्यैवतादृशत्वेन तस्य च वह्न्यादावपि सत्त्वात्। अत्र कश्चित्। ययुक्तवृत्तित्वाभावे हेतुतावच्छेदकसं
बंधेन यत्किंचित्पदार्थानधिकरणवृत्तित्वप्रतियोगिताकत्वं प्रविष्टं तेन नासंभवदोषः। महाकालवृत्तित्वाभावे हेतु
तावच्छेदकसंबंधेन यत्किंचित्पदार्थानधिकरणवृत्तित्वप्रतियोगिताकत्वाभावात्'वृत्तिमद्गगनत्वेन वा वृत्तिमद
वृत्तित्व साध्यवद्वृत्तित्व प्रतियोगिताकत्वोभयानधिकरणत्वं विवक्षितं महाकालवृत्तित्वत्वावच्छिन्नप्रतियो
गिताकमहाकालवृत्तित्वाभावस्य साध्यवद्वृत्तित्वप्रतियोगिताकत्वविरहात्तदुभयानधिकरणत्वं तस्यैव हेतावसत्त्वा च६
न्नातिप्रसंग इति तन्न साधीयः। महाकालवृत्तित्वत्वापेक्षया वृत्तित्वत्वस्यैव लघुतया तादृशाभावप्रतियोगितावच्छेद
कत्वेन साध्यवद्वृत्तित्वप्रतियोगिताकत्वस्य महाकालवृत्तित्वाभावे सत्त्वेन अधिकरणधर्मावच्छिन्नाभावस्यैवता
दिति॥ दृशत्वेन तस्य च हेतौ सत्त्वात्तस्मात्पूर्वोक्तविवक्षयैवातिव्याप्तिरुद्धारः। केचित्तु। साधनसमानाधिकरणव्याप्य
वृत्तिसाध्याभावकूटे साध्यसमानाधिकरणत्वमपि विशेषणं व्यभिचारिणि साध्यतावच्छेदकावच्छिन्नसा
ध्याभावघटितकूटे साध्यसमानाधिकरणत्वाप्रसिद्धेरेव नातिव्याप्तिरिति प्राहुः। ननु प्रतियोगितावच्छेदकवि

शिष्टज्ञानं नाभावप्रत्यक्षमात्रे हेतुः। इदं त्वादिना। भावप्रसक्तेर्व्यभिचारात्। न तावदभावप्रत्यक्षे विशेष्या
ज्ञानाभावात्। अत आह विशेषणतावच्छेदविशिष्टेति। विशेष्ये विशेषणमिति न्यायेन च नाभावप्रत्यक्षम्। अ
ननुभवात्। विवेचितं चेदमालोकसारमञ्जर्यामस्माभिः। ननूक्तमरूपमेव ज्ञाने नासन्नविशेषज्ञानमा
भावदशायां तादृशाभावधीरसिद्धैवेत्यत आह अभावप्रत्यययोरिति। विशेषणस्यापि। विशेषणत्वरूप।
विषयत्वावच्छिन्नस्यापि। तदवच्छेदकत्वं प्रतियोगितावच्छेदकत्वम्। तस्यातन्त्रेणेति। न प्रतियोगितावच्छे विशेषण ५
देनेत्यर्थः। तद्वदयति घटो नास्तीत्येवेति। दण्डीपुरुष इत्यत्र दण्डत्वविशिष्टवैशिष्ट्यज्ञाने पुरुषांशे विशेष
णतावच्छेदकदण्डत्वस्य यादृशी प्रकारता घटो नास्तीत्यत्राप्यभावांशे विशेषणतावच्छेदकघटत्वस्य तादृशी
प्रकारता न तु घटस्येव घटत्वस्याप्यभावांशे साक्षात्प्रकारता। तथा सति घटीयोऽभावो घटत्वीय इत्याका
रकप्रत्ययः स्यादिति भावः। एवकारेण कदापि घटत्वेन घटो नास्तीति स्वातन्त्र्येणावच्छेदकत्वावगाहि प्रत्य
यो न भवतीति सूचितम्। तस्यापि। व्यधिकरणधर्मस्यापि। भ्रमरूपे वेति प्रतियोगितावच्छेदकस्य प्रतियोगि
नि वैशिष्ट्यानवगाहिज्ञानेनावच्छेदकत्वं नावगाह्यत इत्युक्तयुक्त्यावच्छेदकत्वं प्रतियोगि [illegible] वैशि

राम

स्येव

ष्ट्यघटितमित्युक्तम्। तस्य प्रकृतेः भावाक्रमरतिभावः। ननु तत्र घटो नास्ती प्रतीतेस्तथैवास्त्वत्र तु स्वातन्त्र्ये
णावच्छेदकत्वावगाहनादवच्छेदकत्वेन प्रतियोगिवैशिष्ट्यघटितं घटत्वेन घटो नास्तीत्यनुभवस्य दुरपह्नव
त्वादित्यत आह। यदि पुनरिति। आहार्यप्रत्ययस्य वस्तुत्वसाधकत्वादाह स्वरसवाहीलौकिकानामिति। तादृशा
नुभवो यथानुभाविकः अनुभव इति घटेत्यन्वयः॥ केचित्तु॥ घटत्वेन घटो नास्तीत्येव पाठः। समानाधिकरण
धर्मावच्छिन्नाभावप्रत्ययोऽपि यदि प्रतियोगितावच्छेदकस्याप्यभावांशे वैशिष्ट्यावगाही तदेत्यर्थः। तादृशाभा
वनिवारणं तत्तुल्यव्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावनिवारणमिति व्याचक्रुः। ननु असमाना
धिकरणपदं तदनधिकरणवृत्तित्वं केवलान्वयिन्यव्याप्तिः। केवलान्वयिनीत्यग्रिमग्रन्थविरोधात्। नापि तद
धिकरणावृत्तित्वं साधिकरणत्वपदवैयर्थ्यात्। ध्वंसत्वादित्यादावतिव्याप्तिश्चातः साध्यत्वादि। केवलान्वयि
नि साध्यवदवृत्तिगगनादेरधिकरणाप्रसिद्ध्या न भिकरणत्वस्याप्रसिद्धेराह तदभाववत्त्वमिति। न
नु वह्निमान्धूमादित्यादावव्याप्तिः साध्यवदवृत्तिधूमत्वादेरभावस्य धूमादावभावादाह तदवच्छिन्नेति। अव
च्छिन्नत्वस्य कुतो लाभ इत्यत आह तीति। नन्ववच्छेदकत्वमनतिरि [illegible] क्तवृत्तित्वम्। तथा चातिव्याप्तिः समवाय

वह्नेरित्यादौ धूमवदवृत्तिसकलपदार्थविरहकूटस्य वह्न्यधिकरणतानतिरिक्तवृत्तित्वात्। वह्निमान् धूमा
दित्यादौ वह्निमदवृत्तिसकलपदार्थमध्यनिविष्टह्रदत्वाभावस्य धूमाधिकरणतातिरिक्तवृत्तित्वादव्याप्ति
रित्यत आह अन्यूनवृत्तित्वमिति। धूमवान् वह्नेरित्यादौ धूमवदवृत्तिह्रदत्वाभाववत्त्वस्य वह्न्यधिकरणतान्यू
नवृत्तित्वादतिव्याप्तिरत आह साध्यवदवृत्तिसकलपदार्थेति। तत्र तादृशायोगोलकत्वाभावस्य वह्न्यधिकरण
तान्यूनवृत्तित्वाभावान्नातिव्याप्तिरिति। साध्यवदवृत्तित्वस्य संबंधभेदेन भिन्नत्वात् सामान्याभावेन घटतद्वृत्ति
भावः। ननु तादृशसकलपदार्थाभाववत्त्वं पदन्यूनवृत्तित्वमित्यस्यैव सम्यक्त्वे यदधिकरणतेत्यत्राधिकरण
तापदं व्यर्थमत आह यथेति। तथाप्यनतिप्रयोजनकत्वादाह हेतुतावच्छेदकेति। तथा अधिकरणत्वपदं। सं
योगेन साध्यवदवृत्तेरयोगोलकत्वादेः संयोगेनाभावस्य वह्न्यधिकरणतान्यूनवृत्तित्वादतिव्याप्तिरतो येन
३ दीप्ता येनेति। एतेनायेन येनेत्यादिविवक्षणेन। साध्यवदसमवेतस्याकाशाभावादेः। सकलतत्त्वेति। संबंधसा
मान्येन तत्त्वेत्यर्थः। तदभावः साध्यवदवृत्तेरभावः। तादृशेन साध्यतावच्छेदकेन। जातिमदिति। जाति
मदसमवेतं असमवेतमेव तस्य च समवायेनाभावः केवलान्वयी तिभावः। अत एव। जातिमान्मेयत्वादि

राम

त्यादावतिव्याप्तेरेव। दूषणान्तरमाह इदं न जातिमदिति साध्यतावच्छेदकसंबंधेनावृत्तित्वविवक्षायां तु प्र
कृते स्वरूपसंबन्धस्यैव तथात्वात्तेन संबन्धेन साध्यवदवृत्तेः जात्यभावप्रकारकप्रमाविषयत्वाभावस्य प्र
सिद्धत्वात्तदभावस्य हेत्वधिकरणतान्यूनवृत्तित्वान्नाव्याप्तिः संभवतीति संयोगत्वसमवायत्वादिनैव तादृश
विवक्षणे व्याप्तिरुक्ता। रूपभिन्नं गुणत्वादित्यादौ रूपभिन्ने समवायिनासंबद्धं रूपत्वादि तदभावस्य गुणत्वा
५ ति न्यूनवृत्तित्वाभावान्नाव्याप्तिः संभवत्यत एतदिति। समवेतमात्रस्यैवैतद्रूपभिन्नसमवेतत्वादेतद्रूपभि
न्नासमवेतमसमवेतमेव समवायेन तदभावः केवलान्वयीतिभावः। एतद्घटभिन्नं सत्त्वादित्यादौ त्वेतद्घट
भिन्नासमवेतस्यैतद्घटरूपादेः संभवान्नातिव्याप्तिः संभवतीति तन्नोक्तम्। घटभिन्नमिति। घटभिन्नाविष
यकं निर्विषयकमेव तस्य च विषयतयाभावः केवलान्वयीतिभावः। इत्यत्रापीत्यपिना एतद्रूपभिन्नं गुणत्वा
दित्यस्य संग्रहः। द्रव्यं सत्त्वादित्यादावादिना एतद्रूपभिन्नं गुणत्वाद्घटभिन्नं मेयत्वादित्यादिपरिग्रहः। स्वरू
पसंबंधेन। कालिकविशेषणतया। यत्वतत्वयोरननुगमात् साध्यवदसमवेतस्य समवायेनाभावः। सा
ध्यवदसंयुक्तस्य संयोगेनाभाव इत्येवं क्रमेण निवेशनेऽतिगौरवं तत्र च विशेषणताविशेषेण साध्यवदव

PAGE(S)MISSING

NOT AVAILBLE

62

न्तरभावस्यापि निवेशने तेनैव सामंजस्ये विशेषवैयर्थ्यं चेत्याशयेनाह विशेषणतेति। विशेषणतावत
द्व्यक्तित्वस्याभावस्य प्रमाविषयत्वस्य वा ग्राह्यं। सर्वत्रैवेति। पूर्वोक्तयावद्व्यभिचारिणीत्यर्थः। तेन केवला
न्वयिनि तद्व्यक्तित्वादौ साध्यवदवृत्तित्वस्याप्रसिद्धावपि न क्षतिः। तत्र तद्व्यक्तित्वं तत्तद्व्यक्तिस्वरूपं तद्विशे
ष्यणविशेषणतासंबंधेन स्वस्मिन्नपि वर्त्तत इत्याशयेनाह। तत्तद्व्यक्तित्वइति। ननु तत्तद्व्यक्तित्वं तत्तन्मात्र
वृत्तिसाधारणधर्मः सच रूपादिः समवायादिनैव वर्त्तते न विशेषणतयेत्यत आह तत्तदन्यान्यत्वइति।
तत्तदन्यान्यत्वमपि तत्तद्व्यक्तित्वमेव। तदुक्तं। नहि घटभिन्नभेदो घटत्वादतिरिच्यतइति। तथा च सएव
दोष इत्यत आह तत्प्रकारकेति। तथा चैतद्रूपभिन्नंगुणत्वादित्यादावेतद्रूपत्वप्रकारकप्रमाविषयत्वं
४ तदभावस विशेषणताविशेषेण साध्यवदवृत्तिं तेन संबंधेन गुणत्वान्यन वृत्तित्वाभावान्नातिव्याप्तिरिति भावः। त
त्। साध्यवदवृत्तित्वे एवं च सामान्याभावनिवेशोपि सम्यगित्याशयेनाह तेनैवेति। तदवच्छिन्नेति। साध्य
वदवृत्तित्वावच्छिन्नेत्यर्थः मि भ्रमतमुपन्यस्यति। केचित्त्विति। साध्यविरोधित्वं साध्याभावव्याप्यत्वं तच्च केव
लान्वयिन्यप्रसिद्धमंतो साध्यासमानाधिकरणेनीति। ननु साध्यासमानाधिकरणानां गगनादीनां हेतुत्वसा राम

९३

मानाधिकरण्याद्व्यभिचारिण्यतिव्याप्तिरतः साध्यसामानाधिकरण्याभावेति। आर्द्रेंधनप्रभववह्निसामा
नाधिकरण्यव्यक्तेरभावस्य धूमसामानाधिकरण्याभावव्यापकत्वादतिव्याप्तिरतः सामान्येति। हेतुतावच्छे
दकावच्छिन्नहेतुसामानाधिकरण्यत्वावच्छिन्नाभावत्वेन व्यापकत्वस्फोरकम्। तेनायोगोलकीयवह्निसा
मानाधिकरण्यस्यापि वह्नित्वादिनाऽभावस्य धूमसामानाधिकरण्याभावव्यापकत्वेपि न क्षतिः। न वा द्रव्यं गुण
कर्मान्यत्वविशिष्टसत्त्वादित्यादावव्याप्तिरिति। साध्यवतीति। साध्यतावच्छेदकावच्छिन्नसाध्यवतीति। तेन गुणान्यत्वविशिष्ट
सत्तावान्जातेरित्यादौ नातिव्याप्तिः। परं च सामानाधिकरण्यं हेतुसामानाधिकरण्यं। हेतुमतीति हेतुतावच्छेदक
विशिष्टहेतुमति। तेन विशिष्टसत्त्वादौ नाव्याप्तिः। तेनैव हेतुतावच्छेदकसंबंधेनैव। क्रमेण संबंधद्वैविध्याय जेद ५
फलमाह। तेनेत्यादिना। कालिकसंबंधेन पृथिवीत्ववति काले वृत्तिमन्मात्रस्यैव वृत्तेस्तद्वृत्तित्वस्याभा द
वे वसत्वादतिव्याप्तिः। साध्यतावच्छेदकसंबंधेन साध्यवत्त्वोक्तौ तु समवायेन पृथिव्यां कालिकसंबंधेनावर्त्त
मानस्य चरमध्वंसादेर्हेत्वधिकरणे काले वृत्तेर्नातिप्रसंगः। अत एवोत्तरत्र पृथिवीत्वं विहाय द्रव्यत्वमु
क्तम्। सत्त्वे हेतौ हेतुसामानाधिकरण्याभावस्य साध्यसामानाधिकरण्याभावाव्यापकत्वं न स्वस्मिन्न। गुणत्वे

तुस्वस्मिन्नेवतदितितदुदाहृतं।परस्सामानाधिकरण्यपदस्य हेतुतावच्छेदकसंबंधेनेत्यस्य फलमाह नवासं।
योगेनेति।वह्निमानेतद्रूपादित्यादौ वह्निमति समवायेनावर्त्तमानकालपरिमाणस्पंदत्वेन स्वस्मिन्न।गु
णत्वेतु स्वस्मिन्निति।स्वकालिकतया एतद्रूपाधिकरणे काले स्पंदे च समवायेन वर्त्तते इत्यव्याप्तिर्नेत्यर्थः।स्पं
दत्वादेरिति।वस्तावपीत्यत्रानुषज्यते।तेनैवेत्यस्य फलमाह समवायेनेति।तदधिकरणे एतद्रूपाधिकरणे
पर्वतादौ।संबंधविशेषेण।हेतुसामानाधिकरण्ये हेतौ प्रविष्टे न प्राकारे सामानाधिकरण्याप्रसिद्ध्यात
द्विनाकृतलक्षणस्य तत्रातिव्याप्त्यभावादिति भावः।तच्चिंत्यमिति।एतद्रूपभिन्नत्वं गुणत्वात्तज्ज्ञानाद्वेत्यादौ महा
कालान्योघटादित्यत्र कालिकसंबंधेन हेतौ चातिव्याप्तिरत्रास्वरसः।साध्यतावच्छेदकसंबंधेन साध्यवा
निति विशेषणतादिविशेषणत्ववत्त्वस्य भावव्यापको हेतुतावच्छेदकसंबंधेन हेतुमतीति नैव संबंधेन वृत्तित्वाभावव धेन ४
त्युक्तौ नायं दोष इति वाच्यम्।ननु स्वोक्तविवक्षायाम् उक्तदोषासंगतिरत आह यथाश्रुतमिति।ननु साध्या
सामानाधिकरण्यपदस्य साध्यवदवृत्तित्वमेव लक्षणकृतुर्विवक्षाविषयः।अत एवं केवलान्वयिनि तत्प्रसि
द्धिर्निरधिकरणे दर्शिता।तथा च साध्यानधिकरणाधिकरणत्वस्य दूषणमसंगतमत आह यथासेत्त व भि। राम

६५

सेवाभावसिद्धौ वीजं तच्चाधिकरणभेदेनाभावभेदानभ्युपगमेनैव संभवति।

यावंतोऽर्थाः संभवंति तावतां दूषणस्य संप्रदायित्वैमिति भावः।प्रतियोगिविरोधित्वं यदि प्रतियोग्यभा
वव्याप्यत्वं प्रतियोग्यनधिकरणवृत्तित्वं वा व्याप्यवृत्तित्वयघनवह्निभावावृत्तिस्तद्व्यत्वम्।स्वाधिकरणी
भूतयत्किंचिद्वह्निवत्स्यत्संताभावप्रतियोगित्वं वा तद्वानातिव्याप्तिरत आह प्रतियोगिविरोधित्वमिति
तदधिकरणेति।प्रतियोग्यधिकरणेत्यर्थः।न सिद्ध्येति।अधिकरणनानात्वेऽनंतत्वान्नास्तीति प्रतीति
नियामकत्वकल्पने गौरवादतिरिक्तोऽभावः कल्प्यत इति भावः।ननु संयोगात्यन्ताभावो गुणे प्रतियोग्यस
मानाधिकरणो व्याप्य[redacted]वृत्तिश्च द्रव्ये प्रतिसमानाधिकरणोऽव्याप्यवृत्तिश्चेति व्यवहारात्प्रतियोगिसा
योगि ५ मानाधिकरण्यासामानाधिकरण्यव्याप्यवृत्तित्वाव्याप्यवृत्तित्वलक्षणविरुद्धधर्मसंसर्गित्वं संयोगाभावा
द्विभेदकं स्यादत आह संयोगात्यन्ताभावस्येति।द्रव्यइत्यव्याप्यवृत्तित्वं चेत्यत्राप्यनुषज्यते।गुणइत्यपि
व्याप्यवृत्तिचेत्यत्राप्यनुषज्यते।अविरोधादिति।संयोगाधिकरणद्रव्यवृत्तित्वं संयोगानधिकरणगु
णवृत्तित्वयोरेकाशाभावादौ दर्शनादिति भावः।सामान्यतोऽनतथात्वव्यतिरेकइत्यन्वयः।तथा च स्वसमा
नाधिकरणात्यन्ताभावप्रतियोगिनि स्वसमानाधिकरणात्यन्ताभावप्रतियोगित्वाभावः।न वा प्रतियोग्यधि
करणवृत्तौ प्रतियोग्यधिकरणवृत्तित्वाभाव इत्यर्थः।साध्यवतीति।ननु साध्ये इति भावः।सचेति।तथा च साध्यवा

वान्यस्येत्यस्यसाध्यवान्यदधिकरणं इत्यर्थः। ननु यथा चैत्रस्य पुत्रवान यं देशः पुत्र चैत्रसंबंधित्वं पुत्रेऽन्वेति
न तु पुत्रवतितथा समस्बंधिकपदत्वात्साध्यवान् पदस्य संबंधित्वं साध्य एवान्वेति तच्च व्याप्तिरेवेत्यात्माश्रय इ
त्यत आह साध्यसाधनयोरपीति। सामानाधिकरण्यमेव साध्यवान्यस्येत्यत्र षष्ठ्यर्थः संबंधः तस्यान्वयः। साध्यसा
धनयोर्धर्मिणोर्न व्याप्तिनिरूपकत्वमत आह साध्यत्वेति। यत्किंचिद्धर्मेण साध्यसाधनव्यवच्छेदः। त
था च यत्समानाधिकरणान्योन्याभावप्रतियोगी यस्तन्न तेन सममित्यर्थः। न च धूमसमानाधिकरणा
त्यादि। यद्यपि वह्नित्वविशिष्टवह्निरेव तत्तद्व्यक्तित्वादिना धूमसमानाधिकरणान्योन्याभावप्रतियोगि
तावच्छेदकस्तमयुक्तमेतत्। तथापि यद्रूपावच्छिन्नप्रतियोगितावच्छेदके तदन्य रूपावच्छिन्नसामाना
धिकरण्यमित्यर्थ तात्पर्यम्। तत्तद्व्यक्तित्वादिना प्रतियोगितावच्छेदकत्वेऽपि वह्नित्वेन न प्रतियोगितावच्छे
दकमिति प्रगल्भरीत्येदमुक्तमित्यन्ये। वह्निसमानाधिकरणविशेषाभावकूटप्रतियोगितावच्छेदकतया
धूमत्वावच्छिन्नस्य धूमवान्वह्नेरित्यत्र नातिव्याप्तिपरतया व्याचष्टे यद्वेति। प्रत्येकं प्रातिस्विकरूपेणेतर
२ रित्वव्याप्ति द्रव्यत्वादिना धूमसमानाधिकरणः। प्रमेयत्वादेरिति मूलमनुरुध्याह। वैयधिकरण्यमिति। पृथिवीति। द्र

व्यत्वानधिकरणवृत्तित्वस्य पृथिवीत्वे सत्त्वादिति भावः। धूमवान्वह्नेरित्यत्रायोगोलकीयवह्न्यनधि
करणवृत्तित्वं धूमे वर्त्तते इत्यस्वरसे हेत्वनुसरणं। साधनाधिकरणे येन संबंधेन धर्मस्य वृत्तित्वं तेन सं
बंधेन तदनधिकरणं यत्तत्र साध्यतावच्छेदकसंबंधेन वृत्तित्वं चात्र तादृशं वैयधिकरण्यं। तेन संबंध
भेदमादाय न दोषः। धूमादेरपीति। समवायेन धूमस्य साध्यतायां व्यभिचारिणि वह्नौ वर्त्तते व्याप्तिर्वो
ध्या। संयोगेन साध्यतायां द्रव्यत्वानधिकरणे गुणादौ संयोगेन वृत्तित्वस्याप्रसिद्धेर्द्रव्यत्वमादाय नाति
व्याप्तिः संगच्छते। द्रव्यत्वादेरिति। तथा च द्रव्यं पृथिवीत्वादित्यादावव्याप्तिः। मात्रपदे दत्तेऽपि रूपवान्पृथिवी
त्वादित्यत्राव्याप्तिरिति भावः। तदनधिकरणेति। साधनसमानाधिकरणघटत्वाद्यनधिकरणे इत्यर्थः
तादृशेति। साधनसमानाधिकरणेत्यर्थः। नहीति। नीरूपमपि व्यज्ञावादिभिर्भाव धूमत्वादिकेनेति। तथा
च व्यभिचारिणि नातिव्याप्तिः। नन्वन्यूनवृत्तित्वरूपमवच्छेदकत्वमेव यत्वादावपीति नद्व्साध्यकाव्याप्तिरत
स्त्राह। तदवच्छेदकत्वमिति। तच्चान्यधर्मेति। धर्मत्वं वृत्तिमत्त्वं। तत्प्रयोजनमाह तेनेत्यादि। द्रव्यवान्प्रमेयत्वा
दित्यत्र समवायेन द्रव्यसाध्यतायामेयत्वसमानाधिकरणगुणत्वानधिकरणमात्रसमवेतत्वरूपगगना

DR. BHAU DAJI MEMORIAL

तिरो ये

राम

किंतु तेन संबंधेन वृत्तिमत्त्वम् २

दिवृत्तित्वेऽपि तद्धूमानियामवृत्तिवृत्तिमंति सत्तादौ नितरवृत्तित्वस्य द्रव्यत्वे सत्त्वान्नातिव्याप्तिरिति। न
नु धर्मत्वं साध्यतावच्छेदकसंबंधेन संबंधित्वं अवच्छेद्य वाच्यम्। अन्यथा गगनादेरपि संयोगसंबंधेन वृ
त्तितयोक्तदोषपरिहारात्। एवमप्यभावद्वयान्यतरत्वेन समवायेन साध्यतायां मेयत्वादिहेतौ व्यभिचारि
णि तादृशगुणत्वानधिकरणमात्रसमवेतत्वशून्येऽभावे वृत्तिमति तादृशान्यतरत्वस्य सत्त्वादनवच्छेदकत्वं
५ ब स्यात्। तथा च संयोगेन द्रव्यस्य साध्यतायां मेयत्वादिहेतावच्छेदकलक्षणे द्रव्यत्वे व्याप्तिः तादृशगुणत्वाध।
नधिकरणमात्रसंयुक्तत्वशून्यस्य संयोगेन वृत्तिमतोऽप्रसिद्ध्या द्रव्यत्वस्यावच्छेदकत्वाभावात्। एवं तद्धूम्या।
धर्मावृत्तित्वमित्यत्रावृत्तित्वं साध्यतावच्छेदकताघटकसंबंधेन वाच्यम्। अन्यथा वह्निसमानाधिकरण
योगोलकत्वाद्यनधिकरणमात्रवृत्तिताशून्येऽयोगोलकीयवह्नौ धूमत्वस्यापि कालिकसंबंधेन वृत्ति॥
त्वादनवच्छेदकत्वापातात्। इत्थं च समवायेन द्रव्यसाध्यतायां मेयत्वादिहेतौ तादृशगुणत्वानधिकरण
मात्रवृत्तिताशून्ये धर्मे सत्तादौ साध्यतावच्छेदकताघटकसमवायेन वृत्तित्वाप्रसिद्धेरवच्छेदकलक्षणा॥
व्याप्तिः। न च तादृशधर्मानधिकरणमात्रवृत्तित्वाभाववृत्तिमत्त्वोभयाभाववद्यावत्त्वाश्रयकत्वं पारिभा। राम

२एवं

षिकावच्छेदकत्वमिति वाच्यम्। अभावीयविशेषणतया वृत्तिमत्त्वीयसंबंधविशेषेणोभयाभावस्योभ
यवति सत्त्वात्। अन्यतरसंबंधेनाभावस्य चानभ्युपगमात्। ध्वंसाद्व्यत्वोभयवान् जातिमत्त्वादित्यादौ व
क्ष्यमाणरीत्यातिप्रसंगाच्चेत्यस्वरसादाह वस्तुतस्त्विति। तादृशधर्मेति। साधनसमानाधिकरणधर्मेत्यर्थः
स्वाऽवच्छेदकत्वेनाभिमतं। तथा च संयोगेन द्रव्यस्य साध्यतायां मेयत्वादिहेतौ संयोगेन द्रव्यत्वावच्छिन्नाधि
करणतायां तादृशगुणत्वानधिकरणमात्रवृत्तित्वाद्द्रव्यत्वस्यानवच्छेदकत्वमितिः। तादृशधर्मानधिकरणवृ
त्तिस्वावच्छिन्नकत्वमित्युक्तौ गुणान्यत्वविशिष्टसत्तात्वाज्जातिमत्त्वादित्यादौ गुणान्यत्वविशिष्टसत्तात्वावच्छि
न्नस्य गुणत्वानधिकरणमात्रवृत्तित्वाभावादतिप्रसंग इत्यधिकरणतापर्यन्तानुधावनम्। तादृशधर्मान
धिकरणमात्रवृत्तित्वं तादृशधर्मानधिकरणेतरावृत्तित्वमितरांशस्य वैयर्थ्यात्। न च स्वावच्छिन्नाधिक
रणता साध्यतावच्छेदकसंबंधेन वाच्या। अन्यथा धूमवान्वह्नेरित्यादौ कालिकादिसंबंधेन धूमत्वावच्छिन्ना
धिकरणताया अयोगोलकत्वाधिकरणवृत्तित्वेन धूमत्वस्यानवच्छेदकत्वापातात्। तथा च कालो घटवा
न् कालपरिमाणादीश्वरज्ञानं घटवन्नित्यज्ञानत्वादित्यादौ कालिकसंबंधेन विषयितादिसंबंधेन च साध्य

नायांताद्दशावच्छेदकाप्रसिद्धेरव्याप्तिरितिवाच्यम्।येनयेनसंबंधेनस्वावच्छिन्नाधिकरणतातादृशीतेन
तेनसंबंधेनस्वावच्छिन्नप्रकारकज्ञाननिन्नसाध्यतावच्छेदकसंबंधेनयत्साध्यतावच्छेदकावच्छिन्नप्रकार
कज्ञानंतदवच्छिन्नसामानाधिकरण्यस्यविवक्षितत्वात्।विवेचयिष्यतेचेदमुपरिष्टात्।महाकालान्यत्व
विशिष्टघटत्वस्येश्वरज्ञानान्यत्वविशिष्टघटत्वस्यचतत्रतत्रावच्छेदकत्वमित्यपिकश्चित्।तद्रूपधर्मापा
र्याप्तवृत्तिकत्वंवाच्यम्।सत्ताद्रव्यत्वोभयत्वंचनसत्तापर्याप्तवृत्तिकमत आहगुणान्यत्वेति।व्यतिरेकित्वमा
न्योन्याभावप्रतियोगितावच्छेदकत्वंतच्चनाकाशाभावे।नव्यति रेकियावद्धर्माणामधिकरणाप्रसिद्ध्यातद
धिकरणमप्रसिद्धम्।प्रातिस्विकरूपेणधर्मस्योपादानेचावच्छेदकस्यैवतदुपादानमुचितंकिंव्यतिरेकित्ववि
शेषणेनेत्यतआहवस्तुतस्त्विति।तादृशस्येति।तथाचयावत्पदंतत्तद्धर्मवैयधिकरण्यावच्छेदकंयद्यत्तत्तद्भेद
२धूम कूटस्यबोधनाय।ननुसमानाधिकरणपर्वतत्वादिवैयधिकरण्यावच्छेदकमहानसीयवह्नित्वाद्यात्मकता
पावह्नित्वादेर्नतादृशावच्छेदकभेदकूटवत्त्वमतआह।यावत्तादृशेति।तथाचतादृशावच्छेदकत्वस्यमहान
सीयत्वविशिष्टवह्नित्वपर्याप्तसत्त्वेपिशुद्धवह्नित्वेतदभावःप्रतीतिबलादभ्युपेयतइतिभावः।यद्यप्यवच्छेद रामः

कत्वस्याव्यासज्यवृत्तित्वेतदवच्छिन्नभेदोपिशुद्धवह्नित्वेसंभवतिएकोनद्वावितिवत्।तथापितदनभ्युपगमेने
दं।तथाचेति।इत्थंचात्रसाधनसमानाधिकरणधर्मोवह्निरेवेतिध्येयम्।मूलस्यन्यूनतांपरिहर्तुंतदधिकरणव
त्तित्वरूपमपिवैयधिकरण्यंदूषयतितेनेति।संबंधविशेषेणेति।एतच्चप्रागेवनिरूपितम्।आत्माश्रयेति।सा
ध्यनिरूपितव्याप्तेःसाध्यादिनिष्ठायाःप्रवेशादात्माश्रयः।आत्माश्रयादीति।धूमवान्वह्नेरित्यादौधूमनिरूपितधू
मनिष्ठव्याप्तेरपिलक्षणतयाधूमनिष्ठव्याप्तिनिरूपकत्वस्यधूमनिष्ठस्यापिप्रवेशादात्माश्रयः।धूमसामान्यादिनि
ष्ठस्यप्रवेशेत्वन्योन्याश्रयःधूमसामग्र्यादिनिष्ठधूमव्याप्तिनिरूपकत्वस्यापिधूमसामग्रीव्यापकत्वघटितोपाधि
घटितत्वात्।तत्रचधूमनिष्ठस्यधूमसामग्रीनिष्ठव्याप्तिनिरूपकत्वस्यापिघटकत्वादितिननुयत्रोपाधिरव्याप्य
वृत्तिर्नानाव्यक्तिकोवातत्रोपाधिलक्षणसत्त्वादनौपाधिकत्वलक्षणातिव्याप्तिरतआहयत्रेति।इदमेतद्वृक्ष
त्ववद्द्रव्यत्वादित्यत्रैतत्कपिसंयोगोऽव्याप्यवृत्तिरुपाधिः।धूमवान्वह्नेरित्यादावार्द्रेन्धनादिर्नानाव्यक्तिकउपा
धिः।अंततइति।व्याप्तिचाराधिकरणतत्तद्व्यक्तिभिन्नत्वस्यैवाखंडस्यसर्वत्रसंभवादिति।तद्वृत्तिरिति।तत्पदे
नाव्याप्यवृत्तिनानाव्यक्तिकोपाधिःसंगृह्यते।तत्रतत्रैतत्कपिसंयोगभिन्नत्वप्रकारकप्रमाविशेष्यत्वाभाव

आर्द्रेन्धनवह्निमत्त्वप्रकारकप्रमाविशेष्यत्वाभावस्याखंडस्य सर्ववत्तिरेकोपाधिरित्यर्थः। तद्वह्निमत्त्वाभा
वस्य तदभिन्नत्वात्। तत्प्रकारकप्रमाविषयत्वस्य च विशेष्यभेदेन भिन्नत्वादुरुतरानुसरणम्। तस्मा
पि अखंडस्यापि विशिष्टस्यातिरिक्तत्वे विशिष्टाभावस्य विशेषणविशेष्यसंबंधाभावात्मकत्वे वा विशेष्या
स्य न प्रतियोगित्वमत आह। द्वित्वावच्छिन्नस्येति। संनवदिति। द्वित्वावच्छिन्नाभावस्यातिरिक्तस्य केश्चिद
नभ्युपगमात् घटाभावस्यैव तादृशप्रतीतिविषयत्वाभ्युपगमादिति। साध्यसमानाधिकरणेति। अत्र
तादृशप्रतियोगितानवच्छेदकत्वं यद्रूपेण तद्रूपेण तादृशप्रतियोगितावच्छेदकत्वं वा अमूर्तेन सद्धेतौ मु
दस्येन्धनत्वस्य वह्निसमानाधिकरणाभावप्रतियोगितावच्छेदकस्य महानसीयत्वविशिष्टस्य धूमसमा
नाधिकरणाभावप्रतियोगितावच्छेदकत्वेऽपि न क्षतिः। प्रतियोगितयोरेकसंबंधावच्छिन्नत्वादिकं पश्चा
द्वक्ष्यति। अनवस्थामिति। विरोधित्वस्य परस्पराभावव्याप्यत्वरूपस्य प्रवेशेन घाभावेपि विरोधित्वरूपप्र
तियोगित्वघटकव्याप्त्यंतराणां प्रवेशादनवस्थेत्यर्थः। निरुक्तसहानवस्थायित्वे तदधिकरणावृत्तित्वरू न५
पव्याप्तेरप्रवेशादनवस्थाया अभावेऽपि दोषांतरमेव तत्रेति ध्येयम्। अव्याप्यवृत्तेरिति। अत्रैकदेशोना। राम

९२

वच्छेदकः। प्रागभावादेरिति। अत्रैककालोनावच्छेदकः। येन संबंधेनेति। तत्संबंधावच्छिन्नप्रतियो
गिताकाभाववत्ति तेन संबंधेन प्रतियोगिनो वृत्तित्वं वक्तव्यमित्यर्थः। तथापि तादात्म्येन वृत्तित्वस्याधे
यत्वरूपस्य प्रसिद्ध्या कपमन्योन्याभावप्रतियोगिसाधारण्यमत आह। इत्थं चेति। संबंधभेदविवक्षणे चेत्यर्थः।
नायं दोष इति। नाव्याप्तिः। तद्धा। तत्समवायसंबंधावच्छिन्नसत्ताभाववत्तिसामान्यादौ। तादृशेति। प्रतियोगिताव
च्छेदकसंबंधेन प्रतियोगिसंबद्धं यदधिकरणं तदवृत्त्यभावकत्वमित्यर्थः। प्रकृते च तादृशप्रतियोगिसंबद्धा
धिकरणं सत्तावदेव। तत्र सत्ताभावस्यावृत्तित्वान्नाव्याप्तिरिति भावः। यद्यप्यत्रापि सत्ताभावनिष्ठसत्तारू
पाभावप्रतियोगित्वेऽव्याप्तिस्तत्र तादृशप्रतियोगिसंबद्धाधिकरणं सत्ताभाववदेव। तत्र सत्ताया भावतया
तद्वृत्तितानियामकसमवायेन वर्तेरप्रसिद्धेस्तथापि सप्तमपदार्थरूपाभावप्रतियोगित्वमेव लक्ष्यमिति यदि
ब्रूयास्तदा नोक्ताव्याप्तिर्घटत इति दूषणांतरमाह। व्यधिकरणेति। संयोगेनात्माभावादौ संयोगेनात्मेति
संबद्धाधिकरणाप्रसिद्धेरव्याप्तिरित्यर्थः। खंडशः इति। प्रतियोगितावच्छेदकसंबंधसामान्ये प्रतियोगिकत्व प्रतियोगिर
तद्देशकालाद्यवच्छिन्नयदभावाधिकरणानुयोगिकत्वोभयाभावस्तस्य तदभावप्रतियोगित्वं संयोगसंबंधसा

मान्येच जातिप्रतियोगिकत्वज्ञात्यन्ताभाववदनुयोगिकत्वोभयाभावसत्त्वान्नतत्प्रतियोगित्वेऽव्याप्तिरि
ति। नत्परीहारायेति। नस्यापि कृदोषस्याव्याप्तेः परीहारः। आकाशादौ घटाद्यभावप्रतियोगित्वस्य वार
णाय स्वाभावाधिकरणानुयोगिकत्वेन स्वाद्व्यापादाने स्वस्याभाव इत्यत्र षष्ठ्यर्थस्य प्रतियोगित्वस्या
निरुक्तिरपि नासङ्गता। अप्रसक्तिरन्योन्याभावप्रतियोगिनि तस्यान्योन्याभावविरहस्वाभावात्। अ
तिप्रसक्तिस्तत्त्वावच्छेदकेन स्यैवान्योन्याभावविरहत्वात्। प्रकृतोपयोगीति। व्याप्तिलक्षणघटकस
र्थः। मात्रस्येति। मात्रपदेनान्योन्याभावप्रतियोगित्वस्य व्यवच्छेदः। तथा चेदं पर्यवसन्नं साध्यवन्निष्ठा
योन्यन्ताभावस्तदभावत्वरूपं यत्प्रतियोगित्वं तदभावत्वे सति साधनवन्निष्ठात्यन्ताभावस्तदभाव
त्वरूपं प्रतियोगित्वं यत्र स उपाधिस्तदभावो यत्र तत्त्वम् अनौपाधिकत्वरूपा व्याप्तिरिति। लक्षणे ऽउपाधि
लक्षणावैयर्थ्यमिति। धूमवान्वह्नेरित्यादौ धूमवति वर्तमानो यः आर्द्रेन्धनाद्यन्योन्याभावस्तदभावत्व
स्यार्द्रेन्धनादावभावेन तत्रोपाधिलक्षणगमनसंभवेनानौपाधिकत्वरूपव्याप्तिलक्षणस्यातिव्या
प्त्यभावादन्योन्याभाववारकात्यन्तपदं व्यर्थमित्यर्थः। ननु तद्धूमवान्वह्नेरित्यादौ तदार्द्रेन्धनस्याप्युपा राम

१८

धित्वात्तस्य च तद्धूमसमानाधिकरणध्वंसप्रागभावप्रतियोगित्वादनुपाधितापत्तिरतो ध्वंसादिवार
णायैवात्यन्तपदं सार्थकमत आह। सर्वत्र नित्यस्येति। तत्रापि व्यभिचाराधिकरणयोगोलकाद्यन्यत्वा
स्योपाधिकत्वसंभवान्नानौपाधिकत्वलक्षणातिव्याप्तिः। उपाधिलक्षणस्याप्रकृतत्वात्तदव्याप्तिर्न दोष
इति भावः। नित्यस्यापि विशिष्टाभावादिप्रतियोगित्वादवच्छेदकत्वानुसरणमावश्यकं तथा चानित्या
स्यापि नित्यसाधारणधर्मेण प्रकृतोपाधिता संभवत्येवेत्याशयेनाह। नित्यसाधारणेति। तथा च तदा
र्द्रेन्धनायोगोलकभेदान्यतरत्वेन तदार्द्रेन्धनस्याप्युपाधित्वमित्यर्थः। इतरथा भेदप्रतियोगिता साधार
प्रतियोगिता णीमात्रस्य लक्षणे भेदप्रतियोगितेति। धूमवान्वह्नेरित्यादावयोगोलकान्यत्वादेरुपाधेर्धूमवन्निष्ठभे
दप्रतियोगित्वादिति। तस्य अत्यन्ताभावपदस्य। न च सर्वत्र व्यभिचाराधिकरणान्यस्य साध्यं दृष्टेः। त
स्य वा तत्त्वेनोपाधित्वं संभवत्येवेति तद्धारणमफलमिति वाच्यम्। इदं जन्यत्ववत्पृथिवीत्वादित्यत्र व्य
भिचाराधिकरणपरमाणुभेदस्य परमाणुत्वाभावस्य वानौपाधित्वे तस्य जन्यत्वसमानाधिकरणभेद
प्रतियोगित्वात् परमाणुभिन्नस्य जन्यत्वतद्व्यन्यतरस्य वानौपाधित्वं। तादृस्य परमाणावपि सत्त्वेन साध

न व्यापकत्वात्तान च तादात्म्यसंबंधेन साधनाधिकरणे परमाण्वादावसत्त्वात्साधनाव्यापकत्वमकृतमसं
बंधविवक्षायाः प्रकृते अकृतत्वात्संबंधविवक्षणे त्वत्यन्तपदानुपादानस्य वस्तुतस्त्वित्यादिना स्वयमेव वा
च्यत्वात्। एवं तत्परमाणवृत्तित्वादिना नोपाधित्वं संबंधसामान्येन परमाणवृत्तित्वस्य जन्यत्ववद्घटव
निष्ठभेदप्रतियोगितावच्छेदकत्वात्। स्वरूपसंबंधेन परमाणवृत्तिरूपादेः समवायेन परमाणवपि सत्त्वा
न साधनव्यापकत्वादिति॥ केचित्तु॥ घटाभावान्यत्ववान्प्रमेयत्वादित्यादौ व्यभिचारनिरूपकाधिकरण
स्य घटाभावस्य यदन्यत्वं तदवच्छिन्नभेदस्य घटाभावात्मकतया घटाभावान्यस्य घटाभावान्यत्वसमाना
धिकरणघटाभावप्रतियोगितावच्छेदकत्वाद्घटाभावान्यत्वो नोपाधिः घटाभावत्वप्रकारकप्रमाविशेष्य
त्वाभावस्य च साध्यवन्निष्ठभेदप्रतियोगितावच्छेदकत्वेन न दोषः अस्यानुपाधितापत्त्या अत्यन्ताभाव
पदस्य संसर्गाभावपरतया सार्थकत्वमित्याहुः। अन्योन्याभावप्रतियोगिन्यव्याप्तिं निरस्यति। प्रतिबध्ना
ति हीति। प्रतिबंधकत्वं कारणीभूताभावप्रतियोगित्वं चेत्तदाऽप्रात्याप्रमपदत्यत आह। प्रतिबंधकत्वं ज्ञा
ति। अत्र प्रतियोगितालक्षणे प्रतियोगिज्ञानतदभावज्ञानयोर्भिन्नकालावच्छेदेनैकात्मनिवर्त्तेरेककालाव

MEMORIAL

२ने

च्छेदेति। एकशरीरावच्छेदेनेत्यपि बोध्यम्। तेन कायव्यूहदशायां विभिन्नशरीरावच्छेदेनैकत्रात्मनि।
एककालावच्छेदेन वृत्तेरपि न दोषः। अन्योन्याभावबुद्धिप्रतिप्रतियोगितावच्छेदकज्ञानस्यापि प्रतिबंध
कत्वाच्चातिव्याप्तिं निरस्यति अभावपदस्येति। घटान्योन्याभावस्य न घटत्वस्याभाव इति न तत्रातिव्या
ह साध प्तिरिति भावः। वस्तुमात्रस्याप्यभावस्य तत्त्वमिति। एकसंबंधेनेति। तथा च यत्किंचित्संबंधाविशेषितप्रति
योगितानवच्छेदकत्वघटितव्यापकत्वस्याप्रसिद्ध्या व्यापकत्वदले यत्किंचित्संबंधावच्छिन्नत्वं विवक्षणीयं व्या स्य प्रतियोगिताभावा
पकत्वदले च तदविवक्षणे वह्निमान्धूमादित्यादौ तानोपाधिकत्वं स्यात् तत्र समवायावच्छिन्नवह्निसमाना
धिकरणाभावप्रतियोगितानवच्छेदकीभूतस्य द्रव्यत्वत्वादेः संयोगावच्छिन्नधूमनिष्ठाभावप्रतियोगिता
वच्छेदकत्वाद्द्रव्यत्वस्योपाधित्वसंभवात्। न च प्रतियोगितासामान्यानवच्छेदकत्वघटितमेव व्यापकत्वं वा
च्यम्। धूमवान्वह्नेरित्यादौ त्वयोगोलकभेदत्वमेव धूमवन्निष्ठाभावप्रतियोगितासामान्यानवच्छेद
कं संयोगावच्छिन्नाभावप्रतियोगितायामयोगोलकभेदत्वस्य गुरुतया भेदत्वस्यैवावच्छेदकत्वादि
ति वाच्यम्। अन्यमात्रस्यैकालोपाधिसंभवा। योगोलकभेदानधिकरणदेशावच्छेदेन कालिकसंबंधाव

च्छिन्नप्रतियोगितायोगोलकभेदाभावस्य धूमवन्निष्ठतया अयोगोलकभेदत्वस्य तादृशाभावप्रतियो
गितावच्छेदकत्वात्। एवं पृथिवी रूपादित्यादौ व्यभिचाराधिकरणजलभेदादीनां कालिकसंबंधावच्छिन्ना
भावस्य पार्थिवपरमाणौ सत्त्वादुपाधेरप्रसिद्धेरित्यादिकमूह्यम्। तत्संबंधावच्छिन्नाप्रयोगे वेति। वह्निमान्
धूमादित्यादौ तु द्रव्यत्वेनातिप्रसंगः। तत्र समवायावच्छिन्नधूमवन्निष्ठाभावप्रतियोगितावच्छेदकत्वस्य
द्रव्यत्वेऽभावादिति भावः। तथा च मूलउपाधित्वं वाच्यम्। तथा चेति। इत्थं विवरणेऽन्योन्याभावमादायपक्षे
बासस्पर्शादिति। स च। अस्वरसः। अधिकरणसंबंधेति। यद्यपि समानाधिकरणसंबंधावच्छिन्नाभाव
स्यालेऽपि सर्वत्राभाववत्ति तेन संबंधेन प्रतियोगिनोऽप्रमेमानाभावइति अधिकरणसंबंधानुधावनमफ
लम्। तथापि तेन संबंधेन प्रतियोगिमत्ताज्ञाने यत्र तत्र तत्कालावच्छेदेन तदात्मीयाभाववत्ताज्ञानाभावद्व
त्यवमुक्तौ नाप्रसिद्धिः संभवतीति तत्पर्यंतानुधावनमिति। अत्र सर्वत्र पंचम्यन्तानि सचेत्यत्र हेतुत्वेनान्वीय
न्ते। स्वाभाववत्ताज्ञानप्रतिबंधकज्ञानविषयत्वमित्यत्र गौरवमाह। स्वाभावसंबंधित्वस्येति। संबंधत्वस्य व्याप्ति
घटितत्वेनानौपाधिकत्वलक्षणेन वस्या गौरवं चेत्यतआह स्वाभावज्ञानविषयत्वेति उभयत्रैव प्रतियोगि राम

७२

निष्ठत्वं संपादयितुं विशेष्यानुसरणम्। ननु तदेवास्तु प्रतियोगित्वमतस्तदपि दूषयति। स्वाभावेत्या
दाविति। तत्र षष्ठ्यर्थे। तथात्वौचित्यात्। प्रतियोगितात्वौचित्यात्। प्रकारांतरेणापि प्रतियोगितायाः प्रवेशं
दर्शयति। अभावत्वेति। अभावत्वद्व्यादिषक्वान्योन्याभाववत्त्वं प्रतिबंधकत्वं एककालावच्छेदेनैकत्र वर्त्तमान
त्वप्रतियोगिकोऽभावः। तत्र प्रतियोगितानिर्वचनानुयोगस्तदवस्थः। तथाविधेति। अभावत्वप्रकारकेत्यर्थः।
विनेति। तत्राप्यभावत्वस्य प्रवेशात्तस्य च प्रतियोगिताघटितस्य दुर्वचत्वादिति। यत्साध्येत्यत्र मूले कर्मधारयत्त्र
६नि९ मे व्याप्तिर्हेतुत्वालाभोऽतः षष्ठीसमासाभिप्रायेणाह। यत्समानाधिकरणेति। यावत्साधनाव्यापकमव्यापकं यत्सा
ध्यस्य तत्त्वं। यावत्साध्यव्यापकं व्यापकं वा यस्य तत्त्वमित्यनौपाधिकद्वयं क्रमेण परिष्करोति। यत्समानाधिकर
णात्यन्ताभावेति। धूमवान्वह्नेरित्यत्र तादृशप्रतियोगितावच्छेदकस्य घटत्वादेर्धूमसमानाधिकरणाभावप्र
तियोगितावच्छेदकत्वात्। यावदिति। एवं तत्रैव धूमसमानाधिकरणाभावप्रतियोगितानवच्छेदकस्यापि द्रव्य
त्वादेर्वह्निसमानाधिकरणाभावप्रतियोगितानवच्छेदकत्वादुत्तरत्र यावदिति। नोक्तदोषः। नन्वेवमुक्तदो
षः। एकसंबंधस्य तत्तत्संबंधपर्यवसानितानुगमात्तत्र च विशेषणताविशेषस्यापि निवेशात्तस्यैव विशिष्यप्रवे

न्नौचित्यादाह। विशेषणेतेति। प्रथमेसंबंधविशेषाप्रवेशेदूषणमाह। प्रतियोगितावच्छेदकमात्रस्यैवेति।
मात्रपदंकृत्स्नार्थकम्। तथाचहेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकस्यसुतरांतथात्वमिति।
धूमवान्वह्नेरित्यादावतिव्याप्तिरिति भावः। धूमवान्वह्नेरित्यादावयोगोलकभेदत्वादीनांयथासाध्यस-
मानाधिकरणाभावप्रतियोगितावच्छेदकंतथाप्रागेवदर्शितम्। नचैवंजातिभिन्नत्वादित्यत्रतादात्म्ये
नजातेःसाध्यतायांव्यभिचारिण्यव्याप्यत्ववन्निष्ठभेदप्रतियोगितावच्छेदकस्यजातित्वस्यकेनापिसंबंधेनसा
ध्यवन्निष्ठाभावप्रतियोगितावच्छेदकत्वाभावात्कथमेवंनियमः। समवायाद्यवच्छिन्नजात्यभावप्रतियोगि
तायांनित्यत्वादेर्वैयर्थ्येनसमवेतस्यैवावच्छेदकत्वादितिवाच्यम्। विशेष्यतासंबंधेनजातेरभावस्य
नित्यगुणादिविशेष्यकज्ञानेपिसत्त्वेनतत्रनित्यानेकसमवेतत्वरूपजातित्वस्यैवप्रतियोगितावच्छेदक
त्वादितितदभावस्यचसाध्यवैशिष्ट्यत्वादिति। साध्यसमानाधिकरणेत्यत्रसाध्यपदंधूमादिरूपसाध्य
परमित्यपिकश्चित्। द्वितीयलक्षणेसंबंधविवक्षायाःफलमाह। एकसंबंधेति। सामान्यतस्तादृशाभा
वप्रतियोगितानवच्छेदकत्वेऽप्रसिद्धिरतोयत्किंचित्संबंधावच्छिन्नत्वस्यप्रतियोगितायांनिवेशेसंबंधेक्या

विवक्षणेदोषइतिस्फुटयितुमेकसंबंधावच्छिन्नत्वेनप्रतियोगितानिर्दिष्टा। उक्तविवक्षणेलक्षणद्वयस्यैवा
नतिप्रसक्तिंदर्शयति व्यभिचारिणीत्विति। विशेषणेतेति। विशेषणताविशेषश्चात्रप्रमाविषयत्वीयोऽतः।
संबंधविशेषाप्रवेशेलाघवात्कथांतरमाह वस्तुतइति। यदिति। यत्पदंहेतुपरम्। यद्धर्मावच्छिन्नेति। साध्यतावच्छे
दकावच्छिन्नेत्यर्थः। अत्रधूमवान्वह्नेरित्यादौवह्निमन्निष्ठभेदप्रतियोगितावच्छेदकस्यायोगोलकान्यत्वस्यधूमवत्त्व
वत्त्वप्रकारकप्रमाविशेष्यत्वादेर्वाविषयितामात्रज्ञानभेदप्रतियोगितावच्छेदकत्वात्प्रतियोगितावच्छेदकसंबंधाप्र
वेशेप्यवच्छेदकताघटकसंबंधैक्यविवक्षणमावश्यकम्। तथाचकलाघवम्। नचास्तत्राभावघटितेलक्षणेप्रतियो
गितावच्छेदकसंबंधैक्यविवक्षणेप्यवच्छेदकताघटकसंबंधैक्याविवक्षणेविशेषणताविशेषावच्छिन्नवह्निमन्निष्ठा
भावप्रतियोगितावच्छेदकायोगोलकान्यत्वस्यविषयितयातद्ज्ञानाभावस्यतादृशविशेषणताविशेषावच्छिन्नप्र
तियोगितावच्छेदकत्वादतिव्याप्तिःस्यादितिवाच्यम्। अभावीयविशेषणतयाज्ञानाभावस्यव्यधिकरणसंबंधावच्छि
न्नप्रतियोगिताकाभावत्वेनकेवलान्वयितयातत्प्रतियोगितायालाघवाद्भेदत्वादेर्विषयितयाऽवच्छेदकत्वेनायोगो
लकभेदत्वस्यविशिष्टस्यानवच्छेदकतयाऽतिप्रसंगाभावेनावच्छेदकतायांसंबंधैक्यस्यतत्राविवक्षणात्। तस्मात्

भावानंदी

स्फुतइत्यादिपाठःकाल्पनिकः।अतएवप्राचीनपुस्तकेषुन्नोल्लिखितएवतिष्ठतीतिबहवः।यावत्त्वस्यसाध्यवि
शेषणतामभ्रंतदव्यभिचारीत्यत्रकर्मधारयत्वमपिचनिराकर्तुमाह।यावतांतेषामिति।तथाचसाध्यघावतां
मव्यभिचारितेषामव्यभिचारित्वंव्याप्तिरित्यर्थः।दूषितमित्यत्रहेतुंपूरयति।केवलान्वयिन्यव्याप्तेति।ननु
साध्याव्यभिचारित्वस्यत्वेनकेवलान्वयिन्यव्याप्तिरेवदोषइतिप्रकृतलक्षणमेवसम्यगित्यतआह।साचप्र
कृतेऽपीति।केवलान्वयिसाध्यंयस्याव्यभिचारितस्याप्रसिद्धेरितिभावः।एतस्मिन्लक्षणेकार्त्स्न्यस्यविशेषतः
किंचिन्निष्ठत्वेनानुपादानात्कार्त्स्न्यस्याधिकरणविकल्पपुरःसरंदोषप्रदानपरतयोत्तरग्रंथयोजयितुंमूलस्यन्यू
नताञ्चपरिहर्तुमाह।कार्त्स्न्यमित्यादि।साध्याश्रयस्येत्यादिग्रंथंचमूलस्यन्यूनतापरिहाराय।सकलघटसं
बंधस्यप्रत्येकंवर्त्तभावाभावादितिग्रंथसंदर्शनाद्व्याप्तेःसाध्यनिष्ठत्वंदर्शयितुंप्रथममेवविकल्पयतिप्राचइति
।।स्वातंत्र्येणदोषमाहव्याप्तेश्चेति।ननुसाध्यनिष्ठसामानाधिकरण्यनिरूपकत्वंयद्धर्मव्यापकेतद्धर्मवत्त्वंव्या
प्तिरतोनोक्तदोषइत्यतआह।पृथिवीति।पृथिवीत्ववन्निष्ठाभावप्रतियोगितानवच्छेदकत्वमिहतद्व्यापकत्वंत न्योन्यार
त्रचविषयितयाज्ञाननिष्ठंयासर्वस्यैवतादृशज्ञानतन्नेदप्रतियोगितावच्छेदकत्वात्तदनवच्छेदकाप्रसिद्धिरतःस राम

९३

१ या
मवायेनावच्छेदकतातदभावरूपंतादृशप्रतियोगितानवच्छेदकत्वंवाच्यम्।तथाचासमवेतस्यगगनादेरेव
तादृशप्रतियोगितानवच्छेदकत्वात्।तत्रपृथिवीत्वसामानाधिकरण्याभावाज्जातिव्याप्तिःस्यादतस्तत्संपत्त
येगगनादिवारणयजातीतिसमवेतपरम्।द्रव्यत्वादेरेकव्यक्तिकत्वेनकार्त्स्न्याभावात्कृत्स्नसाधनाप्रसिद्धाप
याकृतलक्षणेऽतिव्याप्त्याभावादेवंविधहेतुकरणम्।अतएवउक्तातिव्याप्तिरेवा।द्वितीयकल्पस्यमूलोक्तानुवा
दंसार्थकयति।अर्थाभिधानेति।एकहेतुव्यक्तिकाव्याप्तेःपूर्वमुक्तत्वात्तत्परामर्शकत्वेऽसंगतिरतस्तत्पराम
र्शनीयंदर्शयति।एकव्यक्तिकसाध्याव्याप्तेरेवेति।पूरयतिसमव्याप्तेपिचेति।तदेवदर्शयन्तदभावादित्य
त्रतद्धटस्यार्थविग्रहंचदर्शयतिसंख्यापरिमाणादावित्यादिना।संख्यापरिमाणयोरेकस्यसाध्यत्वेऽन्यस्य
साधनत्वेइदम्।ननुहेतुनिष्ठसामानाधिकरण्यप्रतियोगित्वंयद्धर्मव्यापकेतद्धर्मावच्छिन्नसामानाधिकर
ण्यंहेतौव्याप्तिरतोनोक्तदोषइत्यतआह।भावाद्येति।साध्यस्यकार्त्स्न्यंविवक्षितुंशङ्कतेनित्यनेकव्याप्तिसा
ध्यतारूपादिसाध्यतायांकृत्स्नरूपाधिकरणत्वस्ययथाकृतार्थस्याप्रसिद्ध्यातदुपेक्षितम्।तृतीयचतुर्थयोर
र्थपरिष्कारंदूषणंचाह।तृतीयइति।एकमात्रवृत्तिसाध्यकेपिसाध्यसमानाधिकरणानांबहूनांसंभवाच्चतुर्थे

एतद्दोषस्यासंभवात्। यथासंभवमिति। वह्न्यादावित्यादिदोषद्वयमेवेति। अतिव्याप्तिश्चेति। साध्यसमा
नाधिकरणधर्माणां प्रातिस्विकरूपेण सामानाधिकरण्यविवक्षणे वह्न्यादौ सामसत्त्वादावतिव्याप्तिरिति
र यातु तद्वह्निसाध्यकसत्त्वेऽतिव्याप्तिरप्रसिद्धिश्च वह्न्यादिसाध्यकसद्धेताविति। अर्थपरिष्कारे त्विति। साधना
श्रयस्य कात्स्न्यविवक्षणे वह्न्यादौ साध्ये कृत्स्नसाधनाश्रयाश्रितत्वं लभ्यते। तथा च व्याप्तेर्हेतुवृत्तित्वमतस्तस्या
हेतुनिष्ठत्वसंपादनमर्थपरिष्कारः। एवं साधनसमानाधिकरणेत्यत्रापि परिष्कारः। स्वयं दूषणमाह। ए
कमात्रवृत्तीति। तथैव। अर्थपरिष्कारपूर्वकमेव। प्रत्येकनिरूपितसामानाधिकरण्यविवक्षणे मूलोक्ताप्र
सिद्ध्यभावाद्दूषणांतरमाह। तादृशानामिति। साधनसमानाधिकरणानां। न कुत्रापीति। पर्वतीयवह्नौ
महानसत्वसामानाधिकरण्याभावादेवमन्यत्रापीति भावः। यद्धर्मावच्छिन्नेति। साध्यतावच्छेदकावच्छिन्नेत्य
र्थः। तेन गुणान्यत्वविशिष्टसत्तावान् जातेरित्यादौ जातिसामानाधिकरण्यप्रति सत्तात्मकसाध्यसामानाधिकर
ण्यस्याव्यापकत्वेऽपि न दोषः। इतोऽपीति। तथा च वक्ष्यमाणलक्षणापेक्षया गौरवमेव प्रकृतलक्षणे दोष इति भावः। साध्यं
विनेति। अत्र विनाशब्दो योगेनावा। वा न विनाभावः तत्र समासः सप्तमीतत्पुरुषः ततो नञ्समासः। पूर्वोक्ताय

भिचारित्वस्य साध्याभाववदवृत्तित्वस्य साध्याभाववद्वृत्तित्वभिन्नरूपत्वात्तेन न पौनरुक्त्यं। सत्ता
साध्यके समवायेन हेतौ हेतुतावच्छेदकसमवायेन साध्याभाववतिवृत्तेरप्रसिद्ध्या व्याप्तेराह। साध्य
मित्यादि। अत्र तु विनेति सप्तम्यंतं विनार्थश्चाभावः सप्तम्याश्चावच्छेदकत्वमन्यूनवृत्तित्वरूपं।
प्रत्याय्यते। तथा च विनाभावः साध्याभावव्यापकीभूतोऽभावः। अविनेत्यस्य नञा पुनस्तस्याभा
वः प्रत्याय्यते स एव च प्रतियोगित्वमिति भावप्रधाननिर्देशात्तस्य तादृशाभावप्रतियोगित्वस्य ला
भ इति। कार्यकारणभावाद्यात्मकसंबंधस्य व्याप्तित्वाभावादाह। सामानाधिकरण्यमिति। व्य
भिचारिसंबंधस्य। व्यभिचारिहेतुनिष्ठसाध्यसामानाधिकरण्यस्य। केनचिदिति। मूलस्यासंग
तेः किंचिद्रूपावच्छिन्नसाध्यपरतया व्याचष्टे। किंचिद्रूपावच्छिन्नेनेति। तदेवाह धूमादेरपीति। व्य
भिचाराग्रहे सति व्यभिचारग्रहे तु मित्यनुत्पादः सिद्ध एवेत्यतस्तद्व्यतिरेकं कृः। अनुत्तवविप्रति
पन्नं प्रत्याह। हेत्वंतरइति। तद्धेतुकानुमितौ तद्धेतुकव्यभिचाराग्रहो हेतुरतस्तत्रैवेति धूमत्वरूपेण
व्यभिचारग्रहेऽपि धूमत्वावच्छिन्नधूमहेतुकानुमितेरुदयादिति भावः। येन रूपेण हेतौ पक्षधर्मता

भावानंदी

धीः तेन रूपेण व्यभिचारज्ञानाभावो हेतुर्वाच्य इत्यतो हेतुतावच्छेदकाग्रहेपीति। वह्निसमानाधिकर
णवान्नित्यादौ हेतुतावच्छेदकधूमत्वादेरग्रहेपीत्यर्थः। ननु वह्निसमानाधिकरणवान्नित्यादौ सामा
नाधिकरण्यप्रकारकमेव पक्षधर्मताज्ञानं तेन रूपेण व्यभिचाराज्ञाने च कारणं वह्निसमानाधिकर
णवह्निमदन्यावृत्तिमान्नित्यादौ तु वह्निमदन्यावृत्तित्वप्रकारेण व्यभिचारज्ञानाप्रसिद्ध्या तेन रूपेण
सामानाधिकरण्यप्रकारकपक्षधर्मताज्ञानमेव कारणं न व्यभिचारग्रहाभाव इत्यत आह। वि
वदन्ते वेति। परामर्शो वैतत्स्फुटीभविष्यति। ननु सामानाधिकरण्यज्ञानस्य कारणत्ववादिमते इ
दं स्यात् तदेत्याह व्यभिचारज्ञानेति। उचितमिति। व्यभिचारज्ञानाभावस्य कारणतायां स्वातंत्र्येण ज्ञान
स्य प्रवेशो कारणांतरकल्पने च गौरवात् कारणीभूतसामानाधिकरण्यज्ञाने विषयतयाः व्यभिचा
राज्ञानावच्छेदकत्वमित्यर्थः। गौरवमिति। व्यभिचाराप्रकारकं सत् यद्व्यभिचारप्रकारकं तत्त्वेन हेतु व्यर
त्वापेक्षया व्यभिचारप्रकारकज्ञानाभावस्य हेतुत्वे लाघवादिति भावः। तन्दैवेति व्यभिचाराप्रकारक
व्यभिचारा मं प्रकारकं ज्ञानमभिचारनिश्चयः। तस्मात्मत्वं व्यभिचारवति। व्यभिचारप्रकारकत्वो। व्यभिचारज्ञा राम

७५

रभिचाराभावव

नस्यात्मत्वं च व्यभिचारवति व्यभिचारप्रकारकत्वं तस्मिन्निश्चयो व्यभिचाराभाववति व्यभिचारप्रका
प्र रकत्वाभावा[illegible]कारकं व्यभिचाराभाववति व्यभिचारप्रकारकत्वप्रकारकं ज्ञानं। तथा च यस्य व्यभिचारप्रका
रकत्वज्ञानानास्कंदित व्यभिचाराप्रकारका व्यभिचारप्रकारकज्ञानत्वमपेक्ष्य व्यभिचाराभाववति व्यभि
चारप्रकारकत्वाभावाप्रकारकं व्यभिचाराभाववति व्यभिचारप्रकारकत्वप्रकारकज्ञानानास्कंदित व्यभिचा
रप्रकारकज्ञानत्वेःति गौरवात्तरवच्छिन्नाभावहेतुत्वे सुतरां गौरवादिति भावः। न च यत्र विषयविशेषे व्यभिचा
रज्ञाने भ्रमत्वनिश्चयो न जातस्तत्र लाघवाद्व्यभिचारज्ञानाभावस्यैव हेतुत्वं स्यादिति वाच्यं तथा सुपगंतुरिष्टत्वा
त्। वस्तु माणिक्यविधेति। अन्योन्याभावगर्भत्वेत्यर्थः। यदि लाघवादेकविधव्यभिचारज्ञानस्य कारणत्वं तदान्या
दृशव्यभिचारज्ञानस्यानुमितौ व्याप्तिज्ञाने वा स्वातंत्र्येण प्रतिबंधकत्वं कल्प्यं तथा चातिगौरवमतोऽन्यादृश
व्यभिचारज्ञानस्य व्याप्तिज्ञानाप्रतिबंधकत्वे तु ममापि लघुतरमेव व्यभिचारज्ञानं प्रतिबंधकमस्त्विति त
स्वरसः प्राहुरित्यनेन सूचितः। नन्वनित्ये व्यभिचरित हेतुसत्त्वे पक्षस्य साध्यवत्तावश्यकत्वे तज्ज्ञानं हेतु
तायां बीजं म। न च सामानाधिकरण्यविशिष्टहेतुसत्त्वेपीति लाघवात्तज्ज्ञानमेव हेतुरस्त्विति त्याशंक्य।

भावानंदी

निराचषेसामानाधिकरण्येपि। पक्षे साध्यग्रहं विनेति। पर्वतो वह्निमान्न वेति संशयोत्तरं वह्निमद्वृत्ति
त्वविशिष्टधूमवान्पर्वत इति निर्णयस्यानुपपत्तेः। तद्धर्मितावच्छेदकविशिष्टधर्मिणि तदधिकरणवृत्ति
त्वविशिष्टवत्तानिर्णयप्रति तद्धर्मितावच्छेदकविशिष्टधर्मिणि तद्वत्तानिर्णयस्य हेतुत्वमनायसात्कल्पत इ
ति भावः। केवलान्वयिनि साध्यसामानाधिकरण्यस्य केवलान्वयित्वविशिष्टसाध्यसामानाधिकरण्यस्य वा
ज्ञाने हेतुरिति मतं दूषयति केवलान्वयित्वस्येति। तच्च। केवलान्वयित्वं च। वह्निमत्त्वप्रवेशे गौरवादन्योन्या
भावघटितत्वमभिप्रेत्य व्यभिचारधियः कारणत्वनिर्वाहान्योन्याभावघटितकेवलान्वयित्वमाह। अन्योन्याभावेति। कालि
कतया वाच्यत्वादिमतो भेदस्य प्रतियोगितायां वाच्यत्वादेरवच्छेदकत्वेन स्वरूपसंबंधविशेषणानवच्छेदकत्वमि
ति न दोषः। सर्वसाधारण्याय। केवलान्वयिव्यतिरेकिसाधारण्याय। साधनवावृत्तिवृत्तेर्विशेषणम्। तद्वृ
त्तित्वस्य साधनवद्वृत्तित्वस्य। इदमन्योन्याभावविशेषणम्। तथा च साधनवद्वृत्त्यन्ताभावाप्रतियोगित्वं साध त्र३
नवद्वृत्त्यन्योन्याभावप्रतियोगितानवच्छेदकत्वं वा उभयथा साधारणे साध्ये विशेषणमस्त्कि किंपृथक्कारणत्व
कल्पनेनेति भावः। एकस्यैव वाच्यत्वस्य केवलान्वयित्वज्ञानकाले च पृथक्कार्यकारणकल्पने गौरवादेकरूपकार्य राम

व्याप्तिग्राहकतर्कप्रस्तावे कार्यकारणभावग्राहकतर्कप्रदर्शनस्यार्थान्तरत्वं परिहरन्निव तत्र कोपकारकत्वं दर्शयति। कुतो ज्ञानेत्यादिना। रासभादी
त्यादिना। आदिधनादिपरिग्रहः। यद्यपि वह्नेः कारणताग्रहे तदन्वयव्यतिरेकग्रहस्यैव तंत्रत्वेन रासभघटितस्यान्वयव्यतिरेकानुविधायित्वप्रदर्श
नमप्रयोजकं तस्याहेतुत्वेन श्चयोपदर्शनं च प्रकृतानुपयोगि तथापि उक्तदिशा वह्नाविव रासभेपि कारणताग्रहः कुतो नेत्यादिनिरुक्तशंकावतारस्याकार
णे। सेनव मा विषक्त्तुं न योक्ष्यमिति। वस्तुतस्तु वह्नेरेव भविष्यतीति शंकाया उदासार्थं वह्निपुरस्कारेण सामान्ये धूमान्वयप्रदर्शनं। अप्रहेतुकत्वे वा सत्यसत
इति शंकानिराकरणाय। अवश्यमेतेषामन्यतमं कारणं धूमस्येत्यवधारणं दर्शितम्। एतदुपपादकतया एव व्यतिरेकोपि दर्शितः। अन्यथा धूमस्य कारणं किमपि
न्यायेन क्वचिद्वह्नेर्भविष्यति क्वचिद्वह्निं विनापीतरकारणेन रासभादेर्भविष्यतीति। यथा कारिकां वह्निं विनापीति शंकानिराकरणाय रासभादेरहेतुत्वनि
श्चयोपदर्शनं। यस्य च व्यतिरेकेपि तादृशापरसकलान्वये धूमानुत्पत्तिं परस्परनीत्यनेन वह्न्यसमवहिताजन्यत्वस्य वह्न्यसमवधानकाले न वह्नितत्समवधा
नेन तद्यावत्कारणकत्वस्य धूमे सत्त्वमादर्शितमिति सारं। तत्र च कारणत्वनिश्चये च। अकारणत्वसंदेह इति। धूमे वह्निजन्यत्वनिर्णयसमानविशेष्य
तया वह्न्यावपि धूमकारणत्वग्रहः सम्भवतीत्याशयेनेदं। सम्भावनारसिकसंदेहस्य तर्ककारणीभूतव्याप्यवत्ताज्ञाने नैव निरासादाहार्यसंदेहाय।
तस्याविरोधित्वेन तुच्छघटितसामग्रीतया बोध्या। प्रकृतोपयोगित्वं दर्शयति। अनुसंधेय इति। तर्कप्रयोक्तुरिति शेषः। प्रतिवादिनस्य कार्यकारणभावग्र
हफलमनुसंधायैव तर्कप्रयोगादिति भावः। तदधीनत्वादिति। धूमो यदि वह्निव्यभिचारी स्यात्तदा सामानाधिकरण्यप्रत्यासत्त्या वह्निजन्यो न स्यादित्याद्याकार
कोत्यापकतर्केनिति शेषः। अवश्यानुपयस्य सामानाधिकरण्यप्रत्यासत्त्या कार्यकारणभावग्रहस्यैव व्याप्तिग्राहकत्वं दर्शयति। सामानाधिकरण्येनेति। तेन

भावानंदी

प्रतिबंधकत्वे तादृशलाघवज्ञानस्य ९

व्याप्तिग्रहकारणीभूतस्य सहचारज्ञानस्य व्यभिचारज्ञानाभावस्य च सत्त्वमादर्शितं। तथैव सामानाधिकरण्येन ग्रहे तौ विषयीकुर्वतः ज्ञानस्यैव।
कार्यकारणभावग्रहस्यैव व्याप्तिपरिच्छेदकत्वात्। व्याप्तिविषयत्वात्। न च कार्यकारणभावग्रहस्य सामग्रीवशाद्व्याप्तिविषयत्वेऽपि तस्य व्याप्तिग्रह
नुपयोगितया तदुपपादकतर्कस्य प्रकृतानुपयोगित्वमेवेति वाच्यं। धूमत्वावच्छेदेन वह्निजन्यत्वे लाघवमित्याकारकलाघवज्ञानस्य तदवच्छे
देन वह्निजन्यत्वग्राहकसामग्रीसहकृतस्यैव सामान्यव्यभिचारशंकाप्रतिबंधकतया तन्निवर्तकत्वे तादृशसामग्रीविरहे तु केवललाघवज्ञानस्यानुत्ते
जकत्वे सामान्यव्यभिचारशंकावशाद्व्याप्तिधीप्रतिबंधकतापत्त्या तादृशोत्तेजकसंपादकतयैव तर्कस्योपयोगसंभवात्। न च कारणताग्राहकालि
कव्याप्तिज्ञानमेव तत्सामान्यव्यभिचारशंकाप्रतिबंधकत्वे यादृशिकव्याप्तीनां तदुत्तेजकत्वमिति वाच्यं। सामानाधिकरण्येन धूमत्वावच्छेदेन व
ह्निजन्यत्वग्रस्य तादृशदैशिकव्याप्तिमविषयीकुर्वतस्तेनैवानवच्छापि तस्योत्तेजकत्वकल्पनानुपपत्तेः। परे तु वह्निसमवहिताजन्यत्वविशेषणा
दातुं प्रमाणत्वमाह विपर्यये चेति। तत्कोटीति। प्रसाधनीयं तदेव तत्कोटिपदेनोक्तं। यत्तर्कस्यापादकव्यतिरेकवत्तानां पक्षेऽपि कोटिनिष
यतां विनानुपपन्नेसं एव तर्कोविपर्ययेत्कोटिमात्रपर्यवसायीनस्यैव तदभावकोटिकशंकाप्रतिबंधकत्वमित्यर्थः। वो अवधारणे।। अन्य
थापादितकतत्कोटिविषयकतामात्रेणैव शंकानिवर्तकत्वे। वह्नितज्जन्यान्यतरोऽनस्यादिनिपाठे। तदुत्पन्नं तदसमवहितानवनांतरीयक
वह्निकव्यभिचारः। वह्निसमवधानकालीनवह्नितत्समवधानेतरयावत्कारणकरूपजन्यत्वाभावस्यैवोपाधितात्। तस्य च तत्रापि सत्त्वा राम

१

त्। वह्निपदस्य वह्निसमवहितपरत्वेन जन्यपदस्य वा वह्निघटितसामग्रीपरत्वे तु यथाश्रुतमेव सम्यक्। यत्तु व्यभिचारेपितर्कोभासमानः स्तुल्यैवेति
तस्सतु। विपर्ययेन तत्कोटिमात्रपर्यवसाने नोनासनायाः स्फुटत्वात् नत्वतु व्यभिचारेणापीति। वह्नितज्जन्यान्यतरजन्यो नस्यादिति पाठे त्वत्र वह्नित्व
रूपेण तज्जन्यत्वकोटिपादिकशोभरप्यभावाद्व्ययः। तथा चापत्तेः। वह्निजन्यत्वाभावशंकाप्रतिबंधकत्वापत्तेः। तथा पर्यवसायिता। तत्कोटिमात्रप
र्यवसायिना। विशेषतो व्याप्त्या। तत्कोटिवृत्तिधर्मावच्छिन्ननिरूपितव्याप्त्या। सामान्यतो व्याप्त्या। तत्कोटितदितरकोटिसाधारणधर्मावच्छिन्ननिरू
पितव्याप्त्या। परे धर्मतावलात्। इतरकोटिबाधबलोन्नीततत्कोटेः पक्षत्वेन तादृशबलसंपत्तये तथोपस्थितेति। वह्निसमवहिताजन्यत्वविशि
ष्टपक्षोपस्थितीत्यर्थः। वस्तुतस्त्वत्यादिना। वह्निजन्यमपीति। यद्यपि वह्निसमवहितजन्यत्वस्य वह्निजन्यत्वात्मकत्वेऽपि वह्निजन्यत्वप्रकारकसि
द्धौ तत्प्रकारकत्वेन तद्रूपेण तदभावस्यानापादकत्वात् तथापि वह्निसमवहितजन्यत्वस्य वह्निजन्यत्वरूपत्वेनान्यतरत्वेन वा यावत्तत्कधर्मदर्शन
विधयापि प्रकृततर्कस्य वह्निजन्यत्वाभावशंकाप्रतिबंधकत्वसंभवतीति तत्स्वरसिद्धमिति। ननु पक्षविशेषणीभूतवह्निसमवहिताजन्यत्व
विशिष्टं वह्निसमवहितजन्यं वह्निजन्यं वा यद्यपि स्यात् तदसत् तदपि प्रतिषेधति। वह्निसमवहिताजन्यमिति। पर्यवसितांतं तत्स्वरूपं मूलस्थ
वह्निसमवहितजन्यत्वपदं वा वह्निजन्यत्वपरं। ननु तर्कस्याहार्यशंकाप्रतिबंध एव फलं स्वारसिकशंकायास्तर्ककारणीभूतव्याप्यवत्ता
ज्ञानेनैव निरासात् न वा तिहि अनिष्टोपदर्शनेनेष्टाविच्छेदात् कार्यकारणभावेनाहार्यशंकायाः अनुसारः। तद्धर्मावच्छिन्नानिष्टोपदर्शनेन

तद्धर्मावच्छिन्नज्ञानेच्छाविरोधिनं तु रूपान्तरेणापीति। नीलघटत्वावच्छिन्ने निष्टोपदर्शनेऽपि घटत्वावच्छिन्नज्ञानेच्छाया अनिवृत्तेः। न हि वक्ष्य
समवहिताजन्यत्वविशिष्टवह्निजन्यत्वाभावेऽनिष्टोपदर्शने तज्ज्ञानेच्छाविच्छेदः तादृशवह्निजन्यत्वाभावज्ञानेच्छा कुत इत्यत्र निष्ठेत्यस्य वह्निजन्यत्वाभा
वमेव केवलमापादकं कुत्स्नाह(?)। तथा चेति। अनुयोगिविशेषत्वे व्यभिचारवारणस्यैव संभवादाह प्रतियोगीति। तथा च वक्ष्यसमवहिताजन्यत्व
विशिष्टे यज्जन्यत्वे धूमादौ प्रसिद्धतरभावः सर्वत्रालीति नाव्यभिचार इति भावः। यथाश्रुतस्य व्यावृत्तिं दर्शयति। अजन्य इति। विवक्षितस्यान्ता
दर्शयति। जन्ये चेति। नान्तरीयकेति। धूमजनकताघटकसंबंधेन स्वाधिकरणे स्वाव्यवहितपूर्वक्षणावच्छेदेन प्रसन्नः स्वाजनको वह्नि
र्यत्र नास्मिन् धूमरूपादावित्यर्थः। एतेन वह्निजन्यत्वाभावरूपापादकस्य वक्ष्यसमवहिताजन्यत्वस्य वाप्यापादकोत्प्रतियोगिविशेषणस्य सत्त्व
मादर्शितमिति यथाश्रुतजन्यत्वेन नान्तरीयकवह्निके व्यभिचारस्यावारणादाह। तदर्थस्त्विति। वक्ष्यसमवधानेति। वक्ष्यसमवधानकाली
नानि वह्नितत्समवधानेतराणि तज्जन्यो न स्यादित्यर्थः। ननु नान्तरीयकस्यापि वक्ष्यसमवधानकालीनाप्रियावंतिकारणानि स्वप्रागभावादी
नि तज्जन्यत्वसत्त्वाद्व्यभिचार इत्यत आह तथाविधयावत्कारणकत्वमिति। तथा च वक्ष्यसमवधानकालीनानि वह्नितत्समवधानेतरधूमा
दीनि यावन्ति कारणानि यस्येति विग्रहात् स्वीययावत्कारणे तादृशा वक्ष्यसमवधानकालीनत्वस्य ला... नान्तरीयकवह्निकस्य तादृशयावत्का
रणमध्यानिविष्टचरमकारणे वक्ष्यसमवधानकालीनत्वस्याभावान्न व्यभिचारः। अत्र वक्ष्यसमवधानकालीनयावत्कारणकत्वं वक्ष्यस राम

२

मवहिताजन्यत्वविशिष्टमप्रसिद्धमतस्तत्कारणायेतरान्तं कारणविशेषणं। वह्नीतरयावत्कारणमध्यनिविष्टस्य तत्समवधानस्य तत्समवधा
नेतरयावत्कारणमध्यनिविष्टस्य वह्नेः वक्ष्यसमवधानकालीनत्वाभावादप्रसिद्धिरत उभयोपादानं धूमरूपादौ व्यभिचारवारणाय वक्ष्यसम
वधानकालीनेति। नान्तरीयकवह्निकस्य तु धूमरूपादेस्तादृशयावत्कारणमध्यानिविष्टस्य धूमादेर्वक्ष्यसमवधानकालीनत्वाभावादेव न व्यभिचारः
तादृशधूमरूपप्रागभावादेर्वक्ष्यसमवधानकालीनत्वान्तत्रैव व्यभिचार इत्यतो यावदिति। अत्र च तद्धर्मावच्छिन्नकारणताघटकप्रसासमि
रववह्निसमवधानेतत्त्वावच्छिन्नप्रागभाव एव वक्ष्यसमवधानपदार्थः। स च न तद्धर्मावच्छिन्नप्रागभावो वा तद्धर्मावच्छिन्नप्रतियोगिताकप्रागभावो वे
त्यन्यदेतत्। तेन न पक्षीकृतस्य धूमस्य देशान्तरीयवह्निसमवधानकालीनत्वं यात्कारणके तयाऽनाप्रसिद्धिः। न वा तद्वह्निसमवधानध्वंसकालीनयाव
त्कारणकेन धूमरूपादौ व्यभिचारः। एतद्वह्निसमवधानेतरधूमरूपकार्यावन्मध्यानिविष्टस्य तद्धूमादेस्तादृशप्रागभावकालीनत्वाभावेन नान्त
रीयके व्यभिचाराभावात्। अत एव यत्रेन्धनेन वह्निसंयोगोत्पत्तिः द्वितीयक्षणे नान्तरीयकघटादिसंयोगस्तत्र तज्जनककियापूर्वसंयोगनाशादेर्व
ह्निसमवधानप्रागभावध्वंससमानकालीनत्वेऽपि न व्यभिचारः। तत्र पूर्वसंयोगनाशस्य तादृशप्रागभावसमानकालीनत्वाभावात्। तस्यापि तद्वह्निसं
योगानन्तरोत्पद्यमानत्वाद्धूमावयवसंयोगादिरूपप्रागभावकालीनत्वान्तद्वह्निसमवधानत्वावच्छिन्नप्रागभावपर्यन्तानुधावनं। न च तद्वह्निसम
वधानप्राक्कालीनवह्नीन्धनसंयोगोत्पत्तिद्वितीयक्षणोत्पन्ने इन्धनादौ घटादिसंयोगे तद्वह्निसमवधानत्वावच्छिन्नप्रागभावकालीयावत्कारणा

केव्यभिचार इति वाच्यं। तद्वह्न्यसमवहितानन्यत्वस्य सत्त्वेनार्थत्वात्। वह्न्यन्तरसंयोगद्वितीयक्षणोत्पन्नघटादिसंयोगादौ च तस्यासत्त्वात्। तद्व
ह्न्यसमवहितानन्यत्वं च तद्वह्न्यसमवधानकालावच्छिन्नानन्यत्वं। तेन यत्रेंधनेन वह्निसंयोगोऽस्ति काले नान्तरीयको घटादिसंयोगस्तत्रापि न व्य
भिचारः तस्य तादृशासमवधानप्रागभावकालीनयावत्कारणकत्वेपि तद्वह्न्यसमवधानकालावच्छिन्नेनैव जन्यत्वात्। कारणं चात्र फलोपधा
यकमेव वक्तव्यं। तेन तद्वह्निसमवधानाव्यवहितोत्पन्नेंधनव्यक्तेस्तद्धूमं प्रति स्वरूपयोग्यायास्तादृशासमवधानप्रागभावकालीनत्वाभावेपि न
क्षतिः। न च तद्वह्निसमवधानकालीनोत्पत्तिकेंधनव्यक्तेरपि तद्वह्निजन्यधूमं प्रति फलोपधायकत्वसंभवात्तस्य च तादृशासमवधानप्रागभाव
कालीनत्वाभावात्तद्वह्न्यसमवहितानन्यत्वविशिष्टनिरुक्तजन्यत्वस्याप्रसिद्धिरिति वाच्यं। पार्थिवेंधनजन्यवह्नेरेव धूमं प्रति हेतुत्वेन स्वजन्यवह्नि
जन्यधूमं प्रत्येव तत्तदिंधनानां हेतुत्वेन तद्वह्निसमवधानकालोत्पन्नेंधनव्यक्तेस्तद्वह्निजन्यधूमं प्रत्यजनकत्वात्। न च यत्र चरमोत्पन्ना
इंधनजवह्निना पूर्वोत्पन्नतादृशवह्निना च मिलित्वा धूमो जनितस्तादृशस्थल एवाव्यभिचारात्। तादृशवह्निद्वयजन्यधूमस्थले च
रमोत्पन्नमेव तद्वह्नित्वेनोपादाय तादृशतत्कीर्तनारस्य निःप्रत्यूहत्वात्। न च तथापि वह्नितत्समवधानेतरयावत्कारणमध्यनिविष्टस्य
तद्धूमावयवतत्संयोगादेस्तद्वह्न्यसमवधानकालीनत्वाभावादप्रसिद्धिरिति वाच्यं। दंडस्य घटजनकतायां चक्रसंयोगत्वमिव कपालिका
कपालद्वयसंयोगपर्यन्तानां व्यापारवत्तद्वह्नेरपि तद्धूमजनकतायां तद्धूमावयवतत्संयोगपर्यन्तानां व्यापारतया तद्वह्निसमवधानत्वेन तदि राम

3

द्वह्निसमवधानेतरेस्यनेनैव वारणात्। न चैवमपि तद्धूमावयवरूपादौ व्यभिचारः। तद्धूमावयवस्य तद्वह्निसमवधानत्वेन तदितरयावत्का
रणानां वह्न्यसमवधानकालीनत्वादिति वाच्यं। तद्धूमावयवरूपादिजनकस्य तदवयवरूपस्य वह्न्यसमवधानकालीनत्वाभावात्। न चैवम
पि तद्वह्निजन्यधूमघटुकेकत्वे व्यभिचारः। धूमघटुकस्य स्थूलधूमजनने व्यापारतया तदितरयावत्कारणस्य स्वप्रागभावपरमाण्वेकका
देस्तद्वह्न्यसमवधानकालीनत्वादिति वाच्यं। यत्र वह्न्यन्तरजन्यधूमत्रसरेण्वादिसंयोगजननद्वारा तद्वह्निना स्थूलधूम इत्यादि तस्मात्तादृश
वपरुत्वाभिनिधाने च तदवयवत्रसरेण्वाद्येकत्वानां तद्वह्न्यसमवहिताजन्यत्वाभावात्तादृशस्थूलधूमस्य स्वजनकतापर्याप्त्यासत्तिनयतद्व
ह्नितादृशस्थूलधूमजनकसमवधानेतरयावत्कारणमध्यनिविष्टस्य तादृशस्थूलधूमस्य तद्वह्न्यसमवधानकालीनत्वाभावेन तादृशस्थू
लधूमे कत्वादौ व्यभिचाराप्रसंगात्। न हि तद्वह्निना घटुकादिकमुत्पाद्यैव स्थूलधूम उत्पादनीय इति नियमे प्रमाणमस्ति। न च यादृशधूमत्रसरे
रेणुभिस्तद्वह्निसमवधानपूर्वं वह्नेः संयुक्तैस्तादृशस्थूलधूमारंभकसंयोगो जनितस्तद्द्वितीयक्षणोत्पन्नतत्पत्सरे व्यभिचारः तत्र तादृशी
संयोगस्य वह्निसमवधानत्वेन तदितरयावत्कारणानामपेक्षाबुद्ध्यात्मकसंबंधिनावच्छेदकप्रकारकत्वानघटितानां वह्न्यसमवधानका
लीनत्वादिति वाच्यं। तादृशत्रसरेणुक्रियपायदा धूमारंभकसंयोगस्तदा वह्नेः संयोगान्तरस्याप्युत्पादसंभवेन यावन्मध्यनिविष्टस्य तस्य
वह्न्यसमवधानकालीनत्वाभावादिति। वस्तुतस्तु तद्वह्नेस्तदिंधनेयः प्राथमिकः संयोगस्तदसमवहितसामग्र्यजन्यत्वस्य सत्त्वेन तात्पर्यत्वान्न प्रागु

MEMORIAL

त्वेषु व्यभिचारः। कारणे वैलोपाधिभिन्नत्वग्राह्ये तेन वह्निसमवधानानन्तरोत्पन्नघटादेरपि कालोपाधिविधया पर्वतीयधूमकारण
स्य वह्निसमवधानकालीनत्वाभावेपि नाप्रसिद्धिः। नैवं वह्नेरपि वह्निसमवधानप्रागभावकालीनतया वह्नितत्समवधानेत्यत्र वह्निपदं व्यर्थ
मिति वाच्यं। यत्र देशान्तरादानीतवह्नेस्तत्रत्येंधनसंयोगे सति तत्रत्येंधनजवह्न्युत्पत्तेरनन्तरं च धूमोत्पत्तिरिति क्रमस्तत्र देशान्तरादानीत
वह्निमादाय वान्वयव्यतिरेकग्रहात्तत्साधारण्यस्यैव तद्वह्नित्वस्य तत्समवधानकालीनेत्यत्र व्यक्तव्यतया तादृशधूमकारणीभूतवह्नित्वा
तादृशधूमप्रयोजकवह्निसमवधानकालीनत्वाभावेनाप्रसिद्धिवारणार्थत्वात्। यदि च तादृशधूमकारणीभूतवह्निव्यक्तिरेव तद्वह्नित्वेनो
पादीयते तदा वह्नितत्समवधानेत्यत्र वह्निपदं नोपादेयमिति निनवीनानां पंथाः। यत्तु प्रतियोगितद्व्याप्येतरयावत्तदुपलंभकरूपयोग्यानु
पलब्ध्योउपलंभकतावच्छेदके यावत्त्वविशेषणवदत्रापि कारणतावच्छेदके यावत्त्वविशेषणं। तथा च वह्नित्वस्य तत्समधानत्वेनेतर
वह्निसमवधानकालीनवृत्तियावत्कारणतावच्छेदककोनस्यादिति पर्यवसितोऽर्थः। धूमावयवस्य च धूमं प्रति न धूमसमवायित्वेन का
रणत्वं धूमोत्पादपूर्वं धूमसमवायित्वविशिष्टस्याभावात्। न च कारणतावच्छेदकावलीढसत्त्वमेव कार्योत्पादप्रयोजकं। एवमपि क्वचि
द्धूमः क्वचिन्नेत्यत्र नियामकस्याभावात्। किंतु स्पर्शविशेषवत्त्वेन पृथिवीत्वेन वा स्पर्शविशेषादिसहकृतद्व्याद्यारंभादिवत्सहकारी। असमवा
यिसंयोगस्यापि द्व्यारंभकतावच्छेदकजातेर्वक्तुं नतु विशेषरूपेणापि मानाभावात्। तथा पृथिवीत्वाक्रांतस्य द्व्यारंभकतावच्छेदका राम

सवच्छिन्नसंयोगस्य च वह्निसमवधानकालीनत्वान्नाप्रसिद्धिः। कारणतावच्छेदकं चानेकव्यक्तिवृत्तिग्राह्यं तेन तत्संयोगस्य तदवयवस्य
वा तद्व्यक्तित्वेन हेतुत्वेपि न क्षतिः। तन्नसाधीयः पृथिवीत्वाक्रांतेपरमाण्वादौ नाद्यशजातावक्रांतेसंयोगादौ सामान्यतो वह्निसमवधानकालीन
त्वस्यानिर्णयात्। देशांतरीयवह्निसमवधानशंकायाः सर्वदैव संभवात्। मदुक्तदिशा वह्निपदस्य तद्वह्निपरत्वे वह्नित्वतत्समवधानत्वेस
स्यवैयर्थ्यात्। वह्नित्वादेरपि तद्वह्निसमवधानकालीनवृत्तित्वात् तद्वह्नित्वादेश्चानेकवृत्तित्वाभावादेव निरासात्। नांतरीयकवह्निके व्यभिचारा
च्चा। न त्वत्रापि पृथिवीत्वेन धूमत्वेन वा तादृशधूमरूपविशेषं प्रति समवायिकारणता। असमवायिकारणता तु अवयववृत्तिनीलरूपत्वेन रूपत्वेन वा
स्वसमवायिसमवेतवृत्तित्वं तु प्रत्यासत्तिः। तथा च पृथिवीत्वधूमत्वरूपविशेषत्वादीनां तद्वह्निसमवधानकालीनवृत्तित्वेन व्यभिचारस्य वज्रले
पत्वात्। तद्धूमत्वस्यानेकवृत्तित्वाभावादेव निरासादित्यलमधिकेन। यत्तु नांतरीयक इति। वह्निजन्यत्वाभावे आपादक इति शेषः। आपादकको
टावेवेति। यथाश्रुतमूलानुरोधादिति शेषः। तेनापाद्यकोटिप्रतियोगिविशेषणतया व्यभिचारवारणेन सम्भवेपि न क्षतिः। यथाश्रुते न व्यभि
चारावारणादाह सत्त्वेति। वह्निघटिताजन्यत्वं धूमेपि नास्ति तादृशेंधनादिजन्यत्वादतः सामग्रीति। नांतरीयकवह्निकस्य सामग्रीन वह्निघटि
तेति न तत्र व्यभिचार इति भावः। प्राक् धूमे वह्निजन्यत्वनिश्चयात्प्राक्। तदसिद्धेः वह्निघटितसामग्र्यजन्यत्वस्यानिश्चयात्। तथा पादकवि
शेषणत्वेन पक्षस्यानिश्चयेपि नोक्तरीत्या विशिष्टबुद्धेर्विशेष्याभावमात्रावलंबित्वमिति भावः। खोक्तमतानुसारितया मूलं व्याचष्टे। अत्रेति। अत्र

वह्नित्व इत्यादिना विवक्षितत्वर्को इष्टापत्तीति। वह्न्यसमवहितजन्यत्वस्यानयत्रैव वह्निकोटित्वाद्वह्न्यसमवहिताजन्यत्वरूपविशेषणाभावादिति
भावः। तत्तीयापुनरिति। तथा चासत्त्वात्सुपत्तीतस्य हेतोरभावस्यैव कार्यसामान्ये कार्याव्यवहितपूर्ववर्त्तिनः तत्त्विपत्तत्वादेरभावस्य वा शं
काः हेतुकइत्यनेन विवक्षितेत्यर्थः। आपादकादीत्यादिना आपाद्यपरिग्रहः। वह्निभिन्नादेर्वोत्पत्तस्यापि तात्तरीयकवह्निकस्य वह्न्यसमव
हिताजन्यत्वाभावाद्वह्निपदस्य वह्निभिन्नपरत्वे विशेषणाभावेनेष्टापत्तिपर्यवसानमत आह वह्निशून्यादि ति। भावव्युत्पत्त्याऽपादानप
दार्थस्यत्वादेः शंकाप्रतिबंधकत्वाभावादाह करणेति। उपादीयतेऽनेनेति व्युत्पत्तेरित्यर्थः। तदीयेति। तत्पदं वह्न्यादिपरं। कार्यधूमादि
वह्न्यादिविषयकं यद्धूमादिप्रयोजकत्वात्तानन्तरमित्यर्थः। यदि चागृहीतान्वयव्यतिरेके हेतुमितिमूलानुरोधेनाह तादृशेति। तादृशो वह्न्या
दौ तद्धूमादेर्नियतान्वयव्यतिरेकबोधत्वात्परमित्यर्थः। येन तमपीत्यपिना प्रागुक्तमपि लब्धं। यथाश्रुतेऽनुपपत्तिमाह कृत्यादेरिति।
आदिना स्वक्रियापरिग्रहः। कारणताग्रहोत्तरेति। कारणताग्रहोत्तरकृतिस्तया च शंकाप्रतिबंधकतर्को कारणताग्रह इत्यन्योन्याश्र
य इत्यर्थः। वह्न्यसमवहिताजन्यत्वस्य च धूमविशेषत्वेनिर्णयाद्धूमत्वावच्छिन्नेतदनिर्णयेन तर्कप्रवृत्तिसंभवात्कथं तदवच्छिन्नकारण
ताग्रह इत्याशंकते यद्यपीत्यादिना। ननु विशेषेतादृशतर्कप्रवृत्तावेव सामान्यतः कारणताग्रहो न विघ्नतीत्यत आह तत्कारणेति। तत्र
वह्निविशेषेतादृशतर्कप्रवृत्तावपि वह्नित्वावच्छिन्नेतरणजन्यत्वस्याग्रहसंभवादिति भावः। तथात्वं विशेषाणां तादृशव्यतिरेकान्वयानु राम ५

विधायित्वं। तद्विरोधिशंकायां कार्यत्वकारणत्वाभावशंकायां तर्केण पुनीतायां गायुमानौ। विशेषाणां कार्यकारणभावग्रहः सामान्यतएव
तं परिछिनत्तीत्याशयः। तत्र सहकारिणं दर्शयति। सामान्यव्यभिचारानिर्णयेति। अनेन द्रव्यत्वादिनिरासः। अनुगत इति। यावद्व्यक्तीनाम
न्वयव्यतिरेकाद्यनुविधानं निश्चितं तेनावच्छेदकानुगतेत्यर्थः। तेन तत्तद्व्यक्तित्वादीनां निरासः। अगुर्विति सामान्यधर्मापेक्षया अगुर्वित्यर्थः। तेन
तावद्व्यक्त्यन्यतमत्वनिरासः। विशेषेति। अगृहीतान्वयव्यतिरेकव्यक्तिव्यावृत्तेत्यर्थः। तेन गृहीतान्वयव्यतिरेकमात्रवृत्तितया आत्यादिकमनु
रूपस्थितेन तदा तदवच्छेदेनैव हेतुताग्रहे तेन धूमत्वाद्यवच्छेदेनेति सूचितं। आदिना असाधारणकारणताग्राहकान्तरपरिग्रहः। सामान्यतः।
वह्नित्वधूमत्वावच्छेदेन। तं कार्यकारणभावं। परिछिनत्ति विषयीकरोति। अन्वयव्यतिरेकाविति। विशेषाणामित्यनुषज्यते। तथैव उक्त
सहकारिवशात्सामान्यतः कारणताग्राहकत्वेनैव। प्रामाण्यकौ। प्रमाणसिद्धौ। ननु वह्निं विनापि धूमो न विघ्नतीति व्यभिचारसंदेहदशा
यां कथं धूमत्वावच्छेदेन वह्निजन्यत्वग्रह इत्यत आह फलबलेनेति। लाघवसत्तानादीत्यादिना तर्कघटितायास्तादृशाकार्यकारणभावग्रा
हसामग्र्याः परिग्रहः। एवं च तर्कघटिततादृशसामग्री विशिष्टलाघवज्ञानाभावविशिष्टव्यभिचारज्ञानं तादृशव्याप्तिज्ञाने प्रतिबंधकं अत
एव यत्र तर्को वा तादृशकारणताग्राहकसामग्री वा नास्ति तदोक्तलाघवज्ञानेपि सामान्यव्यभिचारशंकातस्तादृशव्याप्तिधीप्रतिरोधः। अ
त एव न तर्कस्यैव फलं तादृशो नैजकत्वसंपर्कतया व्याप्तिग्राहकत्वादिति भावः। व्यभिचारनिर्णये उक्तलाघवानुसंधानेपि व्याप्तिग्र
हादाह। शंकायामिति। नन्वेवं व्यभिचारज्ञानत्वेन कथमेकाविरोधितेति चेत्। सामान्यव्यभिचारनिर्णयघटितनादृशसामग्रीविशिष्टत्वा

यवत्ताज्ञानाभावविशिष्टव्यभिचारज्ञानत्वेनैव संशयनिश्चयसाधारणेन विरोधित्वात्। व्यभिचारनिर्णयकाले च व्यभिचारानिर्णयरूपविशे
षणाभावेन तादृशविशिष्टलाघवज्ञानाभावेन प्रतिबंधकतावच्छेदकरूपसंभवादिति। पेतुधूमत्वावच्छिन्नमेव पक्षीकृत्योक्तनकावतारं
वर्णयंति तन्मतमारूपयति नि। वह्निजन्यत्वेनापादकेन। अग्रेतनवैत्यत्र तत्पदेन धूमत्वावच्छेदेन वह्निसमवहिताजन्यत्वस्य परामर्शार्थि
तदेव विशेष्यीकृत्य निर्दिशति। जन्यत्वविशिष्टस्येति। यथाश्रुते त्वनेन केषांचिद्विवह्नितस्य वह्निघटितसामग्रीजन्यत्वस्य निरासः।
तच्चाधूमत्वावच्छिन्ने वह्निसमवहिताजन्यत्वं च मनसेव सुगममित्यग्रिमेणान्वयः। उक्तन्यायेन। कृताशनरासनादिपदार्थसार्थस्योक्तन्या
येन। संबंधान्तरेणावह्नियुक्तकारणकलापप्रयोज्यत्वघटकेपि केनचित्संबंधेन वह्निजन्यत्वशंका भवती। सत तादृशवह्नियुक्तेति। तेन संबंधे
न वह्नियुक्तेत्यर्थः। एतां वक्ष्यमाणे न विघ्नति। तिशंकाऽहेतुकएवोमस्यत इति शंका च निराकृता। क्वचिद्वह्निं विनापि भविष्यति। निशंका च वेधा
भवति। वह्निरन्यथासिद्धिसंनिधिकत्वशंकया विकल्पेन जनकत्वशंकया च। आद्यां निरस्यति। वह्निविरहेपीत्यादिना। निरतिशयस्य सत्कार
यैनिरश्शून्यस्य तादृशसमूहस्य। आर्द्रेंधनादिसमूहस्य तथाविधानात्। वह्निशून्यतादृशसमूहात्। संदेहस्य वाद्यायागादिस्त्वन्वयः द्वितीयां निरस्य
ति। तादृशस्यैवेत्यादिना। तादृशस्यैव आर्द्रेंधनादिसमूहस्यैव। तथाविधजनकत्वसंभावनायाः। धूमजनकत्वसंभावनायाः अग्रेतनपाथादिस्वर्धि
णान्वयः। कारणांतरव्यतिरेकेण धूमानुत्पत्तिमत्तपि वह्निसत्त्वेन व्यभिचाराद्वह्निविरहस्य तत्प्रयोजकत्वं न घटत इत्यत आह। तथाविधसमूह
सत्त्व इति। लाघवादिति। प्रयोजकांतरकल्पने कारणांतरकल्पनागौरवादिति भावः। तदुपादानपदेन वह्निसमवहिताजन्यत्वस्य निर्णयं प्रति

राम ६

पादयितुं तथा व्याचष्टे। वक्ष्ये वह्निसमवहितस्येति। यथाश्रुते तु वह्नेर्नियतोपादानेन वह्निभिन्नानुपादानेऽलभ्यते तज्ज्ञनविवक्षितार्थप्रतिपादकत्वा
भिनं चेति भावः। नियमव्यवच्छेद्यस्य नियमाधीनव्यवच्छेदबोधविषयस्य नियमलभ्यस्येति यावत्। यथाश्रुते वह्निसमवहितोपादानस्यैव नियम
व्यवच्छेद्यत्वादसंगतेः। नियमतदुपादानं कथं कुर्यादिति कथमित्यनेन व्यवच्छेद्यस्य नियमलभ्यस्येत्यर्थ इति तु विवेकः। तदजन्यत्वज्ञाने वह्निसम
वहिताजन्यत्वनिश्चये। ननु तदुपादानं शंकाप्रतिबंधकमित्यत्रोपादानपदार्थस्य शंकाप्रतिबंधकत्वं लभ्यते न तु नियमपदार्थस्य तथा च तत्क
थमेव बंधोपदर्शनम् अप्रकृतमत आह परंपरयेति। वह्निसमवहिताजन्यत्वनिर्णयाधीनतर्कप्रसरात् वह्निजन्यत्वग्रहे सति वह्निसमवहि
तोपादानमिति परंपरयेत्यर्थः। तत्र तदजन्यत्वनिर्णये विशेषदर्शनतया वह्निसमवहिताजन्यत्वस्य व्याप्यादिदर्शनतया। शंकाप्रतिबंधकं
वह्निसमवहिताजन्यत्वशंकाप्रतिबंधकं। तदेव। अन्वयव्यतिरेकानुविधायित्वमेव। तथा च यदि वह्निजन्यो न स्यात् तदान्वयव्यतिरेकानुविधायी न
स्यादिति तर्कशरीरमेवेति भावः। अन्वयव्यतिरेकानुविधायित्वस्य तस्य शंकाप्रतिबंधकत्वे मूलस्वरसमाह। तदिदमुक्तमिति। यज्जातीये क्व
चिदन्वयव्यतिरेकानुविधानं तदवच्छिन्ने तज्जन्यत्वमिति व्याप्तिः। यदवच्छेदेन परन्वयव्यतिरेकानुविधानं तदवच्छिन्ने तज्जन्यत्वमिति व्याप्ति
स्तर्कमूले तथा च धूमत्वं यदि वह्निजन्यतावच्छेदकं न स्यात् अन्वयव्यतिरेकानुविधायि न स्यादिति वह्न्यन्वयव्यतिरेकानुविधायितावच्छेदकं न स्यादिति
र्यपर्यवसाने प्रथमे दोषमाह। पारिभाषिकस्येति। तज्ज्ञानीयपदार्थं विघटितं निष्टस्येत्यर्थः। व्यभिचाराद्र। पृथिवीत्वाकांतपर्ल्किंचिद्धकावच्छा

धनुविधायित्वस्य सत्वेपि पृथिवीत्वादेरन्यनावच्छेदकत्वाभावेन व्यभिचारात्। द्वितीये त्वयोः शास्यैव वैयर्थ्यात् नियतव्यतिरेकमा
त्रोपादाने च वह्न्यसमवहितात्जन्यत्व एव पर्यवसानान्मदुक्तपक्षे नेदं दूषणं नियतस्येति। तच्चिंत्यमिति। विनाबीजं नु वह्न्यसमवहिताजन्यत्व
स्य धूमत्वावच्छेदेन निर्णयेपि धूमो यदि वह्निव्यभिचारी स्याद् वह्न्यसमवहिताजन्यत्वे सति जन्यो न स्यादिति तर्केणैव व्यभिचारशंकानिरा
करणे कार्यकारणभावग्राहकस्यैव वैयर्थ्यात्। किं च जन्यत्वस्य यथाश्रुतेर्थे नांतरीयकवह्निके व्यभिचारः। वह्निसमवधानकालीनत्वादिविव
क्षितार्थे च वह्निपदस्य तत्तद्वह्निपरतया न दुष्टितस्य धूमत्वावच्छिन्ने निर्णयान्तोक्ततर्कप्रवृत्तिरिति। व्याप्तिग्रहणायेति। धूमो यदि वह्निजन्यो
न स्यात् सामानाधिकरण्यप्रत्यासत्त्या वह्निजन्यो न स्यादिति व्याप्तिग्राहकतर्काकारं दर्शयति इत्यर्थः। अधिकरणस्य जनकत्वपर्यवसायिनी याशंका
सामानाधिकरण्यप्रत्यासत्त्या वह्निजन्याभावशंका तन्निरासार्थमित्यर्थः। यथाश्रुतमूलमनुरुध्यापादक एव सत्संगतं नेति शिष्याह तथाच यदी
ति। अत्रापि निष्कर्षः आपाद्यकोटिप्रतियोगिविशेषणमेव सत्त्वेन बोध्यं स्वाधिकरणवह्निजन्ये वह्निरूपादौ व्यभिचारवारणाय सत्त्वेन।
धूमस्यापि सामानाधिकरण्यातिरिक्तप्रत्यासत्त्या स्वावयवजन्यत्वात्तत्र वह्निपदं। घटादौ व्यभिचारवारणायापाद्यकोटौ वह्न्यतिरिक्तकम्मलीन
तथापि प्रयोजकत्वं निरस्यति। अप्रयासेन्नस्येति। पक्षे सत्त्वेन स्वप्रमितावेवोक्तन्यायेन विशेष्यानावासिद्धिरिति तत्साधयति। तादृशाजन्यत्वं चे
ति। प्रत्यासत्त्यंतरेति। संयुक्तसंयोगादिप्रत्यासत्त्या वह्निसत्त्वेपीत्यर्थः। तद्धेतोः तादृशाजन्यत्वग्रहस्य प्रत्यक्षेनैव संभवेपि धूमत्वावच्छेदेन तदभा राम

७

नवानदवच्छेदेन तन्निर्णयार्थमिदमुक्तमिति ध्येयं। धूमानुत्पादादिनेति। आदिना लाघवादिपरिग्रहः। इदमेवेति। धूमानुत्पत्तिं प्रति वह्निसं
बंधाभावस्येत्यादि वक्ष्यमाणग्रंथपर्यालोचनेन कार्यकारणभावग्रहोत्तरं तर्कप्रवृत्तेः तदत्रापि तुल्यत्वादिति भावः। परिष्कृतमिति। तत्र वह्निजन्य
त्वादेः प्रवेशे गौरवात्। अत्र तु न तत्प्रवेश इति लाघवमिति भावः। अत्रापि तद्धूमे वह्न्यनधिकरणदेशानुत्पत्तिकत्वग्रहस्य प्रत्यक्षेणैव संभवेपि धूमत्वा
वच्छेदेन तदसंभवात्तदर्थमाह तादृशानुत्पत्तिकत्वेति। वह्निसंबंधाभावस्येति। वह्नेः कारणत्वग्रहात् तत्संबंधाभावप्रयुक्तावश्यंधूमानुत्पत्तिर्यत्र स्यात्तत्र
संबंधान्तरस्यानुपस्थितत्वाद्गौरवाच्च संयोगात्मकसंबंधाभावस्यैव प्रयोजकत्वं कल्प्यत इत्यर्थः। तादृशसंबंधाभावस्यैव। सामानाधिकरण्यघटकसंयोगा
त्मकतत्संबंधाभावस्यैवानयात्वं। प्रयोजकत्वात् तच्चिंत्यमिति। विनाबीजमनु धूमत्वावच्छेदेन प्रथमतएव तथाग्रहे धूमो यदि वह्निव्यभिचारी स्यात् सामा
नाधिकरण्यातिरिक्तप्रत्यासत्त्या वह्निजन्यत्वे सति वह्निजन्यो न स्यात्। वह्न्यनधिकरणदेशानुत्पत्तिकत्वे सति जन्यो न स्यादिति तर्केणैव व्याप्तिग्रह
संभवात् सामानाधिकरण्यप्रत्यासत्त्या वह्निजन्यत्वग्रहस्य वह्न्यनधिकरणदेशोत्पत्तिकत्वग्रहस्य च वैयर्थ्यं। प्रथमे च धूमविशेषस्य पक्षत्वे सामान्यव्य
भिचारानिर्णयादिरूपसहकारिलाघवप्रतिसंधानादिवशात् धूमत्वावच्छेदेन तादृशाजन्यत्वग्रहे च यथाश्रुतमेवास्तु किं सामानाधिकरण्यप्रत्यासत्ति
निवेशेन। सामान्यव्यभिचारशंकापन्नतर्कस्यानुकूलतर्कप्रवेशेनैवोपयोगितया स्वयमप्याश्रयणीयत्वादिति परं। चार्वाकं तर्कमनुसरोस्यापत
द्वाराद्युक्तेः मतु विधया व्यभिचारशंकानिरासहेतुत्वेनोक्तं। वह्निजन्यत्वग्राहकतर्कं मूलेति। तर्कस्य मूलं व्याप्तिः। आदिनेष्टापत्तिशंकापरिग्रहः। नेयरं।

व्याघातोपदर्शनमेवाह मेवमिति। तत्रग्रंथस्वरसं दर्शयति यदाहेत्यादिना। शङ्कुरिति। उपादानपदस्य यथाश्रुतार्थरक्षणमेव प्रकर्षः। न चैव
मपि प्रतिबंधकपदस्य यथाश्रुतार्थबाधाशंकाप्रतिबंधकेशंकाविरहे लिंगमित्यर्थो वाच्यः। तथा च सैवासंगतिरिति वाच्यं। शंकायां नि
यतोपादाने नियतोपादाने चेत्तश्शंका इतिमूले प्रतिबंधकत्वविर रत्नेनैव यथाश्रुतार्थत्यागस्य स्वीकृतत्वादिति भावः। तत्पदस्य सहचार
ज्ञानपरामर्शकत्वे शब्दादि व्याप्तिबोधेपि पदार्थोपस्थित्यादिविधया सहचारज्ञानस्य हेतुत्वात्तेन विनापीति मूलासंगतिरतस्तदर्थमाह
व्यभिचारादर्शनेति। व्यभिचारदर्शनपदस्य निश्चयमात्रपरत्वेन येवासंगतिरतो व्यभिचारज्ञानसामान्येति व्यभिचारज्ञानसामान्याभाव
स्य शब्दादौ हेतुत्वं दर्शयति। योग्यतादीति। आदिना साध्यपरिग्रहः। शब्दादिनेत्यादिनानुमानपरिग्रहः। नपुंसकनिर्देशार्थं स्वरूपमिति
तर्कस्य व्यभिचारेण हेतुत्वमित्यस्वरसं दर्शयति। केचिदिति। वह्निर्तो वह्निगत्वात्। तर्काभासादिति। धूमो यदि वह्निव्यभिचारी स्यात्तदद्येनस्या
दित्याकारादित्यर्थः। व्यभिचार इति। सत्तर्कस्य प्रमायां व्यतिरेकव्यभिचारः। सत्तर्कस्य प्रमेऽन्वयव्यभिचार इत्यर्थः। तस्यां विशेषदर्शनस्य।
बोध्यं पुरुषत्वादि। तथा च पुरुषत्वविशेषदर्शनस्य सत्त्वं पुरुषत्ववद्विशेष्यकत्वं असत्त्वं च पुरुषत्वाभाववद्विशेष्यकत्वं। तेन दंडादौ करा
दिभ्रमात्मकस्य पुरुषत्वविशेषदर्शनस्य पुरुषत्ववद्विशेष्यकस्य सत्त्वे यथा तथा व्याप्तिमद्विशेष्यकत्वं तर्कस्य सत्त्वं तच्छून्यविशेष्यकत्वं चास
त्वमिति उक्ततर्काभासोपि सत्तर्क एवेति भावः। अत्र वस्तुतः तर्कादिग्रंथे च। सत्त्वादीत्यादिना असत्त्वपरिग्रहः। बोध्यादीत्यादिना बोध्यात्वप राम

८

रिग्रहः। यत्र कुत्रचिद्बोध्यसत्त्वेपि तच्छून्ये प्रमानुदयादाह। धर्मिणीति। फलीभूतज्ञानविशेष्ये इत्यर्थः। एवमग्रेपि। तथा च यत्र व्याप्तिः प्रमात्वघटक
विशेष्यतासंबंधेन तत्र व्याप्तिः। व्याप्तिमदिंद्रियसंनिकर्षो वेत्येवं सामानाधिकरण्यप्रत्यासत्त्या हेतुत्वं ग्राह्यमिति भावः। बोध्यस्य व्याप्त्यादिरतीन्द्रियत्वाद्वि
शायां तत्प्रमायां तस्याहेतुत्वासंभवादाह। बोध्यादिमद्धर्मीति। लाघवात्तु व्याप्तिमद्विशेष्यकतर्कत्वापेक्षया व्याप्त्यादेर्लघुत्वात्। संयोगाद्यन्यतमत्वरूपसंनिक
र्षत्वस्य तर्कत्वापेक्षया लाघवमतः आह। तर्कस्येति। व्यभिचारेणेति। यत्र व्याघातादिना स्वतः सिद्धो वा शंकाविरहस्तत्रेत्यर्थः। विपरीतज्ञानेति। अप्रसं
शयपोर्विपरीतज्ञानत्वेनानुगमः। तन्निवर्तकत्वेन विपरीतज्ञाननिवर्तकत्वेनानन्यविपरीतज्ञाननिवर्तकत्वं च। व्यभिचारज्ञानोत्तरव्याप्तिप्रत्यक्षे व्य
भिचारज्ञाननिवर्तकत्वेन व्याप्ति व्याप्ति व्याप्यदर्शनस्य हेतुत्वं क्रमेणेति व्यभिचारशंकानिवर्तकत्वं च तर्कस्यापीति तद्रूपेण तस्यापि हेतुत्वमित्यर्थः।
आपातत इति विपरीतज्ञानाव्यवहितोत्तरत्वस्य तन्त्रप्रतिकिविश्रामेण तादृशप्रत्यक्षनिर्णयतत्स्वार्थसमाजग्रस्ततया कार्यतावच्छेदकत्वादिति।
तथा तादृशहेतुत्वे अन्यत्र विपरीतज्ञानानुत्तरप्रत्यक्षे। तत्र विपरीतज्ञानोत्तरप्रत्यक्षे। तस्यापि विपरीतज्ञाननिवर्तकस्यापि। विशेषतः। विपरी
तज्ञानोत्तरप्रमात्मकप्रत्यक्षं प्रति विपरीतज्ञाननिवर्तकसत्तर्कत्वादिना। ननु संनिकर्षत्वं नानावदन्यतमत्वरूपं गौरवात् दुर्ज्ञेयत्वाच्च अनकताव
च्छेदकं। तथा चान्यतमक्रमाणप्रयोजकं किमत आह। उक्तं चेति। विशेष्यसंबद्धेति। तादृशविशेष्यतासंबंधेन यत्र पुरुषत्वप्रमा तत्र स्वविषयी
भूतपुरुषाश्रयत्वसंबंधेन पुरुषत्वज्ञानं। यत्र भ्रमत्वघटकविशेष्यतासंबंधेन पुरुषत्वभ्रमस्तत्र स्वविषयीभूतपुरुषीभावाश्रयत्वसंबंधेन पुरुषत्व

MEMORIAL

मित्येवंरूपप्रत्यासत्त्या नाऽदृष्टविशेषणज्ञानस्य प्रमात्वहेतुत्वं याह्यं। तेन यथा श्याते पुरुषसंबद्धपुरुषत्वज्ञानस्य पुरुषभिन्नसंबद्धपुरुषत्वज्ञानस्य कारण
त्वपर्यवसाने ऽनावर्त्तकादिदोषप्रसंगो न प्रसज्यते। स्वमते प्रमाऽप्रमत्वयोरर्थदेशासंपन्नतया कार्यतानवच्छेदकत्वादिदं तीति। वस्तुगत्याऽपनादिसिद्धकार्यकारण
भावस्याशंकापनायकत्वे तत्र प्रमाणप्रश्नोऽसंगत इत्यत इदमिति। इदं तत्रेत्यादिनादूषणं प्रयोजकत्वं। शंकाप्रतिबंधे प्रयोजकत्वं। स्वायस्थले ऽनुयोगस्यासंभवात्तत्र प्रमा
णानुयोगइति ग्रंथस्वरसादाह। पर्यति। तथा च तत्र शंकाप्रतिबंधायानादिसिद्धकार्यकारणभावग्रहमूलकत्वेन तर्कोपन्यासेनादिसिद्धत्वे प्रमाणानुयोगोऽनुपपन्न एवेति
भावः। परमते ऽनुपपत्तेरर्थापत्तिबाद्धनयमतसाधारण्य मेवाह व्याप्तिग्रहाधीनेति। व्याप्तिग्रहस्यापेक्षणीयतामेवानवस्थेति भावः। ननु व्यभिचारशंकानिरासस्यावश्यम
पेक्षणीयत्वे तेनैवान्यथासिद्धो विपक्षबाधकतर्कः कथं कारणमित्यत आह। द्वारेणचेति। पक्षे साध्यनिश्चये सिसाधयिषाधीनायत्रानुमितिस्तत्र पक्षेतरत्वस्य साध्याव्याप
कत्वग्रहान्नोपाधित्वं संभवतीत्यत आह। अनिश्चितेति। संभवित्वात् साध्यव्यापकग्रहस्यसंभवित्वात् वैफल्यादिति। अनिश्चितार्थनिर्णयो ऽनुमानफलं। पक्षे साध्यनिश्च
येतदभावादित्यर्थः। एवं च मूले ऽनुमानपदं सफलानुमानपरमिति। उपाधित्वेनेत्यस्य यदि साध्यव्यापकत्वे सति साधनाव्यापकत्वेनेत्यर्थः किं यत्नेनानदा किंचित्यादिना
तेनैव दूषकत्वस्योक्तत्वादसंगतिरत आह व्यभिचारेणेति। व्यभिचारोन्नायकत्वेन व्यभिचारानुमित्युपधायकत्वेनैव। एवं चानुमानमात्रोच्छेदे व्यभिचारानुमिते
रुच्छेदाद्व्यभिचारानुमित्युपधायकव्यभिचारप्रतियोगित्वरूपेणोपाधित्वेन तस्य दोषत्वं नायं संदेह इति मूलार्थ इति भावः। मूले च साध्यव्यावर्त्तकतयेत्यस्य साध्यवत्ता
ज्ञानप्रतिबंधकतयेत्यर्थः। विरुध्यादिति। प्रतिकूलतर्कविषयेति शेषः। शंकाप्रसिद्ध्या स्वमते एतदनुमानासंभवादाह। परमतेनेदमिति। इदमप्रयोजकानुमा
नं। स्वमते ऽपि शंकितसाधकानुमानमेव अप्रयोजकत्वमिति दर्शयति। शंकातिरिक्तविशेषणाप्रवेशेन चेति। नन्वप्रयोजकानुमानं॥ तर्कवादः समाप्तः

राम
९॥

तावच्छेदकावच्छिन्नसमानाधिकरणस्तदाप्रकृतेऽपि तुल्यमिति। अन्ये तु आकाशाभावएव प्रतियोग्यसमानाधिकरणः। न च तस्यापि ह्रदावृत्तित्वा
त्तदभावोऽपि न तथा। यस्य ह्रदाभावाभावेन ह्रदावृत्तित्वं नास्तीति प्रतीतेरभावस्तदभावस्यैव ह्रदावृत्तित्वं प्रतियोगितावच्छेदकं कल्प्यते। आकाशाभावस्य
केवलान्वयित्वात्तद्व्यतिरेकेण तत्प्रतीत्यभावासिद्धेर्न तस्य तत्प्रतियोगितावच्छेदकत्वमिति। तदपि तुच्छं। लौकिकप्रत्यक्षस्यैव विषयाधीनतया ऽतीन्द्रि
यस्य धूमध्वंसकाभावस्याभावेन नाशप्रतीत्यभावासिद्धेः। तस्य न ह्रदावृत्तित्वं प्रतियोगितावच्छेदकमिति तस्यैव प्रतियोगिव्यधिकरणत्वेनित्या
न्तरसंभवात्। अभावांतरेति। अनुगतरूपस्य तत्तदभावप्रतियोगितावच्छेदकत्वे इत्यर्थः। तद्रूपावच्छिन्नसाध्यके ऽननुगतरूपावच्छिन्नसाध्यके॥
अपत्ररूपत्वेन तद्रूपाभावप्रतियोगितावच्छेदकं न वेति न विप्रतिपत्तिः। अभावाधिकरणकाभावातिरिक्ताभावानभ्युपगमे सामान्याभावानुपगं
तापितत्तद्रूपत्वावच्छिन्नाभावस्य रूपत्वावच्छिन्नप्रतियोगिताकत्वस्वीकारात्। किंतु वायौ रूपं नास्तीति प्रतीतिरभावद्वयविषयिणी न वा। अप
त्रंतान्नावद्वृत्तिरूपत्वावच्छिन्नप्रतियोगिताकत्वं रूपकालावच्छेदेन रूपवद्वृत्तिभिन्नरूपवद्वृत्तिवृत्तिनवेत्यादिकोवा। अपत्रघटोत्पत्तिद्वितीयक्ष
णोत्पन्नवायुसंयोगप्रागभावे रूपत्वावच्छिन्नप्रतियोगिताकत्वसत्त्वाद्विधोसिद्धसाधनमतः पक्षे ह सत्तं। तत्तद्रूपाभाववृत्तित्वाद्विधोसिद्धसा
धनमतः साध्ये भिन्नांतं। रूपसामान्याभावस्योत्पत्तिकालावच्छेदेन रूपवद्वृत्तित्वाद्व। वइत्सतो रूपकालावच्छेदेनेति भेदप्रतियोगिविशेषणं

PAGE(S)MISSING

NOT AVAILBLE

10-12

रूपवत्त्वप्रकारकप्रमाविशेष्यत्वाभाववृत्तितया द्रव्यत्वाभाववृत्तितया च सिद्धसाधनमतो रत्यंतं रूपकालावच्छेदेन रूपवद्वृत्तित्वविशिष्टद्रव्यत्वा
भावस्य रूपसामान्याभावसमनियतस्य सिद्धावपि इष्टसिद्धिरेव समनियताभावानामैक्यादिति दिक्। संशयानुपपत्तिं अन्यथानुपप
त्तिनसंशयं प्रमाणयति प्रमाणत्वेनावष्टे। रूपं वायौ रूपं न वेति शब्देनाभिलप्यमानः। तस्य वायोः उद्देश्यत्वादिति। सप्तम्यंतपदेन विशेषणत्वप्रतिपा
दनादित्यर्थः। रूपविशेष्यकत्वे वायुवृत्तित्वतदभावौ कोटी शब्दौ नयासत्याह। नयासतीति। प्रकृतेति। रूपाभावनिश्चयप्रतिबध्यसंशयस्यो
शेषात् रूपसामान्याभावसाधकत्वेन प्रकृतोपयोगादिति भावः। रूपवान्न वेत्युक्ते रूपवदन्योन्याभावस्यैव कोटित्वं स्यात् तेन तु रूपाभावस्यैवे
त्यत्तदभाववान्नेत्युक्तं। नानेन नकृतो संशययोर्भेदः। शब्दासंदर्भमेव संप्रदायविदः इत्यनेनोद्घाटयन् असंदर्भमेव व्यवस्थापयति। विरु
द्धकोटीत्यादिना। कोटिविशेष्यकत्वे संशयत्वमनुपपन्नं एकधर्मिकविरुद्धोभयप्रकारकज्ञानस्यैव संशयत्वादित्यतोन्यथा संशयत्वनिर्वचने तु
उभयप्रकारता। विरुद्धोभयप्रकारता। नियता। आवश्यकी। तथा चेति। रूपं वायौ रूपाभावो वा इत्याकारकसंशय इत्यर्थः। असौ संशयः अनंतरमे
ह वायुवृत्तित्वेत्यादिना। ननु नयासतीति प्रकृतानुपयोग इत्यत आह प्रकृतोपयोगं साधयति। अधिकरणे इति। तथा हि। तत्तदभावयोर्यदन्यतरत्र
निश्चय इत्यर्थः। तथा च वायौ रूपाभावनिश्चये रूपे वायुवृत्तित्वसंशयोनुपपन्न इति भावः तत्त्वे विशेषाभावनिश्चयदशायां वायौ तादृशसंशया

रूपसामान्या

Dr. BHAU DAJI MEMORIAL

क
अनुपपन्न इति भवति प्रकृतोपयोगित्वमिति भावः। अन्यथा तादृशानिश्चयस्याविरोधित्वे। असत्करणविसंवादिना प्रतिबंधकीभूतज्ञानांतरस्यापार
कत्वेनाप्यन्वयव्यतिरेकयोरन्यथासिद्धत्वादिति शाब्दं अन्योन्यप्रतिबंधत्वकल्पने गौरवमित्यरुचिं भावयति। अपरे इति। यावदिति। यावद्रूपाभाव
निश्चये एव तादृशसंशयविरोधी न तदभावात् संशयो नानुपपन्न इति भावः। इत्यस्य। इति वाक्यस्य। तथा निर्णीतत्वादिति। वस्तुगत्या यावंतो रूपा
निर्णयः भावास्तेषां यावंति रूपाणि तावदभावानां चैव प्रकृते न तरेति भावः। तस्य। प्रतियोगिगतयावत्त्वनिर्णयस्य अभावगतयावत्त्वनिर्णयस्य वा अकिंचि
त्करत्वात्। संशयो भवन्नावकिंचित्करत्वात्। अभावनिश्चय इति तथा च वस्तुगता यावंतो रूपाभावास्तन्निश्चय एव तादृशसंभावनाविरहसह
कृतः प्रतिबंधक इत्यर्थः। नन्वतिरिक्तरूपस्याप्रसिद्धेः कथं न संभावनेत्यत आह संभावनाभेति। ननु रूपत्वसामानाधिकरण्येन पार्थिवादित्रि
तयभिन्नत्वावैर्निर्णयात्कथं तादृशसंभावनेत्यत आह निवर्तते चेति। रूपत्वसामानाधिकरण्येन तादृशभिन्नत्वसंशयो रूपत्वावच्छेदेन तद
भावनिश्चयादेव निवर्तत इति भावः। ननु प्रामाणिकं गौरवं न दोषायेत्यत आह विनापीति। तथा च व्यभिचारेण न तथा प्रतिबंधकत्वमिति
भावः। अन्यथा अभावज्ञानमात्रस्य प्रतिबंधकत्वे सामान्याभावानभ्युपगंतुरपि प्रमेयेत्यादिना सामान्याभावनिश्चयस्य प्रतिबंधकत्वप्रसं
गात्। स च रूपत्वसामान्यावच्छिन्नप्रतियोगिताकत्वनिश्चयश्च। ननु विशेषाभावानामेव रूपत्वावच्छिन्नप्रतियोगिताकत्वे मिलितपटे मे
रूपं नास्तीति प्रतीत्यापत्तिरितो रूपत्वावच्छिन्नप्रतियोगिताकत्वाश्रयत्वे नातिरिक्ताभावसिद्धिरेवेत्यत आह। अभावस्यैवेति। अत्र घटाभावस्य

पितेन रूपेण रूपत्वावच्छिन्नप्रतियोगिताकत्वविरोधाभावादभावस्येति सामान्यत एवोक्तं। ननु विशेषणीभूतस्य यावद्विशेषाभावाधिकरण
वृत्तित्वस्येतिः प्रतियोगिताकत्वाद्विशिष्टस्य तथात्वं न संभवतीति भावाभावकरं वितत्वेऽकरं एतदेव पतृभावेऽभावे च विशेषणविशेष्यभावापन्ने
सप्रतियोगिकत्वमतआह। तदवच्छेदेनेति। ननु यावद्विशेषाभावप्रतियोगित्वे चेत्सामान्यावच्छिन्नातदा तादृशप्रतियोगिताकत्वविशिष्टस्या
भावस्य विशेषाणां रवत्वमपि संभवात् यावद्विशेषाभावाधिकरणवृत्तित्वस्य तत्रानवच्छेदकत्वात् तथा च तत्रापि सामान्याभावाधीप्रसंग इत्यत आ
ह। संभवतीति। तथा च सामान्यावच्छिन्नप्रतियोगिताकत्वमभावस्य यावद्विशेषाभावाधिकरणावच्छेदेनैवेति भावः। इदं च यो ध्याऽ
र्थं। गुणे सत्तायाः सत्वेपि गुणान्यत्वविशिष्टसत्तायाः असत्वात्तत्प्रतियोगिताकाभावस्य विशेषाणां रवतिसंभवेपि सामान्यावच्छिन्न
प्रतियोगिताकत्वविशिष्टस्याभावस्यासंभवादिति। प्रतियोगितायास्तत्तत्प्रतियोगिस्वरूपायाः भेदस्याभावभेदकत्वेन प्रतियोगिभेद
प्रयुक्तदोषापत्तिरवच्छेदकभेदमाशंक्य निषेधति। न चेति। भेदो वैलक्षण्यं। तेन घटत्वस्य नीलघटत्वानतिरिक्तत्वेपि न क्षतिः। तत्वे। अ
भावभेदनियामकत्वेऽएकघटेति। नियामकाभावे नियम्यानुपपत्तेरिति भावः। अवच्छेदकेत्विति। अत्र प्रतियोगितावच्छेदकतानियामक
संबंधः प्रतियोगितावच्छेदकसंबंधः प्रतियोगिविशेषणं च अवच्छेदक पदार्थः। आद्योपादाना समवायेन रूपत्वावच्छिन्नसमवायेनाभावाको

राम
१.१४

त्तिकतया रूपत्वावच्छिन्नस्य समवायेनाभावो भिन्नत इति। नद्धटाभ्योन्याभावतद्धटासंताभावयोः प्रतियोगिविशेषणरूपावच्छेदकभेदाभावे
पि प्रतियोगितावच्छेदकसंबंधभेदादेव भेद इत्याह। क्वचित्तादात्म्येति। पूर्वेति। ध्वंसे पूर्वकालीनतद्धटत्वादेः प्रागभावे च परकालीनतद्घ
टत्वादेः तथात्वात् प्रतियोगितावच्छेदकत्वात्। अन्यतरत्वादिनानुगमयसाधारणमवच्छेदकत्वं न दुर्वचमत आह पूर्वेति। तद्धटत्वस्यैव ध्वं
सप्रागभावयोः प्रतियोगितावच्छेदकत्वेप्यनुयोगिताविशेषरूपध्वंसत्वप्रागभावत्वविषयैतादेवविलक्षणप्रतीत्युपपत्तौ पूर्वकालीनत्वादेः प्र
तियोगितावच्छेदकत्वाकल्पनादिति भावः। ननु ध्वंसस्य प्रतियोग्यधिकरणपूर्वकालावृत्तित्वं प्रागभावस्य च प्रतियोग्यधिकरणपरकाला
वृत्तित्वं नियमतः प्रतीयत इति संबंधविधया पूर्वापरकालयोरप्यवच्छेदकत्वं कल्पनमित्यत आह किंत्वेति प्रश्ने। तस्य अभावभेदस्यान
न्यस्वरूपभेदस्य तत्तत्स्वरूपानतिरेकादिति भावः। तथापत्वमिति। यत्र प्रतियोगितावच्छेदकयोर्भेदस्तत्र तदवच्छिन्नाभावयोर्भेद इत्येवं री
त्येत्यर्थः। वैयधिकरण्यादिति। अवच्छेदकरूपभेदस्यावच्छेदकनिष्ठतया अभावस्वरूपभेदस्य चाभावनिष्ठतया वैयधिकरण्यादित्यर्थः। अतएव
वैयधिकरण्यादेवादूषणेनेरमाह। अभेदेपीति। व्याप्यस्याभावस्य सत्वेपि व्यापकस्य प्रतियोगितावच्छेदकभेदस्य सत्वमविरुद्धं। तथा च रू
पतद्रूपत्वयोर्भेदेपि नाभावासिद्धिरिति भावः। वैयधिकरण्यादिकं परिहरति। न चेत्यादिना। तथा च रूपत्वावच्छिन्नप्रतियोगिताको

भावस्तत्तद्रूपत्वावच्छिन्नप्रतियोगिताकाभावादतिरिक्तस्तत्तद्रूपत्वातिरिक्तधर्मावच्छिन्नप्रतियोगिताकत्वात्पटाभाववदित्यनु
मानमित्यभिप्रायः। अत्राप्रयोजकत्वमाह मानाभावादिति। अत एव नाद्यशङ्काभावौ मानाभावौ वा समनियतेनेति। ननु सुखादिव्यक्ति ६२
नानात्वात्तत्सुखादिकालीनतद्दुःखाद्यवच्छिन्नाभावस्य तत्तद्दुःखादिकालीनतत्तत्सुखाद्यवच्छिन्नाभावस्य च सत्त्वात्तयोरैक्ये अ
नन्तसंख्यापरिमाणेति। आदिपदाद्रूपरसादिपरिग्रहः। नानाधर्मावच्छिन्नः नानाधर्मावच्छिन्नप्रतियोगिताकः। किन्तु स्वाभावभे
दकमतेनाह। भेदासिद्धिस्त्विति। भाववत्त्वाभावस्यैव। विरुद्धेति। तद्देशवृत्तित्वतदभावौ तदवच्छिन्नतद्देशवृत्तित्वतदभावौ
वा विरुद्धौ तदध्यासेनाभावानां भेदसिद्धिरित्यर्थः। समनियताभावानामिति। समनियतदेशकालानां समनियतावच्छेदकानां
चेत्यर्थः। अत्यन्ताभाव इति। इदं चात्र बोध्यं। रूपत्वावच्छिन्नाभाववत्तत्परिमाणत्वावच्छिन्नाभावोऽपि नैक एव तत्तद्गुणवृत्तित्ववि
शिष्टतत्परिमाणत्वावच्छिन्नाभावविरूद्धादेव तत्परिमाणे नास्तीति बुद्धेरुपपत्तेः। एवं तत्संख्यात्वावच्छिन्नाभावोऽपि भावकूटावे
ति। मूलाद्यवच्छिन्नशरीरतरुसंयोगादीनां युगपदुत्पन्नानामपि नैकः प्रागभावो युगपद्विनष्टानामपि नैको ध्वंस इत्यन्तोऽसतीति।
तत्र परस्परानवच्छेदकावच्छेदेन तत्प्रदत्तप्रसङ्गो बाधक इति भावः। समानासमानाधिकरणेति। इदं व्यधिकरणधर्मावच्छि

राम
१.१५

संदं

न्नाभावस्यापि प्रतीतिबलात्प्रतियोगितावच्छेदकसंबंधांगीकारेण। अन्यथासमानाधिकरणधर्मावच्छिन्नाभावस्य व्यतिरेकितया केव
लान्वयिव्यधिकरणधर्मावच्छिन्नाभावेन समं भेदानुपपत्तेरिति। यत्काशाभाव एवेति यद्यपि आकाशाभावस्यापि व्यधिकरणसंबंधावच्छि
न्नत्वादसमानाधिकरणैः संबंधैरित्यनेन गतार्थता तथाप्यतिरिक्ताभावकल्पनानिपाते व्यधिकरणधर्मावच्छिन्नाभावानभ्युपगमस्तदा
ऽऽकाशस्याकाशाभावस्य व्यधिकरणसंबंधावच्छिन्नप्रतियोगिताकत्वं कल्प्यते बाधकाभावादित्याशयेनेदं। तत्तद्देशेति। मूलाद्यवच्छि
न्नवृक्षादिवृत्तित्वं किंचिदनवच्छिन्नं घटगुणादिवृत्तित्वं कपिसंयोगाद्यभाववत्त्वस्यावच्छेदकं। एवमुत्पत्तिकालावच्छिन्नं घटादिवृत्तित्वं कि
ञ्चिदनवच्छिन्नं वाय्वादिवृत्तित्वं रूपाद्यभाववत्त्वस्यावच्छेदकं। एवं किंचिदनवच्छिन्नं घटादिवृत्तित्वं समवायेन गोत्वाभाववत्त्वस्यावच्छेदकं
कालिकतया गोत्वाभाववत्त्वस्य तत्तद्भिन्नदेशावच्छिन्नकालवृत्तित्वमवच्छेदकं समवायेनाकाशाद्यभाववत्त्वस्य तु न किंचिदवच्छेदकं व्याप्यवृ
त्तित्वादिति। विशिष्टस्य तत्त्वे पूर्वोक्तदोषात्तत्तदवच्छेदेनेवेति। घटपदेति। अव्याप्यवृत्तिगोत्वादीति। व्याप्यवृत्तिं चाभिप्रेत्यानङ्गदः। घटा
भावपटाभावादिभेदः। तत्तत्स्वभावः तत्तदभावस्वरूपः। तत्रेति। अधिकरणवृत्तित्वस्याभावात्मकत्वेन तदनन्तर्भूतत्वात्। अभावस्व
रूपस्य सार्वत्रिकत्वेन तदनवच्छेदकत्वाच्चेति। समानमिति। रूपत्वावच्छिन्नप्रतियोगिताकत्वस्यापि तत्तद्रूपाभावस्वरूपत्वात्तत्रापि भावच्छि

शेषाभावाधिकरणवृत्तित्वादेरनवच्छेदकत्वादिति। व्यासज्यवृत्तीति। तथा च घटत्वतिपटत्वे घटपटौ न यद्वदिति बुद्धेरिव यत्र किंचिद्रूपाभा
ववतिरूपवतिरूपं नास्तीति बुद्धेरप्यभाववृत्तिभावः। अत एवेतु क्रमर्थविवरणेति। अव्यासज्यवृत्तेरिति। नारद्राप्रतियोगितातिरिक्तैवचेन्नारो
अप्रतिरिक्तेति। व्यासज्यवृत्तित्वे दोषान्तरमाह। किं चेति। युगपदिति। मिलितघटद्वये यावद्रूपाभावानां युगपदिंद्रियसंनिकर्षसंभवादिति भावः।
ननु निरधिकरणाभावलौकिकप्रतीतिर्नास्त्येवातइंद्रियसंबद्धविशेषणताया एव तत्र यादेतुत्वान्न ताद्दशाधीरतआह। अपि चेति। रूपान्तरेण गुण
जौ ५ त्वादिना। ननु व्यासज्यवृत्तिधर्मलौकिकप्रत्यक्षे एव यावदाश्रयसन्निकर्षापेक्षा तद्भावद्दशायां गुणत्वादिना तल्लौकिकप्रत्यक्षं न भवत्येवेत्यत आह
संबंधविधयेति। यावदाश्रयसन्निकर्षेपि संबंधविधया व्यासज्यवृत्तिधर्मस्य लौकिकप्रत्यक्षं भवतीत्यभिप्रायः। एवं चेति। व्यासज्यवृत्तितावच्छेदक
प्रकारकव्यासज्यवृत्तिधर्मलौकिकप्रत्यक्षे एव यावदाश्रयसन्निकर्षस्य हेतुत्वाद्रूपं नास्तीति बुद्धेश्च रूपत्वावच्छिन्नप्रतियोगिताकत्वस्य संबंधवि
धयैव भानादेकैकाभावसन्निकर्षेपि तथाधीः स्यादित्यर्थः। ननु यावदाश्रयसन्निकर्षसंबंधविधया तद्भाने न भवत्येव। अत एव दंडपुरुषस
न्निकर्षदशायामेव। दंडीति संयोगसंबंधांशे लौकिकप्रत्यक्षं यावद्व्यासज्यवृत्तितावच्छेदकप्रकारकत्वं न कार्यतावच्छेदके निवेश्यमत आह। यावद्दे
इति। तत्र तादृशज्ञाने यावदाश्रयाणां। तद्भेदस्य। यावदाश्रयाणां भेदस्य। यद्यपि भेदज्ञानेन ज्ञानस्यावश्यकत्वात्तज्ज्ञानस्य स्वातंत्र्येण हेतुत्वे मानाभाव राम

१९

स्तथापि यावदाश्रयलौकिकप्रत्यक्षाभिप्रायेणेदं। तदुपनीतभाने सत्यपि तल्लौकिकप्रत्यक्षप्रतिबंधकदोषादिसत्त्वे यावदाश्रयसन्निकर्षे
तद्भेदज्ञानादिसत्त्वेपि व्यासज्यवृत्तिधर्माग्रहादिति। तद्विशेष्यकज्ञानाभिप्रायेणेदमित्यपि कश्चित्। तदज्ञाने तल्लौकिकप्रत्यक्षाभावे। तद्भे
दज्ञाने। तद्भेदज्ञानाभावे। तदग्रहात् व्यासज्यवृत्तिधर्माग्रहात्। व्यतिरेकमुक्त्वान्वयमप्याह। आश्रयभेदेति। एकस्मिन्नेव वृत्तेर्भेदक्रमेण द्वि
त्वभ्रमदर्शनादि[illegible]ग्रहणाभावेन तावता प्रकृते किमायातमत आह। न चात्रेति। रूपत्वाद्यादौ। विशेषइति। अभावत्वादिना ग्रहस्य परस्परभेदज्ञानानु
पयोगित्वेनाकिंचित्करत्वात् तद्रूपाभावत्वादिना ग्रहस्य प्रकृतोपयोगिनः तत्तद्रूपत्वाद्यज्ञाने संभवात्। तथा च वाय्वादौ रूपं नास्तीति लौकिकप्रती
तिर्न स्यादिति भावः। ननु यावदाश्रयभेदज्ञानादीनां व्यासज्यवृत्तिप्रत्यक्षत्वावच्छिन्नं प्रति नैकरूपेण हेतुता द्वित्वत्रित्वसंयोगादिसाधारणस्य
व्यासज्यवृत्तित्वस्यैकस्यानुगतानतिप्रसक्तस्य यावदाश्रयभेदज्ञानतत्स्याभावात्। किंतु द्वित्वप्रत्यक्षे तन्न द्वित्वप्रत्यक्षे गततदाश्र स्त
यभेदज्ञानत्वादिना हेतुत्वं प्रकृते चाश्रयभेदज्ञानाभावेपि रूपं नास्तीति प्रतीतिसत्त्वात् तथा हेतुत्वमेव न कल्प्यते इत्यत आह। दिगिति। दिग
र्थस्तु रूपं नास्तीति विषयता एकस्यैवाभावस्य कल्प्यते न तु नैकस्य। एवं प्रतिबंधकाभावकारणतायामभावकूटस्य कारणत्वापेक्षया एकस्यैव
मणित्वाद्यवच्छिन्नाभावस्य हेतुत्वे लाघवं एवं रूपवति रूपान्तरानुत्पत्त्यावश्यं रूपं प्रति रूपाभावस्य कारणत्वं वाच्ये तच्च न रूपाभावकूटत्वेन गौर

वात्। अस्मन्मते तु रूपाभावघटितकारणतापेक्षया एकस्यैव रूपत्वावच्छिन्नप्रतियोगिताकाभावस्य हेतुत्वे लाघवमिति दिक्। तद्व्या
सज्यवृत्तित्वस्यैतादृशप्रतियोगिताकत्वे व्यासज्यवृत्तित्वस्य। इदं च व्यासज्यवृत्तित्वं न प्रतियोगिताकत्वादतिरिक्तमित्यभिप्रेत्य। ननु भूमता
दृशप्रतियोगिताकत्वं तथा व्यासज्यवृत्तित्वं च द्वयं कल्प्यं भवतामपि सामान्यावच्छिन्नप्रतियोगिताकत्वं अतिरिक्ताभावश्चेति द्वयं कल्प्यं न तत्क
यं तत्कल्पनामपेक्ष्य लाघवमित्यत आह कल्पनीयेति। गुरुत्वादिति। अनंताभावेषु तदुभयं कल्पनीयमित्येव गौरवे पूर्वत्रेति भावः। ननु
प्रतियोगिताकत्वस्य व्यासज्यवृत्तित्वं तत्प्रतियोगिताकत्वस्वरूपं मतो नाधिकं कल्प्यं तथा च भवतामेव तादृशप्रतियोगिताकत्वम भावश्चे
त्युभयकल्पनमिति गौरवमत आह क्लिन्निगमनेति। व्यासज्यवृत्तित्वस्यातिरिक्तस्य कल्पनेऽप्यपि प्रतियोगिनोऽतिरिक्ता न कल्पनीया न
यावत्कृत्स्नेष्वनंतेष्वभावेषु एका प्रतियोगिता तत्र सामान्यावच्छिन्नत्वं च कल्प्यं यथा भवता तथास्माकमपि लक्ष्याणामनंतप्रतियोगितानां
सामान्यधर्मावच्छिन्नत्वं अतिरिक्ताभावश्चेत्युभयत्र तुल्यत्वेऽपि विनिगमनाविरहादतिरिक्ताभावसिद्धिरिति भावः। ननु धर्मिकल्पनातो धर्म
कल्पना या लघुत्वात्प्रतियोगिताकत्वस्य धर्मत्वमेव तत्कल्पनेऽविनिगमकमत आह। धर्मेति। यत्र धर्मिकल्पने धर्मधर्मित्वोभयोरपि कल्प्यत्वं
धर्मकल्पने चैकस्य कल्पनं तत्रैव तन्न्यायावतारो न तु धर्मत्वेनैव लाघवमिति तदर्थ इति भावः। लघीयसीति। भवतो कल्पनीयं यममतु द्वयं कल्पनं नाधि राम
९७

करणवृत्तित्वस्य विशेषाभावेषु लक्षणत्वादित्यर्थः। एवं सतीति। घटाभावस्यावदेकः कल्प्यस्तस्यानंताधिकरणवृत्तित्वं च कल्प्यं तदपेक्षया
लक्ष्याणामेवाधिकरणानां तथा प्रतीतिनियामकत्वं लघिष्ठभावो न सिध्येदित्यर्थः। वस्तुतो रूपं नास्तीति धीनियामकतया अतिरिक्ताभावे
सिद्धे तस्यानंताधिकरणसंबंधः कल्पनीय इति फलमुखगौरवं न दोषायेति भावः॥ राम॥ नानाव्यक्तीति रूपवान् पृथिवीत्वादित्यादावित्य
र्थः। साध्यस्यैकत्वे विशिष्टाभावानंगीकारे नाव्याप्तिः हेतोरपि नानाव्यक्तित्वे यद्वृत्त्यधिकरणे साध्यव्यक्तिस्तयोरेव व्याप्तिरिति वक्तुं शक्यमिति ९८
तत्परिहाराय विशेषणद्वयं। उपाध्यायमतमास्कंदति। न च तत्रेति। रूपवत्त्वमपि रूपव्यक्तित्वे दाल्ले कमत आह तद्वेति। परंपरासंबंधेन स्वाश्र
यसमवायेन। रूपादेरिति। तथा च रूपवती पृथिवीत्यनुमितिर्न स्यात् तस्याश्च रूपं पृथिवीत्यनुमितिरिति भावः॥ ननु यत्र रूपस्य व्यापकत्वम
स्त्वेव रूपवती पृथिवीत्यनुमितिरन्यत्र तु रूपं पृथिवीत्याकारिकैवेत्यत आह द्रव्यात्मत्वेति। द्रव्यत्वादाव्याप्तिरिति। यद्यप्यसंभवएव व
क्तुमुचितः सर्वत्र विशिष्टाभावविशिष्टावच्छिन्नाभावसंभवात् यापि त्वावच्छिन्नप्रतियोगिताया व्यासज्यवृत्तित्वांगीकारेण तद्रूपवानेत
द्रसादित्यादौ प्रतियोगिव्यधिकरणहेतुसमानाधिकरणाभावप्रतियोगितापर्याप्त्यनधिकरणत्वं साध्ये संभवतीति नासंभव इति तयो
क्तमिति। नन्ववच्छेदकाघटिततत्तद्रूपेण प्रतियोगितावच्छेदकावच्छिन्नत्वेऽव्यधिकरणत्वेन वा व्यं किंतु प्रतियोगिव्यधिकरणेन तथा च विशिष्ट

सत्ताभावस्य प्रतियोगिसमानाधिकरणतया प्रतियोग्यसमानाधिकरणपदेनैव तद्वारणमत आह अन्यथेति। अतिप्रसंगादिति। त
था च तद्वारणाय प्रतियोगितावच्छेदकावच्छिन्नत्वे यधिकरणपदमवश्यं वाच्यमिति भावः। अन्यथा विशिष्टाभावस्य विशेष्याप्रतियोगिकत्व इति
कश्चित् तन्न विशिष्टाभावस्य विशेष्यविशेषणसंबंध एव प्रतियोगी न तु विशेष्यं तत्र विशिष्टसत्तायाः साध्यत्वे सद्धेतुत्वमेव तादृशसंबंध
स्य साध्यत्वे च व्यभिचारित्वमत आह यु स्यादपि व्यतन इति। दण्डी पुरुषो नास्तीति प्रतीतौ दण्डविशिष्टपुरुषस्यैव प्रतियोगित्वावगाहनान्न तु तादृ
श संयोगस्येति भावः। ननु विशिष्टमतिरिक्तमेवेति मते नोक्तदोष इत्यत आह द्वितीयादीति। तत्र हेतुमति। प्रतियोगितानव्यासज्यवृत्ति
रिति भावः। तथा चासंभव इति ध्येयं। प्रागल्भमतमाशंक्य निषेधति। अथेति। येन रूपेणेति। तथा च तादृशप्रतियोगिताभावावच्छेदकत्वेन तद
रूपत्वेन वच्छिन्नसामानाधिकरण्यं व्याप्तिरिति भावः। अयं तादृशप्रतियोगिताभावः तदभावावच्छेदकत्वं प्रतियोगिताभावावच्छेदकत्वात्सर्वत्रै
वेति। रूपत्वस्यानतिरिक्तवृत्तित्वरूपावच्छेदकत्वस्फोरणाय। न तु कापीति रूपत्वसामानाधिकरण्येन तादृशप्रतियोगिताभावसत्व
व्यवच्छेदायान यथा च रूपत्वावच्छेदेन तादृशप्रतियोगित्वप्रत्ययस्य विरोधिनः सत्वेन तदवच्छेदेन प्रतियोगितात्वावच्छिन्नाभावविषयीक
रणासंभवात् रूपत्वादिना न पृथिवीनिष्ठाभावप्रतियोगित्वमिति प्रत्ययस्य तन्नीयोक्तिरिवि तस्य पृथिवीनिष्ठाभावप्रतियोगितावच्छेदकत्वा राम १८

२

भावो रूपत्वे विषय इति भावः। ननु रूपत्वाद्यवच्छेदेन तादृशप्रतियोगित्वाद्यभावज्ञाने रूपत्वे स्वरूपसंबंधरूपतादृशप्रतियोगि
तावच्छेदकत्वज्ञानमेव विरोधि न तु अनतिरिक्तवृत्तित्वरूपावच्छेदकत्वज्ञानमतो नोक्तप्रतीतिर्बाधिकेत्यत आह अन्यथेति। तेन
रूपेण प्रतियोगिताभावविषयीकरणायोग्य इति। तथा च गुणाद्यनवच्छेदकप्रमेयत्वाद्यवच्छेदेन गुणाद्यभावो पि सिध्येदित्यर्थः
अत्रेष्टापत्तौ दोषमाह प्रमेयधूमत्वेनेति। तथा च प्रमेयधूमवान् वह्नेरित्यत्रातिव्याप्तिरिति भावः। अथेति। तथा सामानाधिकरण्यप्र
तियोगितावच्छेदकं तादृशप्रतियोगिताभावावच्छेदको यो धर्मस्तद्रूपावच्छिन्नसामानाधिकरण्यं व्याप्तिरिति भावः। इदमवच्छेदकत्वं
अनतिरिक्तवृत्तित्वनियतमन्यूनवृत्तित्वनियतं वा। आद्ये असमानाधिकरणेति। असमानाधिकरणो धूमो यस्यायोगोलकीयवह्नेस्त
द्वृत्तिनमेत्यर्थः। तथा च वह्नित्वमनतिरिक्तवृत्तितया सामानाधिकरण्यप्रतियोगितावच्छेदकत्वाद्वह्निमान् धूमादित्यादावव्याप्तिरिति भा
वः। द्वितीये। कंबुग्रीवेति। कंबुग्रीवादिमत्त्वस्य प्रमेयधूमत्वादेरिवानवच्छेदकत्वादित्यर्थः। अत एव। कंबुग्रीवादिमत्त्वादिना घटादेरसाध्य
त्वापत्तादेव। तथा च तादृशप्रतियोगिताभावावच्छेदकयद्रूपविशिष्टसंबंधिनिष्ठाभावप्रतियोगितानवच्छेदकं तदवच्छिन्नसामानाधिक
रण्यमित्युक्तौ प्रमेयधूमवान् वह्नेरित्यादावतिव्याप्तिरिति भावः। एवं प्रतियोगितानवच्छेदकत्वघटितलक्षणकरणे। तत्र साध्यजातीय

भावानंदी

ति। तथा च पूर्वलक्षणे व्यधिकरणवह्निधूमयोरपि व्याप्तिरित्युक्तं। प्रकृते तु समानाधिकरणतद्वह्निधूमयोरेव व्याप्तिरिति भेदः।
घटकयोः। लक्षणघटकयोः। प्रतियोगितेति। प्रतियोगितावच्छेदकान्योन्याभावप्रतियोगितावच्छेदकत्वासंभवादनयोरित्यर्थः। अन
निवेशादिग्रंथासंदर्भः क्वचिदित्यनेन सूचितः। सामान्यविशेषेति। सामान्यं साध्यजातीयसमानाधिकरणसाधनजातीयत्वं। विशे
षः। विशेषः। साध्यसाधनसामानाधिकरण्यं। अव्याप्यधिकरणादिति। अन्योन्याभावाप्रतियोगिसाध्याधिकरणवृत्तिसाध्यसामानाधिक
रण्यमित्यर्थे एकस्य साध्याधिकरणविशेषणस्य वैयर्थ्यं। यदुत्कृष्टमित्यत्र तु अन्योन्याभावाप्रतियोगियत्साध्याधिकरणवृत्तित्वमित्य
र्थे न तदप्रवेशाल्लाघवमिति भावः। नानाव्यक्तीति। नानाधिकरणवृत्तिनानाव्यक्तिसाध्यकस्थले इत्यर्थः। साध्यस्यैकव्यक्तिवृत्तित्वे एको न ह्यावृत्ति
प्रतीतेरन्योन्याभावविषयत्वेनाव्याप्तेरसंभवः। साध्यस्यैकव्यक्तित्वे च यत्साध्यवत्त्वं तादृशान्योन्याभावप्रतियोगितानवच्छेदकमित्युक्तेपि नाति
व्याप्तिः स्यादित्यतः साध्यतद्वतोर्नानात्वमुपदर्शितं। न साध्यवत्त्वस्येति। न तद्वह्निमत्त्वस्य तादृशान्योन्याभावप्रतियोगितावच्छेदकत्वादित्य
र्थः। ननु वह्निमान्धूमादित्यादौ वह्नित्वस्य साध्यतावच्छेदकत्वेन यद्रूपावच्छिन्नवत्त्वमनवच्छेदकमिति लक्षणसमर्थनेपि वह्निसंयोगादौ साध्ये
वह्निसंयोगत्वस्य वह्निघटितमूर्त्तिकत्वेन नानानात्वात्कथं लक्षणगमनमत आह। वह्न्यादाविति साक्षात्परंपरया चेति। वह्नेः साक्षादन्ययोः परंप

राम
१९

रया स्वाश्रयप्रतियोगिकत्वादिरूपया वह्नित्वमनुगमकमित्यर्थः। नन्वेवमपि वह्निसंयोगादौ साध्ये वह्निमानित्येवानुमितिः स्यान्न तु व
ह्निसंयोगवानित्याकारिकेत्यत आह तत्र विशिष्येव लक्षणमाह। यदित्यादिना। वह्नित्वादौ साध्ये यदनवच्छेदकं तत्त्वादौ साध्ये यद्रूपाव
च्छिन्नमनवच्छेदकं वह्निसंयोगादौ साध्ये यादृशरूपावच्छिन्नमिति। एवं वह्निसंयोगवदादौ साध्ये यादृशरूपावच्छिन्नावच्छिन्न
मित्याद्यादिवाच्यमिति। इदं च प्रगल्भमतानुसारेण तन्मते तद्वह्नित्वेन प्रतियोगितावच्छेदकत्वेपि वह्नित्वेन तत्र तदभावानभ्यु
भा०
पगमात्। स्वमते तु वह्न्यादौ साध्ये तादृशप्रतियोगितावच्छेदकतानवच्छेदकं यत्साध्यतावच्छेदकमिति वह्निसंयोगादौ तादृश
प्रतियोगितावच्छेदकतावच्छेदकतानवच्छेदकमित्यादिकं वक्तव्यमिति बोध्यं। शब्दे कोपि अभिधेयस्य नानाविधत्वे एकशब्देनाभिधाना
त्साकिंचित्करत्वादित्यर्थः। विशेषलक्षणानि प्रायेण मूले योजयति। तथापीति। अन्यनिष्ठत्वादिमूलं व्यधिकरणवह्निधूमयोः सामा
नाधिकरण्यांशस्यैव प्रतिक्षेपकं न तु व्यापकदलस्येति भावः। विभिन्नकालोत्पत्तिविनाशयोरपि दैशिकव्याप्तिसत्त्वाद्दैशिकव्या
प्तेः युगपदुत्पत्त्यादिकमनुपपत्तिकमतः पूरयति कालिकीत्यादीति। लक्षणस्येति। सामान्यएकवचनं। अनुभूयमानेति। उल्लेखो विषय
त्वं। तथा चानुभूयमाने विशिष्टभेदविषयित्वं यस्यास्तस्याः इत्यर्थः। उल्लेखः शब्दाभिलापः। तथा चानुभूयमानो विशिष्टभेदवाचकशब्दः।

भिन्नाभावो यस्याप्रतीतेरित्यर्थः। तथा चात्यंताभावविषयकप्रतीतावन्योन्याभावविषयित्वभ्रमस्तादृशाद्यभिन्नाभावो वा ननु साप्रती
तिर्नेदृगवगाहिनी अभेदनिश्चयसत्वे भेदज्ञानस्यासंभवादिति भावः। शिखीति। शिखाविनष्टा पुरुषो न विनष्ट इति बाधकाले तत्र विशिष्टना
शो न विषय इति भावः। बाधकत्वादिति। अभेदप्रत्यभिज्ञानरूपबाधकत्वादित्यर्थः॥ नन्वेवं गुणादावपि संयोगिभेदो न सिध्येदत आह प
त्रं चेति। नातिप्रसंगः। कपिसंयोगी सत्त्वादित्यादाविति शेषः। भेदवत्त्वं भेदस्यैव। तदभावस्य भेदाभावस्य। संयोगस्य तदभावत्वोपपत्तये
तत्प्रतियोगितावच्छेदकस्येति। अव्याप्यवृत्तित्वोपपत्तये संयोगात्मन इति। तदुपपत्तेः। भेदप्रतीतिदशायां अभेदप्रतीत्युपपत्तेः। अत्यंताभाव
प्रतियोगिदृष्टांतेन भेदप्रतियोगितावच्छेदकस्य तदभावत्वे यद्वस्यापयति यथा हीत्यादिना॥ ननु तज्ज्ञानप्रतिबंधकग्रहविषयस्यैव
तदभावत्वे प्रतियोगिव्याप्यस्याप्यत्यंताभावत्वापत्तिरत आह। अभावव्यवहाराच्चेति। ननु लाघवादभावप्रतीतेः प्रमात्वानुरोधाच्च संयोगाति
रिक्त एव संयोगिभेदाभावस्तत्राह। आधिक्येपीति। अव्याप्यवृत्तित्वादिति। अयमर्थः कपिसंयोग्यभिन्नवृक्षत्वादिप्रतीत्या अग्रावच्छेदेन कपि
संयोग्यादिभेदाभावग्रहादिति भावः। अत एव कपिसंयोगिभेदाभावस्य संयोगस्वरूपत्वादाधिक्येप्यव्याप्यवृत्तित्वादेव। नतपानबाधकं
संयोगात्मकत्वपक्षे संभवादिति। आधिक्ये। असिद्धेरिति। यद्यज्ज्ञानस्वरूपस्यासंभवमुक्त्वा विषयस्याप्यसिद्धिमाह असिद्धेरिति। मूले वृक्षे न राम

२०

संभवेपि स्मरणात्मकतदुपस्थितौ

कपिसंयोगिभिन्न इति प्रत्ययस्य संयोगविषयत्वे संभवादि किमुक्ताप्रतिबंधकान्यविषयत्वे दोषमाह नापीत्यादिना। ज्ञानमिति। तथेत्यनु
षज्यते। एवमग्रेपि। तद्वृत्तित्वस्य वृक्षवृत्तित्वस्य। तदवच्छेदस्य। कपिसंयोगावच्छेदस्य। असिद्धिमुक्त्वा संभवं दर्शयति तद्धर्मेति। तद्धर्ममात्रपर्यवसा
यितया। तद्धर्मा[illegible]कतया। तदेव दृष्टांतेन द्रढयति। नहीति। अभावत्वप्रतीतेः प्रमात्वानुरोधेनातिरिक्तत्वस्वीकारे त्वाह अन्यथेति। अत एव। वक्ष्य
माणयुक्तेरेव परास्तमित्यग्रेतनेनान्वयः। सामान्यत इति। अत्यंताभावत्वप्रतियोगितावच्छेदकावच्छिन्नत्वादिना अन्योन्याभावत्वप्रतियोगि
तावच्छेदकत्वादिना चेत्यर्थः॥ विरोधः। परस्परासामानाधिकरण्यं। सः विरोधः। नहीति। नियमत इति। प्रत्यक्षेण संयोगोपस्थितौ संयोगवत्वे
न प्रतियोगिन उपस्थितौ तदसंभवादिति भावः। यत्राप्युपस्थितिस्तत्रापि न संयोगिभेदो विषय इत्याह प्रतियोगिकोटाविति। तदवच्छेदकत्वात्।
संयोगिनोनुल्लेखात्। न संयोगीति प्रतीतेः संयोगात्यंताभावविषयत्वे तु प्रतियोगिकोटौ विशेषणमुद्रया संयोगस्योल्लेखोस्त्येवेति भावः। अभावमा
त्रेति। मात्रपदेन विशिष्टभेदविषयत्वव्यवच्छेदः। प्रतियोगिनः कथं विशेषणमुद्रयोल्लेख इत्यत्र दृष्टांतः। शिखी विनष्ट इतिवदिति। अयं नियमः। अ
न्योन्याभावप्रतियोगितावच्छेदकयोः विरोधो न संकोच्यतामिति पूर्वेणान्वयः। अन्योन्येति। घटान्योन्याभावस्य पटत्वसमानाधिकरणतया
इत्यर्थः। ननु संयोगिभेदस्य गुणादौ च संयोगासामानाधिकरण्यदर्शनेन विशिष्टस्यैव विरोधः प्रकृते नेत्यपि तामत आह अत्यंतेति। नमाविध

विरोधकल्पनायाः। संयोगिभेदस्य संयोगासामानाधिकरण्यकल्पनायाः। ननु संयोगी नेति प्रतीतिः संयोगाभावविषयत्वेनैवोपपन्ना नैतादृशकल्पना बाधिकेत्यत आह किं चेति। तद्बाधात् ध्वंसप्रतियोगित्वबाधात्। विशेषणे ध्वंसविषयतेति। तत्र ध्वंसत्वप्रकारकप्रतीतेः सविशेषणे हीत्यादिन्यायेन विशेषणध्वंसावगाहित्वसंभवइति भावः। विशिष्टभेदमिति। अत्र तु भेदत्वप्रकारकप्रतीतेः कथमत्यंताभावत्वप्रकारकत्वेनोपपत्तिरिति भावः। दण्डादिनाशप्रागभावकालेपि नायं दण्डीति प्रतीतेः ध्वंसादिविषयत्वखंडनाय संसर्गाभावेति। नखल्विति। अतत्प्रकारके तत्प्रकारकस्यानुव्यवसायेन विषयीकरणेऽनुव्यवसायस्य तत्प्रकारकत्वांशे भ्रांतत्वापत्तेरिदं रजतमिति प्रतीतेः रजतत्वप्रकारकत्वस्यानुव्यवसायेन विषयीकरणादिति भावः। न संयोगीति प्रतीतेः संयोगभेदविषयत्वेनोपपत्तिमाशंक्य निषेधति। न चेति। प्रत्यक्षप्रतीतौ सामग्रीवशात् संसर्गाभावविषयतापि प्रसज्येतेत्यतः प्रतिनियतविषयकं शाब्दमपुष्टं भवति। अत आह। युज्यते चेति। ननु पञ्चतादशायामयं नश्याम इति व्यवहारो न नवत्येव किंतु इदानीमयं नश्याम इति तत्र चेदानीं यः श्यामस्तत्त्वावच्छिन्नभेद एव विषय इत्यत आह इदानीमिति। अत्र चेदानीं तद्द्रवतो प्रसिद्धान्यभेदविषयत्वे नोपपन्नभावादिति भावः। व्यवहारो निलापः। तदनुपपत्तेः। संसर्गाभावप्रतीत्यनुपपत्तेः। तदेव व्यतिरेकेण द्रढयति। नखल्विति। नैवं प्रतियोगिसप्तमीं विनापि संसर्गाभावबोधकत्वात् घटो न घट इति। घटे घटसंसर्गाभावसत्त्वादिति भावः। राम

२१

तथा च पुरुषेण दंड इत्यादौ तन्मदस्यान्यपुरुषनिष्ठदंडसंसर्गाभावबोधे पुरुषोपस्थापकपदोत्तरसप्तमीपदज्ञानहेतुः कदाचित् तदभावान्नायं दंडीत्यादौ न दंडसंसर्गाभावधीरिति भावः। ननु इतरविशेषणत्वेनानुपस्थितदंडसंसर्गाभावबोधे तथा हेतुत्वे इतरविशेषणत्वेनोपस्थितदंडस्य तत्र पुरुषानुयोगिकसंसर्गाभावबोधे च पुरुषोपस्थापकपदसमानविभक्तिकपदार्थविशेषणतया दंडस्य पदजन्योपस्थितिः कारणं अत एव पुरुषो न दंड इत्यादौ तन्मदजन्यपुरुषनिष्ठदंडसंसर्गाभावबोधः भवति तु पुरुषान्दंडीत्यादावत आह। अपि चेति। पर्वतो वह्निमान् धूमादित्यादावितरविशेषणत्वेनोपस्थितस्य वह्नेरपि एकवाक्यताधीनबोधः सतु वर्यविशेषणत्वे न हेत्वर्यविशेषणत्वेन चान्वयात्। अन्यत्रेति विशेषणत्वेनेति वा। विशेषणमात्रपरमिति। तथा च मनुपोनस्वार्थेतात्पर्यमिति भावः। नथापीति। दंडिपदस्य दंडपरतया दंडिपदं दंडपरमपि नविशेषइति। इतरविशेषणत्वेनानुपस्थितस्यापि न अनुयोगिनि सप्तमीं विना तद्बोधे चैत्रो न दंडीत्येवं चैत्रो न दंड इत्यत्रापि तथा स्यादिति तथा च तत्रवक्तव्यमतः पूर्वोक्तदोषापत्तिरिति भावः। चैत्रो दंडः घटो न इत्यादौ दंडपदसमभिव्याहृतनञ्
३३. एव तादृशबोधसामर्थ्यरूपमिति तत्पदेकं घटितमेवोदाहृतवान्। एतेन चैत्रो न दंड इत्यादौ तथा प्रतीत्यापादनेन। अभीदवहारस्वाणिकत्वेनेति। तथा च यत्राभावमात्रतन्त्र वस्तुत्वे वानुयोगिसप्तम्यपेक्षा न तत्र वस्त्राभाव नत्वादावस्मिन्नानुयोग्यन्वयेनेन

Dr. BHAU DAJI
डाक्टर भाऊदाजी

तदपेक्षेत्याशयः। एवं चेति। सर्वत्रैव संसर्गाभावबोधे सप्तम्यपेक्षायामित्यर्थः। शक्येति वैयाकरणमते। निपुणतरमिति। नन्व्यतिरेके
णपञ्चम्येन संबंधेन भावान्वये तु योगिनि सप्तम्यपेक्षते यथा भूतले घट इत्यादौ तत्रैव तत्संबंधावच्छिन्नप्रतियोगिताकाभावान्वयेपि सप्तम्यपे
क्षा यथा भूतले न घट इत्यादौ चैत्रः पचतीत्यादौ तु विनापि सप्तमीं कृतेराश्रयत्वसंबंधेनान्वयात्। नत्रापि सप्तम्यपेक्षते इति नन्वादे प्रतियोग्य
भावान्वये च तुल्ययोगक्षेमावित्यनेन दर्शनीयत्वादिति भावः। न श्याम इत्यादौ। सिद्धांतिनां संवादमाह। नञ् इत्यादिवदंतीत्यंतेन। तद्धर्मावच्छिन्न
वैधर्म्यं तद्धर्मावच्छेदकीभूतलक्षणावच्छेदेन तद्वदित्यादि। प्रकृतेन श्याम इत्यादौ नञर्थे वृत्तिभिन्नत्वं च श्याम इत्यादौ च श्यामत्वस्य विशेषण
त्वेतात्पर्यं। तथा चायमिदानीं न श्याम इत्यस्य श्यामत्वविशिष्टवृत्तिभिन्नवानयमिदानीमित्यर्थः रक्तादशायां च घटे न श्यामत्वविशिष्टत्व
मिति न बाधः। वैधर्म्यं रक्तत्वादीत्यत्र संवादमाह। पदाकृरिति। संबंधत्वस्य नियमघटितत्वादाह। निरूपितत्वमिति। संयोगत्वादिनैव तत्प्रवेश
इति भावः। वक्ष्यत इति। नह्लिंगकनत्साध्यकानुमितित्वं कार्यतावच्छेदकमनुमितिसामान्ये तु पक्षभावत्तानत्वादिना हेतुत्वमिति भावः। चतुर्णमेव
लक्षणानामाकृष्यात् द्विवचनं घटत इति न दुपपादयति अपसंतेति। तथा चात्यंताभावगर्भत्वेनान्योन्याभावगर्भत्वेन च योर्द्वयोरेकत्वात् द्विवचनमिति
भावः। स्वसमानाधिकरणेति। द्वित्वसमानाधिकरणघटत्वपटत्वादीत्यर्थः। एकैकाभावप्रतीतिरिति। घटो नास्तीत्यादिप्रतीतिरित्यर्थः। द्वौ न स्तः घ राम

भाव १

टपटौ न स्तः। ननु घटपटौ न स्त इत्यत्र द्वित्वस्याधिकरणस्य भानादेव वैलक्षण्यमत आह शब्दादिनेति। प्रत्यक्षेण तादृशनिश्चयकाले एकैकस्यापीन्द्रि
यसंनिकर्षादिसत्त्वेन निश्चयात्तथा संशयोऽसिद्ध एवेति शब्दादिनेत्युक्तं। घटपटौ न स्त इति शाब्दबोधे घटत्वादेः प्रतियोगितावच्छेदकत्वानवगाह
नात्संशयो नानुपपन्न इत्यनोविषयानुगममिति। क्वचिद्घटप्रतियोगिकाभावत्वं क्वचित्पटप्रतियोगिकाभावत्वं विषय इति विषयानुगम इत्य
र्थः। द्वित्वाधिकरणेति। अभावे द्वित्वाश्रयप्रतियोगित्वं द्वित्वाश्रये च घटत्वं पटत्वं तादृशप्रतीतौ प्रकार इत्यर्थः। घटपटौ न स्त इति शाब्दबोधे प्रतियो
गितावच्छेदकत्वावगाहित्वस्यानुभविकत्वादाह। द्वित्वसमानाधिकरणेति। कथं घटघटोभयं नादृश इति। द्वित्वाधिकरणयत्किंचिद्घटपटशून्ये यत्किं
चिद्घटपटशून्ये यत्किंचिद्घटपटोभयवति घटपटौ न स्त इति प्रत्ययादित्यर्थः। द्वितीयपीदं दूषणं। द्वित्वसमानाधिकरणतत्तद्घटत्व
तत्तत्पटत्वाद्यवच्छिन्नप्रतियोगिताकाभावस्य तत्र सत्त्वादिति। द्वितीये दूषणांतरमाह। द्वित्वसामानाधिकरण्येति। अत एव च समाण
दूषणादेवाऽन्यतरत्वेति। अपिनाऽन्यतरत्वघटकघटत्वत्वादेरनुल्लेखो बोध्यः। यत्तु अतिप्रसक्तधर्ममात्रेणोपस्थितेः अवच्छेदक
त्वाग्रहेपि बोध्य इति तन्न। व्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकाभाव इत्यादौ व्यभिचारादिति परंपरेति। द्वित्वपर्याप्त्यधि
करणघटपटसंयोगादिसंबंधेनेत्यर्थः। तादृशद्वित्वेति। घटपटोभयवृत्तिद्वित्वेत्यर्थः। प्रतियोगितावच्छेदककोटिप्रविष्टतयैव

द्वित्वाधिकरणयोरुच्छेदत्वं आस्तामत आह द्वित्वादेरिति। प्रत्येकं दा विघटपटवृत्तित्वेन द्वित्वोपस्थितिः संभवतीत्यतः शब्देनापीति। अ
तएवाएकविशिष्टापरस्यानुपस्थिता वपि शब्दादिना तथाप्रत्ययादेव। दोषांतरमाह। विरुद्धयोरपीति। इदं च विरुद्धतानिरूपकसंबं
धेन दैशिष्ट्यस्याप्रसिद्धिसूचनाय। न त्र जलत्वविशिष्टपृथिवीत्वस्याप्रसिद्धेरिति भावः॥ तथात्वेपि। द्वित्वाभावप्रतियोगितावच्छेदक
त्वे। साध्येति। साध्येसौ न वह्निष्ठात्वेनाभावप्रतियोगित्वस्य साध्यवति साधन वन्निष्ठान्योन्याभावप्रतियोगित्वस्य चानपायादित्यर्थः। ननु ह्र
दाद्यभावप्रतियोगितायाः ह्रदादिनिष्ठायाएव द्वित्वेऽतिप्रसक्तमप्रतीतिबलाद वच्छेदकं न तु तत्प्रतियोगितावच्छेदकं वापि कस्यात इत्यत आ
हऽन्तरेणेति। एकेति। तेन घटत्वावच्छिन्नाभावविषयत्वनिरासः। पत्किंचिद्घटद्वयवतीत्यनेन न तद्घटत्वावच्छिन्नाभावविषयत्वनिरा
सः। रूपप्रकारत्वादिति। न तद्घटवति। न तद्घटान्यघटत्वावच्छिन्नाभावे न घटांतरवति न तदन्यघटव्यक्तसत्ताभावेनेत्येवं क्रमेणानाद्यप्र
तीतेरुपपादनेप्यनुगतरूपपादयितुं न शक्यमित्यर्थः। घटपटौ न स्त इत्यत्र तु घटत्वपटत्वान्यतरावच्छिन्नप्रतियोगिताकाभावत्व
मनुगतानतिप्रसक्तं विषय इत्यापाततो वक्तुं शक्यमत्र तु तदपि न संभवतीति कृत्वा इदमुक्तं वक्तव्यमत्र ... न्यतरत्वानुले
खेपीत्यादिना दूषणमुक्तमेवेति भावः। अत्रेदं बोध्यं। घटपटौ न स्त इत्यत्र द्वित्वसामान्यं न प्रतियोगितावच्छेदकं यत्किंचिद्घ

दे॰ त्व॰ श्रा॰ ३

२२

राम

टवति घटपटौ न स्त इति प्रत्ययात्। न द्वित्वविशेषः न तद्द्वित्वानामननुगमात्॥ न तद्द्वित्वेनानुपस्थितेश्च न घटपटवृत्तित्वद्वित्वत्वाद्वित्वस्य घटादिवृ
त्तित्वानुपस्थितावपि तथाप्रत्ययात्। न घटत्वपटत्वादि केवलं घटादिमत्यपि तथा प्रत्ययात्। किंतु द्वित्वं तद्धर्मितावच्छेदकीभूतं घटत्वं पटत्वं च तथा प्रतियो
गितावच्छेदकत्वं च व्यासज्यवृत्तिप्रतियोगितावच्छेदकावच्छिन्नं च घटपटोभयमिति न कोपि दोषः। घटौ न स्त इत्यत्र द्वित्वं पर्याप्तिसंबंधेन घटत्वं च तद्धर्मिता
वच्छेदकेनावच्छेदकं। धर्मितावच्छेदकत्वं चान्यूनवृत्तित्वेन। तेनैकघटवत्यपि पटमादाय द्वित्वबद्घटसत्वेपि घटौ न स्त इति प्रतीतेर्नानुपपत्तिरिति। एवम
न्यत्रापि यथानुभवमूह्यं। नन्वन्यतरस्य प्रतियोगित्वेपि प्रत्येकस्य प्रतियोगित्वाभावे कथं समाधानमत आह तदुभयत्वमेवेति। नन्ववच्छेदकाघटितलक्षणेन
दोषतादवस्थ्यमत आह। अश्रूयमाणेति। अश्रूयमाणोऽवच्छेदकत्वांशो यत्र लक्षणे तत्रेत्यर्थः। तथा च साधनेति। अत्र प्रतियोगितयोरेकसंबंधावच्छि
न्नत्वं विशेषणताविशेषावच्छिन्नत्वं वा वक्तव्यम्। तेन धूमवान्वह्नेरित्यादौ वह्निसमानाधिकरणाभावप्रतियोगितावच्छेदकायोगोलकभेदत्वादेर्विषयि
त्वादिसंबंधेनाऽवच्छिन्नधूमवन्निष्ठाभावप्रतियोगितावच्छेदकत्वेपि न क्षतिः। न च विषयितया योगोलकभेदत्ववत्ज्ञानस्याभावीयविशेषणतया
योऽभावस्तस्य धूमसमानाधिकरणत्वादेकसंबंधावच्छिन्नत्वस्य प्रतियोगितयोर्विशेषणे पि न निस्तार इति वाच्यं। तादृशज्ञानस्याभावीयविशेषणतास्व
पव्यधिकरणसंबंधावच्छिन्नाभावेऽयोगोलकभेदत्वस्य गुरुतया तद्घटकलघुयत्किंचित्पदार्थस्यैव विषयितया प्रतियोगितावच्छेदकत्वात्। गुरुधर्मस्याप्य

वच्छेदकत्वे प्रतियोगितावच्छेदकतापेक्षसंबंधेन विवक्षणीयेति ध्येयम्। यद्धर्मावच्छिन्नेति। यत्साध्यतावच्छेदकावच्छिन्ने त्यर्थः। तेन गुणकर्मान्यत्ववि
शिष्टसत्तावान् जातेरित्यादौ जातिसमानाधिकरणाभावप्रतियोगितावच्छेदकस्य द्रव्यत्वत्वादेः सत्तासमानाधिकरणाभावप्रतियोगितावच्छेदकत्वे
पि न क्षतिः। यथाश्रुते नुपपत्तिं दर्शयति। एतेनेति। यावत्त्वमवच्छेदकेन तदवच्छिन्नेऽभावे वा विशेषणं। तत्र क्रमेण दूषणमाह सर्वत्रेत्यादिना। अवच्छि
न्नस्येति। अप्रसिद्धिरित्यग्रिमेणान्वितं। अतिप्रसंजकादिति। वह्निसमानाधिकरणाभावप्रतियोगितावच्छेदकावच्छिन्नयावतः तत्प्रतियोगिकयावत्त्वाव
च्छिन्नाभावो धूमाधिकरणेपि इत्यतिव्याप्त्या यावत्त्वाद्यनवच्छिन्नप्रतियोगिताकत्वं विशेषणं देयं। तथा चाप्रसिद्धिः। यावत्त्वाद्यनवच्छिन्नप्रतियोगिता
कस्य यावतामभावस्याप्रसिद्धेरित्यर्थः। आदिना तादृशयावद्गगनोन्यत्वादिपरिग्रहः। तथा अप्रसिद्धिः। द्रव्यं पृथिवीत्वादित्यादौ तादृशानां घट
त्वपटत्वाद्यभावानामेकाधिकरणाप्रसिद्धिरिति भावः। एतद्रूपवान् द्रव्यादित्यादावभावस्य भावभिन्नत्वविवक्षणे वक्ष्यमाणदिशा प्रसिद्धिसंभवा
दुक्तं प्रायश इति। यावतां तादृशाभावानां प्रत्येकनिरूपितसामानाधिकरण्यविवक्षणे प्रसिद्धिर्नास्त्येवेत्यत आह रूपादीनि। क्वापीति। घटरूपेण
तादृशयावन्मध्यनिविष्टघटत्वाभावस्य पटरूपे च पटत्वाभावस्य सामानाधिकरण्याभावादित्यर्थः। वह्निमान् धूमादित्यत्र तत्तद्धूमवत्तो व्याप्तिरित्यु
क्तो प्रतीकारसंभवात् तत्रोक्तम्। ननु साधनसमानाधिकरणाभावप्रतियोगिनो यावन्तो यद्धर्मावच्छिन्नसमानाधिकरणाभावप्रतियोगिन इत्येवो
च्यतां कृतमवच्छेदकगर्भतया। धूमवान् वह्नेरित्यादौ च तादृशार्द्रेन्धनादीनां चालनीयन्यायेन धूमवन्निष्ठाभावप्रतियोगित्वेपि ऽयोगोलक

राम

२३

धूमवत्त्वाभावादत आह सर्वत्रेति। एकव्यक्तिकस्य व्यभिचारनिरूपकाधिकरणान्यत्वादेः। धर्मान्तरेति। तत्तदधिकरणवृत्तित्वपूर्वक्षणवृत्तित्वादिनेत्यर्थः
विशिष्टस्यातिरिक्तत्वेत्याह। आदीति। आदिना द्वित्वादेः परिग्रहः। मूलाक्षरानुसारेणाह। साधनेत्यादि। इत्थं च मूले तत्प्रतियोगिकात्यन्ताभावसमानाधिक
रणमित्यत्र तत्प्रतियोगिकात्यन्ताभावः समानाधिकरणो यस्य साध्यस्येति बहुव्रीहिर्बोध्यः। रूपवान् पृथिवीत्वादित्यत्र यावत्तादृशाभावेषु रूपत्वावच्छिन्न
सामानाधिकरण्यं वर्त्तत एवेति नाव्याप्तिरिति भावः। तेनेत्यादि। वह्निमान् धूमात् पृथिवीगन्धादित्यादावुत्पत्तिकाले रूपसामान्याभावस्य हेत्वधिकरणे सत्त्वा
त्प्रतियोगिव्यधिकरणहेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वं न संभवतीति तत्रोक्तम्। समवेतसामान्याभावस्याभावः सत्त्वेव। रूपवदन्यासम
वेतत्वावच्छिन्नाभावस्याभावं रूपवन्मात्रसमवेतजात्यादिकमादाय व्याप्त्यभिधाने तु प्रयासगौरवमिति तत्रोक्तम्। भावभिन्नत्वविवक्षणेपि रूपध्वंसप्रा
गभावयोः रूपसामान्याभावाभावात्मकतया स एव दोष इत्यत उक्तं तेनेति। न च तथापि वह्निमत्त्वसमानाधिकरणाभावप्रतियोगितावच्छेदकं जलत्वान्य
त्वविशिष्टसत्तात्यन्ताभावतेजोन्यत्वविशिष्टसत्तात्यन्ताभावान्यतरत्वावच्छिन्नाभावत्वं। तदवच्छिन्नाभावस्य तेजोन्यत्वविशिष्टसत्तात्यन्ताभावस्य ज
लत्वसामानाधिकरण्याभावादव्याप्तिरिति वाच्यम्। जलत्वतेजोन्यतरान्यत्वविशिष्टसत्ताया एव तादृशान्यतरत्वावच्छिन्नाभावतया जलत्वतेजोन्यतरान्यत्व
विशिष्टसत्ताभावस्यैव तदवच्छिन्नाभावत्वात्। तस्य च जलत्वसामानाधिकरण्यसत्त्वेनाव्याप्तेरनवकाशात्। तादृशान्यतरत्वावच्छिन्नाभावस्याभावरूप

त्वेपि तदवच्छिन्नाभावत्वस्यैकस्मिन्नेवोक्तविशिष्टाभावे कस्यपि। तु मुचितत्वात्। अत्र च प्रथमाभावे भावभिन्नत्वविवक्षणेपि स्नेहसमानाधिकरणात्यंताभावप्र
तियोगितावच्छेदकं रूपध्वंसत्वं तद्रूपध्वंसत्वं वा। तदवच्छिन्नप्रतियोगिताकाभावस्य तद्रूपात्मकस्य पृथिवीरूपादेर्जलत्वसमानाधिकरणत्वाभावात्तथैवाव्या
प्तिरतो द्वितीयाभावे भावभिन्नत्वावश्यकत्वे प्रथमाभावेतरन्नोपादेयं। स्नेहसमानाधिकरपटात्यंताभावात्मकभेदप्रतियोगितावच्छेदकघटात्यंताभावत्वावच्छि
प्रतियोगिताकभेदात्मकजलत्वात्यंताभावस्य यावत्तन्मध्यनिविष्टस्य जलत्वासमानाधिकरणतया तथैव दोष इत्यतः साधनसमानाधिकरणात्यंताभावत्वनि
रूपकप्रतियोगितावच्छेदकत्वलाभाय परं प्रथमात्यंताभावपदं। न च नित्यज्ञानवान्नित्यत्वावत्वादित्यत्र साधनसमानाधिकरणसमवायावच्छिन्नघटात्यं
ताभावप्रतियोगितावच्छेदकं घटत्वं विषयितया तदवच्छिन्नस्य ज्ञानादेः समवायेनाभावस्य नित्यज्ञानासमानाधिकरणत्वादव्याप्तिरिति वाच्यम्। प्रतियो
गितावच्छेदकतयोरेकसंबंधावच्छिन्नत्वस्य विवक्षणीयत्वात्। तथा च साधनसमानाधिकरणाभावीययत्संबंधावच्छिन्नाभावप्रतियोगिताया येन संबंधे
न यदवच्छेदकं तेन संबंधेन तदवच्छिन्नत्वेन संबंधेन तदवच्छिन्नतत्संबंधावच्छिन्नप्रतियोगिताका यावंतोत्यंताभावा यद्धर्मावच्छिन्नसमानाधिकरणास्तद्ध
र्मावच्छिन्नसामानाधिकरण्यमिति तु निष्कर्षः। केचित्तु अभावश्चात्र भावभिन्न इति। भावेन प्रतियोगिनाभिन्नो ग्राह्य इत्यर्थः। तथा च साधनसमानाधि
करणाभावीयभाववृत्तिप्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिताका यावंतो भावा इति वाच्यम्। उक्तान्यतरत्वावच्छिन्नाभावश्चेत्तर्हि भावप्रतियोगि
कोत्यंताभावादेकएवाभावः। स च जलत्वसमानाधिकरणएवेति नाव्याप्तिः। अभावश्चेदभाववृत्तिप्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिताकत्वेनैव तदभेव
निरास इत्याहुः। नन्वभावप्रतियोगिको भाववृत्तिप्रतियोगिको वाऽभावाधिकरणकोऽभाव आचार्यमतेऽधिकरणात्मकएव। तथा च घटध्वंसत्वोध्वंसत्वादितो

राम

भा भाव
दाव्याप्तिः। तत्र पटध्वंसे घटध्वंसत्वं नास्ति प्रतीतिविषयस्य घटध्वंसत्वाभावात्मकपटध्वंसस्य घटध्वंसत्वाधिकरणस्यात्यंताभावत्वादेव वारणात्
पटात्यंताभावस्य घटध्वंसत्वाभावात्मकस्य घटध्वंसत्वसमानाधिकरणत्वात्। न चाभाववृत्तेर्घटध्वंसत्वाभावस्याधिकरणात्मकत्वेपि भाववृत्तेर्घटध्वंस
त्वाभावस्यातिरिक्तत्वात्। तस्य च घटध्वंसत्वासमानाधिकरणत्वान्नातिव्याप्तिरिति वाच्यम्। घटध्वंसत्वाभावत्वेन रूपेण घटात्यंताभावेन भावेपि नाद्यप्र
तीत्युपपत्तौ तत्रापि तस्यानतिरिक्तत्वात्। एवं घटध्वंसभूतलान्यतरवृत्तित्वावच्छिन्नाभावो यः भाववृत्तिप्रतियोगिकतयाऽभावाधिकरणतयाधिकर
णात्मकएवेति तमादायापि नातिव्याप्तिवारणमत आह घटध्वंस इति। प्रमाविषयतीयविशेषणताविशेषेणाभावस्य विवक्षणे घटध्वंसत्वाभावमा
दाय नातिव्याप्तिवारणमत आह तत्प्रकारकेति। भावाभाववृत्तिरित्युपलक्षणम्। घटध्वंसभिन्नध्वंसत्वादिसाधावभावमात्रवृत्तिरपि घटध्वंसभिन्न
त्वप्रकारकप्रमाविषयत्वाभावोतिरिक्तः स्वीकार्यः। एतदस्वरसादेव वा वदंतीति। केचित्तु जलत्वान्यत्वविशिष्टसत्वात्यंताभावादिना पूर्वोक्तदोषस्योद्धारा
य स्वसमानाधिकरणात्यंताभावप्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिताकाभावत्वव्यापकसाध्यतावच्छेदकावच्छिन्नसाध्यसमानाधिकर
णवृत्तित्वकत्वं समुदितलक्षणार्थः। ननु घटध्वंसो ध्वंसत्वादित्यत्र ध्वंसत्वसमानाधिकरणात्यंताभावप्रतियोगितावच्छेदकं घटध्वंसत्वं तदवच्छि
न्नप्रतियोगिताकाभावत्वं परं परासंबंधेन घटत्वमनुगतं घटध्वंसत्वसमानाधिकरणघटध्वंसत्वाभावात्मकपटात्यंताभावादि निष्ठम्। एवं घटध्वं
सत्वप्रकारकप्रमाविषयत्वाभावत्वमपि अभावाधिकरणकाभाववृत्तितया नाधिकाभाववृत्तित्वस्य घटध्वंसत्वसमानाधिकरणपटाभाववृत्तित्वाद्वि

कृत्स्नरूपसत्त्वेनातिप्रसंग इति व्याचक्षुः॥ ॥ ननुछम्।अभावे भावभिन्नत्वविवक्षणे वैयर्थ्यात्।षष्ठीतत्पुरुषपक्षे धूमव्यभिचारिवह्निद्रव्यत्वादिव्यभिचा।
रित्वस्य गगनादावभावादसंगतिरतो बहुव्रीहिं व्याचष्टे स्वमित्यादिना।यावत्त्वस्य चरमव्यभिचारिविशेषणत्वे एकव्यक्तिसाध्यके वह्निमान्धूमादित्यादौ च
यावत्साध्याधिकरणाप्रसिद्ध्याव्याप्तिरिति व्याप्तिश्वसत्त्वघटत्वोभयवान्महत्त्वादित्यादौ।अतस्तेषां यावत्तामिति।एवं च स्वव्यभिचारिपदेन सह यावत्पदस्य
कर्मधारयोऽनंतरं षष्ठीतत्पुरुष इति भावः।यत्पदस्य साधनपरत्वेति व्याप्तिरतो व्याचष्टे साध्यत्वेति।तु प्रसप्तमीकस्येति।तथा च तादृशाभावैः सामाना
धिकरण्यमिति विग्रहः।तेन केवलान्वयितादृशाभावस्याकाशाभावाभावस्याकाशादेः सामानाधिकरण्याप्रसिद्धावपि न क्षतिः।द्वितीयासंताभावस्य।
द्वितीयासंताभावपदस्य।विशेषणे विशेषणपदं।तेनार्थस्य तु प्रसप्तमीकत्वाभावान्नाभेदान्वयानुपपत्तिः।प्रथमासंताभावविशेषणत्वे यावदसं
ताभावप्रतियोगिनोऽप्रसिद्ध्याऽसंभवः स्यादिति।यावत्त्वस्य व्यापकत्वादन्यस्य दुर्वचत्वादाह तथा चेति।धूमवान्वह्नेरित्यादौ व्यत्वाद्यभावेन वह्न्यादिसा
मानाधिकरण्यसामान्याभावसत्त्वादतिव्याप्तिरतो व्यापकत्वपर्यन्तम्।तत्रैव रासभनिष्ठवह्निसामानाधिकरण्यव्यक्तेरभावस्य निरुक्ताभावत्वव्या
पकत्वादतिव्याप्तिरतः सामान्येति।न च द्रव्यगुणादिसत्त्वसाध्यव्यापकतावच्छेदकं यद् द्रव्यान्यत्वविशिष्टसत्ताभाववत्त्वं तदवच्छिन्नप्रतियोगि
ताकेसत्तारूपाभावे गुणसामानाधिकरण्याभावसत्त्वादव्याप्तिरिति वाच्यम्।तादृशाभावत्वस्य व्यापकहेत्वधिकरणाधेयतावच्छेदकत्वा
भावकत्वस्य विवक्षितत्वात्।वस्तुतस्तत्त्वभावे प्रतियोगिवैयधिकरण्यस्यानुपादेयत्वाद् द्रव्यान्यत्वविशिष्टसत्ताभाववत्त्वं द्रव्यवृत्तिसत्तारूपाभा राम

२५

वप्रतियोगितावच्छेदकतया न द्रव्यत्वस्य व्यापकतावच्छेदकत्वमिति ध्येयम्।अत्र च साध्यव्यापकताऽभावीयविशेषणताविशेषेणायाग्रह्या।संबंधभेदेन व्यापक
त्वनिवेशो तादृशाभावत्वस्यापि नानात्वादसंगत्यापत्तेः।ननु प्रमाविषयत्वीयस्वरूपसंबंधेन।तथा सति केवलान्वयिनि तादृशाभावाप्रसिद्धिः स्यादिति भावः।त
थाविधः केवलान्वयिनि साध्यव्यापकतावच्छेदकीभूताकाशाभावत्वावच्छिन्नप्रतियोगिताकः।आकाशाभावस्य स्वमतेऽभावासंभवात्संप्रदायविद इति ता
दृशेति।साध्यव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकायावंतोऽभावाः प्रत्येकं तच्छून्यत्वं यदधिकरणताया व्यापकं तत्त्वमित्यर्थः।यावत्त्वावच्छिन्नशून्य
त्वविवक्षणे धूमवान्वह्नेरित्यादावतिव्याप्तिः स्यात्ताभावघटिततादृशयावदभावशून्यत्वस्य वह्न्यधिकरणाव्यापकत्वादिति भावः।यथासंनिवेशे वैयर्थ्या
भावादाह।अनतीति।तादृशानां तादृशाभावप्रतियोगिनामनवच्छेदकवतामप्रसिद्धेरिति।तथा चासंभवः।अप्रतियोग्येव।साध्यवन्निष्ठाभावाप्रतियोग्येव।इंधना
दीनां तु तादृशाभावप्रतियोगित्वात्तन्निरासः।इत्थं च तादृशाभावाप्रतियोगिसत्ताद्येव।तदधिकरणताया धूमाधिकरणे नाव्यापकत्वान्नासंभवः।धूमवान्व
ह्नेरित्यादावयोगोलकनिष्ठस्यापि तादृशाभावाप्रतियोगित्वान्न तदधिकरणताया अवह्न्यधिकरणत्वाव्यापकत्वान्नातिव्याप्तिरिति भावः।रूपांतरेण।द्रव्यत्वत
दधिकरणवृत्तित्वविशिष्टत्वादिना।तथा च तादृशाभावाप्रतियोग्यप्रसिद्ध्या लक्षणासंभव इति भावः।अत्र केचित् केवलान्वयिन्याकाशादिरेव तादृशोऽभा
व इति ध्येयम्।अत्र तादृशप्रतियोगितानवच्छेदकधर्मस्य व्यापकतावच्छेदकं तत्त्वमित्यत एव सामंजस्ये ऽभावद्वयोपादानमनतिप्रयोजनमनतिप्रयोजनमित्य
स्वरसः केचिदाकुरित्यनेन सूचितः।लक्षणद्वयस्यैकेन रूपेण परिहारायाह।अवच्छिन्नमित्यादिना।इत्थं च सामानाधिकरण्यावच्छेदकधूमत्वादेर्व्याप्तित्वं च।संयो
गसमवायभेदेनाह।प्रमत्वद्रव्यत्वादेरिति।नियतपूर्ववृत्तित्वस्य कारणस्य दंडादावभावान्नियतपूर्ववृत्तितावच्छेदकदंडत्वमेव कारणत्वमिति भावः।ननु द

ष्टां तु स्थले घात्माश्रयदोषात्कथमवच्छेदकत्वमतस्तत्रयं समाधानमाह। उपहितेति। सामानाधिकरण्यावच्छेदकत्वोपहितधूमत्वमवच्छेद्यशुद्धधूमत्वमवच्छे
दकत्वमिति भावः। सामानाधिकरण्ये स्यादि। अधिकरणतयोः प्रवेशो तादात्म्येन व्याप्तसंग्रहः इतरस्तो जनकत्वादीति। आदिनाप्रतियोगित्वादिसंग्रहः। तथा च
संबंधिसंबंधित्वं निवेश्यं न त्वधिकरणत्वमपीति भावः। अत्र चेति। गुणवद्गुणकर्मान्यत्वे सति सत्त्वादित्यादाविति भावः। विशिष्टसत्तात्वावच्छिन्नं य
द्गुणसामानाधिकरण्यं तदधिकरणीभूतसत्तायाः कर्मादावपि सत्त्वादिति भावः। साध्येति। तथा च गुणसामानाधिकरण्यविशिष्टसत्ताधिकरणत्वं
न कर्मादाविति नोक्तदोष इति भावः। प्रागसंभवीति। पर्वतो वह्निमान्नवेति संशयदशायां वह्निसामानाधिकरण्यविशिष्टद्रव्यत्ववान्पर्वत इत्यनिर्ण
यात्तत्र सुतो चित्त्वाविर्जितस्य वह्निसामानाधिकरण्यविशिष्टद्रव्यत्ववान्नवेति संशयस्यैव संभवात्। तद्धर्मिणि तद्धर्मसामानाधिकरण्यविशिष्टधर्मा
न्तरस्य प्रसक्तनिर्णये तद्धर्मिणि तद्धर्मनिश्चयसामर्थ्यात्तन्निश्चयस्य तद्धर्माभावग्रहाभावग्रहाभावस्य तद्धर्माभावग्राहकसामग्र्यभावस्य वा हेतु
त्वमनन्यगतिकतया कल्पनीयमित्याशयः। अपमिति। अयमालोको धूमो वेति संशयदशायां वह्निसामानाधिकरण्यावच्छेदधूमत्ववद्वान्पर्वत
इत्यनिर्णयादिति भावः। हृदयमिति। अवच्छेदकत्वं न स्वरूपसंबंधविशेषो ग्रहदृष्यमाणत्वात्। किंतु स्वविशिष्टाधिकरणवृत्तियावत्साध्यासमा
नाधिकरणकत्वादिरूपं। तच्च स्वस्वस्यैकस्याभावाद्विशिष्टधूमत्वादेरनिर्णये दुर्ग्रहमिति भावः। आयेदोषमाह मेयत्वादेरिति। उक्तं यत्तन्माह।
धूमत्वादाविति। तदभावेति। साध्यसामानाधिकरण्याभाववद्वृत्तित्वमित्यर्थः। कर्मादीति। सत्तायां कर्मणि गुणसामानाधिकरण्यं नास्तीति प्र
तीतिबलादिति भावः। न तथात्वम्। न तदभाववद्वृत्तित्वम्। विशिष्टसत्तात्वे। गुणकर्मान्यत्वविशिष्टसत्तात्वे स्यापि तादृशगुणसामानाधिक

राम

२८

रण्याभाववत्सत्तायां वृत्तेरिति भावः। विशिष्टस्यातिरिक्तत्वमते पि दूषणमाह प्रागिति। धूमावयवावच्छेदेन वह्निसामानाधिकरण्याभाववत्त्वाद्धूमे
धूमत्वस्याव्याप्तिरिति भावः। अतिरिक्त इति। साध्यसामानाधिकरण्याभाववति अतिरिक्तत्वावच्छेदेन तादृशावृत्तित्वाभावो बोध्यः। तेन धूमवान्वह्नेरि
त्यादौ कस्यचिदतिरिक्तस्य जलत्वादेर्वह्न्यधिकरणवृत्तित्वाभावे पि न क्षतिः॥ सार्वभौममते सत्तायामपि गुणसामानाधिकरण्याभावसत्त्वात्तस्या द्रव्य
त्वाधिकरणवृत्तित्वाद्गुणवद्द्रव्यत्वादित्यादावव्याप्तिः। वार्ष्णेविशिष्टे कार्यरूपत्वाभावाद्व्याप्तिप्रकारकपक्षधर्मताज्ञानात्मकस्य विशिष्टपरामर्शस्याप्य
नुपपत्तिरत आह साध्यासमानाधिकरणेति। साध्यासमानाधिकरणे न वर्त्तते स्वविशिष्टाधिकरणवृत्तित्वसामान्यं यस्य स्वस्य तत्त्वम्। स्वं अवच्छेदक
त्वेनाभिमतं धूमत्वादि। साध्यसमानाधिकरणनिष्ठत्वादौ धूमत्वविशिष्टाधिकरणवृत्तित्वसामान्यस्यावृत्तित्वाद्धूमस्यावच्छेदकत्वमुपपन्नं। धूमवान्वह्ने
रित्यादौ तु धूमसमानाधिकरणे योगोलकत्वादौ वह्नित्वविशिष्टाधिकरणवृत्तित्वसामान्यसत्त्वान्नातिप्रसंगः। तत्रापि द्रव्यत्वादिनिष्ठस्य वृत्तित्वविशेष
स्यायोगोलकत्वावृत्तेर्वह्नित्वादावतिप्रसंग इत्यत आह सामान्येति। ननु संयोगेन वह्न्यसमानाधिकरणे ह्रदरूपादौ धूमाधिकरणवृत्तित्वस्य संयोगरूपस्य
कालिकादिसंबंधेन सत्त्वात्तद्वृत्तित्वानां तत्तत्संबंधेन समवायादिना वृत्तित्वं वाच्यम्। तथा च संयोगेन वह्न्यसमानाधिकरणे जात्यादौ समवेतत्वस्याप्रसि
द्धत्वात्तद्वृत्तित्वस्य तादृशजात्यवृत्तित्वाभावादसंभव इत्यत आह। स्वविशिष्टेति। स्वं अवच्छेदकत्वेनाभिमतं धूमत्वादि। धूमवान्वह्नेरित्यादौ च वह्नित्वादाव
तिव्याप्तिवारणाय यदिति। यावदिति। गुणवत्सत्त्वादित्यत्रातिव्याप्तिनिरस्यति। सत्तात्वविशिष्टेति। विशिष्टे सत्यफलमाह। कर्माद्यन्यत्वेति। एवं च। उ

कोऽवच्छेदकत्वनिर्वचनेच। मेयत्वादेरपीति। इदंवाच्यमेयत्वादित्यादौमेयत्वस्यवाच्यत्वसामानाधिकरण्याभावनिगगनादौसत्त्वेपिवाच्यत्वसामानाधिकर
ण्यस्यगगनेक्षिदेःसर्वस्यमेयत्वविशिष्टमेयाधिकरणवृत्तित्वादवच्छेदकत्वमुपपन्नमित्यर्थः॥ ॥मैथिलमतेदूषयति। यद्यपीति। वृत्तिमत्प्रमेयत्वमित्यत्र
प्रमेयत्वस्यवैयर्थ्याद्वृत्तिमत्त्वमेवात्रनिष्कृष्यदर्शितमप्रमेयत्वादिनेतितिनमेयादितिप्रयोगोपपत्तिः। अतिप्रसंगादिति। द्रव्यत्वादिनापिधूमादिनि
४ प्रसंग। ष्ठवह्न्यादिव्याप्तिग्रहसंभवात्। संबंधसामान्येनयद्धर्माधिकरणेतदवृत्तावाकाशादौहेतुतावच्छेदकसंबंधेनहेत्वधिकरणवृत्तित्वाभावसत्त्वात्समवाये
नवह्नेःसाध्यत्वेधूमादावतिव्याप्तिरतःसाध्यतावच्छेदकसंबंधेनेति। ध्वंसत्त्वादिसत्त्वसाध्यतावच्छेदकसंबंधेनसाध्यवतिकालेसंबंधसामान्येनहे
त्वाकाशादौहेत्वधिकरणवृत्तित्वाभावसत्त्वादतिव्याप्तिरतोयेनयेनेति। वह्निमान्धूमादित्यत्रवह्निसमानाधिकरणधूमावयवरूपादौसमवायेन
धूमाधिकरणवृत्तित्वादव्याप्तिराह हेतुतावच्छेदकसंबंधेनेति। वस्तुतस्तुपक्षत्वनत्वयोरननुगमाद्वह्न्यसहृरूपकत्वाद्विशेषणताविशेषेणवावृत्तित्वंबो
ध्यम्। एवंचसाध्यतावच्छेदकसंबंधेनसाध्यवतिविशेषणताविशेषेणयद्वृत्तियद्धेतुतावच्छेदकसंबंधेनहेत्वधिकरणेपितेनसंबंधेनावृत्तीत्येव
वक्तव्यमिति। वारणीयत्वेत्विति। वस्तुतस्तत्रव्याप्तिसत्त्वात्तद्वारणेपिनक्षतिः। प्रयोकृप्राधिकेनैवनिग्रहइतिभावः। तादृशेति॥ तेनद्रव्यंविशिष्टसत्ता
दित्यत्रस्वसमानाधिकरणसत्ताघटितत्वेपिविशिष्टसत्तात्वस्यनक्षतिः। नीलधूमत्वेतुधूमत्वमेवतादृशोधर्मोघटकइतिनातिप्रसंगः। स्वस्यापिस्व
घटितत्वादंतरेति। धूमेति। धूमत्वस्यधूमप्रागभावत्वसमानाधिकरणत्वाद्विशिष्टाभावस्याप्रसिद्धिरूपत्वदइतिभावः। ननुतद्वृत्तित्वंतद्विषयकप्रतीत्यविष
यत्वंतदभावस्तदघटितत्वं। तथाचनअप्रसिद्ध्यगगनेत्वाभासंतरेणेविरोधइत्यतआह। तद्विषयकेति। इत्थंचस्वाविषयकप्रतीतिविषयस्वसमानाधिकरण

तादृशधर्मविषयकप्रतीतिविषयत्वपर्यवसितार्थः। तेनधूमत्वस्यनीलधूमत्वभिन्नत्वाभावेपिनक्षतिः। मिश्रमतमाहस्वरूपसंबंधविशेषएवेति। अन्यथानतिप्रसक्तत्वस्या
वच्छेदकत्वपदार्थत्वे। ननुगुणवत्सत्त्वादित्यत्रसत्तात्वस्यगुणसामानाधिकरण्यानतिरिक्तवृत्तित्वाद्घटस्वरूपसंबंधरूपावच्छेदकत्वंस्यादतआहविरुद्धयो
रिति। विरुद्धयोरपिगोत्वाश्वत्वयोरधिकरणेप्रमेयत्वादेर्वृत्तौभावच्छेदकभेदापत्तेरत्यन्ताऽऽकभावाभावयोरिति। एकस्याएकरूपावच्छिन्नस्या। धूमवान्वह्नेरित्यादौवह्नि
र्नाभावेपिनक्षतिः॥ नत्र। विरुद्धानावाधिकरणेएकस्मिन्नसंबंधेनवृत्तौ। अवच्छेदकभेदस्यावश्यकत्वेप्राचांसंमतिमाह। उपाधीति। साध्यसामानाधिकरण्येपउ
पाधिरवच्छेदकः। साध्याभावसामानाधिकरण्येचोपाध्यभावोऽवच्छेदकइत्यर्थः। ननुसत्तात्वस्यगुणसमानाधिकरणमात्रावच्छेदकत्वेयुक्तविरोधपरिहारोनवस्ये
वतथाचातिव्याप्तिरेवेत्यतआह। सत्तात्वंत्विति। विनिगमनाविरहादुभयावच्छेदकत्वेविरोधान्नैकस्यावच्छेदकत्वमितिभावः। विरुद्धयोरित्यस्यफलमाह। अव्याप्य
वृत्तेरित्यादिना। संयोगतदभावयोरेकावच्छेदेनविरोधोवर्त्ततएव। परंतुप्रकृतेतादृशविरोधोनविवक्षितः। एकधर्मिणिवृत्तित्वंययोर्विरुद्धत्वेतयोस्तादृशविरोध
एवविवक्षितइतिदर्शयितुंसंबंधभेदेनाविरोधंदर्शयति। संयोगेनवह्नेरिति। अविरुद्धत्वादिति। तथाचप्रतियोगितावच्छेदकसंबंधेनप्रतियोगितावच्छेदका
वच्छिन्नानधिकरणवृत्तित्वविशिष्टस्याभावस्यप्रतियोगितावच्छेदकसंबंधेनप्रतियोगितावच्छेदकावच्छिन्नस्यचाधिकरणेएकस्यएकेनसंबंधेनवृत्तिर्विरुद्धेत्यर्थः। तेनक
पिसंयोगीसत्त्वादित्यादावप्यवच्छेदकभेदापत्तिरितिदृष्टव्यम्। एकेनसंबंधेनेत्यस्यफलमाह वह्निमतीति। तद्रूपत्वंधूमत्वेति। कपिसंयोग्येतद्वृक्षात्वाद्वह्निमान्धूमा
दित्यादावितिशेषः। नसामानाधिकरण्यावच्छेदकत्वविरोधः। नसामानाधिकरण्यावच्छेदकत्वाभावसंभवइत्यर्थः। नन्वनुमितिविरोधिव्यभिचारज्ञानाविरोधित
योनितव्याप्तिज्ञानमनुमितिहेतुरित्यतआहव्यभिचारेतितद्धर्मविशिष्टस्येति। साध्यतदभावयोरिवतदुभयसामानाधिकरण्ययोरप्येकावच्छेदेनस्वरूपतोविरोधस्या
कृत्वादितिभावः। ननुशाखाविशिष्टवृक्षेकपिसंयोगाभावग्रहेपिशाखावच्छेदेनवृक्षेकपिसंयोगवत्ताज्ञानवतवह्नित्वविशिष्टधूमानधिकरणवृत्तित्वग्रहेपिवह्नित्वावच्छे

१८५ वह्नित्वादेन धूमाधिकरणावृत्तित्वग्रहो नानुपपन्नः। हेतुतावच्छेदकावच्छेदेन साध्यानधिकरणवृत्तित्वं तु न व्यभिचार इत्यत आह। अस्तु वेति। परंपरयेति। एतादृशाव्य
भिचारो न्यायकनयेत्यर्थः। एतादृशव्यभिचारानुन्नयनदशायां व्यभिचारांतरधीकालेप्यनुमितिरेतन्मते इष्टैवेति भावः। व्यर्थविशेषणस्थले व्याप्यत्वासिद्धिं दर्शय
ति। नीलधूमस्त्विति। तुल्ययुक्त्या व्याप्यत्वस्याप्याह। एवं चेति। स्वरूपसंबंधविशेषस्यावच्छेदकत्वात्मकत्वे इत्यर्थः। तत्सहचरितम्। तत्समनियतम्। नन्वेवं गुरुरूपेण व्या
प्तिग्रहणासंभवात्तदवच्छिन्नहेतुकानुमिति न स्यान्नीलधूमादित्यादिप्रयोगे च प्रयोक्ता निगृहीतः स्यात्प्रकारांतरेण व्याप्त्यभिधाने नायं दोष इत्यत आह। तेनेचे
ति। प्रकारांतरेति। अत्यंताभावान्योन्याभावगर्भेत्यर्थः। तन्मतेपि नीलधूमत्वावच्छेदेन तद्ग्राह्यग्रहस्य नीलधूमादिति प्रयोक्तुर्निग्रहस्य चाविशिष्टत्वादिति भावः। केचि
त्तु। तेनेत्समनियतगुरुधर्मस्यावच्छेदकत्वाभावेनापि तन्नक्रमः प्रकारांतरव्याप्तिवादिनां न तत्रानुयोगो पि प्रकृतव्याप्तिवादिना समानः गुरुरूपस्य स्वरूपसंबंध
विशेषरूपावच्छेदकत्वास्वीकाराद् इति। एतद्व्याख्याने च तेन चेत्यस्य हेतुत्वसंगमनमिति व्याचक्षुः। शरीरगौरवकृतमनवच्छेदकत्वं गुत्याद्यव्यक्तिवादकृत सक्रमनम
वच्छेदकत्वं गुत्पादयति एवमिति। द्रव्यत्वादीत्यादिना कर्मद्रव्यत्वादिजातिपरिग्रहः। सत्तावारणाय सत्संतं। कर्मत्वादिवारणाय द्रव्यसमवेतेति। न चात्र रूपास
मवेतत्वादीनां नावतां विनिगमनाविरहेण हेतुप्रवेशे गौरवाद् रूपत्वादिकमेवावच्छेदकमुचितमिति वाच्यम्। विनिगमनाविरहेण रूपासमवेतत्वरसासमवेतत्वा
दीनामवच्छेदकत्वेन घटकत्वेन रूपादीनां च तु विशिनेर प्यवच्छेदकत्वेन संग्राहकगुणत्वस्यैव हेतुत्व प्रवेशेन गुणसमवेतत्वस्यैव हेतुत्वप्रवेशौचित्यात्। अनाप
एवाकाशापदस्य शब्दत्वाप्यावच्छेदकं शब्दत्वमेव न तु कत्वादीत्युक्तं गुणदीधितौ। यद्वा। वाकारो नास्यायां। सर्वसाधारणगुणत्वमेव पूर्वोक्तं सम्यक्। न त्वन्यत्। प्रवच्छेदक
त्वम्। एतन्मतं दूषयति। विरुद्धद्वयेति। तादृशव्याप्तौ मानाभावादिति भावः। कथमिति। व्याप्यावच्छेदकेन रूपेण हेतुप्रयोगस्य न्याय्यत्वात्। रूपत्वादेर्व्याप्यनव
च्छेदकत्वाद् द्रव्यं रूपादित्यादिप्रयोक्तुर्निग्रहः स्यादिति भावः। स्वार्थानुमानाभिप्रायेणाह। तथा परामर्शादिति। द्रव्यं गुणकर्मान्य। त्वविशिष्टसत्वादित्यादिसंग्रहाय

यद्धर्मविशिष्टेति हेत्वधिकरणतायामवच्छेदकत्वमव्याख्याये दोलम्बणं धूमस्य वह्निसंबंधित्वे धूमत्वमवच्छेदकमित्यादिग्रंथविरोधः प्रथमत एव निरस्यति। अयस्त्वि
त्यादिना। विरुद्धदिक्कालेति। अग्रावच्छिन्नकपिसंयोगे साध्ये मूलावच्छिन्नकपिसंयोगविशेषस्य विरुद्धदिगवच्छिन्नवृत्तिकस्य तद्वृक्षादौ साध्ये तद्घटध्वंसस्य विरु
द्धकालावच्छिन्नवृत्तिकस्य चाधिकरणतायां साध्याधिकरणतावच्छेदकत्वासंभवादित्यर्थः। विरुद्धदिक्कालवृत्तिकयोरप्यसंभवमाह। न्यूनेति। वह्निमान्धूमादि
त्यादौ तादृशस्य धूमस्य वह्न्यपेक्षया न्यूनदेशकालतस्याधिकरणतायां वह्न्यधिकरणतावच्छेदकत्वासंभवादित्यर्थः। तुल्यवृत्तीति। तद्रूपवान्तद्रसादि
त्यादौ परस्पराधिकरणतायाः परस्पराधिकरणतावच्छेदकत्वेऽन्योन्याश्रयान्नैकमप्यवच्छेदकमिति भावः। उत्पत्तिज्ञप्त्योरिवेतादृशान्योन्याश्रयेपि
वस्तुव्यवस्थाविरह इति ध्येयम्॥ साध्याधिकरणताशून्यावृत्तित्वरूपेऽनतिरिक्तवृत्तित्वे केवलान्वयिन्यव्याप्तिरतः स्वान्यूनवृत्तीति। स्वं प्रवच्छेदकत्वेना
भिमतं धूमाधिकरणत्वादि। अन्यूनवृत्तित्वं व्यापकत्वम्। तत्पदं साध्याधिकरणत्वपरम्। हेत्वधिकरणतानिष्ठावच्छेदकत्वघटनाय बहुव्रीह्यनुसरणम्।
तथा च यद्धर्मविशिष्टहेत्वधिकरणतास्वान्यूनवृत्तिसाध्याधिकरणताकेत्युक्तिनंग्या यद्धर्मविशिष्टहेत्वधिकरणताया व्यापिका साध्याधिकरणता स धर्मो
व्याप्तिरिति फलितोर्थः। तत्र चाधिकरणताद्वयप्रवेशे गौरवं प्रकाशयति। अत्र चेति। व्याप्तेर्विशिष्टकार्थतासंपादनाय व्यापकेति। अग्रइति। लाघवादन्यो
न्याभावगर्भैव व्याप्तिरित्याशय इत्यर्थः। ननूपाधेः साधनावृत्तितया कथं तन्निष्ठसाध्यसामानाधिकरण्यावच्छेदकत्वमत आह। विशेषणतामिति। नन्व
वच्छेदके विशेषणतापन्नस्यापि तस्यानवच्छेदकत्वं किंतु वह्नौ वार्द्रेन्धनप्रभववह्नित्वमवच्छेदकं। न तु सामानाधिकरण्यसंबंधेनार्द्रेन्धनप्रभवव
विशिष्टवह्नित्वं। तत्र चार्द्रेन्धनप्रभववह्नेर्विशेषणता। किंतु सामानाधिकरण्यघटकतया संबंधत्वमेवेत्यत आह। उपाध्यनुप्रवेशेनेति। तथा चो

मावनंदी

साध्यानुप्रविष्टधर्मेणावच्छिद्यत इत्यर्थः। तदनुप्रविष्टत्वं तद्विषयकप्रतीत्यविषयत्वं। अनुप्रवेशो वैतद्रूपेण दर्शयितुमाह। वह्न्याविति। प्रथमे संबंधतया द्वित
रयोस्तु विशेषणतयानुप्रवेशः। आर्द्रेन्धनत्वस्योपाधिघटकतया निवेशेपि विशेषणतया निवेशाभावे दर्शयितुं तस्य पृथगुक्तिः। नवेति। वाकारो न्यास्थापा
रासनत्वादेः आर्द्रेन्धनप्रभववह्निसामानाधिकरण्यस्य सामानाधिकरण्यसंबंधेन विशेषणत्वे वैयर्थ्याभावादिति। अन्यदेतदिति उपाध्यनुप्रवेशस्याव
ययापि सत्त्वादिति भावः। सोपाधौ नूपाधिनेवेति मुपाधिनेवेति नियममुखेन साधनतावच्छेदकस्यानवच्छेदकत्वप्रापकमिति यथाश्रुतग्रंथतात्पर्यं निरू
स्यति। अत्र चेत्यादिना। व्यभिचारित्वेन साध्यसामानाधिकरण्यं येनावच्छिद्यते न तदवश्यमुपाध्यनुप्रविष्टमुपाधिरिति वा नियमं दूषयति शीतत्वेनेति। इदं स्ने
हवत्स्पर्शादित्यत्र स्नेहसामानाधिकरण्यावच्छेदके शीतत्वं नोपाध्यनुप्रविष्टमिति व्यभिचारः। ननूपाधिनेति तृतीयायां विशेषणत्वं तथा च तद्वत्तासामाना
धिकरण्यसंबंधेन अवच्छेदके विशेषणतया येनावच्छिद्यते तदवश्यमुपाधिरिति नियमात् शीतत्वे व्यभिचारः। तस्यावच्छेदके विशेषणत्वेनावच्छेदकत्वा
दत आह। शीतान्यत्वेति। इदं निःस्नेहं स्पर्शादित्यत्र शीतान्यस्पर्शत्वमवच्छेदकं तच्च सामानाधिकरण्यसंबंधेन शीतान्यत्वविशिष्टस्पर्शत्वं तत्र शीतान्यत्वं
नाद्यमवच्छेदकमपि नोपाधिरिति व्यभिचार इत्यर्थः। उक्तधर्मयोरनुपाधित्वे यथाक्रमं हेतुद्वयं साध्यासमानाधिकरणत्वादि केवलं न शीतत्वेन विशेषणी
भूतशीतान्यत्वेनावच्छिद्यत इत्यन्वेतनान्वयः। ननु तृतीयावलादुपाधिना विशेषणतामापन्नेनैवावच्छिद्यत इति लब्धं तथा चोपाधेरवच्छेदकत्वमवच्छे
दकविशेषणतयैवेति पर्यवसितं मतं दूषयति। शीतान्यस्पर्शत्वेनेति। चकारस्त्वर्थे स्वत एवेन तु कस्यचिद्विशेषणं शीतान्यस्पर्शत्वस्य च पृथिवीस्पर्शज
आन्यतरत्वावच्छिन्नसाध्यव्यापकतया प्रवच्छेदकोपाधित्वं। यत्तु यत्रोपाधित्वं तत्रावच्छेदकप्रविष्टत्वमिति नियमे व्यभिचारोद्भावनं। शीतान्यस्पर्शत्वेनेति
तद्दलं। स्वतोवच्छेदकत्वेपि शीतान्यस्पर्शत्वविशिष्टत्वस्य तादिसाधारणस्यावच्छेदकत्वे शीतान्यस्पर्शत्वस्यानुप्रविष्टत्वेन व्यभिचाराप्रसंजनात्। यद्यपि प्रथम राम

२९

प्रनियमस्यैव प्रकृतोपयोगित्वं हितीयादिनियमानां तु साधनतावच्छेदकस्यावच्छेदकत्वेपि संभवान्नाशंकनीयत्वं तथापि प्रथमनियममात्रसंपादकतयाएवका
रेणाक्षिप्तेन द्वितीयस्यायावेतो नियमाः संभवंतीति तावत एव सांप्रदायिकरीतिमनुरुध्य दूषिता इति। शुद्धस्याकिं विशिष्टविशेषणविशिष्टस्य। साधनेति। साधनताव
च्छेदकातिरिक्तमवच्छेदकमावश्यकमित्यर्थः। तद्विशेषः साधनतावच्छेदकातिरिक्तस्य साध्यसंबंधितावच्छेदकविशेषः। अन्यथा सोपाधौ साध्यसंबंधितावच्छेदकस्यास
त्वेन तद्विशेषस्योपाधित्वाभिधानमसंगतं स्यादिति नवस्तु पुष्टं भवतेति भावः। ननूपाधेः साधनावृत्तितया कथं तन्निष्ठसाध्यसंबंधितावच्छेदकत्वमित्यत आह सामाना
धिकरण्येनेति। तथा च सामानाधिकरण्येनोपाधिरस्विसाधनवृत्तिरेवेति नानुपपत्तिरिति भावः। अनतिप्रसक्तत्वरूपावच्छेदकत्वोक्तौ प्रसक्तमुद्भूतरूपादि
संवंधे
सत्रमहत्त्वादेरुपाधित्वं न स्यादित्यत आह तत्त्वं चेति। अवच्छेदकत्वं चेत्यर्थः। अन्यूनवृत्तित्वं न्यूनवृत्तिभिन्नत्वं न्यूनवृत्तित्वं च तत्सामानाधिकरण्यसत्ताभाववद्वृत्तियोगित्वसा
तित्तत्समानाधिकरणेत्वं तत्र स्वविशेष्यदलस्यानतिप्रयोजनकत्वादाह व्यापकत्वमितीति। इत्थमपि द्रव्यसत्त्वादि साध्यघटत्वादावतिव्याप्तिरत आह तद्वाधिकरणं
तन्नौवेनेति। यदधिकरणं तन्नौवेन साधने साध्यस्य सामानाधिकरण्यं तदधिकरणं तन्नौवेनोपाधेरपीत्येवं क्रमेणेत्यर्थः। सत्तायाद्रव्यत्वस्य सामानाधिकरण्यं घटेपि
तत्र न घटत्वस्य सामानाधिकरण्यमिति नातिव्याप्तिरिति पर्यवसितार्थमाह तेनेति। विशिष्टयत्साधनतावच्छेदकावच्छिन्नसाधनं तद्व्यापकत्वव्यापक इत्यर्थः। अधिकरण
ताद्वयप्रवेशे गौरवादाह निरुक्तेति। साध्यविशिष्टेत्यर्थः। साध्यवैशिष्ट्यं न साध्यतावच्छेदकावच्छिन्नसाध्यविशिष्टत्वं तेन प्रत्यक्षगुणकर्मान्यत्वविशिष्टसत्तावान् जातिरित्य
त्र कर्मान्यत्वेनाव्याप्तिः। इत्थं च तादृशव्यापकत्वविवक्षणे च साधनतावच्छेदकावच्छिन्नत्वस्य फलमाह नवेति। निःस्नेहं स्पर्शादित्यत्र शीतस्पर्शान्यत्वस्य साधनव्या
पकतया सर्वमत एवानुपाधित्वरूपान्यत्वस्य तु साधनाव्यापकत्वेपि द्रव्यत्वाभावविशिष्टसत्त्वाभावेति स्पर्शादौ सत्त्वेन विरोधाभंजकतया एतन्मतेऽवोपाधित्वमित्युक्तमुपपन्नं। यद्यायथा
श्रुते विशेषणत्वं रहितुमिदं विशेषणत्वं हि यावत्तत्त्वं तत्राश्रयतया सामानाधिकरण्येन वा आद्ये शीतस्पर्शान्यत्वेति। शीतस्पर्शान्यत्वस्याश्रयतया स्पर्शान्तरव्यावर्त
कत्वात्। अत एव मिश्रव्याख्यानमपि दूषितं शीतस्पर्शान्यत्वविशिष्टस्पर्शत्वरूपे विशिष्टे संबंधितावच्छेदके विशेष्यं साधनतावच्छेदकांशमपहाय विशेषणांशः स्पर्शी

MEMORIAL

शीतस्पर्शान्यत्वस्योपाधित्वप्रसंगात्· द्वितीये रूपान्यत्वेति· रूपान्यत्वविशिष्टसत्तायाः स्पर्शवृत्तित्वविशिष्टसत्तातो व्यावृत्तत्वादित्यभिप्रायकमिदं मुक्तावल्या श्रुतविशेषणत्व
व्यापितत्रसत्त्वादाह· तत्रेति शीतस्पर्शान्यत्वस्याश्रयतया साध्याभावविशिष्टसाधनव्यावर्त्तकत्वस्य सत्त्वात्तत्रातिव्याप्तिवारणाय सामानाधिकरण्येनेति तेन संबं
धेन तद्व्यावर्त्तकं हि तेन संबंधेन तद्वृत्त्येव भवतीति साध्याभावविशिष्टसामानाधिकरण्यं च तथा च तावन्मात्रेणैव सामंजस्ये व्यावर्त्तकत्वं व्यर्थं व्याप्तिक
चेत्याशयेनाह साध्याभावविशिष्टेति· साध्याभावविशिष्टनिरूपितसाधनव्यापकीभूताभावप्रतियोगितावच्छेदकत्वं साध्यविशिष्टनिरूपितसाधनसमानाधिकरण
भावप्रतियोगितावच्छेदकधर्मविशेषणमिति वर्त्तुलार्थः। तेन जातिमान्मेयत्वादित्यादौ साध्याभावविशिष्टसाधनवति जात्यादौ उपाधितायटकसंबंधसमवायेन वृ
त्तित्वाप्रसिद्ध्यासत्तादावुपाधौ नाव्याप्तिः· तादृशप्रतियोगित्वं चोपाधितायटकसंबंधावच्छिन्नं ग्राह्यं तेन धूमवान्वह्नेरित्यादौ संयोगेन धूमव्यापकस्य वह्न्यादेः साधन
वत्सर्वविपक्षनिष्ठसमवायसंबंधावच्छिन्नाभावप्रतियोगित्वेपि नाव्याप्तिः। यथाश्रुतत्यागबीजमाह एवंचेति· सत्ताया अभेदेपीति·। द्रव्यत्वाभावविशिष्टसत्तातो द्र
व्यत्वविशिष्टसत्ताया अभेदेन व्यावर्त्तकत्वासंभवादिति भावः। साधनतावच्छेदकविशिष्टार्थकस्य निरुक्तिपदस्य व्यावृत्तिमाह नापीति·। नन्वेतावतैव सामंजस्ये
साधनतावच्छेदकभिन्नेत्यस्य वैयर्थ्यमत आह इत्थंचेति· तत् साधनतावच्छेदकभिन्नत्वं घटितकूटमप्याह इदंदधीति· साध्यवत्त्वेनोपाधिरिति मतमवलंब्याह जन्यं
चेति। सामानाधिकरण्यसंबंधेन जन्यत्वविशिष्टं दधि यत्र तत्रावश्यं दधित्वं जन्यत्वाभावविशिष्टं दधि यत्र दधिमति द्व्यणुकारंभकपरमाणौ तत्रावश्यं दधित्वाभाव इति क्रमेण विरोध
भंजके दधित्वादौ साधनधतावच्छेदकभिन्नत्वाभावाद्व्याप्तिरित्यर्थः। साधनतावच्छेदकभिन्नेत्यस्य सार्थकीकर्त्तुमिदं इति। पूर्वकल्पे विशेषणमित्यत एव सद्धेतुनिरासः। अ
त्र कल्पे पूर्वदलेन पूर्वकल्पे तद्दलस्य सद्धेतुसाधारण्येन या व्याख्या नाते· अनवच्छेद्यो तद्दलेनैव तद्वारणमिति दर्शयति प्रकृतेति· सद्धेतौ तु साधनतावच्छेदकावच्छिन्नेन
वसाध्यसंबंधितेति तन्निरासः। तस्य साधनतावच्छेदकस्य। द्रव्यं गुणकर्मान्यत्वे सति सत्त्वादित्यादौ गुणकर्मान्यत्वविशिष्टसत्तात्वस्य द्रव्यत्वाभावविशिष्टसत्तावृत्तित्वेनानवच्छेदक
तया तत्र गुणकर्मान्यत्वादावुपाधिलक्षणस्यातिव्याप्तिः अत आह तद्विशिष्टेति प्रकृतसाधनतावच्छेदकविशिष्टसाधनस्येत्यर्थः। विशिष्टस्यानतिरिक्तत्वात्स एव दोष इत्यत आ ३०

ध्याभाववत इति। अत्र विशिष्टनिरूपिताधिकरणतान गुणादाविति न दोषः। इदं चात्रावधेयं· यथा संयोगस्य शुद्धपुरुषप्रतिकस्य भूतलादौ सत्त्वेपि पुरुषे दंडाभावदशायां
न दंडविशिष्टपुरुषप्रतियोगिकत्वं तथा शुद्धसत्ताप्रतियोगिकसमवायस्य गुणादौ सत्त्वेपि न गुणकर्मान्यत्वविशिष्टसत्ताप्रतियोगिकत्वं· तेन गुणादौ समवायेन न विशिष्टसत्ताव
त्त्वमिति। यत्तु गुणादौ गुणकर्मान्यत्वस्य परंपरया भानेन गुणकर्मान्यत्वं च सत्तात्वसंबंधः। तेन गुणकर्मान्यत्वविशिष्टसत्ताश्रयसमवायसत्त्वेपि गुणादौ न तादृशधीरिति· तत्तु तुच्छ·
गुणकर्मान्यत्वविशिष्टसत्तावानिति प्रतीतौ गुणकर्मान्यत्वस्य विशेष्यपरंपरासंबंधेनाप्रकारत्वात्· अत एव गुणकर्मान्यत्वविशिष्टसत्तायाः समवायेन साध्यत्वं तत्र तत्रोक्तं संगच्छते· सम
वायेन तदभावस्य प्रतिपादनं च। इतरथा तु सर्वं दुर्घटं स्यादिति· एतेन· तादृशावच्छेदकत्वनिर्वचनेन। ननु प्रमेयत्वरूपेण मेयानवच्छेद्यत्वं आर्द्रेन्धनजवह्नित्वावच्छिन्नसंबंधितायाप्र
सिद्धमत आह गुणवदिति· अत्र गुणकर्मान्यत्वविशिष्टत्वं च हेतुतावच्छेदकं समवायेन च हेतुताबोध्या जातित्वघटकनित्यत्वादेरिसुपलक्षणं तद्घटकसर्वस्यैव निष्प्रयोजकत्वात्· परं
तु यत्किंचिद्विशेष्यानिर्देशेनादृशविशिष्टस्वस्य सत्यं तस्मात्तिव्याहारेण प्रतिपादनासंभव इति। यद्यपि गुणकर्मान्यत्वविशिष्टजातित्वावच्छेद्यत्वाप्रसिद्ध्या कथं तत्रातिव्याप्तिः तथा
प्रकृतसाध्यसंबंधितानवच्छेदकत्वं साध्यतावच्छेदके बोध्यं· अत एव साध्यविशिष्टेत्यादिना तथैव दर्शयिष्यते· आयुक्तानुपपत्तेराह अवच्छेदकत्वं चेति· प्रकृतसाधनस्य वा रूपप्रवेशेगो
रवात् नदुपेत्य निष्कृष्टार्थमाह तथा चेति· साध्यविशिष्टस्येति साध्यतावच्छेदकावच्छिन्नसाध्यविशिष्टस्येत्यर्थः। तेन गुणकर्मान्यत्वविशिष्टसत्तावान्जातेरित्यादौ गुणकर्मान्यत्वस्य
शुद्धसाध्यविशिष्टसाधनाव्यापकत्वेपि नाव्याप्तिः। अत एव साध्यसंबंधितानवच्छेदकत्वमित्यत्रापि साध्यतावच्छेदकावच्छिन्नसाध्यसंबंधितानवच्छेदकत्वं वाच्यं· अन्य था जाति
त्वसत्तासंबंधितावच्छेदकत्वेन तत्रैवाव्याप्तिः। इदं द्रव्यं जन्यत्वे सति सत्त्वादित्यादौ स्पर्शवत्त्वादावव्याप्तिवारणाय साधनतावच्छेदकावच्छिन्नस्येति। उपदर्शितेति· निःस्नेह स्पर्शादि
मादाविति भावः। शीतपदस्य गुणिपरत्वभ्रमवारणाय स्पर्शेति। स्पर्शान्यत्वं यथाश्रुतं मिथ्याव्याख्यानं तत्र विशेषणत्वेन संभवतीति तदपि दूषयितुं शीतेति· शीतस्पर्शान्यत्वे संबंधिता(स्पर्श
वच्छेदके शीतस्पर्शान्यत्वस्य तादृशविशेषणत्वेनातिव्याप्तिवारणादिति भावः। आदिना द्रव्यं सत्त्वादित्यादौ रूपान्यत्वादिपरिग्रहः। द्रव्यं सत्त्वादित्यादौ साध्यशून्यगुणादौ सत्तायाः सत्त्वे
न गुणकर्मान्यत्वादेस्तद्व्यावर्त्तकत्वासंभवादाह यत्सामानाधिकरण्येनेति। गुणकर्मान्यत्वविशिष्टसत्तायामपि साध्यशून्यगुणादिवृत्तित्वाभावासंभवादाह साध्यविशिष्टेति। द्रव्यं गुणान्यत्वे स
ति सत्त्वादित्यत्र कर्मान्यत्वेऽव्याप्तिवारणाय प्रकृतेति· साधनतावच्छेदकावच्छिन्नेत्यर्थः। द्रव्यं सत्त्वादित्यत्र कर्मान्यत्वस्य साध्याभावविशिष्टसत्तावत्कर्मव्यावर्त्तकत्वादतिव्याप्तिरतः

शि॰टी॰
३१

सामान्यादिति॰ द्रव्यं जन्यत्वे सति सत्त्वादित्यादौ स्पर्शवत्त्वे व्याप्तिवारणाय द्वितीयदले प्रकृतेति पूर्वोक्तार्थकं द्रव्यं सत्त्वादित्यादौ घटत्वादावतिव्याप्तिवारणाय सामान्यस्येति॰ इत्थं च साध्याभा
वविशिष्टप्रकृतसाधनाधिकरणसामान्यनिष्ठव्याप्यतावच्छेदकं यत्साध्यविशिष्टप्रकृतसाधनव्यापकतावच्छेदकं तत्त्वं फलितोर्थः नतु साध्याभावविशिष्टप्रकृतसाधनाधिकरणत्वव्यापक
कीभूताभावप्रतियोगितावच्छेदकं यत्साध्यविशिष्टसाधनव्यापकतावच्छेदकं तद्वत्त्वमित्यर्थः तथा सति पूर्वकल्पानेदः स्यादिति। सार्वभौममतमवसंग्राह केचित्त्विति॥ सामानाधिकरण्यप्रत्या
सत्त्यावच्छेदकत्वविवरणीयं सामानाधिकरण्यस्य शब्दार्थतां दर्शयितुमाह विशेषणं समानाधिकरणमिति॰ उपाधेर्हेतुवृत्तित्वे न कथं तन्निष्ठसाध्यसंबंधितावच्छेदकत्वमत आह तथा चेति॰ सा
मानाधिकरण्यसंबंधेन विशिष्टबुद्धौ मानाभावान्न तस्य प्रसक्तिरित्यत आह अवच्छेदकीभूतेति॰ धूमवान्वह्नेरित्यादौ आर्द्रेन्धनप्रभववह्नित्वं स्वरूपसंबंधरूपमवच्छेदकं॰ अथवा
ननु तादृशवह्निसामानाधिकरण्यं गौरत्वादिसवच्छेदकत्वं निर्वक्तिरूपवच्छेदकत्वं नेति॰ प्रसक्तोद्भूतादि सत्र महत्त्वस्य न संग्राह्यत्वं प्रसक्तत्वाभावविशिष्टरूपवत्त्वेन   गदो महत्
त्वस्य सत्त्वेन वक्ष्यमाणलक्षणाभावादतउद्भूतेति॰ प्रसक्तयोग्यत्वं च साध्ये तेन प्रत्यक्षाविषयस्योद्भूतरूपवतो महत्त्वसत्त्वेपि न क्षतिः। अत्र प्रत्यक्षत्वसामानाधिकरण्यं गुणत्वादौ तत्र न
महत्त्वसामानाधिकरण्यं महत्त्वसामानाधिकरण्यं गगनत्वादौ तत्र न प्रत्यक्षत्वसामानाधिकरण्यं॰ तथापि सत्त्वादौ हेतुमात्रावच्छेदकावच्छिन्नहेतुवृत्तित्वविरहान्न दोष इत्यर्थः उदाहरणान्तरमा
ह महानिति॰ वक्ष्यमाणलक्षणाक्रान्तत्वस्य तत्त्वादित्यर्थः हेतावनित्यत्वेति। तेन महत्त्वविशिष्टद्रव्यत्वव्याप्यगगनादौ अनित्यद्रव्यसमवेतस्यात्मत्वेपि न क्षतिः। अत्र महत्त्वसामानाधिकरण्यं गगनत्वा
६५ दौ तत्र नानित्यसमवेतसामानाधिकरण्यं। अत्रानित्यसमवेतसामानाधिकरण्यं गुणत्वादौ तत्र न महत्त्वसामानाधिकरण्यमिति। अत्र तथापि सत्त्वादिहेतुद्वयं हेतुतावच्छेदकावच्छि
न्नपरं॰ तेन महत्त्वानित्यद्रव्यत्वादि तत्र शुद्धद्रव्यत्वेन गगनावच्छेदेन महत्त्वसामानाधिकरण्यं तदवच्छेदे नानित्यसमवेतसामानाधिकरण्यविरहेपि नातिप्रसंगः न वा द्रव्यं कर्मान्यत्वे सति
सत्त्वादित्यादौ शुद्धसत्त्वे कर्मावच्छेदेन द्रव्यत्वसामानाधिकरण्याभाववत्त्वे तदवच्छेदेन गुणान्यत्वसामानाधिकरण्यसत्त्वे व्याप्तिरिति ध्येयं॰ यत्र वा न यत्रानतिरिक्तवृत्ति
त्वावच्छेदकत्वं हेतुनिष्ठत्वं निवेश्यं न त्वन्यूनवृत्तितावच्छेदकत्वे विशेषणीयत्वादिति ध्येयं। द्रव्यं सत्त्वादित्यत्र कर्मान्यत्वे पृथिवीत्वादौ चातिप्रसंगं निरस्यति सत्त्वनिष्ठेत्यादिना तन्न
न्निष्ठेति। सत्तानिष्ठेत्यर्थः। सत्त्वनिष्ठद्रव्यत्वसामानाधिकरण्यातिरिक्तवृत्तीत्यर्थः एवमुत्तरत्रापि तदभावो द्रव्यत्वसामानाधिकरण्याभावः। जलत्वादाविति तदवच्छेदकं द्रव्य
त्वसामानाधिकरण्यावच्छेदकं जलत्वाद्यवच्छेदेन सत्तायां द्रव्यत्वसामानाधिकरण्यसत्त्वात् पृथिवीत्वादिसामानाधिकरण्यस्य च सत्त्वादित्यर्थः। साध्यव्यापकानां वह्न्यादिव्या

राम
३१

पकानां द्रव्यत्वादीनां सद्धेतौ धूमादौ धूमनिष्ठद्रव्यत्वादिसामानाधिकरण्यस्य साधनतावच्छेदकभिन्नत्वात् एव दोषः सतस्तदनवच्छेद्येति॰ इदं च साध्यसामानाधिकरण्यविशेषणं॰ ते
नातिप्रसंगः। अत्र कल्पे प्रागुक्तरीत्या सामानाधिकरण्यस्य नाव्याप्यवृत्तित्वमित्यस्वरसः॥ ननु घटः अस्पर्शो मूर्तत्वादित्यादौ व्यभिचारोन्नायकतयोद्भूतरूपवत्त्वादेरुपाधित्वं संमतमेव न तस्य
च निरूक्तावच्छेदकत्वाभावात् एवं तत्र विशेषणमुपाधिरिति नियमः कथमिति शंकते नन्विति। यत्किंचित्सोपाधौ सर्वेणोपाधिना साध्यसंबंधो वच्छिद्यत इत्यत्र इति नियमोस्त्येव यथा
शब्दवान्कालाकाशान्यतरत्वादित्यादौ अतः सर्वत्रेति। सर्वत्र सोपाधौ समनियतस्योपाधेर्निरूक्तावच्छेदकत्वसंभवादाह सर्वेणेति तदसंभवात् प्रसक्त्याभावविशिष्टमूर्तत्ववति
परमाणावुद्भूतरूपवत्त्वस्य सत्त्वेन निरूक्तावच्छेदकत्वासंभवात् शुद्धसाध्यव्यापकेसाधनस्य तद्व्याप्यतावच्छेदकत्वासंभवः पुनः आर्द्रेन्धनादिकमुपेत्य यथाश्रुतं वक्ष्यमाणल
क्षणव्याप्तिं दर्शयितुं साधनावच्छिन्नसाध्यव्यापकमेवोदाहृतवान् तथात्वसंभवः निरूक्तसाध्यसंबंधितावच्छेदकत्वसंभवः। तत्र उपाधौ तादृशनियमवादिमते निरूक्तसाध्य
संबंधितावच्छेदकत्वनियमवादिमते इदं लक्षणमिति॰ न थावेत्स्यतावच्छेदकमिदं लक्षणमपि तद्व्याप्त्तमेवेति तत्स्यतावच्छेदकेन तत्संग्रहो न दोषायेति। यथाश्रुतलक्षणे नोद्भूत
रूपवत्त्वादेरव्याप्तिरत आह साधनाव्यापकत्वमिति॰ उद्भूतरूपवत्त्वादेरपि द्रव्यत्वाद्यवच्छिन्नाभावस्य तादृशाव्यापकत्वादाह॰ तादृशसाधनासामानाधिकरण्यपर्यवसितमिति॰ तथा च तादृ
शव्यापकीभूताभावप्रतियोगितावच्छेदकं नत्वमर्थः तेन जातिमान् भावत्वादित्यादौ साध्याभावविशिष्टसाधनाधिकरणे आत्मादौ समवायेन वृत्तित्वाप्रसिद्ध्या सत्तादावुपाधौ नाव्याप्तिः
पदव्यावृत्तिः पूर्वोक्तव्याख्यया उपदर्शितेति॰ प्रसक्तो मूर्तत्वादित्यादौ उद्भूतरूपवत्त्वादेरुपाधित्वमुदासद्वित्यर्थः। प्रसक्तः प्रसक्तस्वरूपयोग्यः तेन नभसः संतासंभवः। साध्यव्यापक
त्वेन साध्यतावच्छेदकावच्छिन्नसाध्यव्यापकत्वेन॰ तेन गुणकर्मान्यत्वे सति सत्तावान् जातेरित्यादौ द्रव्यत्वे नाव्याप्तिः। ननु व्यभिचारोन्नयनरूपस्योपाधिफलस्योद्भूतरूपवत्त्वादा
वपि सत्त्वेन तद्वारणमेव किमर्थमिति शंकायां मूलं योजयति साध्याभावसंबंधिनीत्यादि॥ अ॰ संबंधः सामानाधिकरण्यं॰ तदसमर्थानां॰ तादृशोपपादनासमर्थानां केवलवि
पक्षगामिनि साध्यसंबंधासंभवेन न विरोधसंभावनाइत्यत आह पक्षविपक्षेति॰ अत एवेतीति॰ व्यभिचारे चावश्यमुपाधिरिति ग्रंथेन व्यभिचारस्योपाधिव्याप्यत्वं प्रदर्श्य तेन तत्फलं व्यभि
चारे लोपाध्यनुमानं व्यभिचारोन्नयनस्योपाधिफलत्वे व्यभिचारे ज्ञाते उपाध्यनुमानं व्यर्थमेव स्यादिति विरोधं तेजन्नमेवोपाधिफलमिति मूलार्थः। प्राभाकरमतोपष्टंभेन तएवत्र
येत्याख्यापावायिमतोपष्टंभेन चतुर्थमतएवेति व्याचिख्यासुराह यतएवेति। स्वाभाविकं। किंचिदनवच्छिन्नो स्वाभाविकहेतुनावच्छेदकस्य साध्यसंबंधितानवच्छेदकत्वादेव। अन्य

उपतएवा...
भ

शि॰दी॰व्या॰
३२

था॰ स्वाभाविकहेतुतावच्छेदकस्य साध्यसंबंधितावच्छेदकत्वे॰ तत्रविशेषणतया साध्यसंबंधितावच्छेदकत्वभ्रमजनकस्वरूपं यात्रतत्संक्रामकत्वं अनुपपन्नमेव
स्यादितिभावः सुपष्टं नः। उपष्टं नोपष्टंभकतया साध्यसंबंधितावच्छेदकलक्षणव्याप्तिरित्यस्योपयोगः। उपाधिपदनिविष्टस्योपपदस्यार्थमाह स्वसमीपेति। सा
मीप्यमत्रन संयुक्तसंयोगाल्पीयस्त्वंइत्यत आह समानाधीति। संक्रामकतयेति। स्वविशिष्टहेतुतावच्छेदकस्य साध्यसंबंधितावच्छेदकत्वप्रसादनेनोपाधेर्हेतौ साध्यसं
बंधितावच्छेदकसंक्रामकत्वमितिभावः। साध्यव्याप्यस्यैवेति। एवकारेण विषमव्यापकनिरासः। विषमव्यापकेस्वनिष्ठव्याप्तेरभावेन तत्संक्रामकत्वायोगादितिभा
वः। साध्यन्यूनवृत्तौ साध्याव्यापके साध्यव्याप्यो वाच्यतयेति उपाधिपदस्यैतिमध्यस्थितमनुषज्यते समव्याप्तस्यैव लक्ष्यत्वेन विषमव्याप्तसाधारण्यात्तल्लक्षण
घटकत्वमतः आह दूषणौपयिकमिति साधनवतीति व्यभिचारोन्नयनमुपपादयितुं नव्यतिरेकेण साध्यव्यापकव्यतिरेकेण। हर्हिसंबंधव्यापकत्वोक्तिः किमर्थमत आ
ह साधनवतीति। साधनवत्त्वेन ज्ञाने यथा साधनवत्त्वे सति साध्यसंबंधाभावप्रकारान्तरं उपाध्यभावातिरिक्तव्यभिचारानुमानप्रकारं प्रदर्शितं तथाविधोक्तिरिति नतुलक्ष
णान्तर्थे च निवेश इति भावः। तेरुपाधिव्यवहारं। विषमव्याप्तेपि रूढिप्रवृत्तिनिमित्तसत्त्वादाह यौगिकमिति। योगानादरमिति। तथा च विषमव्याप्तस्योपाधिपदं मुख्य
मेवेतिभावः। अप्रयोजकत्वादावपि व्यभिचारोन्नायकस्वरूपोपाधिसत्त्वेनेत्याप्रपादनं नघटनइत्यतो व्यावृत्तेउपाधिपदेति। अप्रयोजकत्वादावुपाधिपदात्प्रयो
गान्नेष्टापत्तिरितिभावः। ननुयोगादेरपि व्यभिचारोन्नायकत्वमेव रूढिविषयतावच्छेदकमस्त्वत आह योगेति। लाघवादिति॰ साध्यव्यभिचारानुमापककोटिप्रवि
ष्टत्वापेक्षया साध्यव्यापकत्वस्य लघुत्वादितिभावः। साध्यव्यापकतामात्रेति। स्वनिष्ठव्याप्तिसंक्रामकतयैव साधनाव्यापकत्वलाभान्मात्रइति॥ राम

इतिदीधितिप्रकाशेव्याप्तिवादः समाप्तः॥ राम

राम
३२

श्रीः॥ एककार्यानुकूलत्वं। एकत्वकार्यानुकूलधीविषयत्वं। निरूपयितुमिति। पक्षतायाः प्रनिरूपणेपक्षत्वविशिष्टपदार्थधर्मत्वस्यानिरूप
णादितिभावः। पाइशेति॥ अत्रनिर्णयत्वं पक्षे साध्यप्रकारकत्वं पक्षसाध्यविशिष्ट्यावगाहित्वंवा सति। साध्येपक्षनिष्ठसंतानाभावप्रति योगित्वाविषयक
वा॰ त्वं नतु साध्यानीप्रकारकमिर्णत्वं तान्वपिनप्रसिद्धेः। तादृशनिर्णयनिवृत्त्यस्य पक्षे साध्याभावनिर्णयस्य पक्षतात्वाभावादाह संशयइति। नचसा
सं॰ ध्याभावकोटिकसंशयस्य विवक्षितत्वे साध्येपक्षवृत्तित्वकोटिकसंशयोग्रहः। पक्षवृत्तित्वकोटिकसंशयस्याविवक्षितत्वे साध्येपक्षवृत्तित्वकोटिक
संशयस्यहितवक्षितत्वेसाध्याभावकोटिकसंशयोग्रहइतिवाच्यं पक्षसाध्यसंबंधावगाहित्वानस्यैवप्रकृतेसंशयपदार्थत्वात्। वक्षिमानितिनिश्चये
निवर्त्यात दर्शने नै वदारणादिति। तेनेति। केवलान्वयित्वतानदशायां पक्षविशेष्यकसंशयासंभवात्तत्साध्यविशेष्यकपक्षवृत्तित्वकोटिकसंशयस्यात्रावि
भावः। याद्रासंबंधेनेत्यस्य फलमाह। नवेति। संयोगेनवक्षिनिर्णयेसमवायेनतत्संशयसत्त्वात्संयोगेनतन्निश्चयेनपक्षतात्वमितिभावः। नमः प्रभृति
ष्विति। संदिग्धसाध्यधर्माधर्मीति। पयाकृतलक्षणे दूषणनिर्दशाकाशस्यधर्मवाभावात्तमःप्रभृतेश्च नसमवायेनधर्मित्वमिति। अत एवपक्षस
त्वमाकाशसाध्येसंदिह्यतइतिपद्युव्यतेनतदापिननिस्तारइतिभावः। संयोगादिनासंबंधेनाकाशस्यापिधर्मत्वात्स्वरूपसंबंधेन नमःप्रभृतेरपिध
त्वादुक्तं समवायेनेति। नद्धेकल्पपक्षतावेकल्यांनापीत्यादेर्लक्षणान्तरपरत्वे संशययोग्यतायाःश्लेनुक्तत्वात्तन्नूनतापत्तिरत आह संशययोग्यतापीति
तिनिरस्यतीति। पक्षतात्वेनेतिशेषः साधकमानस्यानुमानस्यसत्त्वात्तदभावात्संगतेकस्मिन्संनवार्थमाह। साधकेति। सिद्धिबाधौविति। तथाचप्रत्य

MEMORIAL

गा.गानंदी

याथीन विवक्षित इति भावः । केवलान्वयिनि साध्याभावाप्रसिद्ध्या तन्निर्णयरूपबाधाप्रसिद्धेराह । केवलान्वयिनीति । तत्रापि । स्वानन्तरोत्पन्न
व्याप्तिस्मरणादिना सिसाधयिषा नश्यत्वेपि परामर्शानन्तरमिति । पूर्वपरामर्शस्यानुमित्यनुत्पादकानुमितीष्टसाधनताज्ञानादेव नाशादिति भावः । परा
मर्शानन्तरं सिषाधयिषोपपत्तिमाह स्मरणेति । वह्निव्याप्यधूमवान्पर्वतो वह्न्यनुमितिरिष्टसाधनमिति ज्ञानादनुमित्सेत्यर्थः । नचेदानीमनुमित्यापत्तिः ।
अनुमित्सारूपपक्षताभावात् सिद्धान्तिमतेपि पूर्वं सिद्धिसत्त्वादिष्टसामग्र्याः बलवत्त्वाज्ज्ञानदशायामेवोपपत्तेरिति । फलबलादिति । यत्र तादृशक्रमेणानु
मित्सानुत्पादस्तत्र फलाभावोपि कल्पनीय इति भावः । स्वनिष्ठेति । स्वं अनुमाता । तस्याः ईश्वरेच्छायाः । तदानीं सिद्धिकाले । तज्जनकत्वं । अनुमितिजनक
त्वं । तथा चानुमितिजनकत्वविशिष्टाइच्छानन्तरं इत्यर्थः । तद्धि अनुमितिजनकत्वेहि । अनपायादिति सिद्धिकालेपि तदिच्छायाः स्वरूपयोग्यतायाः
सत्त्वादिति भावः । तदुपाधानं अनुमित्सूपधानं अनुमितेरिति । तथा च कुत्राप्यनुमितिर्न स्यात् अनुमित्सूपहितत्वविशिष्टाया इच्छाया अनुमितिप्रा
क्कालेऽभावात् कारणतावच्छेदकावच्छिन्नपूर्ववृत्तित्वस्य कार्योत्पादकत्वमते तु सिद्धौ सत्यामनुमितिप्रसंगस्तदवस्थ इति भावः । तत्सामग्रीसमवधाने
अनुमितिसामग्रीसमवधाने अनुमितिजनकत्वेनेत्यर्थः । कारणमात्रस्येति । मात्रपदं कृत्स्नार्थकं । तथा च पक्षतामात्रस्यैव कारणत्वं स्यादिति एक
प.रि.२ कारणाशेषापत्तिरिति भावः । ननु परामर्शत्वादिनान्यथाप्यनुविधानात्तेन तेन रूपेण तेषां हेतुत्वमशक्यापह्नवमित्यत आह । शेषेति । अनुमितिसाम
ग्रीसमवहितायाः इच्छापक्षतेत्यत्रानुमितिसामग्र्यतिरिक्तस्येच्छाभागस्यैव वैयर्थ्यादिति भावः । नन्वनुमितिविशिष्टाइच्छापक्षताजनकत्वे त्वनुमितिसामग्र्यास्तत

सामग्री२

राम

१

निसे

रूपेणेच्छाया अनुमित्सात्वेनेति । सिद्धिकालेत्वनुमितिसामग्र्यभावादेव नानुमितिरित्यत आह तदानीमिति । तदानीं सिद्धिकाले । परामर्शरूपकारणस्येच्छारू
पकारणतापन्नसत्त्वे अनुमितिसामग्र्यभावो यदभाववति सत्त्वे हेतुरस्तु कृतमुक्तपक्षतयेत्यर्थः । वक्ष्यत्वेति । तदुक्तकारणासिसाधयिषाविरहविशिष्टसि
द्ध्यभावरूपमन्वयव्यतिरेकिनान्यादिति भावः । परामर्शरूपकारणसत्त्वे सिद्धिरूपविरोधिसत्त्वेप्यनुमितेस्स्यात्तदाननुत्पादे तज्जनकत्वं सिद्धाव्येतत । नच
तत्तत्त्ववति । योग्यविभुविशेषगुणे च यस्य युगपदवस्थानं साम्प्रतवादिसन्तस्तात्ज्ञास्य मुदाहरति । यत्रेत्यादिना । साध्यनिर्णयसामान्येच्छानन्तरं
तादृशस्मरणे तादृशेच्छायाः सविषयसिद्ध्युपहितत्वे न तान्नेमनकत्वस्यादेतदुक्तं अनुमित्सेति । अनुमित्सानन्तरं वह्निव्याप्यधूमवान्पर्वतो वह्निमा
निति स्मरणं यत्रेत्यर्थः । अनुमितिरिष्टसाधनं वह्निव्याप्यधूमवान्पर्वतो वह्निमानिति स्मरणानन्तरं यत्रानुमित्सा तत्रप्रयोजनमाह । अनुमिनोतीति । स्म
रणात्पूर्वमनुमितेरिष्टसाधनताधीसत्त्वे इच्छासामग्र्या बलवत्त्वात् स्मरणमेव न स्यादतोऽनुमितीष्टसाधनताविषयकत्वपर्यन्तानुधावनं तादृशस्मर
णादि । साध्यतव्याप्यविशिष्टपक्षस्मरणात् । स्मरणात्मकसिद्धपरामर्शस्थले सह कृतान्तस्य प्रयोजनमुक्त्वा प्रत्यक्षात्मकासिद्धपरामर्शस्थले तदाह अनु
मित्सापूर्वमिति । अनुमित्सापूर्वकालावच्छिन्नपदवस्यस्य विशेषणे हानस्यनाशमित्सोत्तरपरामर्शे उपयोगित्वमत उक्तमेवेति । विशेषणेति । परामर्श
ना सिद्धिविशेषणेत्यर्थः । लौकिकत्वसंपादयाह अनुमित्साकालोत्पन्नेति । अनुमित्सापूर्वकालेइन्द्रियसन्निकर्षोत्पादे प्रत्यक्षसामग्र्याभावे धारानुमि
त्सैव न स्यादतो निर्विवादस्वजा । न प्रायेणेके अनुमित्साकालोत्पन्नेति । तदनन्तरं चानुमितिरिति । साध्यतव्याप्यविशिष्टपक्षप्रत्यक्षमित्यादिविषय
मानन्तरिकेत्यर्थ । सिद्धिमात्रगोचरेच्छायाः सिसाधयिषात्वे पर्वतो वह्निशाब्दं जायतामित्याकारेच्छायामनुमितिवर्जितापत्ता मित्साकारकेच्छासत्त्वे सिद्धिस

त्वे पक्षताप्रसंग इत्यत आह सिसाधयिषा चेति। तत्साध्येति। साध्यतावच्छेदकावच्छिन्नसाध्यविशिष्टपक्षतावच्छेदकावच्छिन्नपक्षविषय
यत्वप्रकारकेत्यर्थः। तेन वह्निमद्विशिष्टपर्वतानुमितिर्जायतां वह्निविशिष्टपाषाणमयानुमितिर्जायतामित्येवमाकारकेच्छाव्युदासः। तत्साध्य
विशिष्टतत्पक्षेत्यत्र वैशिष्ट्यं वैतानिकं। तेन न च मानुमितौ पक्षतासूक्तिः। तत्पक्षविषयकत्वेत्यंतस्य प्रयोजनमाह। यत्किंचिदिति। ज्ञान
मिति। एतदुत्तरकालीनज्ञानमित्यर्थः। यत्किंचिद्वैशिष्ट्यज्ञानस्य नियमतः सिद्धतया तेन रूपेणेच्छाया असंभवात्। न च यत्किंचिज्ज्ञानोत्तरज्ञा
नस्य सिद्धिसत्त्वेपि न सिद्धत्वाय तद्दशायां मुक्तेच्छासंभव इति वाच्यं। ज्ञानादिस्थले स्वरूपतः सिद्धस्यैव प्रतिबंधककल्पनादिति। अनुमि
तित्वप्रकारकत्वाविवक्षायामनुमितिविषयत्वानुरोधेन बीजमाह। अनुमितित्वाप्रकारिकायामपीति। प्रत्यक्षायतिरिक्तेति। आदिना शाब्दोप
मीत्योपरिग्रहः। प्रत्यक्षाद्यनंतरमिति। प्रत्यक्षसत्त्वे शाब्दादिसामग्र्यभावकाले प्रत्यक्षभिन्नं वर्तेवह्निज्ञानं जायतामितीच्छासत्त्वेऽनुमि
त्यनुत्पादापत्तेः। शाब्दादिस्थलेप्यूह्यं। न च यत्र शाब्दसामग्र्यां सत्यां प्रत्यक्षभिन्नं पर्वते वह्निज्ञानं जायतामितीच्छा तत्रानुमित्यापत्तिः। तत्र
तादृशेच्छायाः शाब्दविषयत्वेनानुमित्यविषयत्वात्। यदा तदानीं पक्षतासत्त्वेपि अनुमितित्वप्रकारकतादृशेच्छाविरहविशिष्टसमानविषयशाब्दसामग्र्याः
एव प्रतिबंधकत्वादेव तदानीं नानुमितिरिति। ननु यत्र पर्वते वह्निप्रत्यक्षं तत्रच्छायापरामर्शश्च समकालं वह्नौ त्वाविषयांतरेणानुमितिसामग्र्यभावः। तत्र
यत्किंचिज्ज्ञानोत्तरानुमितिर्जायतामितीच्छासत्त्वेपि पर्वते वह्नेरनुमितिरनुभवसिद्धा तत्र च तत्साध्यविशिष्टतत्पक्षविषयत्वप्रकारकानुमित्साविर

२

हविशिष्टसिद्धिसत्त्वासत्त्वानंगः। एवं यत्र सौरभत्वेनाकाले शाब्दादिसामग्र्यभावः तत्र प्रत्यक्षभिन्नं ज्ञानं जायतामितीच्छायामप्यनुमिति
दर्शनात्तत्र पक्षतासंगः। एवं अनुमितित्वप्रकारकत्वानिवेशने यत्र वह्निविशिष्टपर्वतविषयकप्रत्यक्षतद्रूपेणानुमितिर्नेच्छा नानापक्षतापि
तिरेनोऽनुमितित्वप्रकारकत्वपर्यंतस्यावश्यकत्वे कथं प्रत्यक्षादिभिन्नं पर्वते वह्निज्ञानं जायतामितीच्छासाधारण्यमत आह यादृशेति। तथा च न
साध्यविशिष्टतत्पक्षविषयत्वप्रकारकानुमितित्वप्रकारकेच्छायाः प्रत्यक्षादृशायां पर्यवसाननिवेशस्य इच्छायाः अनुगततद्रूपेणैव निवेशः। अनुमानाद्धूमेन सा
ध्यतां वह्निरिति। अन्यथेच्छायामानस्यैवानंत्यं युक्तिस्वेनानिवेशे भिन्नलिंगकेच्छाव्यक्तेर निवेशादेव तत्र पक्षताविरहेन प्रतिबंधकत्वकल्पनेनावि
शेषणांतरदानं वा निःप्रयोजनं स्यादिति। यत्किंचिज्ज्ञानोत्तरानुमितिर्जायतामित्याकारिकायाः पक्षतोत्तेजकत्वे नन्न घटितत्वेनैव निवेशः। विषयांतरेऽनुमिति
वि८६ सामग्रीसत्त्वे तादृशेच्छाया उत्तेजकत्वाभावादिति लौकिकप्रत्यक्षसामग्रीकालीनसिद्धेरसत्त्वेपि पर्वते वह्निप्रत्यक्षं जायतामितीच्छासत्त्वेप्यनुमितिदर्शनात् तत्सि
द्धिसत्त्वे च नदीच्छासत्त्वेप्युक्तपक्षतावारणायोक्तं सिद्धेरसत्त्वामिति। सिद्धेः सत्त्वे तादृशेच्छासत्त्वेनुमित्यनावादनादिच्छानपेक्षताप्रयोजिकेति भावः। अननु
गमेपीति। अनुमितित्वप्रकारकप्रत्यक्षभिन्नज्ञानत्वप्रकारिकाणामपीच्छानामननुगमेपीत्यर्थः। अप्रत्यक्षमपीति। सिद्धौ सत्यामवश्यं प्रतिबंधकतया त
स्याः अविलक्षणरूपेण प्रतिबंधकत्वं स्यात्। न तादृशेच्छाया इति शंकास्यादिति भावः। अपिना सिद्धिसत्त्वे तादृशेच्छानः सर्वथैव नानुमितिरिति सूचितं। अन्यथाना
त्रलिंगकेति। तथा च तदन्यमात्रलिंगकपरामृश्यमानलिंगान्यलिंगकेत्यर्थः। मात्रपदस्य नयलिंगकेच्छाया अनुकूलत्वे ननद्वारणाय। यादि चेति। तथा च तस्याः
प्रतिबंधकत्वं नास्तीति भावः। उत्तेजकत्वं तु सर्वथैव न स्यादित्यभिप्रायेणाह। यादि चेति। तल्लिंगकेति। तल्लिंगकानुमितित्वप्रकारकेच्छेत्यर्थः। अन्यथा तल्लिंगकानु

भावानंदी लिंगोचरेच्छावत्तदन्यलिंगकानुमितित्वप्रकारिकेच्छाया अप्युत्तेजकत्वापत्तिरिति। लिंगोदासीनायाः पर्वते वह्न्यनुमितिर्जायतामितीच्छाया अप्यसंग्र
हापत्तेराह। तदन्यमात्रेति। तथा च तदन्यमात्रलिंगिकायानुमितेस्तादृशलिंगोदासीनानुमित्सायामितिनतस्या असंग्रह इति भावः। धूमेन पर्वते वह्नि
मनुमिनुयामालोकेन वह्निमनुमिनुयामित्याकारकसमूहालंबनेच्छासंग्रहाय मात्रेति। तल्लिंगतावच्छेदकावच्छिन्नलिंगकत्वाप्रकारकत्वे सति तदन्य
लिंगतावच्छेदकावच्छिन्नलिंगकत्वप्रकारिका। तल्लिंगतावच्छेदकविशिष्टलिंगकत्वाप्रकारकत्वे सति तद्विरुद्धधर्मविशिष्टलिंगकत्वप्रकारिका वा यादृशेच्छा न
दन्यानुमित्सेत्यर्थः। तेन यत्र धूमत्वावच्छेदेन व्याप्यत्वपरामर्शो न तु द्रव्यत्वावच्छेदेन तत्र द्रव्यत्वावच्छिन्नलिंगकवह्न्यनुमित्साया अपि विरोधित्वात्तस्या अ
पि वारणं। यत्र द्रव्यत्वस्य लिंगतावच्छेदकानुल्लेखिनी द्रव्येण वह्निमनुमिनुयामितीच्छा तस्याः संग्रहः। न वा यत्रालोकत्वस्यावच्छेदकत्वानवगाहिनी आ
लोकेन वह्निमनुमिनुयामितीच्छा तस्याः संग्रहः। यदि च धूमेनालोकेन वह्न्यनुमितिर्जायतामितीच्छापि न धूमलिंगकानुमितावुत्तेजिका तल्लिंगतावच्छेदकावच्छि
न्नलिंगकानुमितित्वावच्छिन्नोद्देश्यकत्वे सतीति सत्यंतेन वक्तव्यं। धूमेनालोकेन च वह्न्यनुमितिर्जायतामितीच्छायां तु धूमलिंगकत्वस्यालोकलिंगका
नुमितित्वं उद्देश्यतावच्छेदकेन तु धूमलिंगकानुमितित्वमिति तदुदासः। यदि च द्रव्येण वह्निमनुमिनुयामालोकेन च वह्निमनुमिनुयामितीच्छापि धूमलिंग
कानुमितावुत्तेजिका तदा तल्लिंगतावच्छेदकाविरुद्धधर्मविशिष्टलिंगकानुमितित्वावच्छिन्नोद्देश्यत्वे सतीति निरुक्तिनीयसत्यंतेनाविवक्षणीयं। सर्वत्राविरुद्धत्वं वि
रुद्धत्वं च वैज्ञानिकं बोध्यं तेन धूमद्रव्यत्वादेर्धूमत्वाविरुद्धत्वभ्रमदशायां द्रव्येण वह्निमनुमिनुयामितीच्छाया अप्युत्तेजकत्वान्न न संग्रहः। वह्निव्याप्यधूमवान्पर्वत
इति परामर्शसत्त्वे सिद्धिसत्त्वे मत्तानसीयधूमेन वह्न्यनुमितिर्जायतामितीच्छायामपि दिनोत्तेजिकात्वं तत्पर्वतीयधूमत्वविरुद्धधर्मविशिष्टलिंगकानुमितित्वप्र

नद्वा१

राम
३

धूमत्वाविरुद्धधर्मविशिष्टानुमितित्वावच्छिन्नानुद्देश्यत्वे सति।

रिकायां तदन्यत्वं विवक्षणीयं। एवं पूर्वकालीनपर्वतीयधूमेन वह्न्यनुमितिर्जायतामितीच्छायां यदि नैतत्कालीनधूमपरामर्शादनुमितिस्तदैतत्का
लीनधूमलिंगकानुमितिप्रसंगे तत्कालीनधूमलिंगकानुमितित्वावच्छिन्नानुद्देश्यकत्वे सति एतत्कालीनधूमत्वविरुद्धधर्मविशिष्टलिंगकानुमितित्वप्र
कारिकायां तदन्यत्वं ग्राह्यं। एवं प्रतिपदव्यावृत्तिरपि बोध्या। नन्वेवं धूमलिंगकत्वावच्छिन्नानुद्देश्यकत्वे सति धूमत्वभिन्नधर्मावच्छिन्नलिंगका
नुमितित्वप्रकारिका। या चेयं धूमत्वविरुद्धधर्मविशिष्टलिंगकत्वप्रकारिका तद्भिन्नत्वं निवेश्यं न त्वन्यथा पर्वते वह्न्यनुमितीच्छानन्तरभावविशिष्टसिद्ध्यभावः प
र्वतो वह्निमानित्यनुमितेः प्रसंगेत्यागतं। तथा च सिद्धिसत्त्वे आलोकेन वह्निमनुमिनुयामितीच्छासत्त्वे आलोकपरामर्शादपि अनुमितिर्न स्यादित्यरु
क्रमहक्ताभावादत आह। लिंगविशेषेणापीति। तथा च धूमलिंगकानुमितौ सा पक्षता। आलोकलिंगकानुमितौ धूमपदस्थाने आलोकपदं प्रक्षिप्याव
शिष्यपक्षतायां हेतुत्वं बोध्यमिति। अपि नापक्षत्वे दादि संग्रहः। ननु तल्लिंगकानुमितौ तदन्यमात्रलिंगकानुमितीच्छाभावानुमितीच्छाविरहविशिष्ट सिद्ध्यभा
वस्य हेतुत्वापेक्षया लाघवात् सिद्धिविशिष्टतदन्यमात्रलिंगकेच्छाविरहत्वेन हेतुत्वं युक्तं। न च तत्र वापि सामान्यतस्तत्पक्षकतत्साध्यकानुमितित्वावच्छिन्नं
प्रति निष्पक्षकसाध्यकपक्षतात्वेन कारणतानिरूपणं नागौरवं। लिंगभेदेनानंतकार्यकारणभावेऽप्युत्तेजिकास्वनेनासुनाऽऽशेच्छासु नाऽऽशेच्छा
त्वस्य विशेषणत्वापेक्षया सर्वसाधारणस्यैकस्य कार्यकारणभावस्यैव कल्पने लाघवादित्याशयेनाह। तल्लिंगकानुमिनाविति। सिद्ध्यभावसत्त्वे
नाऽऽशेच्छासत्त्वेऽप्यनुमित्युत्पादादाह। सिद्धिकालीनेति। सिद्धिविशिष्टस्यार्थः। तेन यत्राविरलक्रमेण सिद्धिर्निलिंगकेच्छा सिसाधयिषा धूमलिंग
कपरामर्शः तत्र सिद्धिनाशक्षणे नाशेच्छासत्त्वेऽप्यनंतरं धूमलिंगकानुमितौ न दोषः। धूमेन वह्निमनुमिनुयामालोकेन च वह्निमनुमिनुयामितिस

मूहालंबनेच्छायाः सिद्धिविशिष्टायाश्च प्रतिबंधादाह। तल्लिंगकानुमित्यौच्छाविरहविशिष्टेति। विशिष्टत्वं एककालावच्छेदेनैकात्मवृत्तित्वं। धू
मत्वावच्छिन्नधूमलिंगकानुमितित्वावच्छिन्नोद्देश्यकायाश्च्छानद्विरहविशिष्टाया धूमत्वभिन्नधर्मावच्छिन्नलिंगकानुमितित्वप्रकारिकेच्छा। या
वधूमत्वविरुद्धधर्मविशिष्टलिंगकानुमितित्वप्रकारिकेच्छासा। अन्यलिंगकेच्छात्वेन विवक्षितानामनुगमस्य निरुक्तरूपेणानावश्यमेव कारणताप्रतिप
दत्रयोजनं तु प्रागेवोक्तं। साधकमानपदस्य प्रमाणपरत्वे सिसाधयिषाविरहकाले कदाप्यनुमितिर्न स्यात्। अनुमानप्रमाणसत्वादत आह साध्यव
त्वनिश्चय इति पाषाणेति। पाषाणमयो वह्निमान्पर्वतत्वेनत्वेनेति वा सिद्धावपि पर्वतो वह्निमानित्यनुमितेः पक्षतावच्छेदकविशिष्टे साध्यताव
च्छेदकविशिष्टसाध्यवत्तानिश्चयस्य साधकमानपदार्थत्वं इत्यर्थः। उपलक्षणमिदं। साध्यतावच्छेदकसंबंधसाध्यतावच्छेदकतावच्छेदकसंबंधप
क्षतावच्छेदकतापटकसंबंधावशेषानिवेशनीयाः। अन्यथा पर्वतो नरो नारशानुमितिः। सामानाधिकरण्येनानुमितिः। एकत्र सिद्धौ पर्वतान्तरेवच्छेदका
वच्छेदेन साध्यासिद्धेर्विवादानावादिति। नेति॥ तथा च पर्वतत्वसामानाधिकरण्येन तत्पर्वते विशेष्ये वह्न्यनुमितिप्रति पर्वतत्वरूपेण। तत्पर्वतविशे
ष्यकवह्निनिश्चयत्वेन प्रतिबंधकत्वमित्यर्थः। नान्यथेति। अनुमितेरगत्या विकल्पनावेनप्रवेशनीयाद्इत्यर्थः। तदवच्छेदेन पक्षतावच्छेदकाव
च्छेदेन। सिद्धेः। साध्यसिद्धेः। विरोधित्वमित्यन्वयः। तत्सामानाधिकरण्यमात्रेणेति। पक्षतावच्छेदकावच्छेदेन साध्यानुमितावपि पक्षतावच्छे
दकसामानाधिकरण्येन साध्यावगाहित्वसत्वादाह मात्रेति। सिद्धिमात्रेस्येति। मात्रपदं कृत्स्नार्थकं। तथा च साध्ये पक्षतावच्छेदकावच्छिन्नत्वान

राम ४

वगाहितत्सामानाधिकरण्यावगाह्यनुमितिं प्रति पर्वते विशेष्यकवह्निनिश्चयत्वेन विरोधित्वमित्यर्थः। इत्थं चेति। सामानाधिकरण्येन सिद्ध्यनंत
रं तदवच्छेदेन सिसाधयिषायामपि सामानाधिकरण्यमात्रेणानुमित्यसदर्शनात्। सामानाधिकरण्येनानुमितिं प्रति पक्षतावच्छेदकावच्छिन्नत्वानवगा
हितत्सामानाधिकरण्यावगाहिसिसाधयिषाविरहविशिष्टानिकत्वसिद्ध्यभावत्वेन हेतुत्वं। एवं अवच्छेदकावच्छेदेन सिद्धिसत्वे सामानाधिकरण्यमात्रेण
* वच्छेदका सिसाधयिषायामवच्छेदकावच्छेदेनानुमितेरनुदयात् पक्षतावच्छेदेनानुमितौ पक्षतावच्छेदकावच्छिन्नत्वानवगाहिसाध्यप्रकारकपक्षतावच्छेदकसामा *अवगाहि त्वेऽपि पाठः
नाधिकरण्यावगाहित्वप्रकारकानुमितीच्छाविरहविशिष्टपक्षतावच्छेदकावच्छिन्नसिद्ध्यभावत्वेन हेतुत्वं। तेनावच्छेदकावच्छिन्नत्वावगाहित्वे तदवगाहित्वानव
गाहिन्याः शुद्धसामानाधिकरण्येन सिसाधयिषायाः अवच्छेदकावच्छेदेन सिसाधयिषायाश्च संग्रहः। यद्वा उत यत्र पक्षतावच्छेदकसामानाधिकरण्येनैवेच्छा
उत्तेजिका। तथा चानुमितिसामान्यं प्रति तादृशसिसाधयिषाविरहविशिष्टपक्षतावच्छेदकावच्छिन्नसिद्ध्यभावत्वेन सामानाधिकरण्येनानुमितिं प्रति सि मात्रे ९
साधयिषाविरहविशिष्टसिद्धिसामान्याभावत्वेन हेतुत्वं। अवच्छेदकावच्छेदानुमितिं प्रति तदवच्छेदेन सिद्धिकालीनायाः सामानाधिकरण्यमात्रेणानुमि
त्सायाः पृथगेव प्रतिबंधकत्वं। एवं सामानाधिकरण्यमात्रेणानुमितिं प्रति सिद्धिसामान्यकालीनायाः अवच्छेदकावच्छेदेन सिसाधयिषायाः पृथगेव प्रति
बंधकत्वमिति संक्षेपः। तां प्रति। पक्षविशेष्यकानुमितिं प्रति। पक्षविशेष्यिके वेति। एवकारेण साध्यविशेष्यकव्यवच्छेदः। प्राचीनमतमाश्रित्याह। एवं चेति
। नवीनमते तु पक्षविशेष्यकत्वमेव नियतं। अत एव वह्न्यनुमितेरनुपनीतभानत्वं पूर्वपक्षयति। अन्यथा साध्यविशेष्यकत्वे संनिकृष्टविशेष्यकज्ञा
नजनने चक्षुषः सामर्थ्यात् कथं पूर्वपक्षावतारः स्यादिति। तुल्यन्यायत्वं दर्शयति। समानाकारेति साध्यप्रसिद्धौ सत्यां साध्यविशेषणकैवानुमितिस्तदर्भो वेतु सा

ध्यविशेष्यकैव। अत एव ज्ञाने ऽप्रामाण्याभाव इत्यप्रसिद्धाभावविशेष्यकानुमितिरिति मिते नाह। नाद्य इति। साध्यविशेष्यकेत्यर्थः। सिद्धिपदेन पक्षे
साध्यनिश्चयस्योक्तत्वात्तत्र पक्षवैशिष्ट्यावगाहित्वस्यानिवेशान्निरस्यति। साध्यप्रसिद्धिरिति। अत एव साध्यप्रसिद्धिमात्रस्य साध्यविशेष्यकानुमिते
विरोधित्वादेवात यथाऽभावसाध्यकस्थले साध्यविशेष्यकानुमितेरप्रसिद्धत्वात्। भावसाध्यकस्थले एवोक्तक्रमेणानुमितेर्विधानात् साध्यविशेष्यका
नुमितिं प्रति साध्यप्रसिद्धिमात्रस्य विरोधित्वं न तत्र ज्ञाने ऽप्रामाण्याभाव इत्यनुमितिं प्रति ऽप्रामाण्याभावप्रसिद्धित्वेन न विरोधित्वं। अप्रामाण्याभावेप
क्षे धेयत्वसंबंधेन ज्ञानसाध्यकानुमितेरपि न दाकारतया तादृशस्य विरोधित्वात्। नापि ज्ञानमप्रामाण्यव्यापकाभावप्रतियोगिमदित्याकारकपरामर्शज
न्यतादृशानुमितित्वेन प्रतिबध्यत्वं। ज्ञानमप्रामाण्यव्यापकाभाववत् अप्रामाण्याभावो ज्ञानीयत्वव्याप्यवानिति समूहालंबनात्मकपरामर्शजन्यद्विविधवि
धेयप्रकारकानुमितिं प्रति अविरोधित्वात्। किंतु ज्ञाननिष्ठोद्देश्यतावगाहि अप्रामाण्याभावनिष्ठविधेयत्वावगाहिनी ज्ञाने ऽप्रामाण्याभाव इत्याकारकानुमि
तिं साध्यप्रसिद्धेर्विरोधित्वं। अप्रामाण्याभावपक्षकज्ञानसाध्यकस्थले त्वप्रामाण्याभावस्योद्देश्यत्वं ज्ञानस्य विधेयत्वं भासते। उद्देश्यत्वं विशेष्यत्वं च
स्वरूपसंबंधविशेषः प्रतीतिसाक्षिकः। अनुमितौ तु पक्षस्योद्देश्यत्वं साध्यस्य विधेयत्वं भासते। अप्रामाण्याभावे ज्ञानव्याप्यवत्त्वज्ञानानन्यत्वे ऽप्रामाण्या
भावे ज्ञानीयत्वावगाहिज्ञानानन्यत्वे च सति ज्ञाने ऽप्रामाण्याभाव इत्याकारकानुमितित्वावच्छिन्नं प्रति न तथात्वं ज्ञानीयप्रामाण्याभावत्वेन यत्र पक्षता नादृशानु
मितिवारणाय द्वितीये सत्यंतमित्यपि वदंति। व्याप्तिस्मरणादिनेति। उत्पादकमाननियमादुक्तं। अनुमित्यानंतरोत्पत्त्यैवेति। ननु अनुमित्यायोग्यतयैव कारार्थः
तयैवा ऽनुमित्यानंतरोत्पादेनैव। योग्यतावाच्येति। जनकत्वेनेति शेषः। सा चेति। स्वा ऽनुमित्या उत्पत्तिपदं उत्पादकसामग्रीपरं। तेनानुमित्या सति कालेपिप

गान

५

MEMORIAL

कालः किं वा रुणद्धि तत्क्रमकः कालजननं जनकत्वेन कदाचिदुक्तमप्यधारणीयं इति एवं विशिष्य नन्तरं रूपस्य

रूपता। अनुमित्या पूर्वकालत्ववारणाय पूर्वं प्रतीक। अनुमितिनंतरकालत्ववारणाय विशेष्यं। तत्रापि प्रत्यक्षादिकादिसिद्धिसत्त्वे पक्षतासंपत्तये स्वविषयेति।
दिवसादी ति। तदानीमनुमित्स्नुदयस्यानुभाविकत्वात्। अनुमित्साविषयसिद्ध्युत्पादकालसत्त्वसंपादनायाह इंद्रियादिनेति। अनुमित्सानंतरमिति। अ
नुमित्सोत्पादकसामग्र्यनंतरमित्यर्थः। तेनानुमित्सोत्पत्तिकालसंग्रहः। ननु व्याप्तिघटकीभूतपदार्थानां केषांचिदुपस्थितावनुमित्सानंतरं कदाचिद्दृश्यमि
णानंतरमिति परामर्शोत्पत्तिनियमस्तत्राह उत्सर्गत इति। लिंगस्मरणव्याप्तिविशिष्टधर्मप्रत्यक्षं न तावद्व्याप्यधूमवान्पर्वत इति विशिष्टवैशिष्ट्यबोधात्मकपरा
मर्श इति रूपपक्षकालककालस्य बोधसंभवादिति भावः। नन्वेतादृशकालस्य कथमनुत्तेजकत्वमत आह। फलबलेनेति। ननु अनुमित्सानंतरं क्रमकत्वाद्भुसन्नकमध्ये ऽनु
मितेरानुभाविकत्वात्साधारण्यायाह। अथवेति। तुल्यन्यायतयोत्तेजकस्य प्रतिबंधकेपि प्राप्तामाह यदि चेति। ननु सिसाधयिषानंतरं दंडात्मकं किंवारूपछ
त्मको वा कालः प्रतिबंधकइत्यपि कथमवधारणीयमत आह विशिष्य रूपेण नियमत्विति। वदंतीति। अत्रायमस्वरसः। विशिष्य रूपेण नियमो ग्रहणेपि दुरवधारणः।
एवमेकस्य सिसाधयिषायामन्यस्यामप्यन्यस्य सिद्धिसत्त्वे नुमितेरनुदयात्। नतु हृषीयसिसाधयिषानंतरं तादृशरूपेणाभावविशिष्टसिद्ध्यभावस्य तत्पुरुषीयानु
मितिं प्रति हेतुत्वे वाच्ये ऽतिगौरवमिति। अनुमित्सायां सत्यां तादृशप्रत्यक्षादिसत्त्वे ऽप्यनुमित्युत्पादादाह। साध्यनिर्णयेच्छानंतरमिति। पूर्वोक्तन्यायेनेति। सिसाध
यिषाप्राक्कालीनविशेषणज्ञानेन सिसाधयिषाकालीनेंद्रियसंनिकर्षेण च यत्र वह्निमान्वह्निव्याप्यधूमवांश्च पर्वत इत्याकारकं प्रत्यक्षं स्मरणं वेत्यर्थः। अनुमित्साप
मपि स्वविषयसिद्ध्यनुपहितत्वविशेषणदानार्थमाह। यत्रचेति। वह्निमान्वह्निव्याप्यवान्वह्निव्याप्यव्याप्यवांश्च पर्वतः पर्वतपक्षकवह्निनव्याप्यानुमितिरिष्टं
साधनमित्येकं स्मरणमित्यर्थः। तत्रेष्यसामग्र्या ऽनुमितिविरोधित्वस्यसंदिग्धत्वादनुमित्सोत्पत्तिकाले वह्न्यनुमितेर्वारणाय स्मृतौ वह्निविषयकत्वोपादानं

वह्नित्वव्याप्यानुमितिसामग्रीसंपादनाय वह्नित्वव्याप्यवत्त्वविषयकत्वोपादानं । उक्तं यत्रानुमित्सासंपादनाय उक्तयानुमितौ इष्टसाधनताविषयकत्वमु
पात्तं । अत्र वह्न्यनुमितेरेव परामर्शात्मकतया पूर्वपरामर्शनाशेऽपि स्फूर्तिविरह इति भावः स्फुटतरामिति । सिषाधयिषानन्तरं क्षणस्य द्वात्मककालस्यैव सिषाध
यिषापदार्थत्वात् । अनुमित्यव्यवहितप्राक्काले इच्छाविरहेऽपि न क्षतिः । स्फुटतरामेवानुमितिप्रसंग इत्यन्वयः । अनुमित्सानन्तरं प्रत्यक्षादिसिद्धिसत्त्वेऽप्यनुमित्सुत्सा
हानिदिच्छाविषये सिद्धिविशेषणं । तद्विशेषणं । तदिच्छाविशेषणं । पक्षसाध्यभेदेनेति । उपलक्षणमेतत् । संबंधभेदोऽपि द्रष्टव्यः । यत्र । यत्पक्षकयत्साध्यकस्य
ले । गौरवादिति । सिसाधयिषाविरहविशिष्टसिद्ध्यभावस्य सिद्ध्यभावतोऽन्यत्वेऽपि तदपेक्षया गुरुत्वादित्यर्थः । यत्साध्यकयत्पक्षकसिद्धिस्थले कस्यापि सिषा
धयिषा न जाता तत्र सिषाधयिषाविरहविशिष्टतादृशसिद्ध्यभावस्यापि नाधिक्यमिति ॥ एवं यत्पक्षकयत्साध्यकसिद्धिकाले नियमतः परामर्शाभावस्तत्र
सिद्ध्यभावोऽपि न कारणं । न च तत्साध्यतत्पक्षकपरामर्शसिद्धेर्योगिनामेव संभवात्कथमेतदिति वाच्यं । एवमपि यत्र विषयाविशेषे विषयविशेषस्यात्रमा
नुमितिस्तत्र सिद्धिकाले परामर्शाभावस्य तूपपद्यत्वात् योगिनां त्वमेमानाभावात् । अन्यस्य च सिद्धिकाले परामर्शाभावे नैयत्यादिति । प्रयोजनाभावा
दि । सिद्धिकालेऽनुमित्साधीनपक्षतायाः अनुमितिसंघटनमेव तत्प्रयोजनं तच्च तत्र न संभवतीति भावः । उक्तिसाधारण्यमात्रेति । मात्रपदेनार्थैक्यव्यव
च्छेदः । ईश्वरस्य व्यवस्थापनं विना तदिच्छानिवेशोऽपि दुर्घट इत्याह आयास इति । सिषाधयिषाविरहेति । सिषाधयिषाविरहविशिष्टो यः स्वक्षणस्तदव्यवहि
तोत्तरक्षणोत्पत्तिकानुमितिकं यद्यत्तद्भिन्ना या सिद्धिः सिषाधयिषाविरहविशिष्टा यास्तस्या अभावः पक्षतेत्यर्थः । एतन्मते सिषाधयिषानाशेऽपि सिद्धिसत्त्व
द्वित्रिक्षणमध्येऽप्यनुमितिस्वीकारः । अत एव तत्रैव तन्निष्ठप्रतियोगिसिद्धिः । अनुमित्यव्यवहितप्राक्काले सिषाधयिषाविरहविशिष्टा या सिद्धिस्तद्भिन्न

द्वय एव पक्षताप्रतियोगिन इति । द्वितीयसिषाधयिषाविरहविशिष्टपदव्यावृत्तिं प्रदर्शयन्नेव प्राथमिकसिषाधयिषाविरहविशिष्टपदव्यावृत्तिं
प्रदर्शयितुं पृच्छति । अपेति तृतीयक्षणस्य व्यवधायको द्वितीयक्षणस्तत्रेत्यर्थः । तथा च द्वितीयक्षणेन व्यवहितत्वात् तृतीयक्षणेनाव्यवहितत्वमित्यर्थः
सिद्ध्यनन्तरं क्षणविलंबेन सिषाधयिषाधयिषामासह अत एव सिद्ध्यभावाधीनपक्षतासत्त्वमित्यत उक्तमविरलक्रमेणेति । सिद्धिसिषाधयिषेति । अत्रस्य
सिषाधयिषाविरहविशिष्टस्वक्षणं सिद्ध्युत्पत्तिक्षणः तदव्यवहितोत्तरक्षणे । नानुमित्युत्पत्तिरिति तद्वती सा सिद्धिः । सिसाधयिषाविरहविशिष्टस्वक्षण
व्यवहितोत्तरक्षणोत्पत्तिकानुमितिकभिन्ना तस्या विशिष्टाभावोपपत्तये द्वितीयं विशिष्टान्तमित्यर्थः । स्वक्षणस्येति । सिद्धिक्षणस्येत्यर्थः । यत्क्रमेणेति । सि
षाधयिषानाशक्षणे प्रात्यक्षिकसिद्ध्युत्पत्तौ पक्षतासंपत्तिरुक्तविशेषणेनापि न संभवत्यत उक्तं क्रमेणेति । अविरलक्रमेणेत्यर्थः । एवं सिद्धिपरामर्शयोः
समूहालंबनत्वे स्वक्षणाव्यवहितक्षणोत्पत्तिकानुमितिकैव सा सिद्धिः स्यात्तदन्यासिद्धेरभावः सहजत एवास्तीति तदर्थविशेषणमफलं अत एव तत्रापि क्र
मो विवक्षितः । तथा च सा सिद्धिः स्वाव्यवहितोत्तरक्षणोत्पत्तिकानुमितिकानन्तरवति । स्वक्षणाव्यवहितक्षणे तस्याः परामर्शस्यैवोत्सारादनुमित्यव्यव
हितप्राक्क्षणे तस्याः सिषाधयिषाविरहविशिष्टाया एव सत्त्वाद्धेतोर्विशेषणमादानं । द्वितीये च तस्मिन् क्षणे तदुत्पत्तिक्षणस्य च न सिषाधयिषाविरहवि
शिष्टत्वं सिषाधयिषाविरहविशिष्टस्य स्वस्योत्पत्तिक्षणस्याव्यवहितोत्तरक्षणेऽनुमित्युत्पत्तिरिति सिषाधयिषाविरहविशिष्टस्वक्षणाव्यवहितोत्त
रक्षणोत्पत्तिकैव सा सिद्धिः तदन्यसिद्धेरभावः सहजत एवास्तीति न भवति पक्षतेत्यर्थः । तदव्यवहितोत्तरत्वं तद्ध्वंसाधिकरणक्षणध्वंसानधिकरणत्वे
सति तद्ध्वंसाधिकरणत्वं । न या च यत्र सिषाधयिषासिद्धिपरामर्शानुमितयस्तत्र सिद्धिसिषाधयिषाकाले विनष्टः सिद्ध्युत्पत्तिकालपर्यन्तस्थायी क्रिमात्मकः कालोपा

धिस्तस्य पूर्वकाले सिषाधयिषाविरहविशिष्टत्वात्। स एव सिसाधयिषाविरहविशिष्टस्वकालत्तदव्यवहितोत्तरक्षणः सिद्ध्युत्पत्तिक्षणः परामर्शोत्प
त्तिक्षणस्तत्रानुमितेरनुत्पादात् सिसाधयिषाविरहविशिष्टस्वकालाव्यवहितोत्तरक्षणोत्पत्तिकानुमितिकभिन्नासा सिद्धिस्तस्याः सिषाधयिषाविरहवि
शिष्टायाएव पूर्वकाले सत्वात् पक्षतानुत्पादनः प्रथमक्षणपदं। एवं सिषाधयिषाविरहविशिष्टस्वक्षणाव्यवहितोत्तरकालस्यास्तादृशाव्यवहितोत्तरक्षणो
पर्यंतस्थायीनत्पूर्वस्थायीस्थूलकालोपाधिः। तथा च तादृशस्थूलकालोपाधिमादायस्तवापिसिद्धिः सिषाधयिषाविरहविशिष्टस्वक्षणाव्यवहितोत्तरकालो
त्पत्तिकानुमितिकेति। तदन्यासिद्धिरीश्वरस्यैवेति तस्याईश्वरीयसिषाधयिषाविशिष्टायाएव सत्वेनासिषाधयिषाविरहविशिष्टतादृशासिद्धचत्रसिद्धा त्रि॥५
संतवदुस्तोद्वितीयक्षणपदं। पर्वतोवह्निमानित्यनुमित्यनंतरं विनश्यदवस्थपूर्वपरामर्शेनानुमित्यंतरापत्तिः। अनुमित्यात्मकसिद्धेः सिसाधयिषावि
रहविशिष्टस्वक्षणाव्यवहितोत्तरक्षणवृत्तित्वात्मकानुमितिकत्वेन तदन्यसिद्धेरभावसत्वात्। तादृशस्वक्षणाव्यवहितोत्तरक्षणवृत्तित्वभिन्नानु
मितिकत्वविवक्षणेपि यत्र पर्वतोवह्निमानित्यनुमितिरपेक्षाबुद्धिरूपा तदुत्तरं च पर्वतो वह्निमान् वह्निव्याप्यवांश्चेति प्रात्यक्षिकी सिद्धिरपेक्षा
बुद्धिरूपा। तत्र तादृशानुमितिनाशानंतरं प्रत्यक्षात्मकसिद्धिसत्वेप्यनुमितिप्रसंगः। प्रत्यक्षात्मकसिद्धिस्तादृशस्वक्षणाव्यवहितोत्तरवृत्तित्वभिन्नानुमि
तिकत्वेनाप्रतिबंधकत्वादत उक्तमुत्पत्तिकेति। अनुमितिपदं च प्रकृतानुमितिपरं। अन्यथा वह्निव्याप्यवान् वह्निमांश्च पर्वतो घटव्याप्यवानिति प्रत्यक्ष
स्यस्वाव्यवहितोत्तरक्षणोत्पत्तिकघटानुमितिकत्वेन वह्न्यनुमित्यविरोधित्वेन तत्रापि पक्षताप्रसंगादिति। यत्रानुमित्सेत्यादि। अनुमित्यात्मकसिद्धावनुमि
त्साया फलोपहितत्वेनानुत्तेजकत्वस्यादनः प्रासंगिकीति। अनुमितस्तानाशकालेइत्यनेन तादृशसिद्ध्युत्पत्तिक्षणस्यानुमितिप्राक्क्षणस्य च सिसाधयिषाविरहवि

राम
७

शिष्टत्वं सूचितं। अथ परामर्शानुमितीइत्यनेन सिद्धेः परामर्शाव्यवहितत्वेन तादृशक्षणाव्यवहितोत्तरक्षणोत्पत्तिकानुमितिकभिन्नत्वं सूचितं। द्वितीयमपेक्षे
ति। तथा च स्वाधिकरणक्षणानंतरत्वघटितत्वेनोपादानादाव्यवहितोत्तरत्वं निर्वाच्यं। अन्यथा स्वाधिकरणक्षणध्वंसाधिकरणक्षणध्वंसानधिकरणत्वस्य तृतीयक्ष
णे संभवेनासंगतत्वापातात्। तत्र घटितत्वेनोपादाने च स्वाधिकरणीभूतक्षणध्वंसाधिकरणक्षणध्वंसानधिकरणत्वे सति तादृशक्षणध्वंसाधिकरणत्वं तृती
यक्षणे विकल्पमिति भावः। तत्र घटितत्वेन निवेशगौरवादाह। स्वध्वंसेति। स्वं सिद्धिः विषयितया स्वध्वंसाधिकरणक्षणध्वंसानधिकरणत्वासंभवादित्यत आह कालो
ति। कालिकसंबंधेनाधिकरणत्वप्रापकं। तत्र तृतीयक्षणत्वेनोत्पन्नो। स्वध्वंसाधिकरणकालः स्वतृतीयक्षणः तद्ध्वंसानधिकरणत्वे सतीत्यर्थः। तेन चतुर्थक्षणव्यु
दासः। स्वपूर्वकालवारणाय विशेष्यं। तत्रापि स्वाधिकरणक्षणध्वंसवत्वात्। कालेति। स्वाधिकरणत्वेनैव पूर्वकालवारणेपि अनुमित्युत्पत्तिक्षणवारणाय गुरुतरान्तः।
अन्यथाऽनुमितेरपि तादृशाव्यवहितोत्तरस्वोत्पत्तिकानुमितिकत्वेन तद्भिन्नसिद्धेरभावसत्वादनुमित्यनंतरं पुनरनुमित्यापत्तिः स्यादिति। नन्वेवं स्वक्षणस्य सि
साधयिषाविरहविशेषणे व्यर्थीयत्क्रमेण सिसाधयिषाप्रासंगिकसिद्धिपरामर्शानुमितयस्तत्र तादृशासिद्धेः निरुक्तस्वक्षणाव्यवहितोत्तरक्षणोत्पत्तिकानुमिति
कत्वेन तदन्यसिद्धेरभावस्य सत्वादतः प्रकारान्तरेण तत्प्रयोजनमाह यथा चेति। सिद्ध्यनंतरं तृतीयक्षणे सिसाधयिषायां सिसाधयिषायास्तृतीयक्षणेऽनुमित्युत्पत्तौ
तासिद्धेः स्वक्षणाव्यवहितोत्तरक्षणोत्पत्तिकानुमितिकत्वेन तदन्यसिद्धेरभावस्य प्रथमक्षणेपि सत्वादित्यर्थः। उत्तरक्षणस्येति। स्वक्षणस्य विशेषणे तादृशसिद्धेरुत्प
त्तिक्षणस्य सिसाधयिषाविरहविशिष्टत्वेन प्रथमक्षणे पक्षतावारणासंभवादिति। उत्तरक्षणस्य तादृशसिद्धेरव्यवहितोत्तरक्षणस्य। तथा च सिसाधयिषावि
रहविशिष्टो यः स्वाव्यवहितोत्तरक्षणस्तदुत्पत्तिकानुमितिकं यद्यत्त्वेन भिन्नाया स्तादृशासिद्धेः क्षणे प्रथमक्षणे इव द्वितीयक्षणेपि सत्वान्न पक्षतास्यादिति भावः।

३ तंनघटत इत्यतः क्रमेणेति। अविरलक्रमेणेत्यर्थः। प्रथमक्षणइति तादृशसिद्धेः स्वक्षणाव्यवहितोत्तरक्षणोत्पत्तिकानुमितिक ३

इच्छाजनिकेति। तथा च प्रथमक्षणे पक्षतासत्त्वेऽपि न क्षतिः। तदानीमनुमित्सुत्पादस्येच्छाजनकसामग्र्याः प्रतिबंधेनैवाभावादिति भावः॥ इच्छाघटितसामग्र्या एव प्र-
तिबंधकत्वं दृष्टं न त्विच्छाजनकसामग्र्या इत्यतस्तत्र प्रतिबंधकस्य संदिग्धतोदशायामनुमित्सुयदिष्टुनरिति। तदानुमितीति। यद्यप्यत्रापेक्षाबुद्धिरूपा सिद्धिस्तत इष्टसाधनताधीस्त-
तः सिसाधयिषा ततोऽनुमितिस्तत्र तादृशसिद्धेरपि निरुक्तस्वक्षणाव्यवहितोत्तरक्षणोत्पत्तिकानुमितिकत्वेन तदन्यसिद्धेरभावस्य प्रथमक्षणेऽसत्त्वादितत्राव्याप्ति-
च्छासामग्र्याः प्रभावाच्चेष्टसाधनताधीकालेऽनुमित्यापत्तिः॥ अतइच्छासामग्रीप्रतिबंधकत्वेऽपि सिसाधयिषाविरहविशिष्टत्वं विशेषणं तत्रावश्यकं। तथाप्यपेक्षाबुद्धे-
र्द्व्येइति प्रसक्तान्यथानुपपन्नाक्षणत्रयावस्थायित्वात्तत्र च तादृशप्रसक्ताभावात् क्षणत्रयावस्थायित्वमिसन्निधेस्यैतदुक्तं। स्वाव्यवहितोत्तरक्षणोत्पत्तिकानुमिति-
कसिद्धिभिन्नसिद्ध्यभावस्य बहुव्रीह्यर्थप्रवेशेन गुरुत्वात्तदुपेक्षितं। अनुमित्यव्यवहितपूर्वत्वं चानदनुमित्सुत्पत्तिकालोत्पत्तिकध्वंसप्रतियोगित्वं। तादृशक्षणवृत्तिसिद्धिभिन्न-
सिद्धीनामभाव इत्यर्थः। मात्रपदेन सिसाधयिषाविरहविशेषणव्युदासः। सिद्ध्यभावत्वस्य पक्षतात्वसंपन्नये चरमसिद्धिपदं सार्थकं। कर्तुं प्रथमसिद्धिपदं त्वेवमभावत तस्य ९
यापि नवैयर्थ्यं। तथा चानुमित्यव्यवहितपूर्वक्षणवृत्तिसिद्धिभिन्नत्वस्य परामर्शादेः प्रतिबंधकत्वापातान्न चरमसिद्धिपदं। क्वचिदनुमित्यव्यवहितपूर्वक्षणवृत्तिभिन्न-
सिद्ध्यभावमात्रमिति पाठः सिद्धिपदस्याखण्डाभावसंपादकतया नवैयर्थ्यं। तादृशसिद्धीनां सिसाधयिषाविरहविशिष्टस्वक्षणाव्यवहितोत्तरक्षणोत्पत्तिकानुमिति-
कभिन्नसिद्धीनां। निरुक्तेति। निरुक्तो सिसाधयिषाविरहविशिष्टत्वादिकं रूपं। नन्वनायत्यैवानेन कार्यकारणभावो लभ्यत इत्यत आह तादृशेति। नन्वनुमित्यव्यवहितपूर्ववृ-
त्तिभिन्नसिद्धीनां तत्तद्व्यक्तित्वेनैवाभावः कारणं। अनुमित्यव्यवहितपूर्ववृत्तितादृशसिद्धीनां तु सिसाधयिषाविरहविशिष्टत्वेन शब्दैक्यमनुपादेयमेवेत्यत आह तन्नेति। आ-
त्मनिष्ठस्य प्रतिबंधकत्वं तादात्म्यसंबंधेनेति। यत्र सिद्धिसिसाधयिषानुमितयस्तत्र सिद्धेः प्रथमक्षणे प्रतिबंधकत्वं। बाधकात्। तत्क्षणसंबंधस्यैव तथात्वमित्यस्यार्थः। ननु

तत्क्षणसंबंधस्यात्मान्तरेऽपि सत्त्वात्तदानीमनुमितिर्न स्यात्। न च तदात्मीयतत्क्षणसंबंध एव प्रतिबंधक इति वाच्यं तदात्मान्तरक्षणव्यावृत्ततोधिकस्य तदात्मीयतत्क्षणसं-
बंधस्याभावादाह तत्तन्मनयावच्छिन्नेति। तन्मनोयोगेति। यत्रात्मनि यदानुमितिर्निमित्ते तदात्मीयमनोयोगस्तद्व्यक्तित्वेनोपादेय इत्यर्थः। आदिना तदात्मीयपरिमा-
णादिसंग्रहः। यद्यप्येवं तत्क्षणावच्छिन्नसिद्धिव्यक्तेरपि प्रतिबंधकत्वे सति विनिगमनाविरहात् तथापि तादृशानन्तप्रतिबध्यप्रतिबंधकभावे मानाभाव इत्यत्र तात्प-
र्यं। अत्र च सामान्यतः प्रकृतानुमितित्वमेव कार्यतावच्छेदकं न तु तत्तदनुमितित्वं सामानाधिकरण्यप्रत्यासत्त्या प्रतिबंधकत्वकल्पनान्नातिप्रसंगं इत्यपीति। परामर्शादि-
वित्यादिपदेनात्ममनोयोगादिपरिग्रहः। ननूक्तरूपविशिष्टाभाव एव नियामकः। न च नियमान्तरकल्पनं विना न देव हेतुत्वमिति वाच्यं। तत्स्वरूपसत एव हेतुत्वेन त-
द्ज्ञानेऽपि क्षतिविरहादत आह तवेति। कार्योत्पादस्य कारणतावच्छेदककोटिप्रवेशे तदवच्छिन्नस्य पूर्वकालेऽसत्त्वात्कार्योत्पादो न स्यादिति तत्सूचनाय कारणतावच्छे-
दकावच्छिन्नसमाजाधीनेत्युक्तं। कार्योत्पादादिकमिति। आदिपदेन प्रतिबंधकसत्ताधीनकार्यानुत्पादपरिग्रहः। तपासनि। कारणतायाः फलगर्भत्वे परामर्शादि-
संस्कारे लाक्स्वाव्यवहितोत्तरक्षणेऽनुमित्सुत्पादानन्तरं क्षणान्तरेऽनुमितिजननवारणाय उत्पत्तिकालावच्छिन्नेति विशेषणं। कालोऽत्र क्षणः। तेन तादृशी-
स्थूलकालोपाधिमादाय नातिप्रसंगः। स्वक्षणेति। स्वक्षणः। समयः। घटज्ञानादेरप्युत्तरक्षणे समानाधिकरणानुमित्सुत्पादात्तद्वारणाय अव्यवहितेति। स्वका-
लाव्यवहितोत्तरतत्कालः। स्वकालध्वंसाधिकरणकालध्वंसानधिकरणत्वे सति स्वकालध्वंसाधिकरणकालः। स्वद्वितीयक्षणपर्यन्तस्थायी स्वपूर्वकालस्थायी स्थू-
लकालोपाधिः। तथा च घटज्ञानादेरपि स्वाव्यवहितोत्तरकालोत्पत्तिकस्वपूर्वकालीनस्वसमानाधिकरणानुमितिकतयातिप्रसंग इत्यत आह क्षणेति॥ यत्र परामर्-
शेनानुमितिः संस्कारश्चैकदेव जनितो तत्र स्वद्वितीयक्षणवृत्तितादृशानुमितिकेन संस्कारेण स्वद्वितीयक्षणेऽनुमितिजननप्रसंग इत्यत आह उत्पत्तिकेति। पक्ष

गा॰गं॰टी

चैत्रस्य घटज्ञानाव्यवहितोत्तरक्षणे मैत्रस्यानुमितिस्तत्र तादृशपटज्ञानस्यापि निरुक्तरूपशालित्वाच्चैत्रस्याप्यनुमितिजननप्रसंग इत्यतः स्वसमानाधिकर
णेति। घटव्याप्यवान् पर्वत इति परामर्शस्य क्षणव्यवहितोत्तरक्षणोत्पत्तिकघटानुमितिकस्यापि व्यवहितोत्तरक्षणे वह्न्यनुमित्सुत्वाद् प्रसंग इत्यतोऽनुमिती
ति। प्रकृतानुमितीत्यर्थः। यत्र चैत्रमैत्रयोर्निर्वह्नित्वाव्यवहितोत्तरक्षणे मैत्रस्यानुमितिर्जाता तत्र तादृशद्वित्वस्यापि निरुक्तरूपशालित्वात्तेन चैत्रस्यानुमिति
जननप्रसंग इत्यतः सविषयत्वेनेति। सिसाधयिषासंस्कारसाधारण्याय ज्ञानत्वमुपेक्षितम्। एतस्य स्वत्वस्य द्वयघटितत्वाद् द्वित्वादिव्यपदेशेन चैत्रगोर
वादाह स्वसमानाधिकरणेति। स्वा। अनुमितिजनकत्वेनाभिमतं परामर्शादि। तदव्यवहितपूर्वत्वं च तदुत्पत्तिक्षणोत्पत्तिकध्वंसप्रतियोगित्वम्। अनुमित्सुत्प
त्तिक्षणोत्पत्तिकध्वंसप्रतियोगिस्थूलकालोत्पन्नज्ञानादिवारणाय क्षणेति। यस्य परामर्शस्य संस्कारस्य वा तिमक्षणे एवानुमितिस्तस्यापि तादृशानुमि
त्यव्यवहितपूर्वक्षणवृत्तित्वेन तदुत्पत्तिद्वितीयक्षणे पुनरनुमितिप्रसंग इत्यत उत्पन्नेति। अत्रोत्पत्तिरूपलक्षणं तेनोत्पत्तिकालावच्छिन्नत्वमस्य सार्थ
कत्वम्। उत्पन्नेति विशेषणत्वेनोत्पत्तिघटकीभूततायत्वस्यैव पर्याप्तात्। तादृशानुमित्स्यव्यवहितपूर्वक्षणवृत्तित्वविशिष्टत्वेनैवातिप्रसंगभंगात्। तत्र कि
वस्तुनेन वस्तुनेति। पदांतरस्य च प्रयोजनं पूर्वं वक्ष्ये। ननु अनुयोगिनि स्वत्वप्रवेशात् स्वत्वस्याननुगतस्याभावात् कथमनुगतः कार्यकारणभाव इत्यत आ
ह स्वक्षणेति। अत्र स्वशब्देन पक्षज्ञानादेरव्यवहितोत्तरक्षणेनानुमित्सुत्वादेरेवाभिधानम्। तावद्भेदकूटवत्त्वविषयत्वस्य चानुगतत्वान्नाननुगमः। अत्रापि
स्वक्षणस्वक्षणः समयः। अव्यवहितपदद्वितीयक्षणपदादिप्रयोजनं पूर्ववज्ज्ञेयम्। अत्राप्युत्पत्तिकालावच्छिन्नत्वस्यानुषंगः। तेन यस्य परामर्शस्य संस्का
रस्य वाव्यवहितोत्तरक्षणेऽनुमितिस्तस्यापि कारणतावच्छेदकाक्रान्ततया न पुनरनुमित्सुत्वादप्रसंगः। न चैवमुत्पत्तेः स्वघटितत्वेन कथमेवं क्रमेणाव्य

राम ८

नुगम इति वाच्यम्। स्वाधिकरणसमयध्वंसविशिष्टत्वाभावकूटस्य विशेषणत्वात्। ननु ज्ञानेच्छासंस्कारादिसाधारणं सविषयकत्वमेकम्। अतिरिक्तवि
षयताया अनभ्युपगमात्। एवमनुमित्स्यव्यवहितपूर्वक्षणे नियमतः सविषयकपदार्थोत्पत्तौ मानाभावाच्चेत्यत आह किं चेति। अनुमित्स्यव्यवहितपूर्वक्षणे
परामर्शस्यावश्यकत्वान्न ज्ञानत्वघटितो क्तरूपावच्छिन्नत्वस्यानुमितिजनकत्वे व्यभिचारः। एकेन परामर्शेनानुमितिजननानन्तरं पुनरनुमितिजननस्य
वारणाय तादृशाव्यवहितपूर्वक्षणवर्त्तित्वविशिष्टत्वमुक्तं द्वित्वादिवारणाय स्वसमानत्वमुक्तं। शेषं पूर्ववत्। आदिपदेन तादृशसंस्कारत्वतादृशसंयोगत्वादीनां
परिग्रहः। ननु पूर्वोक्तस्याव्यवहितोत्तरत्वस्य तृतीयक्षणसाधारणतया येन परामर्शेन विनश्यदवस्थेनानुमितिर्जनिता तेन स्वद्वितीयक्षणेऽनुमितिजननाप
त्तिरत आह। अव्यवहितोत्तरश्चेति। तथा च सुसंवेद्यस्वाधिकरणकालध्वंसाधिकरणकालध्वंसानधिकरणत्वे सति स्वाधिकरणकालध्वंसाधिकरणत्वमे
वाव्यवहितोत्तरत्वं वाच्यम्। तत्रापि विशेष्यदले स्वाधिकरणत्वेन स्वपूर्वगोष्ठीवारणेऽपि स्वोत्पत्तिक्षणवारणाय कालध्वंसेति। तत्कारणफलं तु अनुमित्सुत्पत्ति
कालोत्पत्तिकसंस्कारेणानुमित्सुनः क्षणेऽनुमित्संतरोत्पत्तिवारणमिति। न चादिमे स्थिति। चतुर्थे परामर्शस्यैवानुमित्स्यव्यवहितपूर्वक्षणवृत्तित्वविशिष्टस्य
सत्त्वान्नाप्रसंगः। सिषाधयिषादिना बाधादिपरिग्रहः। अन्यथा त्वादिति स्वक्षणाव्यवहितोत्तरक्षणोत्पत्तिकतादृशानुमितिकत्वाभावात्। तदानीं। परामर्श
स्येति क्षणे। ननु यत्र कामिनीलौकिकप्रत्यक्षात्मकः परामर्शो निष्पन्नस्तीव्रध्यानान्तरं विनश्यदवस्थसंनिकर्षेण कामिनीलौकिकप्रत्यक्षात्मकः परामर्शो
जनितस्तत्र द्वितीयक्षणे ज्ञानमात्रस्यैवानुत्पत्तिः कामिनीजिज्ञासाया एव प्रतिबंधकत्वात्। न वा पुनः कामिनीलौकिकप्रत्यक्षं। संनिकर्षाभावात्। तत्रान्त्यो
पक्षेऽनुमितिर्न स्यात्। तादृशसविषयकाभावात्। एवं यत्रैतत्परामर्शाव्यवहितोत्तरे स्मृतानेनाभवत्तिलोष्ट्रधामेत्रादिकमौषधादिकं वा प्रयुक्तं तत्रापीत्य
त आह तादृशसंस्कारमुपपादयति अनन्तरः संस्कारादिति। न तत्संभवात्। अनुमितिसंभवात्। आद्यायाः अनुमितेः संस्कारजन्यत्वेन स्मृतित्वापत्तिरत आह संस्का

नावानंदी

रेति॥ प्रागेव। सुतरां संस्कारत्वेन संस्कारजन्यवृत्तिभिन्नत्वेन पृथक्प्रतिबंधकत्वादनुमितिमात्रस्यैवानुत्पादापत्तिः। अनुमित्यव्यवहितप्राक्प्रत्यन्तित्वादे
रपि स्मृतित्वापातादिति भावः। ननु क्षणस्थायिपरामर्शस्यापेक्षत्वे कथं तत्संस्कारसंभावना किंचेत्यादिपक्षेप्यनुयोगिनि स्वत्वप्रवेशादननुगमस्तदवस्थ एवे
त्यतोऽनुगतरूपेण प्रतिबंधकत्वमाह स्याद्वेति। मैत्रीयानुमित्यव्यवहितप्राक्क्षणोत्पन्नसिषाधयिषादिमतश्चैत्रस्य सिसाधयिषाशून्यस्यानुमित्यापत्तेराह। स्वसमाना
धिकरणेति। स्वसमानाधिकरणानुमित्यव्यवहितपूर्वक्षणवृत्तिपर्यन्तभिन्नत्वेन सर्वः। सामानाधिकरण्यं च समवायेन तेन स्वव्यधिकरणानुमितेरपि वि
षयतया स्वसमानाधिकरणत्वेपि न क्षतिः॥ न चैवं ध्वंसादेरपि तादृशपूर्ववृत्तिभिन्नत्वेन प्रतिबंधकत्वादनुमितिमात्रस्यैवानुत्पादापत्तिः। अनुमित्यव्यवहित
प्राक्क्षणध्वंसादेः सत्त्वेपि समवायेन तदभावस्य सत्त्वादिति। इदानीन्तनानां सिष्यादीनां सर्वेषामेव प्रायशस्तत्रानुमितिपूर्वक्षणवृत्तित्वात्। स्वपूर्ववृत्ति
स्वानन्तरतृतीयक्षणोत्पन्नध्वंसप्रतियोगिस्थूलकालोपाध्यात्मकतादृशानुमित्यव्यवहितनावत्कालवृत्तित्वाद्वा प्रतिबंधकतया सिसाधयिषुत्तरमनुमित्यापत्तेराह अ
व्यवहितेति। क्षणेति चावस्यमाणसिद्ध्यात्मकपरामर्शानन्तरं सिसाधयिषोत्पादकालेन तु क्षणोपसंयोगादेरवश्यं नाशोत्पत्तौ मानाभावात्। सिसाधयिषा
प्राक्क्षणवृत्तीनां परामर्शानामनुमित्यव्यवहितप्राक्क्षणवृत्तित्वेनाप्रतिबंधकत्वात् सिसाधयिषोत्पत्तिकालेऽनुमित्यापत्तिरित्यस्वरसादाह स्वसमा
नाधिकरणेति। तादृशानुमित्यव्यवहितपूर्वक्षणवर्त्तिनोपि परामर्शस्य तादृशानुमित्युत्पत्तिकालोत्पन्नध्वंसप्रतियोगित्वरूपाव्यवहितपूर्वत्वानधिक
रणस्थूलकालमहाकालवृत्तितया प्रतिबंधकत्वादनुमितिकालेऽनुमित्यनापत्तेराह। क्षणेति। क्षणत्वं चात्र स्ववृत्तियावद्ध्वंसविशिष्टसमयत्वं विशि
ष्टोपादेयं। अन्यथा स्वपूर्ववृत्तीत्यादिक्रमेणापक्षणावच्छिन्नास्थिरस्यापि क्षणत्वेन तस्य चानुमित्यव्यवहितप्राक्क्षणस्यानिरुक्तानुमित्यव्यवहित

राम
१.

पूर्वत्वानधिकरणतया तद्विशिष्टपरामर्शस्य प्रतिबंधकत्वादनुमित्युत्पत्तिक्षणेऽनुमित्यापत्तेः। तादृशानुमित्यव्यवहितपूर्ववर्त्तिनोपि तादृशानुमित्यव्यव
हितपूर्वत्वानधिकरणक्षणवृत्तित्वेन प्रतिबंधकत्वादनुमितिकालेऽनुमितिर्न स्यादतो विशिष्टत्वेनेति। अनुमित्यव्यवहितप्राक्क्षणे चानुमित्यव्यवहि
तपूर्वत्वानधिकरणक्षणवृत्तित्वविशिष्टाभावस्य सत्त्वान्नानुमितिप्रतिबंध इति भावः। नन्वनुमित्यव्यवहितपूर्वत्वं अनुमित्युत्पत्तिक्षणोत्पत्तिकध्वंस
प्रतियोगित्वं। तथा च तदनधिकरणक्षणवृत्तित्वविशिष्टत्वे क्षणद्वयप्रवेशात्तादृशानुमित्युत्पत्त्यनधिकरणसमयोत्पत्तिकध्वंसप्रतियोगिक्षणवृत्तित्व
क्षणवृत्तित्वविशिष्टत्वे एकमात्रक्षणप्रवेशाल्लाघवमित्याशयेनाह। स्वसमानाधिकरणानुमित्युत्पत्त्यनधिकरणेति। अत्रापि क्षणत्वे क्षणवृत्तियावद्ध्वंस
विशिष्टसमयत्वं मतो नानुमितिप्राक्क्षणोत्पन्नस्यानुमितिद्वितीयक्षणोत्पत्तिकनाशप्रतियोगिनोपि अनुमित्यव्यवहितप्राक्क्षणस्य स्वस्वपूर्ववृत्ती
त्यादिक्षणरूपत्वेपि अनुमित्युत्पत्त्यनधिकरणसमयाव्यवहितपूर्वत्वाभावाच्च वृत्तित्वविशिष्टत्वेन न प्रतिबंधकत्वमिति। अत्र च क्षणस्य प्रवेशोपि द
वा तादृशस्थूलकालाव्यवहितपूर्ववृत्तित्वविशिष्टत्वेन प्रतिबंधकत्वे क्षतिविरहान्न समर्पयस्तुक्तं। कालिकसंबंधेन तादृशोत्पत्त्यधिकरणतायाः अभावसत्तदु
त्पत्तिकेऽप्यत्र कालिकसंबंधेन तदुत्पत्तिकस्य चलाभावाय तदुपादानं। अन्यथा तदुत्पत्त्यनधिकरणसमयस्यापि कथंचिन्न विषयत्वादिसंबंधेनोत्पत्त्यधिकरणता
ऽप्रसिद्धिः स्यात्। तादृशोत्पत्त्यनधिकरणत्वाने प्यनुमित्यव्यवहितप्राक्क्षणध्वंसोत्पत्तेरपि विषयितया वर्तमानत्वात्तत्क्षणवृत्तित्वविशिष्टस्य प्रतिबंधकत्वेऽनु
मितिक्षणेप्यनुमितिर्न स्यादत इति। अनुमितिस्थितिक्षणस्याप्यनुमित्यधिकरणतया तदव्यवहितप्राक्क्षणवृत्तित्वविशिष्टस्याप्रतिबंधकतया अनुमित्युत्तरम
नुमित्यापत्तिरत आह उत्पत्तीति॥ अनुमितिस्थितिक्षणस्याप्यनुमित्युत्पत्त्यनधिकरणतया तदव्यवहितप्राक्कालस्य स्थूलकालोपाधेरनुमित्यव्यवहिततया प्राक्

MEMORIAL

रूणोपिसत्वान्न तद्वृत्तित्वविशिष्टत्वेन प्रतिबंधकत्वेऽनुमितिकालेऽप्यनुमितिर्न स्यात्। अत: रूणेति। अत्र तादृशासमयाव्यवहितपूर्वत्वं तादृशासमयोत्पत्ति
कध्वंसप्रतियोगित्वं। न तु तादृशरूणोत्पत्तिकध्वंसप्रतियोगित्वं गौरवात्। निःप्रयोजनत्वाच्च। तादृशानुमित्युत्पत्त्यनधिकरणस्थूलकालस्योत्पत्तिस्थितिरूण
साधारणरूणसामान्योत्पत्तिकध्वंसप्रतियोगिरूणवृत्तित्वविशिष्टत्वेन प्रतिबंधकत्वे रूतिविरहोऽिति। इदं त्वेवधेयं। यत्र पर्वतो वह्निमान् वह्निव्याप्यवान् पर्वत
वत्यनुमित्यनंतरं मिष्टसाधनमित्याकारकानुमितिस्तत्रोवह्न्यनुमित्यनंतरं जायतामितीच्छा न तत: पुनर्वह्न्यनुमितिस्तत्रेच्छोत्पत्तिरूणेप्यनुमितिप्रसंग:। रूण
रूपदार्थानंतरमुपगमेपि स्थिरस्यास्यरूणावच्छिन्नस्योत्तरानुमित्युत्पत्त्यधिकरणतया यद्रूणावच्छिन्नस्य वा रूणतयांत्यरूणावच्छिन्नस्योत्पत्तिरूणस्य पूर्वानु
मित्युत्पत्त्यधिकरणतया। आद्यरूणावच्छिन्नस्यानंतरानुमित्युत्पत्त्यधिकरणतया तादृशानुमित्युत्पत्त्यधिकरणत्वाभावात्। तस्मात्तादृशसिसाधयिषोत्पत्तिरू
णोनानुमित्युत्पत्त्यधिकरणमिति सर्वसाक्षिकप्रतीतिबलात् तादृशरूणत्वविशिष्टस्य तादृशानुमित्युत्पत्त्यनधिकरणत्वं। तादृशरूणत्वविशिष्टत्वावच्छेदेनो
त्पत्त्यधिकरणत्वाभावो वाऽनन्यगत्याभ्युपेयः तादृशोत्पत्त्यधिकरणत्वाभावावच्छेदेन तादृशसमयोत्पत्तिकध्वंसप्रतियोगित्वं तदव्यवहितपूर्वत्वं। तेन स्थि
रस्यापि कालस्य यत्किंचिद्रूणत्वविशिष्टस्यानुमित्युत्पत्त्यनधिकरणतयाऽनुमित्यव्यवहितपूर्वरूणस्य तदुत्पत्तिकध्वंसप्रतियोगित्वेपि न क्षतिरिति भा
वः। पदांतरव्यावृत्तिः पूर्ववत्। ननु तु मित्यव्यवहितपूर्वत्वानधिकरणत्वघटितेन रूणे तदव्यवहितपूर्वत्वं तदुत्पत्तिरूणवृत्तिध्वंसप्रतियोगित्वा तच्चा
तिपूर्वरूणस्यापीति तद्वृत्तित्वविशिष्टानामप्रतिबंधकत्वापत्तिरत आह। तदव्यवहितेति। तथा च ध्वंसस्यानुमित्युत्पत्तिरूणवृत्तित्वेपि तदुत्पत्तिरूणा
भावान्न तस्याव्यवहितपूर्वत्वमिति। अनुमितिरूणोत्पत्तिकध्वंसप्रतियोगित्वमनुमित्युत्पत्तिरूणस्यापीति तद्वृत्तित्वविशिष्टस्याप्रतिबंधकत्वादनुमि

राम
११

सुत्तरमनुमित्सापत्तिरत तदुत्पत्तीति सर्वस्यैवास्वरूणावच्छिन्नरूणस्यानुमित्युत्पत्त्यनधिकरणस्थूलकालोत्पत्तिकध्वंसप्रतियोगित्वाद
प्रसिद्धिवारणाय रूणेति। सर्वस्यैव रूणस्य तदुत्पत्तिकध्वंसात्मकभेदप्रतियोगित्वादप्रसिद्धिरतो ध्वंसप्रतियोगित्वलाभाय ध्वंसेति। केचित्तु ननु तदव्य
वहितपूर्वत्वं तत्प्रागभावाधिकरणकाल प्रागभावानधिकरणत्वे सति तत्प्रागभावाधिकरणत्वं न प्रागभावानंगीकारे न संभवतीत्यत आह तदव्यवहि
तेत्याहुः। न चात्रेति। प्रथमइति। चरमयोस्तादृशापूर्वत्वानधिकरणसिसाधयिषाप्राक्रूणवृत्तित्वविशिष्टपरामर्शो नैव प्रतिबंधान्नासिसाधयिषोत्पत्तिकाले
नुमितिरितिभावः। सिद्धनेतरपरामर्शस्थले सिद्धेरेव तादृशाव्यवहितपूर्ववृत्तिभिन्नत्वेन प्रतिबंधकत्वात्सिसाधयिषोत्पादरूणेनुमित्युत्पादः स्यादेवेत्यत उक्तं
सिद्ध्यात्मकेति। ननु पुरुषीयस्येति पुरुषांतरीयतादृशधर्मस्य प्रसिद्धावपि न तत्पुरुषसमवायेन तदभावस्य सत्त्वान्न तत्पुरुषीयानुमितिप्रतिबंध इति भावः। क
स्यापीति। यद्येवंभूते किंचित्स्यात्तदा तेनैव प्रतिबंधान्न तदानीमनुमितिः स्यादिति। प्रतिरूणेकस्यचिद्विनाशोपगमेपि तदात्मवृत्तिधर्मस्य प्रतिरूणे नाशोप
गमे मानाभावादिति भावः। अनंतरं चानुमितिरिति। अन्यथा परामर्शस्यैव तादृशापूर्ववृत्तिभिन्नत्वस्यादिति। तदुत्पादसमयोत्सिसाधयिषोत्पादसमयोसा
अनुमितिः। अनवरतेति। अनवरतं परिस्पंदमानायेऽपरिमिताः पवनादिपरमाणवः तैः सार्द्धं पक्षे तन्नसंयोगसंतानः तदेतःपातिपत्तीनामित्यर्थः। प्रतिरूणंता
दृशसंयोगनाशकर्मोत्पादनाय अनवरते स्युक्ते। एकपरमाणुसंयोगकालेपि परमाणंतरस्य संयोगनाशो भविष्यतीत्येतत्प्रतिपादनाय। अपरिमितेति। वायुने
असौ रविलंबगमनशीलत्वाभिप्रायेण पवनादीत्युक्तं। ननु तेषां प्रतिरूणासु परमेमानाभाव इत्यत आह रूणानुत्पादेति। ननु तदानीमनुमित्सनुत्पादनापकारणांतर
मेदकल्प्यतां तदभावात्तदानीनानुमितिरत आह। कारणांतरेति। ननु कारणंतायहसमयेऽन्वयव्यभिचारसंदेहः प्रतिबंधकीस्त्वत आह अन्वयेति। यास्याभाव

नवगाहित्वादिति भावः। ननु स्वस्वव्याप्येतरयावद्धूमहेतुसमवधाने दंडसत्वेपि घटसत्वमिति ज्ञानं कारणतायाहकं तद्विरोधितया न्वयव्यभिचारनिर्णयवतः संशा
यापि प्रतिबंधकरूपत्वात् किं च यत्र वह्निमान्वह्निव्याप्यवान्पर्वतः पर्वते वह्न्यनुमितिं न तरमिष्टसाधनमिति समूहालंबनानुमित्यनंतरं अनुमित्यंतरे ध्यानतो वह्न्यनुमित्यनंतरं
तं रूपैकपदार्थाभावात् तादृशासिसाधयिषाप्राक्कालीनरूपेण हेतुतां सर्वेषां तादृशानुमित्यव्यवहितप्राक्क्षणवृत्तित्वेन तद्भिन्नत्वाभावादन्वयव्यभिचारनिर्णयेवे संस्वरसा
दाह। उपादायतां सिति। तथा च तत्र प्रथमानुमित्युत्पत्तिक्षणसंबंधेन तादृशानुमित्यव्यवहितपूर्ववृत्तिभिन्नत्वेन प्रतिबंधकत्वात् सिसाधयिषोत्पादकालीनानुमितेः।
स्वसमानाधिकरणेत्यत्र स्वाधिकरणत्वं क्षणसंबंधस्य विशिष्टक्षणस्वरूपसंबंधेन वाच्यं। तादृशसमयस्य पुरुषांतरीयानुमित्यव्यवहितपूर्वक्षणवृत्तित्वात् संबंधपर्यंतानु
धावनं। तदात्मीयतत्संबंधस्य तदात्मन्येव सत्वात् पुरुषांतरीयानुमितिः न तत्समानाधिकरणेति नोक्तातिप्रसंगः। ननु तादृशसंबंधानां स्वरूपसंबंधात्मक
तया तदात्मरूपत्वं तत्क्षणरूपत्वं वा स्यात्। न चात्मनः प्रतिबंधकत्वमसंभावितमेव क्षणस्य च स्वसमानाधिकरणस्य पुरुषांतरीयानुमित्यव्यवहितपूर्वक्षणवृत्ति
तया तद्भिन्नत्वाभाव इत्यत आह। स्वेदं इति। तथा च तत्पुरुषीयानुमितित्वस्य कार्यतावच्छेदकत्वान्न पुरुषांतरे तादृशानुमित्युत्पादः। पुरुषीयांतरानुमित्यव्यवहि
तपूर्वक्षणस्य तत्पुरुषीयानुमितिजनकत्वात् कारणे तत्पुरुषीयेति। परामर्शादीनां कारणत्वरक्षणार्थमाह तादृशेति। न च तत्पुरुषीयानुमित्यव्यवहितपूर्वक्ष
णस्य तत्क्षणविशिष्टस्य परामर्शादेः पुरुषांतरेपि सत्वात् तत्रापि तत्पुरुषीयानुमितिप्रसंग इति वाच्यं। तदात्मसमवेतत्वे प्रतिंदात्मत्वेन समवायिकारणत्वकल्पनात् पु
रुषांतरे तदात्मीयानुमित्युत्पादनासंभवादिति। वस्तुतस्तु। तत्पुरुषीयानुमित्यव्यवहितपूर्वत्वस्य कस्याभावादुक्तप्रकारेणाद्वयमेव सम्यगिति ध्येयं। तन्निष्ठ
कारणत्वे को दोष इत्यत आह। तथा चेति। निरुक्तानुमितिकारणस्य सर्वत्र संभवात् अनुमितिसामग्र्याः वेनोपमानादेः प्रमाणांतरस्य कल्पनं न स्यादिह

राम

१२

र्थः। ननूपमित्यव्यवहितपूर्वक्षणस्यानुमित्यव्यवहितपूर्वत्वाभावात् कथं सर्वत्रानुमितिसामग्र्याः। अथोपमितिक्षणेनुमितिकल्पनमेवे स्वसमानाधिकरण
नुमित्पूर्वक्षणत्वसन्न्त्वादिना रूपेण कार्यकारणभावेन निर्वाहात् नोपमितिः तत्सामग्री च कल्प्यत इति चेन्नहि। अनुमितिक्षणे उपमितिकल्पनमेव स्वसमा
नाधिकरणोपमितीत्यादिना रूपेण सम कार्यकारणभावेन तन्निर्वाहात् नानुमितिः कल्प्या स्यात् यदि चानुमिनोमीत्यनुव्यवसायानुव्यवसायबलादनुमि
तिक्षणे उपमित्यभावस्यानुभविकत्वान्नोपमानेनानुमानस्यान्यथासिद्धिः तदोपमीत्यनुव्यवसायबलादुपमानादेरपि नान्यथासिद्धिरित्यस्वरसादाह विलं
बते चेति। परामर्शस्यापि तादृशाव्यवहितपूर्वक्षणवृत्तित्वविशिष्टत्वादिना कारणत्वस्योक्तत्वात् परामर्शत्वेनेति। बाधस्यापि पूर्वक्षणवृत्तिभिन्नत्वेन प्रतिबं तादृशाव्यवहित
धकत्वान्न बाधत्वादिनेति। आदिना तदभावव्याप्यवत्वनिश्चयत्वादिपरिग्रहः। कार्यांतरे पुत्रस्य रूपघटादिरा हाल्तकेषु ज्ञानां। संनिकर्षादीनां दंडादीनां च का
रणानां। एवंरूपेणामल्पादीनां। अनंतत्वात्। अकारणत्वं प्रतिबंधकत्वं। अरूपाणां चानां तादृशाप्रसरूपव्यवहितपूर्वक्षणवृत्तित्वविशिष्टानां तदात्मपरिमाणादि
नां। तादृशघटादिकारणत्वापमात्र वृत्तिसिद्धिवारीनां कारणत्वस्यान्। एवं दाहप्रतिदाहाव्यवहितपूर्वक्षणवृत्तिभिन्नत्वेन प्रतिबंधकत्वे रासभादीनामपि प्रतिबंधक
त्वस्यादित्यर्थः। अत एव। कारणतावच्छेदकावच्छिन्नसमाजाधीनकार्योत्पादस्य कारणतावच्छेदककोटिनिवेशादेव द्वितीयोपीति। अनुमित्यव्यवहितपूर्व
वृत्तिसिद्धिभिन्नत्वे सिध्यभावमात्र … कल्प्योपि। दूषणांतरमाह वेयर्थ्यं चेति। अव्यवहितपूर्ववृत्तिभिन्नत्वेन वस्तुतरस्यापि प्रतिबंधकत्वे रूपनिविरहासिद्धैव
यर्थ्यमित्यर्थः। उपाध्यायमतमुपन्यस्यति सिसाधयिषेति। अनुमानात्मकसाधकमानस्य तादृशस्य सत्वासिसाधयिषाभावकाले कथमनुमितिर्न स्यात
नानुमानातिरिक्तेति। तदुपहितं सिंधुपहितं। स्वजन्यसिद्धिविशिष्टं। सामग्री। सिद्धिसामग्री। तदुपहितत्वाभावेनेति। स्वजन्यसिद्धिकाले तदुपहितत्वस्य सत्वा

दित्यर्थः। अनुमानातिरिक्तेति। अनुमितेः पूर्वमनुमानस्य तदुपहितत्वाभावादित्यर्थः। यद्यपि सिद्धिकाल एव सिद्ध्युपहितत्वेन तादृशसिद्ध्यभावहेतुत्वेनैव तादृशसिद्ध्यु
पहितमानाभावेपि साधकमानपदवैयर्थ्यमित्यर्थः एवं तथापि स्वजन्यसिद्ध्यधिकरणक्षणोत्तरक्षणत्वं यदि सिद्ध्युपहितत्वं निरूप्यते तदा तन्निवेशे सिद्धिकापरसिद्धि
सामग्रीकालावच्छिन्नचक्षुरादिकाले तादृशसिद्ध्यभावात्तत्रानुमितिवारणाय साधकमानपदार्थस्य सार्थक्योपि सिद्ध्युपहितस्यैकस्यानुमानस्य तादृशसिद्ध्यभावदशा
यामनुमित्सेतराजनकत्वादनुमानातिरिक्तत्ववैयर्थ्यमित्यर्थः। अनुमितिसामग्र्येति। अनुमितिसामग्री तादृशप्रत्यक्षसामग्र्यभावघटिता तादृशप्रत्यक्षसामग्री चानु
मितिसामग्र्यभावघटितेति तादृशसामग्रीज्ञानाधीनमपरसामग्रीज्ञानमिति कार्यकारणभावग्रहेऽन्योन्याश्रयादेतादृशकार्यकारणभावग्रहाभाव इत्यर्थः। केचिद्वि
दूषणमाह। व्याप्त्वेति। प्रतियोग्यारोपेति। व्याप्त्वारोपेत्यर्थः। अभावप्रत्यक्षेति। अप्रामाण्यकप्रत्यक्षे इत्यर्थः। उपनीतभाने तु सर्वतो दुर्बलमिति भावः। नरत्वाभावेति। स्था
णुत्वाभावेत्यर्थः॥ केचिदिति स्वरसः। नव्यैः नतु आरोपस्य हेतुत्वमेव खंडितमित्यर्थः। तु सिद्धिसामग्रीपदेन सिद्धसाधारणकतिपयकारणमेव धर्त्तव्यं न तु सिद्ध्यु
पधायकयावत्कारणचक्रं येनान्योन्याश्रयः स्यात्। अनुमित्साविरहविशिष्टप्रत्यक्षसामग्र्यभावत्वेनानुमितिहेतुत्वमित्यत्र प्रत्यक्षसामग्री च चक्षुर्मनोयोगसमवहिता
लोकसंयोगावच्छेदकावच्छेदेन वह्निचक्षुःसंयोगादिरूपैव धर्त्तव्येति कथमन्योन्याश्रय इत्यस्वरसादाह वस्तुतस्त्विति। स्वतंत्रेति। तादृशासिद्ध्यभावं विहाय तादृशा
सामग्र्यभावस्य तादृशसामग्र्यभावं विहाय तादृशासिद्ध्यभावस्यान्वयव्यतिरेकादित्यर्थः। तादृशान्यतराभावोपस्थितिकाले तादृशासिद्ध्यभावादेर्नियमेनोपस्थित
त्वादित्यर्थः। यद्यपि तादृशान्यतरत्वात्मनिशाब्दादिबोधकाले तादृशासिद्ध्यभावादेरुपस्थित्यभावान्न नियमसंभवः। तथापि तदानीमपि मानसतादृशबोधविषयत्व
इत्यभिप्रायः। लाघवात् शरीरलाघवात्। प्रत्येकमेव। तादृशासिद्ध्यभावत्वादिनैव। अन्यथा स्वातंत्र्येण प्रतिबंधकयोरपि अन्यतरत्वेनाभावहेतुत्वे। अत्रैव। प्रकृता प्रतियो

राम
१३

तियोगिकोटावेव। ननु बाधस्य तत्प्रकारकज्ञानत्वं धर्मितावच्छेदकं। सिद्धेस्तु विधेयता प्रतिबध्यतावच्छेदकभेदे कथं तत्तद्भाव इति चेत्। तत्सं। यत्र विषयवि
शेषयोर्धर्मितावच्छेदकीकृत्यैकस्यापि नानुमितिः तत्र तयोरेकमेव तत्प्रकारकानुमितित्वं प्रतिबध्यतावच्छेदकं। लौकिकसंनिकर्षीयजन्यज्ञानत्वापेक्षयानु
मितित्वादेरेव लघुत्वादिति भावः। विस्तरेण तत्त्वसिद्धिबाधयोरेकैव वह्निमानिति विधेयताप्रतिबध्यतावच्छेदिका तत्र वह्निमुद्देश्यतावच्छेदकीकृत्य कुरविधेय
ताशालिन्यनुमितिर्जायतामिति चेन्न तदाश्रयासिद्धिविधयात्तद्बाधे तद्बाधे तत्सिद्धे तत्सामग्रीगणमन्यतमत्वेनैकतत्प्रतिबंधकत्वस्य प्रकृताघटकत्वात् द्वाधकालेप
रूपताविरहादेव नैतदनुमितिः। केचित्तु पर्वतत्वावच्छेदेन वह्न्यनुमितिं प्रति नीलपर्वतो वह्न्यभाववानिति बुद्धेरिव वह्न्यभाववन्निष्ठविशेष्यतानिरूपितसंयोगसंबंधा
वच्छिन्नवह्निप्रकारताशालिज्ञानकालीनपर्वतो वह्न्यभाववानिति बाधबुद्धेरपि विरोधितया तथाविधानुमितिं प्रति तादृशबाधादिघटिततथाविधान्यतमत्वेनैव प्र
तिबंधकत्वं कल्पनीयं। ननु तादृशबाधस्य स्वातंत्र्येण प्रतिबंधकत्वमपीति। बाधादेस्तत्रैसादिग्रंथार्थः। तत्र वह्निविधेयकानुमितित्वस्य प्रतिबध्यतावच्छेदकत्व
त्वे नानुपपत्त्यभावात्। न चैवं तादृशबाधकाले वह्निमान्पर्वतो घटवानित्यनुमित्यापत्तिः। तादृशबाधकाले तथाविधानुमितिजनकीभूतपरामर्शे अप्रामाण्यज्ञाना
स्यनियतत्वेन तादृशानुमितेरयत्नसंभवादित्याहुः। नन्वनुमित्साविरहो यत्र विशेषणं तयोरेवान्यतरत्वेनानुगमो न तु बाधादेरपि अन्यभानस्य विशेषणत्वे गौरवा
दित्याशंक्य निषेधति न चेति। अनुमित्साविरहस्य प्रत्येकमेव विशेषणत्वस्यावश्यकत्वं दर्शयति। शाब्दसिद्धाविति। प्रात्यक्षिकादिसिद्धौ सत्यामशाब्दज्ञानं जायतामितीच्छा
नुदयात् शाब्देति। तादृशेच्छायां। अशाब्दज्ञानं जायतामितीच्छायां। अनुमितित्वादीति। आदिना प्रत्यक्षान्यज्ञानत्वादिपरिग्रहः। ननु सिद्धावनुमितिविषयेच्छाविरहस्य
विशेषणत्वे पर्वतो वह्निः शाब्दसिद्धिसत्त्वे घटानुमितिजनकपक्षतापरामर्शसत्त्वे च शाब्दज्ञानं जायतामितीच्छायामनुमित्सेजनकत्वापत्तिः। न चानुमितिविषयकेच्छाभावत्वेन

विशेषणत्वानुमितिनार्थः किंतु अनुमितिविषयिणीयाइच्छा तत्सत्त्वे तद्व्यक्तित्वेनाभावः सिद्धौ विशेषणं न प्रत्यक्षसामग्र्यां यदानुमितिसामग्रीकालीना वाशाब्दज्ञा
नं जायतामितीच्छा न तत्तद्व्यक्तित्वेनोपादेयेति नोक्तातिप्रसंग इति वाच्यं। तथा सति प्रत्यक्षसामग्र्यामपि तद्व्यक्त्यभावस्य विशेषणत्वेऽनुमितिविरही न हि यदिच्छाव्यक्तिस
त्वेऽनुमितिः तदिच्छाव्यक्तिसत्त्वे प्रत्यक्षं जातमस्त्विति चेत्। अशाब्दज्ञानं जायतामित्यस्य पर्वतो वह्निरिति शाब्दज्ञानं जायतामितीच्छायामित्यर्थः। सिद्धावनुमितिविषयेच्छेत्यादिः
दशो४ सिद्धावनुमितिविषयिणीयाईच्छा तदभावस्य विशेषणत्वमित्यर्थः। तथा च पर्वतो वह्निरिति शाब्दज्ञानं जायतामित्याकारकेच्छाभावघटितत्तदिच्छाभावस्तोमविशिष्टसि
द्धित्वेन प्रतिबंधकत्वं वक्तुं शक्यते। ननु तादृशेच्छाभावघटितस्तोमविशिष्टप्रत्यक्षसामग्रीत्वेनेत्याशयात्। अत एव पर्वतो वह्न्यनुमितिविषयकेच्छात्वेनैवोत्तयत्रोत्तेज
कत्वं प्रत्यक्षादिसामग्रीसमवहितता दृशेच्छावारणानुत्व निवर्तकेत्यादिनाकार्यमित्याशयेनाह। स्वनिवर्तकेति। स्वं तादृशेच्छा तन्निवर्तकं यत्प्रत्यक्षशाब्दोपमितिप्र
तसामग्रीसमवहितं यत्स्वं तदन्यत्वादिनेत्यर्थः। आदिना तत्तद्व्यक्त्यन्यतादृशेच्छापरिग्रहः। प्रत्यक्षादेरिच्छानिवर्तकत्वं तु स्वविषयसिद्धत्वमुद्रया तानेच्छास्थले स्वरूपस
त्सिद्धत्वस्यापीच्छाविरोधित्वादिति। स्वनिवर्तकानुमितिसामग्रीसमवहितेच्छासंग्रहाय प्रत्यक्षादीति। प्रत्यक्षसामग्रीकालीना च पर्वतो वह्निरिति शाब्दज्ञानं जायतामितीच्छा तु
स्वनिवर्तकप्रत्यक्षसामग्रीकालीनेवेति नातिप्रसंगः। ननु सिद्धिमात्रे पाइच्छोक्तेनिको तत्तदिच्छाभावविशिष्टसिद्धिप्रत्यक्षादिसामग्र्योरन्यतरस्यानुमितित्वप्रका
रकेच्छाभावसमुदायो विशेषणमस्तु तादृशासाधारणेच्छाभावसमुदायस्य प्रत्येकं विशेषणत्वे गौरवात्। किंच यत्र विषयविशेषेऽनुमितित्वादिप्रकारकेच्छैव जाता
न तु अशाब्दज्ञानं जायतामित्येवमाकारिका तत्र तादृशेच्छाभावस्य प्रत्येकं विशेषणत्वे गौरवात् अन्यतराभावः कारणमस्त्वित्यत आह। अन्यतरत्वेनेति। सिद्धि
भिन्नत्वे सति यत्तादृशसामग्रीभिन्नत्वं तद्भिन्नत्वमन्यतरत्वं किं वा तादृशसामग्रीभिन्नत्वे सति यत्सिद्धिभिन्नं तद्भिन्नत्वमित्यत्र विनिगमनाविरह इत्यर्थः। ननु स्व

रूपसंबंधरूपाकारणतासाचावच्छेदकभेदाद्भिद्यते। अवच्छेदकभेदेऽपि अवच्छेदकानामसमनियतत्वं। प्रकृते च विशेषणविशेष्यभेदेप्यवच्छेदकयोः समने
यत्समेव कथं कारणताभेदः स्यादत आह। आत्मनिष्ठश्चेति। ननु त्वगीयमनःसंयोगविशिष्टालोकसंयोगावच्छिन्नचक्षुःसंयोगस्य समवायेनाभावो वह्निनिष्ठत
दनुमितिजनकः स्यादित्याशंकामपनेतुमुक्तं। आत्मनिष्ठश्चेति। भिन्नभिन्नसंबंधेनेति। तादृशचक्षुःसंयोगप्रतियोगिचक्षुर्नियामकादृष्टादिसंबंधेनेत्यर्थः। तद
साधारणेति। कालादिघटितसामग्र्याः प्रतिबंधकत्वे मानाभावात्। आलोकसंयोगावच्छिन्नमनःसंयुक्तचक्षुःसंयोगादिरूपायाइत्यर्थः। तत्तत्सामग्र्या भिन्नभिन्नसं
बंधेनाभावः कारणमिति पूर्वेणान्वयः। ननु तादृशचक्षुःसंयोगविशिष्टमनोयोग एव प्रतिबंधकोऽस्तु तथा चात्मनिष्ठः स एव समवायेन उभयोरन्यतरत्वेनाभावः का
रणमस्त्वत आह। मणिविशिष्टस्येति। अयोगादिति। गौरवादिति भावः। सिषाधयिषादेः प्रतियोगितावच्छेदकसंबंधभेदेनाभावैक्यासंभवमुक्त्वा सिद्धितत्सामग्र्योः सिषाधयि
षाविरहविशिष्टप्रतियोगितावच्छेदकस्य संबंधभेदादभावैक्यासंभवमाह। एवमिति। सिषाधयिषाकालीनसिद्धेरपि तदात्मवृत्तिताकालोत्तरीयेण तत्कालीनेन वात्मा
न्तरवृत्तिना सिसाधयिषाभावेन विशिष्टत्वादाह। एककालावच्छेदेनैकात्मवृत्तित्वमिति। अन्यादृशामिति। यत्कालावच्छेदेनात्मनि सिसाधयिषाभावस्तत्कालावच्छेदेन
तदात्मीयमनःसंयुक्तनादृशचक्षुःसंयोगः प्रतिबंधकः तत्र सिसाधयिषाविरहविशिष्टतदात्मीयमनःसंयुक्तचक्षुःप्रतियोगिकत्वेन तद्वैशिष्ट्यमित्यर्थः। यद्यपि तादृशसंयो
गस्य स्वप्रतियोगिचक्षुर्नियामकादृष्टसंबंधेनात्मवृत्तितास्। यत्कालावच्छेदेन तादृशादृष्टसंबंधेन तादृशसंयोगस्यात्मवृत्तित्वं तत्कालावच्छेदेनात्मनि सिसाधयिषा
विरह इत्यत्रापि ककालावच्छेदेनात्मनि सिसाधयिषाविरह इत्यत्राप्येककालावच्छेदेनैकात्मवृत्तित्वे वैशिष्ट्यं वक्तुं शक्यत एव तथापि तत्रैकात्मवृत्तित्वेऽभावस्य विशे
षणतासिद्धेः समवायः। अत्र च तादृशसंयोगस्य तादृशादृष्टसंबंध इति सर्वथा संबंधैक्यासंभव इति भावः। नन्वेवं सामग्रीविशेषाभावस्य सत्त्वात् चेष्टहेतुत्वे सत्येव किमिति नप

कृतासंभवइत्यभावमाह। सामग्रीति। लाघवादिति। तादृशसामग्र्यभावापेक्षया तादृशसिद्ध्यभावस्य लघुत्वात्। यत्तदेव लाघवमेव। इदमुपलक्षणं सिद्धसाधनस्थलेता
दृशसामग्रीविशेषाभावस्य सत्त्वेपि पक्षव्यवहाराभावान्न तादृशसिद्ध्यभावस्थलेपि बोध्यं। नन्वेवमपि लाघवाद्धाभावस्य प्रवृत्तिनिमित्तमस्त्वत आह फलेति।
आवश्यकत्वे पुरुषपदप्रवृत्तिनिमित्तत्वावश्यकत्वे गौरवादिति। बाधस्थले पक्षव्यवहाराभावेनोभयसम्मतनिमित्ताभावः। नन्वेवमात्मनि सुखस्यैव सिद्ध्यभावस्य हेतुत्वास
वेनादौ कथं पक्षव्यवहारः स्यादत आह विशिष्टसिद्ध्यभावत्वमेव। परंपरासंबंधादिति। स्वाश्रयात्मसंबंधेन सिद्ध्यभावस्य तथात्वे सिद्धिदशायामपि पर्वते समवायेन सिद्ध्यभाव
ससत्त्वात्पक्षव्यवहारः स्यात्। तस्माद्वाप्यमात्मा सुखीत्यनदात्मत्वादिस्यात्रानुमातुः सिद्ध्यभावदशायां पक्षीभूततदात्मन आहं सुखीति सिद्धिदशायां तदात्मनि पक्षव्यवहार
इति। परंपरासंबंधश्च यत्कालावच्छेदेन यदात्मनि यत्पक्षकयत्साध्यकसिद्ध्यभावस्तत्कालावच्छेदेन तदात्मीयतदात्मीयतत्पक्षव्यवहारहेतुनिमित्तं तदात्मीयत्वे च तत्प
क्षस्य तदात्मवृत्तितादृशसिद्ध्यभावप्रतियोगिसिद्धिनिरूपिततत्साध्यनिष्ठप्रकारतानिरूपिततत्पक्षतावच्छेदकरूपावच्छिन्नविशेष्यत्वात्। तेनातीतानागतयोरप्यात्मनि सिद्ध्य
भावकालेन पक्षत्वरक्षेति ध्येयं। ननु तदात्मीयतादृशचक्षुःसंयोगस्य वह्न्यादौ सत्त्वेपि दोषवशाद्धूमादेरग्रहदशायां तद्धेतोरनुमितिदर्शनात् तदभावोपि तादृशसामग्री
मध्ये निवेश्यो दोषाश्च पुरुषदोषनियंत्रिता विषयेंद्रिययोर्वर्तमानोत्तरपुरुषांतरीयचक्षुर्विषयतत्पुरुषीयचक्षुर्दोषस्य वा सत्त्वदशायामपि पुरुषांतरस्य प्र
त्यक्षोदयात्कथं सामान्यतः सामग्रीविशेषाभावस्य हेतुत्वं यातत्वं अनन्तस्य पुरुषभेदनियंत्रितमेव कार्यकारणभावमोहणकस्येति। तद्विरहिणः। अनुमित्सावि
रहिणः। तत्पुरुषीयेति। अनुमित्साया तत्पुरुषत्वेनिर्भवितो। तस्यानुमित्सासत्त्वेपि धूमादौ तद्विरहस्य सत्त्वेन तत्कालीनायाः सामग्र्याः प्रतिबंधकत्वापातादिति तत्
द्विरहे। तथा च तत्पुरुषीयायानुमित्साविरहस्तत्कालीनातत्पुरुषवृत्तित्वविशिष्टायास्तत्पुरुषीयसिद्धिसामग्री तद्विरहोहेतुरित्यर्थः। तत्पुरुषीयसिद्धिसामग्री च तत्पुरुषी
यचक्षुर्मनोयोगस्तादृशचक्षुःसंयोगः तत्पुरुषीयचक्षुःसंयोगश्च तत्पुरुषीयतादृशदोषाभावश्चेत्येवंरूपाया एवेति नोक्तदोषः। तत्पुरुषीयानुमित्साविरहका

राम
९५

लेपुरुषांतरीयप्रत्यक्षसामग्रीसत्त्वेप्येतत्पुरुषीयानुमितिसंभवात्सामग्र्यां तत्पुरुषीयत्वमिति। अननुगमस्येति। पूर्वोक्तरीत्या सर्वपुरुषसाधारणस्य
कार्यकारणभावस्यासंभवादिति भावः। सिसाधयिषाविरहकालीनानुमितौ व्यभिचारादाह। सिद्ध्युत्तरेति। एवं विशिष्टाभावस्याहेतुत्वे उक्तेन तत्कालाभावकालीनदो
षव्यभिचाराशङ्काह। मण्यादिस्थलीयेति। अननुगतत्वादिति। मणिमंत्रौषधादिसाधारणस्यैकस्याभावादित्यर्थः। ननु तेषामननुगतत्वेन तद्घटितविशि
ष्टाभावोपि कथमनुगतइत्यत आह तावदिति। यत्किंचिदुत्तेजकविशिष्टमणेः सत्त्वेपि तदुत्तेजकाभावविशिष्टमणेरसत्त्वादित्यर्थः। इहापि। अनुमितावपि दर्शितइति
यादृशयादृशयादिनेति शेषः। ननु यत्पक्षकयत्साध्यकस्थले एकविधैव सिषाधयिषा तत्र तेन रूपेण हेतुत्वमस्त्वतः कार्यतावच्छेदकत्वेऽयमिति सिद्ध्युत्तरेति
ति। सिद्ध्युत्तरत्वमनुमितिसामान्यवृत्तितयातिप्रसक्तं। सिद्ध्यव्यवहितोत्तरत्वं तत्तद्व्यक्तिविश्रांततया ननुगतमित्यर्थः। अनुमितिमात्रस्यैव स्वात्मकसिद्धि
कालीनत्वात्। स्थितीति। स्थितिकालीनत्वे तत्कालोत्पत्तिकत्वं तेन नोक्तदोषः। ननु स्थितिकालीनत्वं सिद्ध्यधिकरणकालध्वंसानधिकरणत्वे सति सिद्ध्यधिकर
णत्वं कालमात्रस्यैव। न तु सिद्ध्यधिकरणकालध्वंसाधिकरणत्वे सति न सिद्ध्यधिकरणक्षणत्वं तत्सिद्धिस्थितिकालत्वं वाच्यं। तथा च तत्तद्व्यक्तिविश्रांततया
कथमनुगमइत्यत आह। स्वेतरेति। अनुमितिमात्रस्यैव स्वात्मकसिद्धिकालत्वादाह स्वेतरेति। यद्यप्यत्रापि स्वत्वप्रवेशादननुगमएव तथापि स्वत्वेनैव
च्छिन्नस्वाधिकरणक्षणोत्पत्तिकत्वसंबंधेन सिद्धिविशिष्टानुमितित्वं उत्पत्तिप्रवेशात्। स्वानंतरोत्पत्तिकसिद्धिविशिष्टानुमितौ न व्यभिचारः। सिद्धिनाश
कालइति। तत्कालीनानुमितेर्निर्विकल्पकत्वात्। नावच्छेदकानाक्रांतत्वादिति। ननु स्वाव्यवहितोत्तरक्षणोत्पत्तिकत्वसंबंधेन सिद्धिविशिष्टानुमितित्वं न यास्वाव्यवहितोत्तरत्वं
च द्वितीयतृतीयक्षणसाधारणं निर्वाच्यमत आह एकस्येति। अनुमित्सनुत्पादेति। तदीयानुमितेरप्यत्तदीयसिद्ध्यव्यवहितोत्तरक्षणोत्पत्तिकत्वेन कार्यतावच्छेदकाक्रां

नत्वादि तिभावः॥ नन्विसिसाधयिषात्वेन न तु स्वरूपीयसिसाधयिषात्वेन। इत्थं चातिप्रसंगाभावात् कार्यकारणभावोपि न सामानाधिकरण्यप्रत्यासत्त्या विशेषितः इति भावः। ननु
सामानाधिकरण्यावच्छिन्नस्याव्यवहितोत्तरत्वस्यैव निरूपकत्वसंबंधेन सिद्धिविशिष्टानुमितित्वं न येन न कार्यकारणभावानन्वयमेतन्त्राह अपि चेति। सामान्यसामग्रीतरेति। सि
द्ध्युत्तरानुमितिस्थले यावदुपधायकपरामर्शात्मनो योगादिनस्यासिद्धिकालेपि सत्त्वात्सिद्ध्युत्तरं तथैव सामग्र्याऽनुमित्युत्पादप्रसंगः। न च सिद्ध्युत्तरानुमित्युपधायक
परामर्शादिव्यक्तेस्तत्त्वेन हेतुत्वस्यावश्यकत्वात्तदभावादेव सिद्धिकाले सामान्यसामग्रीतोऽनुमित्यनुत्पाद इति वाच्यं। परामर्शेनैकानुमित्युत्तरं विनश्यदवस्थेन विनापि
सिसाधयिषामनुमित्स्येत्तरजनने न तत्पाततात्। तत्परामर्शव्यक्तितदात्ममनोयोगादिव्यक्तीनां सत्त्वात्। न च तत्तद्रूपसंबंधेन च कारणं। अनंतानां रूपसंबंधानां तत्तद्व्यक्तित्वेनानं
न कार्यकारणभावमपेक्ष्य तादृशसिद्ध्यभावस्यैकस्यैव हेतुत्वकल्पनालाघवात्। अन्यथा सर्वत्रैव तत्तद्रूपसंबंधानां विशिष्टहेतुत्वेनैवातिप्रसंगभंगे विशेषकारणमात्रस्यै
व कल्पनानास्यादिति। ननु सामान्यसामग्री विशेषसामग्रीसहितैव कार्योपधायिका। प्रकृते तु सिसाधयिषारूपविशेषसामग्रीविरहान्न तत्कार्यमित्याशंकां निराकरोति
नहीति। तादृशेति। सिसाधयिषारूपेत्यर्थः। तद्विशेषेति। तत्परामर्शव्यक्तितन्मनोयोगव्यक्तीनामपि पूर्वोक्तरीत्या सत्त्वादिति भावः। ननु सिद्ध्युत्तरानुमितौ सिद्ध्यभावरू
पविशेषसामग्री प्रकृते वातिप्रसंगभंगे कार्यकारणभावद्वयकल्पनागौरवमित्यर्थः। शंकते। इच्छाया मानेति। इत्थं सिद्धिकाले। सा अनुमितिः। सा वा सिद्ध्युत्तरानुमितिः। तत्का
रणं। सिसाधयिषा। सा सिद्ध्युत्तरानुमितिः। एतादृशसामग्र्याः विनापि सिसाधयिषां सिद्ध्युत्तरानुमितिजनकत्वादेतादृशसामग्रीवशादनुमितिसामान्यं स्यादि
त्यर्थः। कारणाभावस्य प्रतिबन्धकत्वानसंभवतीति भावः। ननु परस्य तां हेतुत्वे परामर्शोऽवच्छेदकोऽस्त्वित्यत आह करणव्यापारत्वेनेति। तथा च करणस्य व्यापारव
त्वनियमात्परामर्शस्य हेतुत्वमावश्यकं परस्तु तया स्वव्यापारत्वासंभवात् करणत्वविशिष्टपर्वते धर्मतास्तां न हेतुरिति क्रमेणावच्छेदकत्वमेवेत्यर्थः। प्रतिबंधकान्तरे

ति। बाधादीत्यर्थः। अन्यथा स्वतंत्रान्वयव्यतिरेकशालिनो परहेतुत्वे। यथासंभवमिति। यत्र निमित्तकारणस्य समवायिकारणप्रत्यासत्त्या कारणत्वं तत्रेत्यर्थः। य
थाइच्छां प्रति ज्ञानादिस्तत्र ज्ञानविशिष्टत्वेनैव हेतुतयातिप्रसंगवारणसंभवादिति। समवायिकारणस्य कार्येण तादात्म्यसंबंधेन स्य कारणत्वमावश्यकमिति भा
वः। तदभावस्य। अनुमितिसाधारणसिद्ध्यभावस्य। तदसंभवात्। तादृशसिद्ध्यभावासंभवात्। सा अनुमितिः। यस्मेत्यादि। कार्यसमकालतया। कार्योत्पत्ति
क्षणावच्छेदेन कार्याधिकरणदेशवृत्तितया। तथात्वेन कार्यकालवृत्तित्वेन तु सर्वस्य प्रतिबंधकाभावस्य। अन्यथा एकत्र कृते तेनैवान्यत्रापि कार्यजनने। समवा
यिकारणस्येति। अन्यथा विनश्यदवस्थस्य समवायिकारणत्वे। निराश्रयत्वं रूपादिकं न चेत्कार्यस्यादिति। यद्यपि प्रतिबंधकाभावस्य कार्यसहभूतत्वेन हेतुता कारण
मात्रस्य तथात्वापत्तिरिति समवायिकारणस्येति विशेषानुधावनमफलं। तथापि कार्यसामान्ये समवायिकारणस्यैव तथात्वेऽपि तत्त्वं न तु प्रतिबंधकाभावस्य य च गुण
विशेषे द्व्यविशेषवा प्रतिबंधकत्वमेव न स्वसंततत्तदभावस्य हेतुत्वादि नियतत्वप्रसक्तौ। कार्यसहभूतत्वेन हेतुत्वप्रसक्तौ। प्राभाकरादेवेति। तेषां कार्यसहवर्तिनः
हेतुत्वात् विनश्यदवस्थदशायां कारणमात्रस्य राजावादिति भावः। अत्रेदं तत्त्वं यत्र यत्कारणत्वोच्छेदोऽस्य तत्र तद्रूपेण तदव्यवहितपूर्ववृत्तित्वं तस्य अभावः इत्याकारकान्व
यव्यतिरेकाभ्यां हेतुत्वग्रहः। सत्या धूमोत्पत्तिकाले विधिकरणान्तरेयत्पाशनावस्य सत्त्वात् तत्र यत्रेत्यस्यान्वयव्यतिरेकशरीरप्रवेशः। तथा च स्वाधिकरणरूपाव्यवहित
पूर्ववृत्तित्वप्रत्यासत्त्या सत्यामपि घटाभावादेः कारणत्वं मपुत्पत्तिक्षणाव्यवहितपूर्वक्षणावच्छिन्न तदधिकरणक्षणाव्यवहितपूर्वक्षणइति। एवं समवायिकारणस्यापि स्वाधि
करणक्षणाव्यवहितपूर्वक्षणवृत्तित्वप्रत्यासत्त्या कारणत्वं। तेनाविनश्यदवस्थसमवायिनो न कार्योपधायकत्वं। कारणताग्रहश्चैवं यत्र घटोत्पत्तिः स्वाधिकरणक्षण
व्यवहितक्षणे कपालमिति। स्वाधिकरणक्षणाव्यवहितपूर्वक्षणे यदा कपालमिति तदेव समवहितेन दानत्र कपाले तदुत्तरक्षणे घट इत्याकारकान्वयव्यतिरेकग्रहः। नन
ु दंधेनेत्यादि। प्रतिबंधकदंधेनेत्यादि दाहोत्पत्तिकालीनमणाभावत्वेन हेतुत्वे कारणतावच्छेदकावलीढस्यैव पूर्वसत्त्वं कार्योपधायकत्वे नन्वात्र नानन्यत दाहोत्पत्तिक्षणवृत्तित्व

भावानंदी

९०

विशिष्टस्यतद्ग्रहपूर्वकालेसत्त्वेपिक्षतिः।एवंतत्तद्घटंप्रतितत्तत्कालीनतत्तत्कपालत्वेनहेतुत्वंसामान्यसामग्र्यांचविशेषसामग्र्यासहकारेणैवका
र्यपिधापिकेतिविनश्यदवस्थकपालेनघटोत्पत्तिरित्यपिकेचित्।धारावाकरास्त्विति।क्वचिदिति।यत्रानुमित्युत्पत्तिक्षणेपिपरामर्शांतरसामग्री
नियमात्तत्रेत्यर्थः।परामर्शेति।परामर्शप्रवाहस्यानुमितिप्रवाहस्यचेत्यर्थः।एकानुमितिनाशानंतरमपरानुमितिरित्यत्राह।कार्यत्वेनेदेति।सिद्धेर
प्रतिबंधकत्वेकथंसिद्धसाधनोद्भावनेनपरस्यनिग्रहइत्यतआह।परार्थेति।अर्थांतरेति।सिद्धेर्थेआकांक्षाविरहात्तदभिधानमर्थांतरमित्य
र्थः।।पक्षतासमाप्ता।।

राम
९१

श्रीरामायनमः।।मूलेव्यभिचारज्ञानेसत्युपाधित्वादिनियोजनेत्संकल्पनागौरवात्मव्याप्तिनिश्चयत्वस्यासंगतत्वात्तदुपोद्घातस्यासंगतत्वादाह।प्रसंगादिति।स्मृ
तस्यानुपेक्षणीयत्वंप्रसंगः।ननुःपूर्वग्रंथेयेनक्रमेणास्यतत्त्वंतत्प्रदर्शनायउपाधित्वानादित्यादिमूलं।व्याप्तिग्रहोपायेसाचक्षुविदुपाधिसंदेहादित्यत्रनिश्चयप्रावण्ये
जन्यीभूतव्यभिचारशंकाकारणज्ञानविषयत्वेनोपाधेःस्मारितत्वादितिभावः।उक्तेचमूलेनव्याप्तिनिश्चयइत्यनंतरमुक्तमितिशेषः।साध्यत्वसाधनत्वेव्याप्यत्वव्याप ध न ३
कत्वरूपे।अभिमानस्यविशेषणत्वेयत्रनतदभिमानस्तत्राव्याप्तिःसाध्यतावच्छेदकादीनामप्रवेशावश्यकत्वेवैयर्थ्यंचेत्यतआह।यावदिति।यद्वदच्छिन्नव्यापकत्वे
सनियदवच्छिन्नाव्यापकइत्यर्थः तेनगुणकर्मान्यत्वविशिष्टसत्तावान्ज्ञानेरित्यादौसंयोगीगुणकर्मान्यत्वेसतिसत्त्वादित्यादौनद्रव्यत्वेऽव्याप्तिव्याप्ती।।एकरूपेणेति।ए
कप्रकारेणैकसंबंधेनेत्यर्थः।तेनद्रव्यत्वत्वेनसमवायेनवह्निधूमंवाप्रतिव्यापकस्यद्रव्यत्वस्यवह्नित्वादिनासंयोगसंबंधेनवाधूमंवह्निप्रत्यव्यापकत्वेपिवह्निमान्धूमाद
त्यत्रधूमवान्वह्नेरित्यत्रचद्रव्यत्वादौनातिव्याप्तिः।नद्वन्निष्ठात्वंनानावाप्रतियोगित्वरूपव्यापकत्वप्रवेशेव्याप्तेरप्रवेशेन्योन्याश्रयस्यासिद्धेराह।साध्यनिष्ठव्या
प्तीति।धूमवान्वह्नेरित्यत्रार्द्रेंधनरूपोपाधेःसाध्यव्यापकत्वंसाध्यनिष्ठव्याप्तिनिरूपकत्वंधूमनिष्ठव्याप्तिग्रहेचार्द्रेंधनव्यापकत्वसामग्रीरूपोपाध्यभावज्ञानेकार
णं।आर्द्रेंधननिष्ठतत्सामग्रीव्याप्तिग्रहेचद्रव्यत्वादिरूपोपाध्यभावज्ञानंकारणमितिक्रमेणानवस्थायाएवसंभवात्।अन्योन्याश्रयणेवनसंभवतीत्यतस्तदुपपादयति
साध्येति।सउपाधिनिरूपितसाध्यनिष्ठव्याप्तिः।यावदुपाधिव्यापकेव्यापकत्वरूपनिरुपाधिकत्वेति।यावत्स्वव्यभिचारिव्यभिचारिसाध्यसामानाधिकरण्यरूपानोपा
धिकत्वज्ञानहेतुत्वेव्याप्तेरप्रवेशोनान्योन्याश्रयासंभवादिति।अतएवज्ञानादेवेति।एवकारेणउक्तरूपसाध्यव्यापकत्वाधटितानोपाधिकत्वोरत्तोनव्यवच्छेदः।धू
मनिष्ठार्द्रेंधनव्याप्तिग्रहेयावत्आर्द्रेंधनव्यापकोधूमइतिज्ञानंकारणंवाच्यं।आर्द्रेंधनव्यापकंचार्द्रेंधनमयीतितत्रापिधूमनिष्ठव्याप्तेःतन्निरूपकत्वज्ञानमपेक्षितंतथा राम

त्वार्द्रेंधनेधूमनिष्ठव्याप्तिनिरूपकत्वप्रवेशे सति धूमनिष्ठतद्व्याप्तिग्रहः धूमनिष्ठतद्व्याप्तिग्रहे च सति विशेषणतानानव्याप्तिनिरूपकत्वं आर्द्रेंधने ग्राह्यमित्यन्योन्याश्रयः
धूमनिष्ठव्याप्तिस्तन्निरूपकत्वस्य च ग्राह्यत्वे चेदात्माश्रयः। अत एव यावदुपाधिव्यापकव्याप्यत्वमुपेक्ष्य साध्यव्यापकत्वमित्युक्तं। समानेतरमाह व्यापकत्वमित्यादिना।
मेवेद् अविशेषितव्यापकत्वकथनेन यत्र न व्यापकत्वं निविष्टं तत्र तन्निष्ठव्याप्तिनिरूपकत्वं न तस्या। अन्यथोपाधिव्यापक इत्यत्र तन्निष्ठात्यंताभावाप्रतियोगित्वरूपतद्व्या
पकत्वप्रवेशोऽनवस्थापातः प्रसंगवान्। स्वमते तु उपाधिनिष्ठसाध्यव्यापकत्वमात्रं साध्यनिष्ठव्याप्तिनिरूपकत्वरूपं उपाधिव्यापकेत्यादौ अन्यादृशव्यापकत्वप्रवेशोऽन्यो
न्याश्रयापरिहारात्। अत एवोपाधेः साध्यव्यापकत्वमिति विशेषितमेव स्वयमुक्तं। न त्वविशेषेति। अनौपाधिकत्वशरीरप्रविष्टोपाधित्वप्रविष्टेत्यर्थः। संप्रदायइति। अपदार्थ
व्याख्येवास्वरसः। ननु तदधिकरणानधिकरणत्वं उपाधिताघटकसंबंधेन तदधिकरणवृत्तित्वे। अन्यथा संबंधभेदमादायाव्याप्तेः। तथा च द्रव्यं सत्त्वादित्यादौ सत्त्वा
धिकरणगुणनिष्ठसंयोगाभावाधिकरणवृत्तित्वस्य संयोगे सत्त्वात् साधनाव्यापकत्वसमर्थनेपि जातिमान्मेयत्वादित्यादौ सत्तादेः समवायेनोपाधित्वं न स्यात्
मेयत्वाधिकरणसामान्यादिनिष्ठसत्ताभावाधिकरणसामान्यादौ समवायेन वृत्तेरप्रसिद्धत्वात् तदधिकरणवृत्तित्वस्य सत्तायामसंभवात्। एवं द्रव्यं सत्त्वादित्यादौ विशि
ष्टसत्त्वस्योपाधित्वं न स्यात् विशिष्टस्यानतिरेकेण गुणाद्यवृत्तित्वस्य तत्रासत्त्वात्। अत आह तदधिकरणेति। विरोध्यर्थकेन नञा तदधिकरणाधिकरणविरोधित्वं ल
ब्धं नञ्च प्रतियोगित्वविशेषणमिति दर्शयति यत्प्रतियोगित्वमिति। तदधिकरणेति यमानमधिकरणं तु तदधिकरणाधिकरणत्वेन संभाव्यते यार्थकत्वेन ज्ञानवि
षयत्वलाभात्। विरोधित्वं च ग्रहप्रतिबंधकग्रहविषयत्वं यादृशप्रतियोगित्वज्ञाने यदधिकरणे प्रतियोग्यधिकरणत्वग्रहप्रतिबंधस्तादृशप्रतियोगित्वमिति
कलितार्थः। कीदृशं तदत आह प्रतियोगीति। प्रतियोगित्वपदस्यैव प्रतियोगिव्यधिकरणाभावार्थकत्वेन तन्निष्ठाभावेऽसत्त्वाभावे तस्य वैयर्थ्यमत आह। प्रति

योगिव्यधिकरणत्वेनेति। न च कालः परिमाणवान्मेयत्वादित्यादौ कालिकसंबंधेनोपाधौ घटादावव्याप्तिः तेन संबंधेन काले प्रतियोगिव्यधिकरणस्याभावस्या
प्रसिद्धिरिति वाच्यं। प्रतियोगितावच्छेदकसंबंधेन निरूक्तप्रतियोगिव्यधिकरणसाध्यवन्निष्ठाभावप्रतियोगितायां यद्धर्मावच्छिन्नत्वयत्संबंधावच्छिन्नत्वोभयाभा
वस्तेन संबंधेन तद्धर्मावच्छिन्नस्यैव साध्यव्यापकत्वादिति भावः। स्वयं च समानस्य सत्त्वया मोमित्रात न यत्वादित्यत्र साधनावच्छिन्नसाध्यव्यापकस्य शाकपाकज
स्य साधनस्यापि यद्रूपधर्मस्तात्स्वरूपधर्मावच्छिन्नसाध्यव्यापकत्वस्य संभवात् वायुः प्रत्यक्षः प्रत्यक्षस्पर्शाश्रयत्वादित्यादौ बहिर्द्रव्यत्वावच्छिन्नसाध्यव्यापकस्यो
द्भूतरूपस्य प्रत्यक्षस्पर्शाश्रयत्वरूपसाधनावच्छिन्नसाध्यव्यापकत्वसंभवाच्च संकर्षमत आह। अग्रेइति। यत्र पक्षे हेतुमति च साध्यमित्यादिग्रंथे इत्यर्थः। पक्षा अनयोरिति
पक्षे(दितरइति यं च मीनत्सुरूपे सर्वनामकार्यपक्षे तस्मिन्निति निस्पारतो बहुव्रीहिमाह। पक्षेतर इति। पक्षेतरस्य प्रमेयत्वादेः पक्षेपि सत्त्वात्साधनव्यापकत्वम ५
त आह। भावप्रधानेति। न च भावप्रधाननिर्देशादेव सर्वनामकार्याभावे बहुव्रीह्याश्रयणमसंगतं। सर्वनामशक्तिमूलकत्वरूपायाः अर्थनिरोपस्थापनेपि सर्वना
मकार्यस्य संभवात् बहुव्रीहेस्तथात्वेपि निषेधानुशासनबलादेव सर्वनामकार्याभावादिति। पक्षेतरपदस्य पक्षावृत्तिधर्मार्थकत्वे अग्रे पर्वतेतरान्यत्वादित्यत्र पर्व
तावृत्तिधर्मोन्यत्वाविरसर्धेः संगतिः तत्र धर्मित्वरूपकत्वेप्रपमत एव धर्मित्वरूपकत्वे स्यादित्यस्वरसः केचिदित्यनेन सूचितः। भावप्रधानत्वं विनैवोपपत्तिमाह तादा
हि३ त्म्येनेति। बहुव्रीहावश्यकत्वे इति भावः। अत एव। तादात्म्येन व्यापकत्वस्य तात्पर्यविषयत्वादेव पर्वतेतरस्य तादात्म्येन साध्यव्यापकत्वे तादात्म्यावच्छिन्नप
र्वतेतराभावः पर्वतेतरान्यत्वरूपो व्यापकाभावे न यावत्साधनावसाधने हेतुरूपपद्यत इति भावः। इतरथा। भावप्रधाननिर्देशेन प्रकृतेन ग्रंथस्य पर्वतेतरत्वापुपा
धिपरत्वे। व्यापकत्वादिति। पर्वतेतरत्वरूपव्यापकत्वेनोऽन्योन्याभावः पर्वतेतरान्यत्वरूपस्य स्यापीत्यर्थः। गमकत्वं। व्याप्याभावसाधकत्वं। संगमनीयं पर्वतेत

शान्यत्वादिकमनुपपद्यते। यद्यपीति। व्यर्थविशेषणत्वरहितविशेषणतावच्छेदेनान्वयव्याप्तिविरोधितयानुमाने दोषः। अत्र तु व्यतिरेकव्याप्तिरेव गमकत्वे यद्यपीति व्य
[माकिंचित्करं]
र्थविशेषणत्वमिति भावः। तथा वैयर्थ्यं पर्वतेतरव्यतिरेकस्य वह्न्यभावव्याप्यत्वे पर्वतांशस्य वैयर्थ्यं। तथापि अनुमानदूषकव्यर्थविशेषणत्वस्याभावेऽपि। वास्तवेति। यद्व्यतिरेक
त्वं साध्याभावव्याप्यतानवच्छेदकविशेषणघटितत्वे सति साध्यव्यापकत्वादिशालित्वं विवक्षितं। प्रगल्भमतमाह। यद्योरिति। व्याप्यवृत्तिव्यतिरेकित्वं व्याप्यकोटौ वन्व
यव्याप्तौ साध्यसाधनयोर्विशेषणं नतु व्यापककोटौ अतिरेकव्याप्ताविति दर्शयितुं व्यापकव्यतिरेकव्याप्तिं विवक्ष यन्मनुपपन्नस्य व्याप्तिं दर्शिता। अथ यथा व्याप्यवृत्तिव्यतिरे
किणोर्यद्योरन्वये व्याप्तिस्तयोरवश्यं व्यतिरेकव्याप्तिरित्युक्तौ तद्देन पूर्वोपस्थितपरापरौ व्याप्यवृत्तिव्यतिरेकित्वं व्यापककोटावपि लब्धं स्यादिति। हेतुतावच्छेदकरूपेण
हेतुतावच्छेदकसंबंधेन व्याप्यवृत्तिव्यतिरेकप्रतियोगित्वे सति यः साध्यतावच्छेदकसंबंधावच्छिन्नतादृशाभावप्रतियोगित्वावच्छेदकधर्मावच्छिन्ननिरूपितव्याप्यत्ववान्स
तत्संबंधावच्छिन्नतद्धर्मावच्छिन्नतत्प्रतियोगिकाभावत्वावच्छिन्नव्याप्यतानिरूपितव्यापकतावच्छेदकतद्रूपावच्छिन्नतत्संबंधावच्छिन्नप्रतियोगिताकाभावत्वावच्छिन्नप्रति
योगीति व्याप्त्यर्थः। संयोगिप्रमेयं वा द्रव्यत्वादित्यादौ व्यभिचारवारणाय साध्यादिशि व्याप्यवृत्तिव्यतिरेकप्रतियोगित्वमुक्तं। संयोगस्यापि समवेतसामान्याभावरूपव्याप्य
वृत्तिव्यतिरेकप्रतियोगित्वात् साध्यतावच्छेदके तादृशप्रतियोगितावच्छेदकपर्यन्तानुधावनं। प्रमेयत्वादेरपि कालिकसंबंधावच्छिन्नव्याप्यवृत्त्यभावप्रतियोगित्वात् साध्यतावच्छेद
कसंबंधावच्छिन्नत्वेन तादृशप्रतियोगितायां विशेषणं भिन्नि द्रव्यं संयोगादित्यादौ व्यभिचारवारणाय हेतुदिशि सत्यंतं संयोगाभावस्य केवलान्वयितया तन्निरूपितव्याप्यतायां
द्रव्यत्वाभावस्य द्रव्यत्वविशेषणवैयर्थ्येनानवच्छेदकत्वात्। संयोगस्यापि समवेतत्वरूपेण व्याप्यवृत्तिव्यतिरेकप्रतियोगित्वात् अधिकरणसंबंधेन संयोगाभावस्यापि व्याप्य
वृत्तित्वाच्च तथैव दोष इत्यतो हेतुतावच्छेदकरूपेण हेतुतावच्छेदकसंबंधेनेति च। पर्वतेतराभावस्य तत्त्वघटितत्वादिना वह्न्यभावव्याप्यत्वे व्यर्थविशेषणत्वाभावादुक्तं अपनीय व्या
व्यापककोटौ तद्रूपाभावत्वावच्छिन्नव्याप्यत्वस्य संबंधभेदस्य चानुधावनं। अन्यथा प्रमेयत्वादीनामपि कालिकसंबंधावच्छिन्नाभावस्य संयोगादीनामपि स्वसमानाधिक राम

२

रणद्रव्यत्वादिरूपपरंपरासंबंधादिनाभावस्य व्याप्यत्वव्यापकत्वयोः संभवात्। व्याप्यवृत्तिव्यतिरेकित्वं साध्यसाधनयोर्व्यर्थमेव स्यात्। न च व्याप्यवृत्तित्वं व्यतिरे
कित्वविशेषणं विशेषणमेवास्तु व्याप्यवृत्तिर्यो व्यतिरेकस्तत्प्रतियोगित्वमित्यनुसरणे किमर्थमिति वाच्यं। आकाशाभाववान् द्रव्यत्वादित्यादौ व्यभिचारात्। आकाशा
भावस्याकाशाभावमते आकाशरूपव्यतिरेकप्रतियोगित्वात्। व्याप्यवृत्तित्वे सति वृत्तिमद्व्यतिरेकित्वस्य निवेशने च यास गौरवात्। अत एव व्याप्यवृत्तिव्यतिरेकप्रतियोगित्वं
साध्यविशेषणमसंगतमित्याह नो व्याप्यवृत्तित्वमात्रं निवेश्य तेनावनेव द्रव्यं संयोगादित्यादौ व्यभिचारवारणसंभवादिति दूषणं प्रत्युक्तं। यथा संनिवेशे वैयर्थ्याभावात्। केचि
त्तु स्वसमानाधिकरणतादृशधर्मान्तराघटितलघुरूपसमनियतगुरोरपि व्याप्यतावच्छेदकत्वमिति मते द्रव्यं कंबुग्रीवादिमत्त्वादित्यादौ कंबुग्रीवादिमत्त्वावच्छेदेन द्रव्यत्वव्याप्ति
सत्त्वेऽपि कंबुग्रीवादिमत्त्वावच्छिन्नाभावस्याप्रसिद्ध्या व्यतिरेकव्याप्तिरसंभवात् व्यभिचार इत्यतो व्याप्यवृत्तित्वस्य स्वातंत्र्येण हेतौ विशेषणत्वेऽपि हेतुतावच्छेदकरूपेण
व्यतिरेकप्रतियोगित्वे विशेषणमावश्यकमित्याहुः। तत्तुच्छं। व्याप्यवृत्तिव्यतिरेकिणोर्हेतुसाध्ययोर्यथासंख्यमन्वयः। न यथा च व्याप्यवृत्तित्वं हेतौ व्यतिरेकित्वं सा
ध्ये विशेषणं। अन्वयव्याप्तिश्च प्रतियोगिव्यधिकरणाघटितत्वेनोपादेया। इत्थं संयोगी द्रव्यत्वादित्यादौ द्रव्यत्वे प्रतियोगिव्यधिकरणाघटितसंयोगव्याप्य
भावसत्त्वादेव न व्यभिचारः। व्यतिरेकित्वे च वृत्तिमद्व्यतिरेकप्रतियोगित्वं तेनाकाशाभावसाध्यके न व्यभिचारः। इत्थं चात्र बोध्यं। पर्वतेतरत्वेन वह्निमत्त्वावच्छिन्न
व्याप्यतानिरूपितव्यापकतांशालि। वह्न्यभावत्वावच्छिन्ननिरूपितव्याप्यतावच्छेदकीभूतताभावत्वावच्छिन्नप्रतियोगितावच्छेदकावच्छिन्नत्वाभावान्न तादृशप्र
तियोगितावच्छेदकं च वह्निसामग्रीत्वादिकमेव प्रसिद्धं। यदि च पर्वतेतरत्वेऽपि तद्घटितत्वरूपावच्छेदकमादाय हेत्वसिद्धिराशंकते तदा पर्वतेतरत्वेन तादृशव्या
पकतावच्छेदके वह्न्यभावत्वावच्छिन्ननिरूपितव्याप्यतावच्छेदकस्वावच्छिन्नाभावत्वकत्वाभावादिप्रयोगः। तादृशं स्वं वह्निसामग्रीत्वादिकमेव प्रसिद्धमिति। इदं च
चिंत्यं पर्वतभेदत्वादिनो याधिस्वस्य वारणेऽपि तद्घटितत्वेन तत्त्वं दुर्वारमिति दिक्। अहेतुकत्वेति। इदं शरीरहेतुकमहेतुकत्वादित्यत्र व्यतिरेके शरीरविशेषणवै

यथेति न व्याप्यत्वाभावेऽन्वयव्याप्तिसत्त्वादित्यर्थः। धूमाभाववान्वह्न्यभावादित्यादौ धूमाभावत्वादिना व्याप्तिविरहेऽपि नक्षतिः। तत्र धूमव्यापकवह्न्यभावादिनाऽ
वधूमाभावानुमानसंभवे धूमाभावत्वावच्छिन्नवह्न्यभावनिष्ठव्याप्तेरनभ्युपगमस्यापि संभवादिति नक्षोहितं। ननु व्यतिरेकपदेन सप्तमपदार्थरूपोऽभावो वाच्यः
न चैवं प्रकृतासंगतिः पर्वतेतरत्वाद्यभावस्यापि पर्वतत्वरूपत्वादिति वाच्यं। पर्वतनिष्ठभेदप्रतियोगित्वाभावस्य पर्वतत्वसमनियतस्यापि प्राचां मते प्रतियोगि
भेदेन भिन्नस्य सप्तमपदार्थरूपत्वादनपायादेवमपीति। स्वविशेषणघटितविशेष्यतावच्छेदकावच्छिन्नाधिकरणवृत्तिस्वविशिष्टतद्विशेष्यतावच्छेद
कावच्छिन्नाभावके यद्विशेषणं तदवच्छिन्नतद्विशेष्याभावत्वभिन्नत्वेन साध्यतावच्छेदकं विशेषणीयं। अन्वयव्याप्त्यनभ्युपगमो बाधःस्वरसहृत्याहुः। एवमपि।
उक्तव्याप्तिस्वीकारेऽपि। केवलान्वयिनीति) व्याप्यवृत्तिव्यतिरेकित्वविशेषणेनैवाक्षव्याप्तेस्तथाप्यनभ्युपगमात्। तथा च पक्षेतरसामान्यभेदत्वातिव्याप्तिरने
नप्रकारेण वारयितुमशक्येति भावः। तदहितेति। साध्यरहितेपक्षे। उपाधिरेवेति। यत्र साधनाव्यापकत्वसंभवस्तत्रोपाधिरेवेत्यर्थः। संप्रतिपन्नोपायवा
ति प्रायेणेदं। नन्वखण्डत्वेत्यादिना तत्रोपाधित्वस्तानंस्यादित्युक्तं तच्चानलक्षणदूषणं। अलक्षणगमनस्यैवानिष्टापत्तिपर्यवसानात्। अत आशयं पूरयति
यद्विषयतेति। नान्यतः तदितरं तेनानुमापकं। अनुपपन्नत्वात्। अनुमानदूषणप्रसंगेनस्यानुपयोगात्। ननु प्रतिबंधकतानिर्विषयतावच्छेदकं। उक्तरूपं।
साध्यव्यापकत्वे सति साधनाव्यापकत्वं। अनुमितिमात्रेति। तथा चोक्तरूपेण प्रतिबंधकतावच्छेदकमित्युपेयं। तथा च तदुपाधित्वस्वरूपमिति भावः। मूले:
नुपाधित्वे। उपाधित्वघटकसाध्यव्यापकत्वानिश्चये उपाधिमात्रं उपाधित्वनिश्चयः पक्षवृत्तित्वेन निश्चितस्यैवोपाधित्वनिश्चयसंभवान्नउपाधिमात्रमिति न
संगच्छते अत आह। संप्रतिपक्षेति। पक्षवृत्तित्वेन निश्चयेन तदभावस्य पक्षे निश्चयेन सत्प्रतिपक्षत्वाभावादिति भावः। इत्थं च। व्यभिचारोन्नायकतया दूषकत्व
मते। विच्छेदः विशेषदर्शिनां साध्यव्यापकत्वनिश्चयः पक्षावृत्तेरिसस्यवापक्षावृत्तित्वेन निश्चितस्येत्यर्थः। विपक्षव्यावर्तकधर्मवत्त्वस्यापेक्षा पावीजमाह। वपक्षे। राम

३

ति। हरान्यत्वविशिष्टपर्वतेतरत्वादेरित्यर्थः। विपक्षव्यावर्तकत्वं चेत् यत्किंचिद्विपक्षवृत्तितावच्छेदकं यत्स्वविशेष्यतावच्छेदकं स्वविशिष्टतदवच्छिन्नाभाववत्त्व
द्विपक्षकत्वं तदत्र आर्द्रेन्धनत्वादि। तद्धि धूमसाध्यकविपक्षायोगोलवृत्तितावच्छेदकं यदिंधनत्वं तदवच्छिन्नस्वविशिष्टाभाववद् अयोगोलकात्मकं तद्वि
पक्षकं भवतीति नाद्यः। विपक्षव्यावर्तकान्यत्वं पर्वतान्यत्वादौ पर्वतादेरिति। द्रव्यं सत्त्वादित्यादौ गुणगुणाधौ गुणत्वमप्येवं विपक्षाव्यावर्तकं तद्विशेष्यतावच्छेदका
भावे। न निरुक्तव्यावर्तकायोगात्। अतो विपक्षाव्यावर्तकविशेषणानवच्छिन्नेत्यत्र विशेषणपदं यत्किंचिद्धर्मितावच्छेदकावच्छिन्नविशेषणत्वपरमिति तदर्थः
तेन गुणत्वादिनिरासः। वस्तुतस्तु यत्किंचिद्विपक्षभेदव्याप्यतावच्छेदककोट्यप्रविष्टत्वं विपक्षाव्यावर्तकत्वं। आर्द्रेन्धनादौ सर्वमेव विशेषणं तदयोगोलकभेदव्या
प्यतावच्छेदकं। पर्वतेतरत्वादौ पर्वतादिविशेषणं तु न यत्किंचिद्विपक्षभेदव्याप्यतावच्छेदकमिति। अत एव उपाधितावघटकसंबंधेन विपक्षवृत्तित्वस्य विवक्षायां
द्रव्यं सत्त्वादित्यादौ संयोगसंबंधेनोपाधेरव्याप्तिरिति दूषणमनवकाशं। विशेषणानवच्छिन्नेति। साध्यव्यापकत्वसाधनाव्यापकत्वयोरन्यतरमात्रान्वयि। न चैवं
पर्वतेतरत्वादावपि वह्निविशिष्टत्वेन साध्यव्यापकत्वस्य महानसत्वविशिष्टत्वेन साधनाव्यापकत्वस्य विपक्षाव्यावर्तकविशेषणानवच्छिन्नस्य सत्त्वान्नत्राति
व्याप्तिरिति वाच्यं। एकरूपावच्छिन्नसाध्यव्यापकत्वविवक्षणेनैव तन्निरासादिति। तद्विवक्षितं। भस्य विशेषणदानतुः विवक्षितमित्याशंक्य अस्मिन्नाप्यवामाह इ
त्यन्वयः। ननु तथापीत्यादिना पक्षेतरे व्याप्तेरभिधानं न घटते तस्य यमेव तत्रातिव्याप्तिकथनेन तस्यालक्षत्वस्वीकारात्। अत आशयं पूरयति। पक्षेतरत्वस्येति।
वस्तुतो वस्तुगत्या। इष्टकताप्रयोजकरूपवतः। तत्त्वेन ज्ञायमानस्य। इदं चोपाधेः सत्प्रतिपक्षवदनित्यदोषत्वाभ्युपगमेन। यदा तत्र साध्यव्यापकत्वादिनाज्ञानं तदो
पाधिरित्यभिप्रायेण। मूले च सर्वत्र साध्यव्यापकत्वादिपदं तज्ज्ञानपरं। तस्य पक्षेतरत्वस्य। वारणाय चेत्यत्रापि तस्यैवान्वयः। तथापीत्यादिना सत्प्रतिपक्षोन्नायक
त्वस्योपक्रमात्तत्र साधनाव्यापकत्वस्यानुपयोगात् साधारण्यापत्तावन्मात्रस्येति पदं व्याचष्टे साध्यव्यतिरेकोन्नयन इमेति। तथा च मूले मात्रपदेन विपक्षाव्या

वर्तकविशेषणानवच्छिन्नेत्यस्यानुदासः साध्यव्यापकत्वमात्रं न दूषकं पक्षे साध्यव्यापकाभावस्य साधनेवा साध्यव्यापकव्यभिचारस्य सत्प्रतिपक्षव्यभिचारस्य
वोन्नायकत्वादत आह। दोषेति। दोषस्य सत्प्रतिपक्षस्य व्यभिचारस्य वा। उन्नयनोपयोगित्वात्। उन्नयनोपयुक्तत्वादित्यर्थः। पक्षेतरस्य न जातित्वं दूषणासम
र्थेतरस्येव जातित्वादत आह नदुत्तरस्येति। एवं चोपाधेर्दूषकत्वं व्यभिचारानुमानद्वारा अनुमानमात्रस्योच्छेदे च व्यभिचारानुमानस्याप्युच्छेदापत्तेः पक्षेतर
स्य दूषणासमर्थकत्वेनासुत्तरत्वमिति निरर्थकारणाय विपक्षव्यावर्तकेत्यादिविशेषणं नानुचितमिति। अनन्तरे वेति मूलार्थः। मूले दूषणसमर्थत्वेन। अनुमानप्रवृ
त्तिस्कन्धस्थाने दशायामेवेति नानुमानमात्रोच्छेदइत्याशयः। पूर्वपक्षिणोपाधित्वस्यैवाभ्युपगमात्। उपाधित्वाभावेनेतद्दूषणं निर्युक्तिः सत्यत आह उपाधित्वानंगीका
रेपीति। तवेति शेषः। न स उपाधिरिति। तथा च तद्धारकं विशेषणं नायुक्तमिति भावः। व्यभिचारोन्नायकत्वाभावमुपक्रम्य पथ्याहीत्यादिना व्याप्यत्वावोन्नायक
त्वाभावेपि तुवचनमसंगतमतो न्यूनतानंगायपथ्युमेव पूरयति व्यभिचारादिति। आदिना व्याप्यत्वाभावपरिग्रहः। उन्नयस्यैवोपक्रमे व्यभिचारोन्नायक
त्वाभावे हेतुत्वप्रदर्शनान्न्यूनत्वमतो हेतुं पूरयति व्याप्यत्वादिनेति। साध्ये पूरयति प्रव्याप्यत्वादिति। ननु प्रतिपक्षे बकुत्वरूपबलसंपन्ने ये सत्प्रतिप
क्षे सत्प्रतिपक्षोद्भावनं युक्तमेवेत्यत आह व्याप्तीति। बकुत्वस्य। पतिपक्षबकुत्वस्य। न सत्प्रतिपक्षतायामिति। सत्प्रमप्यर्थस्यापयोगित्वं तथा चानुमिति
प्रतिबंधकतोपयुक्तं न बकुत्वं बलमित्यर्थः। अंगमंगेति। व्याप्तिपक्षधर्मतानंगेत्यर्थः। तत्कौत्यापकतया बकुत्वे बलमित्यर्थः। तथा चैतादृशतत्कौत्यापकं य
त्र तत्र तत्र सत्प्रतिपक्षे सत्प्रतिपक्षत्ववपुमापुद्भावनं व्यर्थमेवेत्यादि निमूलार्थः। किंचैवमित्यस्य एवमिति व्याचष्टे। एवमिति व्यतिरेके साधारण्यादि स
त्रापिहेतुप्रदर्शयन्नन्नित्यादेस्तात्पर्यार्थं हेतुं पूरयति। बाधस्यानिश्चयइत्यादिना। असाधारण्यात्। व्यतिरेके साधारण्यात्। वैयर्थ्यात्। उपाध्युद्भावन

तम
४

वैयर्थ्यात्। यद्वा व्यतिरेकइत्यनंतरं बाधस्यानिश्चयइति असाधारण्यादित्यनंतरं च निश्चयेत्यादिकं च पूरयन्फलाभावान्मान्तस्यापीत्याः त्रापिहेतु
पूरयति। बाधस्यानिश्चयेइत्यादिना। ननु वैयर्थ्यपि व्याप्तिबलादेवतत्रोपाधिर्नविध्यनीत्यत आह दर्शायापिरपिनास्तीत्याह मूलेतावेनोपाधिनिश्चमर
ति। हेतुमतीति। हेतुमतिपक्षे बाधे उपाधिनियमइत्येव व्याप्तिरूपाधेश्चान्यस्यासत्वात्परिशेषात्मस्तेनरण वोपाधिर्नविध्यनीत्याशयः। अनेन सत्वादिरूपा
धित्वसंभवादिति। तथा चानपरिशेषावकाशइति भावः। तेनोमात्रेति। अत्रैव परिशेषानुत्क्लेनियमबलेन पक्षेतरे उपाधित्वसंभवइति भावः। दीधितौन
ञासंकीर्णेति। व्यभिचाराद्यसंकीर्णेत्यर्थः। गंधप्रागभावावच्छिन्नोघटो गंधवान्पृथिवीत्वादित्यादौ प्रसिद्धस्य महानसीयवह्न्यर्महानसीयत्वेलाघवमिति
लाघवसहकारेण महानसीयवह्न्यादेर्व्यभिचारसाधके वह्निमान्धूमादित्यादौ वहेतुमतिपक्षे बाधसत्वेप्युपाधेरनावाद्यनिवारइत्यर्थः। साध्याभावत्वेवे
ति। साध्यतावच्छेदकावच्छिन्नाभावस्यैवेत्यर्थः। प्रकृते प्रकृत नियमो। अनिप्रायसंकोचनयाइत्याह तदनभ्युपगमादेति। असंकीर्णबाधानभ्युपगमात्। सिद्ध
तावच्छेदकसामानाधिकरण्यमात्रस्यैवानुमितिविषयत्वेन पक्षतावच्छेदकस्यावच्छेदकतयानुमितत्वविषयत्वात्। समानप्रकारकविरोधिनिश्चयस्यैव
विरोधित्वा यामहानसीयवह्नित्वेनाभावनिश्चयस्य वह्नित्वेन तदनुमितावविरोधित्वात् सल्लिंगपरामर्शस्य गुणतया बाधितार्थलाघवप्रतिसंधानव
शादपि न तत्तयानुमित्यसंभवादिति भावः। न त्समर्शीलमिति। असाधारणव्यतिरेकप्रतियोगित्वेनतुल्यमित्यर्थः। शुद्धसाध्यव्यापकस्येति। इत्यं चोपाधि
नियमइति मूलस्य शुद्धसाध्यव्यापकोपाधिनियमइत्यर्थः। एतद्व्यतिरेकः। अनेन सत्वादिव्यतिरेकः पक्षे। तेनोमात्रे साध्यस्यानुमितत्वव्यतिरेकस्यो
न्नत्वस्य। असिद्धौ अनिश्चये। सपक्षे। निश्चितसाध्यवति। तत्वादाविति। साध्यनिश्चयविषयत्वे सपक्षत्वं। ननु निश्चितसाध्यवत्त्वेनस्य नाप्रसिद्धि

MEMORIAL

रितिभावः। यी प्रयोक्षणोनि उद्भूतरूपवत्तेन मित्रसत्वनिश्चयेनेन सत्वनिश्चयस्यापि संभवाद्व्यतोन साध्यसहचारत्वासंभवादनुद्भूतरूपानुधावने। सपक्ष
सिद्धिमनुरुंध्य यी प्रयोक्षणो उक्तसत्वनिश्चयानुसरणे। न चाप्रतीतसाध्यतदभावसहचारत्वमिति साध्यनिश्चयस्याघटकत्वात्तदनुसरणं किमर्थमिति वा
च्यं। निश्चितसाध्यतदभाववद्वृत्तित्वमसाधारण्यमित्यस्य निश्चितसाध्यतदभाववद्वृत्तित्वपाठेऽनिश्चितत्वमित्यर्थकरणाभिप्रायेण तथानुस
रणादिति। यदा जलादावुक्तसत्वभ्रमयी प्रयोक्षणोनेन स्वाग्रहः प्रतदा तत्रोक्तपक्षेतरव्यतिरेकस्योक्तरूपसाधारण्याभावादुपाधित्वमस्तु न मिति किंवे
वमित्यादिमूलस्यासंगतिरिति स्वरसः। अन्ये परेइत्यनेन सूचितः। व्यतिरेकिणा सत्प्रतिपक्षसंभवाद्वेति मूले सम्भवतारपि तुमाह असाधारणे
हीत्यादिना। व्याप्तिग्रहप्रतिबंधो दूषकताबीजमित्यग्रेतनेन न संबंधः। नन्वन्वयव्याप्तिग्रहप्रतिबंधेऽपि व्यतिरेकसहचारबलाद्व्यतिरेकव्याप्तिग्रहादे
वानुमितिः स्यादत आह। व्यतिरेकेति। न ह विशेषात्। हेतुव्यतिरेकव्याप्तिग्रहाविशेषात्। न चेहेति। इह पक्षेतरस्य व्यतिरेके अन्वयव्याप्तिग्रहप्रति
रोधो न दूषकताबीजमित्यर्थः। व्यतिरेकित्वादिति। व्यतिरेकव्याप्तिग्रहाधीनसत्प्रतिपक्षतायामन्वयव्याप्तिग्रहस्याकिंचित्करत्वादिति भावः। अत एव मूले
व्यतिरेकिणा इत्युक्ते। न चासाधारण्येनस्यापि सत्प्रतिपक्षोत्थापकतया दोषत्वादिति मूलार्थं दर्शयितुमाह। नहि तीय इति। इह सत्प्रतिपक्षो दूषकताबी
तिने जमित्यर्थः। तदनवकाशात्। सत्प्रतिपक्षानवकाशात्। आगुक्तरीत्येति। यथा साध्यव्यापकव्यभिचारित्वेन साध्यव्यभिचारित्वमुन्नेयं। तथा साध्यव्याप्या
व्यापकत्वे साध्याव्यापकत्वमुपाधेस्यादिति रीत्येत्यर्थः। व्यभिचाराद्युन्नायकत्वस्येति। दूषकतायामबीजमित्यभिप्रायेणान्वयः। उपाधेरन्यतोऽपि शंकोद्भवा
दन्ययोगव्यवच्छेदासंभवात्तत्कृतानुपयोगाच्च एवकारस्याभिन्नक्रमं दर्शयितुं तथैव मूलमनुवदति। उपाधेरित्यादि। नवत्वेत्यादिकं मूलं कृतिपयप राम

५

दानि व्याचिख्यासुर्मूलमनुवदति। नवत्वेत्यादि। पक्षेतरेति। व्याप्तिवारणाय विपक्षाव्यावर्त्तकेत्यादिविशेषणदानात्तद्विशेषाभिव्याप्तिपरत्वं मूल
स्य दर्शयितुं पूरयति। उपादीयतामिति। न यापीति मूलमनुरुंध्याति व्याप्तिस्थलं दर्शयति। अत एवेति। यदि निश्चितसाध्याभाववत्त्वेन दाण्वत्वाव
च्छेदेनापि पक्षतायां परमाणोर्विपक्षत्वमक्षतमित्याशयेनाह। अत एवेति। यदि निश्चितसाध्याभाववत्त्वेन दाण्व्याण्वेति। न चाण्वभिन्नत्वे
नाण्वकस्यापि अण्वत्वेनाविशेषणत्वात्तस्य च विपक्षाव्यावर्त्तकत्वमस्त्येवेति वाच्यं। नहि घटकस्य तत्वेनोपाधौ प्रवेशः। किंतु अण्वत्वेन रूपेणपर
माणुरूपविपक्षस्य व्यावर्त्तकत्वमस्त्येवेति भावः। प्रकृतलक्षणप्रविष्टसाध्यव्याप्यत्वदूषकतायामनुपयोगित्वेऽपि पक्षेतरणदाने व्याप्तिवारकत
मेव सार्थकत्वात्तथेत्यादिमूलमनुपपन्नमतस्तदवतारणिकामाह नन्वित्यादिना। व्यभिचारादीति। आदिना सत्प्रतिपक्षपरिग्रहः। उन्नायकत्वे
व्याप्यतया व्याप्यीभूतव्यभिचारादिप्रतियोगिन्याभावमात्रेणेति। मात्रपदेन साध्यव्याप्यत्वादिघटितलक्षणस्य व्यवच्छेदः। उपाधित्वे तु पाधिपद
वाच्यत्वे। व्यापकव्यभिचारादाविति। आदिना सत्प्रतिपक्षोन्नायकव्यापकव्यतिरेकपरिग्रहः। न चैतस्य दूषणसमुच्चायकत्वे चकारवैयर्थ्यमिद
र्थमाह तेन रूपेणेति। दूषकतायामित्यस्य व्याख्या व्यभिचारस्येत्यादि। अतिप्रसंजनेनेति। व्यापकव्यभिचारित्वादावतिप्रसंजनेनेत्यर्थः। तथा च व्या
पकव्यभिचारित्वादावतिप्रसंगभंजकस्थलसत्तानिष्कामकस्य व्यभिचारेणेत्यादिदूषकताबीजस्यापि विषमव्यापकसाधारण्यवारणार्थं यत्सा
ध्यव्याप्यत्वविशेषणं तदवश्यमिति मतेनेतस्यापि वैयर्थ्यादिति मूलार्थः। मूलोक्तसाध्यप्रयोजकत्वस्य सद्भावेऽपि सत्त्वेनातिव्याप्तिः पूरयति। साधना

शितिभावः यो व्योम्नोति उद्भूतरूपवत्त्वेन मित्रत्वस्य निश्चयेनेतस्य निश्चयस्यापि संभवात् प्रतीतं साध्यसहचारत्वासंभवादनुद्भूतरूपानुधावने। सपक्ष
सिद्धिमनुरुध्य यो व्योम्नि उक्तत्वनिश्चयानुसरणे। न चाप्रतीतं साध्यतदभावसहचारत्वमिति प्रकृतसाध्यनिश्चयस्याघटकत्वात्तदनुसरणं किमर्थमिति वा
च्यं। निश्चितसाध्यतदभाववद्वृत्तित्वं हि साधारण्यमित्यस्य निश्चितसाध्यतदभाववद्वृत्तित्वे सति निश्चितत्वमित्यर्थकरणाभिप्रायेण तथानुस
रणादिति। यदा जलादावुक्तत्वभ्रमः यो व्योम्नि तेन स्वाग्रहः अतदा तत्रोक्तपक्षेतरव्यतिरेकस्योक्तरूपसाधारण्याभावादुपाधित्वमस्त्वेनमिति किं वे
व मित्यादिमूलस्यासंगतिरिति समस्वरसः। अन्ये परे इत्यनेन सूचितः। व्यतिरेकिणा सत्प्रतिपक्षसंभवाद्धेतिमूले समबलतारपि तु माह असाधारणे
हीत्यादिना। व्याप्तिग्रहप्रतिबंधो दूषकताबीजमित्यग्रेतनेन संबंधः। नन्वन्वयव्याप्तिग्रहप्रतिबंधेपि व्यतिरेकसहचारबलाद्व्यतिरेकव्याप्तिग्रहादे
वानुमितिः स्यादत आह। व्यतिरेकेति। तदविशेषात्। हेतुव्यतिरेकव्याप्तिग्रहाविशेषात्। न चेहेति। इह पक्षेतरस्य व्यतिरेकान्वयव्याप्तिग्रहप्रति
रोधान दूषकताबीजमित्यर्थः। व्यतिरेकित्वादिति। व्यतिरेकव्याप्तिग्रहाधीनसत्प्रतिपक्षतायामन्वयव्याप्तिग्रहस्याकिंचित्करत्वादित्यर्थः। अत एव मूले
व्यतिरेकिणा इत्युक्तं। न चासाधारण्येनस्यापि सत्प्रतिपक्षोत्थापकतया दोषत्वादिति मूलार्थं दर्शयितुमाह। न द्वितीय इति। इह सत्प्रतिपक्षो दूषकताबी
निने जमित्यर्थः। तदनवकाशात्। सत्प्रतिपक्षानवकाशात्। आगुरुतरेत्येति। यथा साध्यव्यापकव्यभिचारित्वेन साध्यव्यभिचारित्वमुन्नेयं। तथा साध्यव्याप्य
व्याप्यकत्वे साध्याव्यापकत्वमुपाधेरस्यादितिरीत्यर्थः। व्यभिचाराद्युन्नायकत्वस्येति। दूषकतायामबीजमित्याग्रिमेणान्वयः। उपाधिरन्यतोपि शंकोद्भा
दन्यथायोगव्यवच्छेदासंभवात्प्रकृतानुपयोगाच्च एवकारस्य लिङ्गक्रमं दर्शयितुं तथैव मूलमनुवदति। उपाधेरित्यादि। नन्वत्वेत्यादिकं मूलं कतिपयप

राम

५

दानि व्याप्तिरव्यासुर्मूलमनुवदति। नन्वत्वेत्यादि। पक्षेतरेति। व्याप्तिवारणाय विपक्षाव्यावर्तकेत्यादि विशेषणदानात्तद्विशेषितव्याप्तिपरत्वं मूल
स्य दर्शयितुं पूरयति। उपादीयतामिति। तथापीति मूलमनुरुध्याति व्याप्तिस्थले दर्शयति। अत एव इति। यदि निश्चितसाध्याभाववत्त्वेन तदा तत्त्वाव
च्छेदेनापि पक्षतायां परमाणोर्विपक्षत्वमहत्त्वमित्याशयेनाह। अत एव इति। यदि निश्चितसाध्याभाववत्त्वेन तदाऽन्यत्रैव इति। न चाणुभिन्नत्वे
ण्वणुकस्यापि अणुत्वेनाविशेषणत्वात्तत्स्य च विपक्षाव्यावर्तकत्वमस्त्येवेति वाच्यं। नहि द्व्यणुकस्य तत्त्वेनोपाधौ प्रवेशः। किंतु अणुत्वेन रूपेणापर
माणुरूपविपक्षस्य व्यावर्तकत्वमस्त्येवेति भावः। प्रकृतलक्षणप्रविष्टसाध्यव्याप्यत्वदूषकतायामनुपयोगित्वेपि पक्षेतरणदाने व्याप्तिवारकत
येव सार्थकत्वात्तथेत्यादि मूलमनुपपन्नमतस्तदवतारणिकामाह नन्वित्यादिना। व्यभिचारादीति। आदिना सत्प्रतिपक्षपरिग्रहः। उन्नायकत्वं
व्याप्यतया व्याप्यीभूतव्यभिचारादिप्रतियोगिनयावामात्रेणेति। मात्रपदेन साध्यव्याप्यत्वादिघटितलक्षणस्य व्यवच्छेदः। उपाधित्वे उपाधिपद
वाच्यत्वे। व्यापकव्यभिचारादाविति। आदिना सत्प्रतिपक्षोन्नायकव्यतिरेकपरिग्रहः। तथैवस्य दूषणसमुन्नायकत्वे च कारवैयर्थ्यात्तद
र्थमाह तेन रूपेणेति। दूषकतायामित्यस्य व्याख्या व्यभिचारस्येत्यादि। अतिप्रसंजनेनेति। व्यापकव्यभिचारित्वादावतिप्रसंजनेनेत्यर्थः। तथा च व्या
पकव्यभिचारित्वादावतिप्रसंगभंजकस्य लक्षणतानिवामकस्य व्यभिचारेणेत्यादि दूषकताबीजस्यापि विषमव्यापकसाधारण्यवारणार्थं पत्ना
ध्यव्याप्यत्वविशेषणं नवदत्रिमतेनस्यापि वैयर्थ्यादिति मूलार्थः। मूलोक्तसाध्यप्रयोजकत्वस्य सद्भावेपि सत्त्वेनातिव्याप्तेः पूरयति। साधना

व्यापकधर्मेति जनकजनकत्वादिरूपं प्रयोजकत्वं न विवक्षितमित्याह। साध्यान्वयेत्यादि। उन्नायकत्वं व्याप्यत्वे साध्यान्वयोन्नायकान्वयप्रतियोगित्वे
न साध्यव्यापके। साध्यव्यतिरेकोन्नायकव्यतिरेकप्रतियोगित्वेन साध्यव्यापकत्वं लभ्यते। आद्यदलेन पक्षेतरवारणमिति भावः। अन्यथा। उक्तरूप
प्रयोजकत्वस्यानियामकत्वेऽतिप्रसंगात्। विषमव्यापके पक्षेतरादौ विषमव्याप्तेन्दिधनादावतिप्रसंगात्। भूधानित्यस्य सार्थकत्वेनि ससाध्यके विष
मव्यापकादावतिप्रसंगादित्यतो व्याचष्टे अन्यवतः अन्यतरदिति। मूले विवक्षितं विवक्षितुमर्हं। प्रयोजकं उपाधिपदवाच्यत्वे इति तौ। न चैवमिति। एवंरूप
णेनोपपिकस्य साध्यव्यापकत्वस्योपेक्षणे। तथापि। साध्यव्याप्यत्वसन्निवेशापितुरपि। साध्यवत्त्वादावित्यादिना केवलान्वयिसाध्यकपक्षेतरादिसं
ग्रहः। अनुपाधित्वे उपाधिपदाप्रतिपाद्यत्वे। ननु स्वनिष्ठधर्मान्तरसंक्रामकतयापि योगोपपत्तौ स्वनिष्ठव्याप्तिसंक्रामकत्वस्यालाभान्नात्कथं न इत्ता
साध्यव्याप्यत्वस्यलाभ इत्यतआह। यद्धर्मेति। यद्धर्मविषयकबोधजनकसन्निधानं तत्पदसमभिव्याहारेणेत्यर्थः। यद्धर्मविशेष्यक विशेष्यतया
विशेषणतया वा। तत्र। उपाधिपदं। यथा स्फटिकलोहित्ये इति। अत्र स्फटिकविशेष्यकप्रतीतिप्रकारकत्वरूपषष्ठ्यर्थविशिष्टस्फटिकप
रस्य लक्षणा सप्तम्या अर्थोपाधिपदार्थतावच्छेदकीभूतस्ववृत्तिधर्मान्वयभेदः। उपाधिपदस्य स्ववृत्तिधर्मप्रकारकज्ञानजनकभेदश्चार्थः।
भेदे च प्रतियोगितया कुसुमादेरनुयोगितया स्फटिकादेरन्वयः। इत्थं च स्वभिन्नस्फटिकविशेष्यकप्रतीतिप्रकारीभूतलौहित्याभिन्नस्ववृ
त्तिधर्मप्रकारकप्रतीतिजनकं जपाकुसुममित्यन्वयबोधः। वस्तुतस्तु स्फटिके लौहित्ये जपाकुसुममुपाधिरित्यादौ उपाधिपदस्य धर्मप्रकारक
प्रतीतिजनक एवार्थः। जपाकुसुमादिपदोत्तरस्य सुपो वृत्तित्वं भेदे च लक्षणा वृत्तित्वस्योपाधिपदार्थैकदेशधर्मे भेदस्य च स्फटिकादावन्वयोनु

राम

६

त्तिवैचित्र्यात्। तोन स्वत्वानुगमादनन्तशक्तिकल्पनं। स्फटिकपदोत्तरसप्तम्या विशेष्यकत्वं उपाधिपदार्थैकदेशे प्रतीतावन्वितमित्यर्थः। धर्मश्चा
त्र तात्पर्यमर्यादया लौहित्यमेव धर्मत्वेन भासते तथा च स्वभिन्नस्फटिकविशेष्यस्ववृत्तिधर्मप्रकारकप्रतीतिजनकं जपाकुसुममित्यन्वयबोधः। जपाकु
सुमस्फटिकयोर्विप्रकृष्टत्वे तादृशप्रतीतिजनकत्वासंभवात्। अर्थतएव समीपवर्तित्वस्य लाभः। अस्तु वा तत्रापि सुपो लक्षणा धर्मत्वेनैव च स्व
वृत्तिलौहित्यादेर्भानं। नामार्थयोर्भेदान्वयबोधस्य विभक्त्यर्थोपस्थितिं विना प्रकृतेऽस्वीकारे भेदः। सामीप्यं चोपाधिपदस्यैवार्थः। तत्र च जपाकु
सुमादेर्नामार्थस्यैव विशेषणतया स्फटिकादेर्विशेष्यतयाऽन्वयः। एवमुपाधिपदार्थैकदेशे धर्मेऽपि जपाकुसुमादेरधिकरणत्वेनान्वयः। स्फटि
कलौहित्ये जपाकुसुममुपाधिरित्यत्रोपाधिपदस्य भेदः सामीप्यं वृत्तित्वप्र। तीतिजनकत्वं चार्थः। तत्र भेदादेरन्वयः। पूर्ववद्वृत्तित्वे च जपाकुसु
मस्य निरूपकतया लौहित्यस्य चाधिकरणत्वेनान्वयः। स्फटिकपदस्य स्फटिकविशेष्यकत्वं सप्तम्याश्च प्रकारकत्वमित्यर्थः। इत्थं च स्वभि
न्नसमीपवर्तिस्फटिकविशेष्यकस्ववृत्तिलौहित्यप्रकारकप्रतीतिजनकं जपाकुसुममित्यन्वयबोधः। अपि च मत्र साधनेऽउपाधिरित्यत्र प्र
थमसप्तम्या विशेष्यकत्वं द्वितीयसप्तम्यास्तादात्म्येन व्याप्यप्रकारकत्वं। साधनपदस्य वा धर्मपरतया व्याप्यत्वमात्रपरत्वं।
उपाधिपदस्य च सामानाधिकरण्यरूपं सामीप्यं तादात्म्यं वृत्तित्वं वा प्रतीतिजनकत्वं चार्थः। पदार्थान्वयः प्राग्वत्। एवं

च स्वसमानाधिकरणो तद्विशेष्यकस्वतादात्म्यव्याप्यप्रकारकप्रतीतिजनकोयमित्याकारकः स्वसमानाधिकरणोतद्विशेष्यकस्व
वृत्तिव्याप्यत्वप्रकारकप्रतीतिजनकोयमित्याकारकोवान्वयबोधइति।सोपाधिनियतस्योपाधेरभावप्रतियोगितावच्छेदकीभूतस्य
प्रसिद्धसंबंधस्याभावात्संयोगादिनासंबंधेनोपाध्यभावस्यव्यभिचारविरोधित्वाभावादिहोपाधिरितिव्यवहारे विषयस्याभावः
प्रकृतेयदभावशब्दार्थोवाच्यः।तत्रान्वयव्यतिरेकाभ्यांतद्विषयंदर्शयितुमाह।अस्तितावदित्यादिना।इहोपाधिरस्तीत्रोपाधिसामा
नाधिकरण्यादेर्विषयत्वंनिराकर्तुंव्यतिरेकमाह।नेहोपाधिरिति।तथासतिसद्धेतावपिनाहइत्योपाधिसामानाधिकरण्यसत्त्वान्ने
होपाधिरितिप्रतीतिर्नस्यादितिभावः।प्रतीतिविषयतामात्रेणनशब्दार्थतारादेस्यव्युत्पत्तिबलादेवबोधकत्वाद
तोव्युत्पत्तिंदर्शयितुंव्यवहारमप्याह।व्यवहारश्चेति।तौप्रतीतिव्यवहारौ।आलंब्येति।उपाधिव्यभिचारादयं
दभावशब्दार्थतायांकल्पकस्यव्युत्पत्तिबलस्यव्यवहाराधीनत्वात्।व्यवहारंचव्यवहर्त्तव्यक्त्वानविधयाव्यभि
चारादेःसंबंधत्वकल्पनयाचप्रतीतेरप्युपयुक्तत्वादितिभावः।उक्तप्रतीत्योर्यथाक्रमंविषयमाह।यदीतिप्र
मयत्वव्यभिचाराप्रसिद्ध्यायथाश्रुतस्यासंभवात्तात्पर्यप्रमयासंगमयति।अत्राह।तद्व्याप्यत्वेनिउभयत्रोपाधि

राम
७

पदस्योपाधेर्व्यभिचारेऽव्याप्यत्वेवालाक्षणिकत्वात्संमुखतोव्यवहारोपपादनंनघटनेइत्यतोलक्षणांविनाप्रकारा
न्तरमाह।यदिवेति।तेन।व्यभिचारेणव्याप्यत्वेनवा।तद्वत्त्ववृत्तीसाधनवत्त्वसवृत्ती।सप्तम्यर्थस्याभावान्वयमतिप्रसङ्ग
नित्वमुक्तं।इत्थंतथापितेनसंबंधेनोपाध्यभावःसाधननिष्ठोनेहोपाधिरित्यस्यार्थोवाच्यः।शाकाद्यत्वादिति।नेहोपाधिरित्य
स्योपाधिव्यभिचाराद्यभावार्थकत्वेप्यस्यव्यभिचारादौलक्षणा।तेनसंबंधेनोपाध्यभावार्थकत्वेवाअपितेनसंबंधेनपदभावपरत्वमिति
भावः।पर्यायाक्रान्तव्यभिचारविरोधित्वेसाध्यव्याप्यत्वस्यैवलाभात्साध्यसमव्याप्यत्वमुपाधेर्नलभ्यतइतितल्लाभायव्यभिचारविरोधित्वं
निर्वक्तितद्भावस्येत्यादिना।तदभावस्य।पक्षव्यभिचाराभावस्य।तत्सत्त्वइत्यादौतत्पदंतादृशयद्भावपरं।विषमव्यापकाभावस्यसाध्यादौ
व्यभिचारविरहेणसामानाधिकरण्यसत्त्वादव्यवस्थामिति।तद्विरहिणि।तदभावविरहिणि।विषमव्याप्याभावविरहिणिप्रमेयत्वादौव्य
भिचारस्यसत्त्वादव्यवस्थामिति।व्याप्यत्वस्यघटकत्वेसाध्यसमव्याप्याव्याप्यत्वात्मकयदभावविरहिणिगगनादौव्यभिचारासत्त्वाद
संभवइत्यतोधर्मइति।तद्विरहस्यव्यभिचारव्याप्यत्वेनत्वव्यभिचारविरोधित्वंस्वरूपतोनघटतइत्यतस्तदभावनिष्ठमेवदर्शितंतरनि

वक्तुं पूर्वदलमनुवदति। तत्सत्त्व इत्यादिना। यद्वा व्यभिचाराभावान्वयव्यतिरेकानुविधाय्यन्वयव्यतिरेकशालित्वरूपं व्यभिचा
रविरोधित्वमुक्तं। व्यभिचाराभावसमनियतत्वरूपं तदाह। तत्सत्त्व इत्यादि। अत्रापि उक्तव्याप्यत्वस्य घटकत्वे व्यभिचारविरहिणोऽग
नादेरुपाधिव्याप्यत्वरूपतदभावाभावादसंभव इत्यतो धर्मेति। ईदृशव्यभिचारविरोधित्वे आद्यदलाद्विषमव्यापकस्य द्वितीयदला
द्विषमव्याप्यस्य वारणीयत्वं। ईदृश इत्यादिना। व्यापक एवेति। धूमस्य विषमव्यापकमार्द्रेन्धनं तत्र स्वव्यभिचाराद्यभावसत्त्वेऽपि धू
मव्यभिचारसत्त्वादित्यर्थः। विषमव्याप्यं धूमस्य तन्महानसत्वं। साध्ये धूमादौ। तद्विरहेति। तन्महानसत्वव्यभिचाराद्यभावरूपयद
भावविरहेऽपि धूमव्यभिचारित्वाभावादिति भावः। एतावता समव्याप्तत्वं लब्धं न तु साधनाव्यापकत्वमतस्तल्लाभाय तादृशधर्मेति। उ
क्तसंबंधेनेति। उक्तसंबंधेन स्वव्यभिचारित्वेन स्वव्याप्यत्वेन वा संबंधेनोक्तस्य संबंधस्य वृत्तिनियामकत्वे मानाभावादाह। उक्तत्वसंबं
धस्यैवेति। उक्तस्योपाधित्वेऽपि पारिभाषिकानौपाधिकत्वे प्रतियोगितया तस्य वैशाल्याभावात्। यत्र समव्याप्तोपाधेरसंभवस्तत्रानौपा
धिकत्वस्याप्रसक्तौ व्यभिचारे चानन्त इत्यादिग्रंथस्यानुत्थानादाह। स एव चेति। तथा चैवकारेण तद्धर्मस्य तद्भिन्नस्य निरूपाधित्वेन तादृशव्य
भिचारित्वापि निरूपाधित्वप्रसक्तौ न क्षतिरिति भावः। अपमते चेति। यत एवोक्तरीत्योपाधिर्निरुक्तोऽत एवेत्यर्थः। साध्यव्याप्यता घटितप्र रास

८

कारांतरेण तस्य निरुक्तौ तु अनौपाधिकत्वं पारिभाषिकं वा स्यादिति भावः। यत्साध्यके व्यभिचारः प्रसिद्धस्तत्साध्यक एव संदेहात् अनौपाधि
कत्वे। केवलान्वयिसाध्यके व्यभिचाराप्रसिद्ध्या तद्घटितनिरुक्तोपाधेरप्रसिद्ध्या न तत्रानौपाधिकत्वमिति हृदयं। केवलान्वयिन्यनुमितिसमुपगंतॄणां
मीमांसकानां मतानुयायिना वाच्य इति। ननु विषमव्यापकस्यापि दूषकताबीजस्यानुमानोच्छेदकविशेषणवत्त्वरूपस्य करणमनुचितमित्यारोप आगरूके
विनाप्रयोजनमुक्तिर्वैचित्र्यमात्रेण समव्याप्तत्वघटितलक्षणकरणमनुचितमतः प्रयोजनमाह। विरोधेति। एकैकस्य। व्यापकताप्रापकदलमात्रस्य
व्याप्यताप्रापकदलमात्रस्य। व्याप्तिशरीरघटकता न स्यात्। व्याप्यता न स्यात्। दूषकता। दूषणोन्नयनोपयोगिता। न स्यादिति। उभयस्य। व्याप्य
त्वव्यापकत्वप्रापकदलद्वयस्य। उपादानं। लक्षणप्रवेशः। समव्याप्ताकाशेति। आकाशपदं उपाधिताघटकसंबंधेन वृत्तिपरं। अतिरिक्त
वृत्तित्वेन निरुक्तलक्षणासंभवात्। मात्रेति। धूमवान्वह्नेरित्यादावार्द्रेन्धनजन्यवह्न्याकाशान्यतरत्वादिनेत्यर्थः। नैरूप्येण आकाशादेरुपाधित्वे वृ
त्तिविरहः। आकाशत्वादिना लक्षणगमनमसंभावितमित्यरुचेराह यदि चेति। अनित्यत्वविषमव्यापकस्य प्रमेयत्वस्य व्यभिचाराप्रसिद्ध्या
मदभावाप्रसिद्धेरुक्तरीत्यासंगतिमाशंक्याह। अत्र चेति। व्यतिरेकीति। गगनान्यत्वादिरेव तादृशधर्म इति। व्याप्तिलक्षणत्वे इति। केवलान्व
यिनि संदेहाभावादनुमानाभावेन व्याप्तेरभावादिति भावः। यत्रेति। अयमेतन्मात्रवृत्तियावद्धर्मवान्प्रमेयत्वादिसाध्यादौ साध्यातिरिक्तसोपाधेरभा
वादित्यर्थः। अतिव्याप्तिरिति। स्वव्यभिचारविरोधिसाधनाव्यापकव्यभिचारित्वाभावकं यद्यत्तत्त्वाभाववत्त्वात्तत्साध्यकत्वेऽनौपाधिकत्वमि

त्यभिप्रायेण। यदि च निरुक्तोपाध्यभाव एवानौपाधिकत्वं तदा तिव्याप्तिरभावाद् व्याप्तिमाह तस्येत्यादिना। तस्य निरुक्तसाध्यव्यभिचा
रविरोध्यभावप्रतियोगिनः। अभावानिरूपणे इति। स श्यामभावो निरूप्यत इति न्यायादिति भावः। नन्वत्र समसङ्केतौ ऽप्ययमेनद्धत्तियावद्
र्मवानेनन्त्वादिसाद्दोमतोत्तरमाह यस्येत्यादिना। यस्येत्यस्य विवरणं। यद्व्यभिचारेत्यादि। ग्निमथं यानुरोधादाह। यद्व्याप्यत्वस्य चेति। सा
ध्यव्यापकत्वलाभाय पूरयति साध्यव्यापक इति। यद्व्यभिचारित्वाभावस्य साध्यव्यापकनिष्ठतया यत्पदार्थस्य साध्यव्यापकत्वं लब्धं साध्य
व्यापकव्यापकस्य स्तुतरां व्यापकत्वादिति भावः। साध्यव्यापके साध्यव्यभिचारविरोधित्वं च यत्र यत्र साध्यव्यापके यद्व्यभिचाराभावस्तत्रा
वश्यं साध्यव्यभिचाराभाव इत्येवं रूपं विषमव्यापकाभावस्य नैतादृशविरोधित्वमिति निमूलत एव तु व्यक्तं। ननु साध्यव्यापक इति यदभावः सा
ध्यव्यभिचारविरोधी स एवोपाधिः। नथासति साध्य इति यदभाव इत्यादेरेव सम्यक्त्वे व्यापकपदवैयर्थ्यात् एवमपि साधनाव्यापकत्वालाभात्तदर्थं पू
रयति साधनाव्यापक इति। विरोधस्वरूपनिर्वचनेन इहोपाधिरिति शतीतिनियामकसंबंधेनेमूलेनैव समव्याप्यत्वस्य साधनाव्यापकत्वस्य च
लाभात्पदान्तरपूरणं गौरवमित्यत्रास्वरसः वदंतीत्यनेन सूचितः। व्यभिचारविरोधीत्यस्य व्यभिचाराभावापादक इत्यर्थानुसारेण मतांतरमाह य
दित्यादिना। साधने। प्रकृतसाधने। व्यभिचाराभावापादकत्वं च तद्योग्यता। आपादकस्य पक्षे ऽभिचारा यत्तानहूपपक्षधर्मत्वं। आपाद्यापादकयो
र्व्याप्तिरापाद्यव्यतिरेकस्य च पक्षे ऽभिमतत्वमिष्टापत्तिश्च आवारकमित्येवंरूपाणि तेन यथाक्रमं साधनाव्यापकत्वस्य साध्यव्याप्यत्वस्य साधने साध्यव्यभिचा राम

६

रित्वस्य लाभः साध्यव्यापकत्वस्य लाभाय पूरयति साध्यव्यापक इति। अत्रापि साध्यव्यापकपदपूरणेन गौरवं साधनस्य व्यभि
चारित्वेऽप्यु साध्यविषमव्याप्यस्यापि तत्र किंचिद्धर्मावच्छिन्नसाध्यव्यापकत्वरीत्या व्यभिचारोन्नायकत्वेन दूषकत्वसंभवात्
संग्राह्यत्वेनान्यपदपूरणे प्रयोजनाभावश्चेत्यस्वरसः केचिदित्यनेन सूचितः। यस्मिन्सति साक्षात्परंपरया वाऽनुमितिप्रतिबंधो भ
वतीत्यर्थकतया। आनुमितिपदस्य यथाश्रुतार्थपरित्यागेऽपि क्षतिविरहः। यदभावे व्यभिचारविरोधित्वोक्त्या व्यभिचाराभावरू
पव्याप्तिसत्त्वावश्यकत्वलाभेऽपि अनुमितिभाव नावश्यकत्वस्यालाभान्नन्मूले दूषणाभिधानमनुक्तोपालंभरूपमतस्तन्नुमितीकरणा
नुमितिपदं अनुमितिप्रयोजकपरतया व्याचष्टे। नन्वित्यादिना। प्रयोजकीभूतज्ञानविषयतावच्छेदकं। न च व्याप्यत्वपक्षधर्मत्वं अप्र
धित्वादिवज्जन्यानुमितिपदार्थः। उक्तिसंनतार्थदृष्टांतमाह यथेति। असिद्धिव्यतिरेक इति। व्याप्यत्वाभावरूपाया व्याप्यत्वासिद्धे
स्पक्षधर्मत्वरूपायाः स्वरूपासिद्धेर्व्यतिरेकोऽनुमितिप्रयोजकस्य व्याप्यत्वस्य पक्षधर्मत्वस्य वा यथायथं सिद्धिरित्यर्थः। विरुद्धत्वादेरिति म
तस्मादिपक्षोपगृहीतव्यभिचारमंतर्भाव्य व्याचष्टे। विपक्षमात्रगामिचेत्यादिना। साध्यासमानाधिकरणत्वरूपविरोधस्य व्यतिरेके सा

DR. ... DAJI MEMORIAL

ध्यसामानाधिकरण्यस्यैवानुमितिप्रयोजकस्य सत्त्वनियमात्तद्रूपेसाध्यविरोधपदार्थमाह विपक्षमात्रगामित्वरूपेति। तथा च
तदभावस्य गगनादौ व्यभिचारित्वेपि सत्त्वात्तेनुमितिप्रयोजकस्य साध्यसामानाधिकरण्यस्याव्यभिचारस्य वा सत्त्वनियम इति
भावः। विपक्षवृत्तित्वरूपव्यभिचाराभावसत्त्वेनुमितिप्रयोजकस्याव्यभिचारस्य सत्त्वनियमात्तत्र प्रकृतनियमव्यभिचारो न घटत इत्य
तः सपक्षवृत्तित्वपर्यन्तं व्यभिचारे निवेशितं। तथा चोक्तरूपस्य व्यभिचाराभावस्य विपक्षमात्रगामिनि विरुद्धेपि सत्त्वात्तत्सत्त्वेऽव्यभिचा
रस्य न सत्त्वनियम इति। व्याघातादेरिव पक्षसाध्यभेदेनोपाधेरपि भिन्नत्वात्तत्पक्षकतत्साध्यकतत्साधनकयावदुपाधिसाधारणस्यैकस्य
लक्षणस्य तत्पक्षकोपाधिकं यस्यासंकीर्णत्वेन व्याप्तिग्रहे तत्तस्य निवृत्त्यैकपक्षसाधनेष्विवासंकीर्णमुदाहरणद्वयं प्रदर्शयन्नाह।
यत्रेत्यादिना। पक्षे साध्यासत्त्वे साधनावच्छिन्नसाध्यव्यापकस्यापि पक्षसाधनवदन्यतरत्वरूपपक्षधर्मावच्छिन्नसाध्यव्यापकत्वेन
संकरएव न स्यादित्याह हेत्विति। साध्यासत्त्वे च साधनावच्छिन्नसाध्याप्रसिद्ध्या व्यापकत्वासंभवः हेतोः पक्षवृत्तित्वेन तदवच्छिन्नसाध्यव्यापकस्य
पक्षधर्मावच्छिन्नसाध्यव्यापकतापि स्यादतो भिन्नं यदुक्तं। एकः। साधनावच्छिन्नसाध्यव्यापकः उपाधेः पक्षवृत्तित्वे पक्षसाधनवदन्यतर

१०

त्वरूपपक्षधर्मावच्छिन्नसाध्यव्यापकतापि स्यादतः पक्षावृत्तिरिति। साधनावच्छिन्नसाध्यव्यापकोपपादनायाह हेत्विति। इदं च पक्षावृत्तेर्हेतु
समानाधिकरणोपाधेः पक्षनिष्ठत्वेन समानाधिकरणोपाधेर्भेदः सुदुरापह इत्यसांकर्यस्फुटतरत्वार्थमुक्तं। न तु नियमपरत्वेन। तेन विद्युत्त्व
समानाधिकरणस्य तादृशस्य गगनत्वादेः साधनावच्छिन्नसाध्यव्यापकत्वाभावेपि न क्षतिः। पक्षधर्मावच्छिन्नसाध्यव्यापकमाह परइति। पक्षावृत्तेः
पक्षनिष्ठतया भेदं दर्शयित्वा हेतुसमानाधिकरणभेदं दर्शयितुमाह साध्यवतीति। हेतुसमानाधिकरणस्योपाधित्वेन साध्यवनिहेतुसमाना
धिकरणत्वसमर्पणात्। लब्धमतस्तस्मादिदं भेदकमित्याशयः। जलत्वप्रत्यक्षं नित्यद्रव्यत्वादित्यत्र पक्षावृत्तेर्हेतुसमानाधिकरणस्य पृथिवी
त्वस्य गगनपृथिव्यन्यतरत्वावच्छिन्नसाध्यव्यापकतयोपाधित्वे साध्यवनिहेतुसमानाधिकरणत्वाभावात्तस्य तन्नेदकत्वमतः स्फुटं भेद
कमाह हेत्वसमानाधिकरणेति। साधनपक्षधर्मयोर्द्वन्द्वे साधनपदस्यैवाल्पाच्तरत्वेन पूर्वनिपातसंभवात्मूलोक्तक्रममनुपेक्ष्यैकक्रमेणो
दाहरणं दर्शयितुं साधनावच्छिन्नसाध्यव्यापकं प्राग्दर्शितं। ध्वंसादेरनभ्युपगमे नित्यद्रव्यत्वावच्छिन्नप्रत्यक्षत्वस्य त्रसरेणावपि सत्त्वान्ना
त्मत्वं न व्यापकं स्यादतो। विद्युत्त्वादिति। पक्षधर्मेति। बहिर्द्रव्यत्वादिरेव पक्षधर्मः। आद्यहेतोः साध्यवनिहेत्वसमानाधिकरणं द्वितीयहेतोर्हेत्वस
मानाधिकरणमेवोद्भूतरूपवत्त्वं। प्रभायाः अप्रत्यक्षत्वे वायोः स्पार्शनत्वे च बहिर्द्रव्यत्वावच्छिन्नप्रत्यक्षत्वव्यापकं नोद्भूतरूपमित्यत आह। प्रसक्तो।

स्पर्शेति। इदं च हेतुद्वयस्यैवासमानाधिकरणं समवायेनोपाधित्वमभिप्रेत्योभयत्र संबंधाभिलापः। दशाविशेषेन याज्ञानस्य दोषतायां
दृष्टत्वेन ज्ञानानि व्याप्तेरदोषत्वात्तत्वस्तत्वति व्याप्तिमाह घट इत्यादि। तद्धर्मावच्छिन्नसाधनाव्यापकत्वोक्तौ पक्षधर्मपदवैयर्थ्यं सिद्धांतलक्षणानु
ल्यं चेति भावः। शुद्धसाध्यव्यापकस्यान्यतरत्वरूपपक्षधर्मावच्छिन्नसाध्यव्यापकत्वस्य पुनरसंभवात्। आर्द्रेन्धनेत्यादिमूलमसंगतमत आ
ह। नचेति। इत्थं च पक्षनियतेत्यस्य पक्षधर्मत्वेन नियतो व्याप्तो न विशेष्यस्यार्थः। न्यूनतां परिहरति। विरुद्धेति। साधनावच्छिन्नसाध्याप्रसिद्धेरि
ति भावः। मित्रातनयत्वावच्छिन्नश्यामत्वव्यापकशाकपाकजत्वव्यभिचारित्वेपि काकत्वादेर्न श्यामत्वासाधकत्वमत आह स्वावच्छिन्नेति। काक
त्वं न स्वावच्छिन्नश्यामत्वव्यापकव्यभिचारि। शाकपाकजत्वस्य तदवच्छिन्नसाध्यव्यापकत्वाभावात्। काकत्वप्रकारकप्रमाविषयत्वादेः काक
त्वे व्यभिचाराभावादित्यर्थः। मित्रातनयत्वपक्षकानुमाने च मानुषत्वं दृष्टांतः। दृष्टांतपक्षसाधारणस्य स्वत्वस्यैकस्याभावादाह साधनवतीति।
काकत्वादेर्मित्रातनयत्ववति मित्रातनयत्वावच्छिन्नश्यामत्वव्यापकशाकपाकजत्वाभाववद्वृत्तित्वाभावादित्यर्थः। अप्रसिद्धीति। अप्रसिद्धिरपक्ष
धर्मत्वं। व्यभिचारिणि वक्ष्यमाणलक्षणाः शुद्धसाध्यव्यापकव्यभिचारस्यापि सत्त्वादसिद्धिर्न संभवतीत्यत आशंकेति। अवच्छेदकांशः साधनपक्षधर्म
रूपः। अप्रसिद्धिशंकादिवारकस्य विशेषणस्य व्याप्तिग्रहानौपयिकतया व्यर्थत्वमत आह। अथवेति। श्यामत्वसमानाधिकरणाभावप्रतियोगि

तावच्छेदकत्वाभावात्। शाकपाकजत्वस्य घटेपि वृत्तेर्मित्रातनयत्वाद्यवच्छिन्नश्यामत्वसमानाधिकरणाभावप्रतियोगितावच्छे
दकत्वाभावस्य भिन्नत्वादिति भावः। शुद्धसाध्यव्यापकाभावस्यापि मित्रातनयत्वावच्छिन्नश्यामत्वव्यापकतावच्छेदकरूपावच्छिन्नाभा
ववत्तया तादृशाभावस्याखंडत्वासंभवादिति। व्यापकव्यभिचारित्वं व्यापकतावच्छेदकरूपावच्छिन्नाभाववद्वृत्तित्वं। तथा च शाकपाकजत्व
त्वावच्छिन्नाभाववद्वृत्तित्वज्ञानं विना मित्रातनयत्वावच्छिन्नश्यामत्वव्यापकतावच्छेदकरूपावच्छिन्नाभाववद्वृत्तित्वग्रहः तज्ज्ञाने न दूषणे
व हेतुत्वसंभवात्। तादृशव्यापकतावच्छेदरूपदोषादाने प्रयासगौरवमित्याशयेनाह येन रूपेणेति। काकत्वादौ व्यभिचारवारणाय विशेषणं
वतीति। इत्थं च मित्रातनयत्ववति शाकपाकजत्वव्यभिचारित्वादित्यादिरेव हेतुः कर्तव्य इत्यर्थः। प्रागुक्तैव कारे व्यवच्छेद्यं स्फुटीकर्तुं शुद्ध
साध्यव्यापकस्थले प्रकारद्वयेन हेतुमाह शुद्धेत्यादिना। तत्रासिद्धिशंकायाः अभावेन तद्वारणैकप्रयोजनस्यावच्छेदकांशस्यानिवेशादिति
भावः। कतिपयस्थलेष्वेकरूपेणैवासाधकतानुमानमाह प्रायश इति। तद्धर्मवतीति। मित्रातनयत्ववतीति। मित्रातनयत्वावच्छिन्नश्यामत्व
व्यापकतावच्छेदकरूपावच्छिन्नाभाववद्वृत्तित्वस्य हेतुत्वे तादृशव्यापकतावच्छेदकत्वस्य शाकपाकजत्वत्वरूपस्य श्यामत्वसामग्रीत्वेपि सत्त्वेन ते
न रूपेण तदवच्छिन्नाभाववद्वृत्तित्वस्यापि हेतुत्वेनानपायात्। धूमवान्वह्नेरित्यादौ पर्वतायोगोलकान्यतरत्ववति तदवच्छिन्नधूमव्यापकव्य

भिचारस्य हेतुत्वेन तदवच्छिन्नधूमव्यापकत्वस्य पर्वतत्वादावार्द्रेन्धनादावपि सत्त्वेन तेन रूपेणार्द्रेन्धनादिव्यभिचारस्यापि हेतुत्वसा
मादित्यर्थः। एतद्धूमवान्वह्नेरित्यादौ साध्यव्यापनाघटकस्याभावस्य खण्डशः संभवात् तत्र वच्छेदकांशस्य वैयर्थ्यमेवेत्यत आह प्रायश इति।
ननु चात्रावच्छेदकांशस्य वैयर्थ्यान्निरुक्तोपाधिनानासाधकत्वसाधनमित्यत आह वस्तुतस्त्विति। न त्वसाधकत्वं। नहि परहेतोरसा
धकत्वं यत्किंचिद्दूषणद्वारा साधनीयमिति नियमस्य कुतोरक्षत्वमित्यत आह। उन्नीतेति। उपाध्युन्नीतेत्यर्थः। तत्साधने। असाधकतासाधने।
ननु व्यभिचारसंदेहस्यैव व्यभिचारस्य संदिग्धत्वान्न हेतुत्वं संभवतीत्यत आह। संदिग्धेति। समर्थितेति। यदि तत्र संदिग्धोपाधिकत्व
मेव हेतुस्तदा सम्भाव्यपि संदिग्धव्यभिचारकत्वमेव तथाऽसाधकतानुमानमपि तुल्यमित्यर्थः। मतेति। पक्षेऽपीति। व्यभिचारोन्नयनपक्षे सत्त्वे
ऽपि पक्षोन्नयनपक्षे चेत्यर्थः। पक्षधर्मावच्छिन्नसाध्यव्यापकत्वगर्भलक्षणपक्षे साधनावच्छिन्नसाध्यव्यापकत्वगर्भलक्षणपक्षेऽपीत्यर्थः। विशिष्ट
साध्यव्यभिचारस्यानाकाङ्क्षितत्वमभिधातुं केवलसाध्यव्यभिचारावसंगमनं प्रदर्शनं संगमयति। साधितो। तथा चेत्यादिनाऽपविरोधित्वादिति।
साध्यनिर्देशानन्तरं प्रतिवादिनः तत्साधकाकाङ्क्षायाइव साधनोपन्यासानन्तरं वादिनाऽशुद्धसाध्यानुमितिविरोधिदोषाकाङ्क्षाया एव संभवादिति
भावः। उद्भावने सिद्धिर्नास्त्येवानन्तत्वात्। नहि विषयस्य साध्यव्यभिचारस्याग्रहणे साध्यस्यानतरभावः पक्षे बाधेन वा सिद्धिः। न चोपाध्युपन्यासेन बाध

निरास इत्यतो व्याचष्टे उद्भाव्य इत्यादिना। विशेषणव्यभिचारित्वे सतीति। विशेषणवतोऽप्यस्योपलक्षकं। तत्रैतस्य व्यावर्त्यमाविशिष्टसादि सर
यति उद्भावितायामिति। प्रकृतेति। प्रकृतानुमानविरोधी यः शुद्धसाध्यव्यभिचारस्तत्साधको यो विशिष्टसाध्यव्यभिचारः तस्यैवोपाधिनासाध
नादित्यर्थः। वक्ष्यमाणेति। मित्रातनयत्वे श्यामत्वव्यभिचारि मित्रातनयत्वाव्यभिचारित्वे सति शाकपाकजव्यभिचारित्वादित्यत्र मेणेत्यर्थः। आह हेत्
वेति। सा शादेवा ननु विशिष्टसाध्यव्यभिचारसाधनद्वारेणैवेत्येव कार्यार्थः। उपाधिमात्र एव तद्दूषणं संभवेऽपक्षधर्मेत्यादिसंकोचविशेषणमनु
चितमत आह। पक्षधर्मेत्यादि। उपाधिव्यभिचारस्योपन्यासे विशेषणत्वेनोपाधेरुपन्यासान्नोपाधिरिति मूलमसंगतमतो नेत्यनन्तरं दूरयति।
प्राधान्येनेति। तथा चायमत्रोपाधिरिति उपन्यासो नोचित इति भावः। हेतुं पूरयति। व्याप्यादाविति। आदिना पक्षधर्मत्वपरिग्रहः। व्यभिचारित्वा
देः संबंधत्वेपि तेन संबंधेन व्याप्यतायां सांप्रदायिकैरनभ्युपगमात्। इतरथा तु दुष्टोपाधिरित्यस्य दुष्टोपाधिव्यभिचार इत्येवार्थो वाच्यः। तथा च स्वाप
देशशब्दप्रयोगे द्विभिस्यवाचकं प्रयोगसामञ्जस्यमिति न्यायादिहोपाधिव्यभिचार इत्येव वक्तुमुचितमिति भावः। स च व्यभिचारप्रतियोगित्वार्थकत्वे दुष्टो
पाधिरित्यस्यैव तन्निष्ठव्यभिचारप्रतियोगी उपाधिरित्यर्थः। तथा चोपाधिविशेष्यकव्यभिचारविशेषणकमुद्भावनं नोचितं किंतु उपाधिविशेष
णकव्यभिचारविशेष्यकमुद्भावनं युक्तमिति अभिप्रायः। दूषकताबीजनिर्णयं विना तस्यासाधकत्वविभागानुपपत्तेः तदादौ विचारयति अत्रेत्यादिना

अत एवाह लक्षतानियामकमिति। तत्वोल्लक्षतानियामकत्वे साध्यवदिति। तस्य पक्षधर्मतावच्छेदकपक्षीयसाध्याव्यापकत्वादिति भावः। ननि
दमपि दूषणमेतद्दूषणेन भविष्यतीत्यत आह व समारोपेति। बाधानवतारे इति। पक्षातिरिक्ते सर्वत्रैव साध्यसत्वाद्व्यभिचाराप्रसिद्धेः। बाधावतारे च तत
एवानुमितिप्रतिबंधे उपाधिवैयर्थ्यादिति भावः। पर्यवसितसाध्यव्यसाध्यव्यभिचारोन्नायकत्वेनैव दूषकतास्त्वित आह। न च पर्यवसितेति। तथा
सति पर्वतो वह्निमान्धूमादित्यादौ धूमस्य पर्वतीयवह्निव्यभिचारोपि विरोधी स्यादिति भावः। एवमपि। संभूतिपक्षोन्नायकत्वस्य लक्षतानियामकत्वे
पि। सद्धेताविति। नैयायिकनये शब्दस्यानित्यत्वेन वा सत्वसत्प्रतिपक्षत्वाभावादिति भावः। मीमांसकमतेइति। तन्मते शब्दस्य नित्यत्वेनैसाध्या
भावसत्वेन दुन्नायकत्वसंभवादिति भावः। मतद्वयसाधारण्यार्थमाह। शब्दशब्दयोरिति। पक्षसाध्यस्य साध्य पदयोरित्यर्थः। तथा च शब्दत्वं
नित्यत्वातिरिक्तशब्दत्वधर्मातिरिक्तधर्मवदित्यादाविति भावः। इदमुपलक्षणं। यदि चेत्सादावपि शब्दत्वे शब्दपरं। पक्षतावच्छेदकादेरिति। पर्वतो
वह्निमान्धूमादित्यादौ पर्वतीयवह्निव्यापकस्य धूमाव्यापकस्य पर्वतत्वादेः सत्प्रतिपक्षोन्नायकत्वेनाव्यस्तत्वादिति भावः। पक्षावृत्तित्वे सतीति। इ
त्यं च साधनव्यापके दूषकताबीजसत्वे कथकानामनुपाधिव्यवहारविरहादेव केवलसाधनाव्यापकत्वं विशेषणमिति भावः। स्वतंत्रेति। अनित्यत्वसा
धनानुपाधेर्गोत्यर्थः। उपयोगिनयेति। कृतकत्वस्यापि शब्देसाधनेन व्यतिरेकस्य संदिग्धतया सत्प्रतिपक्षोत्थेः। नित्यसाधनस्य निष्प्रत्यूहत्वात्। द्वयोः॥ राम

१३

अनित्यत्वकृतकत्वयोः। असाधकत्वादिति। पक्षधर्मतांशे संदेहादिति भावः। अथ च मध्येयोर्बोध्यमित्यनेनानेति। इत्थं च यदा पक्षे कृतकत्वाभावो नि
श्चितः अनित्यत्वसंदिग्धं तदा साधने कृतकत्वमुपाधिः यदा नित्यत्वाभावो निश्चितः कृतकत्वसंदिग्धं तदा तत्साधने नित्यत्वमुपाधिरित्यर्थः।
सावयवत्वं द्रव्यसमवेतद्रव्यत्वे। तत्र विशेष्य द्रव्यत्वांशस्य प्रयोजनाभावात् द्रव्यसमवेतत्वमात्रे दिवह्निते। तत्र विशेष्यस्य समवेतत्वस्य विशे
षणस्य द्रव्यांशस्य च प्रयोजनमाह समवेतत्वेनेत्यादिना। ननु अनित्यासमवेतत्वमेव साध्ये क्रियतां पक्षविशेषणस्याहिंसानित्यद्रव्य
समवेतत्वे पर्यवसानं भविष्यतीत्यत आह साध्येद्रव्यपदमिति। स्फुटतरत्वं विहायेति। द्रव्यसमवेतद्रव्यादिना। द्रव्यसमवेतत्वं द्विविधं। नित्य
द्रव्यसमवेतत्वमनित्यद्रव्यसमवेतत्वं च। तत्र द्रव्यसमवेतत्वविशिष्टेऽनित्यद्रव्यसमवेतत्वाभावप्रकारिकानुमितिर्नोपमानात्साध्यद्रव्ये
नित्यत्वविशेषणव्यावृत्तिपर्यालोचनेनोपस्थितनित्यद्रव्यसमवेतत्वमादाय वैयर्थ्यमिति अप्रामाण्याभावानुमितौ प्रामाण्यं वक्तुं। अन्यथाप्र
तीतेरपर्यवसानात्। द्रव्यसमवेते अनित्यासमवेतत्वानुमितौ द्रव्ये समवेतेनित्यसमवेतत्वं नास्तिनित्यद्रव्यापोल्लक्षणन्यायेनानेन द्रडरी
त्यइति भावः। विशिष्टाभावस्यानतिरिक्ततयादंडिमतिरक्तदंडिनास्तीत्यादिप्रतीतेर्दंडरक्तत्वाभावविषयकत्ववद्द्रव्यसमवेतत्वति अनित्यद्र
व्यासमवेतत्वप्रतीतेरपिद्रव्येऽनित्यत्वाभावपर्यवसानेनानित्यत्वाभाववद्द्रव्यसमवेतत्वेऽवविश्रामाभावसत्वसाध्ये द्रव्यविशेषणे सत्येयस्यादित्यभिप्रा

यः। सावयवत्वसिद्धेव परमाणोः सिद्धेरुक्तं। नित्यत्वेति। नन्वित्यसिद्धौ महत्त्वएव सहचारग्रहः स्तेन वनीति भावः। व्यभिचारवारकतया ऽप्रसिद्धि
वारकतया व्याप्तिग्रहोपयिकविशेषणस्यैव सार्थकता। तत्वन्न यत्र व्यभिचारग्रहः संपादकस्यापि। व्यतिरेकग्रहसहचारेणापि व्याप्तिग्रहसंभवाद
त आह विशिष्टेति। जातिविशेषितानयाचजन्यत्वस्याप्रवेशात्तवैयर्थ्यमिति भावः। ननु जन्यपदं मास्तु नावादिति। न चावयववत्त्वजन्यताव
च्छेदकतया तादृशजातिसिद्धिः। अवयववत्त्वेनैव दत्तावात्। अवयवावयवस्य नदनवयवत्वात्। हस्त्वावयवानरजातिविशेषावच्छिन्नत्वमनित्य
वयवविशेषाणां हेतुत्वस्यावश्यकत्वेनादृशकार्यकारणभावेमानाभावादिति। नन्वणुपरिमाणव्यावृत्तविभुपरिमाणेपेक्षितापकृष्टय
वहारनियामकतया तादृशजातिः स्यादत आह। वैनवेति। अननुगतेति। हस्त्वत्वविनाशित्वादिरित्यर्थः। तथा चैकप्रकारकत्वरूपोऽनुगत
व्यवहारोऽसिद्धः। एकाकारशब्दप्रयोगस्य नार्थस्य साधकः। वैनवनिष्ठोत्कर्षावधितावच्छेदकजातित्वेन वा तादृशजातीनामनुगमइति
भावः। ननु लाघवादेकैव तादृशी व्यवहारविषयितावच्छेदिकाकल्प्यतेइत्यत आह। तुल्यन्यायेनेति। तथापि परस्परमहत्त्वयोः परस्परा
भावसमानाधिकरणयोर्जात्योर्घटादिमहत्त्वे संकरः स्यादित्यर्थः। एवं च तत्र (महत्त्व) निष्ठापकर्षावधितावच्छेदकतया तादृशजातीना
मनुगमादनुगतव्यवहार इति भावः। दोषेति। परमाणुनित्यत्वासिद्धिदशायां नित्यद्रव्यनिस्पर्शद्रव्ययोस्तादात्म्यग्रहात्तदनित्यत्वे

राम

रपि तादात्म्यग्रहेण व्याप्तिग्रहः स्तेन वावयः। अत एव तादात्म्यतद्वृत्तित्वयोर्व्याप्तिग्रह इति वैशेषिकाः। गमकताउपाधेः पर्यवसितसा
ध्याभावोन्नयनोपयिकरूपवत्ता। पर्यवसितेत्यादि। अन्यथा निस्पर्शसमवेतस्य गुणत्वादौ सत्त्वात्तत्र नित्यद्रव्यसमवेतत्वाभावेन साध्यव्यापक
ताभावात्। इदं उपयद्। पर्यवसितसाध्यव्यापकत्वं एतद्धादिनोक्तं सत्प्रतिपक्षोन्नायकत्वं दूषकताबीजं तदभिमतं। तदनुपयोगितया पर्यवसितसा
ध्यव्याप्यत्वं निष्प्रयोजनकं। न चाक्षस्य कस्यचित्तादृशाजरूपमस्तीत्यस्वरसः केचित्तु सनेन सूचितः। भवतां शुद्धसाध्यव्यापकोपाधिमंगीकु
र्वतां। अनवस्थेति। द्व्यणुकावयवस्यापि अवयववत्त्वे तदवयववात्कल्पनेऽवयवानवस्थात्यादि सवश्यं क्वचिन्निरवयवस्य शवितिविश्रान्तिरिति। नित
समवेतद्रव्यः नित्यद्रव्यासमवेतैमलिनत्वस्पर्शवद्समवेतत्वमस्ति शुद्धसाध्याव्यापकत्ववत् नित्यद्रव्यसमवेतत्वरूपपर्यवसितसाध्यस्यापि त
त्रसत्त्वान्निःस्पर्शद्रव्यसमवेतत्वस्य चास त्वान्नपर्यवसितसाध्याव्यापकत्वमपि तत्रैवेत्यर्थः। सोपाध्युपाधेरत्तानदशायां साध्यसिद्धे
तोत्यनत आह सोपाधितयानिश्चितइति। उपाधिसंदेहाधीनव्यभिचारसंदेहकालेऽप्यनुकूलतर्कसत्वे व्याप्तिनिश्चयसंभवान्निश्चयपर्यन्त
नुधावनं। मतंमपरिष्करोति नन्वित्यादिना। तात्पर्ययोऽपता। ननु फलोपधानं येन सोपाधिकत्वादिना दोषः स्यादिति भावः। पारङ्गा। पर्वतावच्छिन्नोऽप
र्दत्तोति। यथा पर्वतो वह्निमान् धूमादित्यादौ पर्वतीयवह्नित्वावच्छिन्नत्वमेव पर्यवसितसाध्यं पर्वतत्वहेतोश्च पर्वतने बाधितत्वेन सिद्ध्यन्तरत्वादि

MEMORIAL

तिभावः। ननु बाधानवतारदशायां महानसीयवह्न्यादेरपि सिद्धियोग्यता। तथा च तद्व्यापकतया महानसत्वं पर्वतो वह्निमान्धूमादित्यादावुपा
धिः स्यादत आह। पक्षे साध्यसिद्धीति। विरोधित्वं विरोधिप्रमाविषयत्वं प्रमात्वं सर्वांशे ग्राह्यं। तेन पक्षवृत्तिधर्मस्य पक्षे भावत्वमदशायां पर्यवसित
वह्निव्यापकताशालित्वेपि नातिव्याप्तिः। इत्थं च पक्षवृत्तिस्वनिष्ठाभावप्रतियोगितावच्छेदकरूपेण साध्यसिद्धिविरोधित्वान्न विषयव्यापकताशालित्वविशिष्टपर्य
वसितव्याप्यविशेषानुपादाने व्यापकत्वं दूषकत्वं च मतमाह। स्वव्यतिरेकेणेति। एवं च पक्षविशेष्यकसाध्यसिद्धिविरोध्यनुमितिजनकतानवि
षयतावच्छेदकरूपव्यतिरेकप्रतियोगित्वं। तादृशज्ञानविषयतावच्छेदकत्वं च जनकतायाः प्रकारतासंबंधेनावच्छेदकत्वपर्याप्त्यधिकरणत्वं व्याप
विशेष्यकपरामर्शे च व्याप्तिपक्षधर्मतयोः सत्वमविकलं। ननु व्यतिरिक्तत्वातिरिक्तशब्दघटितातिरिक्तधर्मवत्त्वसिद्धौ व्यतिरिक्तत्वाभावसिद्धेः समानप्र
कारिकायाः कथं विरोधित्वं। एवं सत्यमोमित्राननयत्वादिसिद्धौ शाकपाकजत्वाभावाधीनायाः मित्रातनयत्वावच्छिन्नश्यामत्वाभावसिद्धेः कथं शुद्धस्या
मत्वसिद्धिप्रतिविरोधित्वमत आह। भवन्निहीति। रहिते न त्वे। ननिश्चितेपि युक्तसाध्येति। तथा च समानविषयत्वेनैव विरोधित्वमिति भावः।
साधनादिमतितत्वेनानिश्चिते। सिद्धेरपि युक्तसाध्यसिद्धिविरोधिनीत्यर्थः। ननु समानप्रकारकत्वान्नैव विरोधितया नोक्तक्रमेण साध्या
भावसिद्धिर्युक्तसाध्यसिद्धिविरोधित्वं। एवं मूलीयपर्यवसितेन साध्युपेक्षेण उदरूपत्वं साधनाव्यापकत्वं च प्रयोजकं निरर्थकमतो निष्कृष्याह वस्तुत राम

२५

स्त्विति। ननु व्यापकव्यतिरेकाश्रयधर्मावच्छिन्नस्यैव साध्यस्याभावसिद्धिः सा च न विरोधिनी भिन्नप्रकारकत्वादत आह सिध्यतीति चेति। विशे
षणवतीति। संमुग्धाकारलिखने तेन विशिष्टाभावस्यानतिरिक्ततया सामान्यतो दृष्टस्यैकविशेषबाधे विशेषान्तरप्रकारकानुमितिजनकत्वे
विशेषणवत्त्वेनानिश्चिते विशिष्टसाध्याभावसिद्धिरेव शुद्धसाध्याभावसिद्धिः। इतरथा तु विशेषणवत्त्वे सति विशिष्टसाध्यव्यापकाभावेन हेतुना
शुद्धसाध्याभावस्यानुमितिरिति। ननु व्यभिचारोन्नायकतावादिभिरसंगृहीततया उक्तो साधनव्यापके हृदो वह्निमान्धूमादित्यादौ वह्निसा
मग्र्यादौ निरुक्तलक्षणस्याति व्याप्तिरत आह तादृशस्येति। तादृशः। निरुक्तलक्षणाक्रान्तः। संग्राह्य इति। तत्सत्तानियामकदूषणताबीजसत्त्वं तस्य
तायां नियामके न तु लक्षणान्तरकर्तृसंगृहीतत्वं। तथा सति सत्प्रतिपक्षोन्नायकतावादिभिरसंगृहीतोपि हृदो पर्वतो धूमवान्वह्नेरित्यादौ आर्द्रेन्ध
नादौ साधनाव्यापकत्वघटितलक्षणस्यातिव्याप्तिः स्यादिति भावः। इतरेषां। व्यभिचारोन्नायकत्ववादिनां। ननु तेषां तु साधनव्यापकस्य संग्र
हः। तथापि व्यभिचारोन्नायकस्य पक्षवृत्तेरसंग्रहो दोषो भवेत्स्यादतो आह परेषामिति व्यभिचारोन्नायकत्ववादिनां। तथा च सत्प्रतिपक्षो
न्नायकस्य साधनव्यापकस्य व्यभिचारोन्नायकत्वरूपलक्षणतानियमकदूषकताबीजाभावादलक्ष्यत्वं तथास्माकमपि व्यभिचारोन्नायकस्य
परुष्टतेन सत्तानियामकसत्प्रतिपक्षोन्नायकतोभावादलक्ष्यत्वमिति भावः। ननु भवतां वह्नौ साध्ये एकस्यैव धूमत्वावच्छिन्नस्य पर्वता

दियरूतायां निरूपाधित्वं रूद्रादिपरूतायां सोपाधित्वं स्यादित्यस्यापि साधनभेदे न साम्यं दर्शयति परेषामिति। परेषां व्यभिचारोन्नायकत्व वादिनां। पर्वतो वह्निमानित्यत्र धूमे साधने निरूपाधित्वे द्रव्यत्वादि साधने सोपाधित्वेन यथा दूषणावहं। अस्माकमपि परूभेदान्नयात्वेन दोषावहमिति भावः। वस्तुत इति। सिद्धान्तग्रंथे। केचित्तु साधनव्यापको प्युपाधिरित्यादिनाग्रंथ पंक्तेरेव रूव्यमतो न दूषणमस्तीति भावः छ। यद्यभिचारित्वेनेत्यादेर्लक्षणस्वरूपत्वे लक्षणत्वित्यादिकं पुनरूक्तं स्यादत आह लक्षतेति। लनीयार्थः करणत्वं निरूपकतया तदन्वयश्च न साध्यव्यभिचारित्वे। यद्यभिचारित्वस्य साध्यव्यभिचारित्वकारणत्वबाधादतः पूरयति। उन्नीयत इति। तथा चोन्नयने तस्य करणत्वं नबाधितमिति भावः। उन्नायकत्वफलोपधानरूपत्वेप्य व्याप्तिव्याप्तीस्यानामत आह उन्नायकत्वमिति। व्याप्यादित्वमेणोन्नायकस्यानुपाधेरपि व्याप्यादिमत्त्वेन तामानत्वरूपयोग्यतासत्त्वान्नयैवाति व्याप्तिरतो योग्यताविशेषं दर्शयति। साचेति। ननु यद्यभिचारित्वेनेत्यत्रोपाधितावच्छेदकाभिप्रितोपाधेः स्वरूपमात्रस्य यत्पदार्थत्वे द्रव्यं जातेरित्यादौ गुणान्यत्वविशिष्टसत्तायां गुणान्यत्वविशिष्टसत्तात्वादिनोपाधितानस्यात्। सत्ताव्यभिचारित्वस्याज्ञातत्वाभावात्। पार्ईन्धनादौ तप्रसक्तेर्नद्रव्यत्वादिनोपाधितापत्तिश्च सरूपेण न रूपविशेषस्य नियमाभावात्। एवमवच्छिन्नसाध्यव्यापकशाकपाकजत्वादावव्याप्तिस्तद्व्यभिचारस्याशुद्धरूपामत्वव्यभिचाराव्याप्यत्वात्। अतो व्याचष्टे तयाचेति। यद्धर्म। उपाधितावच्छेदकत्वेनाभिमतः। आर्द्रेन्धनत्वादिः। शाक राम

पाकजत्वसंग्रहाय यत्किंचिदिति। वृत्तिस्वं हेतुतावच्छेदकसंबंधेन वृत्तित्वसामान्यं। तेन कालिकादिसाधारणयोगोलकवृत्तित्वस्य धूमे पृथिवीत्वाव्याप्येपि सत्त्वात्तस्य धूमव्यभिचाराव्याप्यत्वेपि न क्षतिः। सामान्यपदोपादानाद्रूपवान्द्रव्यत्वादित्यादावसंग्रहस्य पृथिवीत्वाभावाधिकरणीभूतभावादेः तत्पृथिवीवृत्तित्वविशेषस्य सत्त्वाद्द्रव्यत्वादिनिष्ठस्य रूपव्यभिचारव्याप्यत्वेपि नातिव्याप्तिः। पृथिवीत्वादिनिष्ठस्य पृथिवीवृत्तित्वस्य तदन्याप्यत्वादिति। व्याप्यादिपदसमभिव्याहारेणावच्छेदकावच्छेदेनान्वयोपस्थितिर्वैशिष्ट्यात्। तथा च यत्किंचिदधिकरणवृत्तित्वतावच्छेदेन व्याप्यत्वं प्रत्याभिव्यज्यते। अन्यथा वह्निर्धूमव्याप्य इत्यप्यबाधितं स्यात् वह्नित्वसामानाधिकरण्येन तत्सत्त्वात्। वृत्तित्वादिपदसमभिव्याहारे तु आधेयतावच्छेदकसामानाधिकरण्ये। तेन वृत्तित्वसामान्ये साधनवृत्तित्वोक्तावपि तदाश्रययत्किंचिद्घटकीतत्वत्वेनैव कृतार्थतात वृत्तित्वसामान्यस्य साधनावृत्तित्वात्। साधनवृत्तित्वेति भेनानन्वयापत्तेः प्रकृतेनन्वोपात्ते। यद्धर्मेत्यस्य प्रयोजनमाह तेनेति। तत्रावक्तौ। नरूपेति। द्रव्यत्वादीत्यर्थः। तदभाववद्वृत्तित्वस्य धर्मवृत्तित्वादिति यथाश्रुतमिदं सन्निवायेन वह्नेर्हेतुत्वाभिप्रायेण। संयोगेन हेतुतायां च न दूषावच्छिन्नाभाववति संयोगेन वृत्तित्वस्याप्रसिद्धतया व्याप्याभावादिति बोध्यं। यत्किंचित्पदस्य प्रयोजनं दर्शयन्नेवोपयत्रलक्षणं गमयति। शुद्धसाध्येति। तदभाववन्नान्नेति। भाव पदं सामान्यार्थकं। अवच्छेदकेति। अवच्छेदकाधिकरणीभूतयद्रूपाद्यनावाधिकरणीभूतेन वृत्तित्वमित्यर्थः। उभयत्र। शुद्धसाध्यव्यापके वह्निच्छिन्नसाध्यव्यापके च। ननु विशेषितम विशेषितेवाप

व्यभिचारित्वं साध्यव्यभिचारित्वव्याप्यसाधनवृत्तित्वेत्युपेत्य यत्किंचिदधिकरणवृत्तित्वसामान्यगर्भतायां गौरवसहिष्णुतायां बीजमाह
र्शयतीत्यद्रव्यत्वेनेत्यादिना। तत्र पृथिवीत्वाभावस्य व्यभिचारोन्नायकत्वं च यथा क्रमतत्तद्रूपेणोपदर्शयितुमाह सत्वेनेति। द्रव्यत्वरूपं व्यभि
चारित्वं सत्त्वेत्यादिविशेषणे सति पृथिवीत्ववद्वृत्तित्वात्सत्त्वादिवदिति क्रमेणोत्यर्थः। तत्र सत्त्वेनेति दृष्टांतार्थो। द्रव्यत्वेति स्वरूपसिद्धिवारणा
र्थं जलत्वेति विशेष्यदलसार्थक्यार्थं। अन्यथा सत्त्वादद्रव्यत्वेनयत्र विशेष्यकधीविशेष्यत्वादित्यस्य तद्विशेष्यत्वे सति वृत्तित्वादित्यस्य वा सा
मर्थ्ये पृथिवीत्ववद्वृत्तित्वस्यैव यथार्थत्। मात्रपदं च घटत्वादिकमादाय याधीस्तद्विशेष्यत्वे सति पृथिवीवृत्तित्वस्य घटत्वादावेव व्यभिचा
र इति तन्निरासायोपात्तं। तन्मात्रविषयकबुद्धिरप्रसिद्धा तद्विशेष्यकबुद्धिविषयत्वं च द्रव्येतरावृत्तित्वघटितं द्रव्यत्वघटकेजन्यपृथिवीत्वक
पद्रव्ये पिगतमतो विशेष्यद्वयं। लघुप्रकारांतरमाह। जलसमवेतेति। पृथिवीत्वादेर्वारणाय सत्यंतं। तस्यापि संबंधांतरेण जलवृत्तित्वात्सम
वेतेति। जलपृथिवीसंयोगादिवारणाय नित्येति। जलत्वादौ व्यभिचारवारणाय विशेष्यमिति। नोपाधिःनोपाधित्वरूपेण संग्राह्यः। संग्रहाभा
वं दर्शयति। नहीत्यादिना। तादृशसाध्यव्यभिचारनिरूपकं यद्वृत्तित्वसामान्यमिति सत्त्वाद्यत्वादिनिष्ठस्य पृथिवीवृत्तित्वस्य व्याप्यत्वेपि तत्सामान्य
स्याव्याप्यत्वादिति भावः। दूषकताबीजसत्त्वेन धारणमेव नकुतइत्यतआह। न च व्यभिचारेति। मात्रपदेन तथाविधव्यवहारविषयत्वस्यावच्छेदः। प्रकृ

तोपाधित्वरूपेणस्येति निर्वाहो। नियम्यत्वं तथा च व्यभिचारोन्नायकत्वं यत्र तत्रावश्यमुपाधित्वरूपेणेति नियमो नेत्यर्थः कथकानां।
वादजल्पवितंडासु कथासु च निपुणानां। तथाविधव्यवहारः उपाधिव्यवहारः। तथा च तद्विषयत्वमेव प्रकृतोपाधित्वं स्यान्नियामकं तद
भावात्पृथिवीत्वादेर्नोपाधित्वमिति धारणमनुपाधित्वरूपेणमुचितमिति भावः। ननु पृथिवीत्वादिभावादिव्यावृत्तस्य व्यवहारविषयतावच्छेदक
स्याभावेन व्यावृत्तित्वव्यवहारविषयत्वमपि दुर्निरूप्यमत आह। तदवच्छेदकमेवेति। तथाविधव्यवहारविषयतावच्छेदकं चानंतुपद्धर्मावच्छिन्नाभा
वृत्तित्व५ धिकरणीभूतयत्किंचिदधिकरणे सामान्यं साध्याव्याप्यत्वव्याप्यसाधनवृत्तित्व च तद्धर्मावच्छिन्नं तेनोपाधिरित्येवं रूपसाध्यतासिद्धयुन्नायकत्वमेव
तद्रूपं पृथिवीत्वाभावादिव्यावृत्तं कथं यन्न तादृशव्यवहारविषयतावच्छेदकमत आह व्याप्यत्वासिद्धीति संभवदपि। पृथिवीत्वाभावादिव्यावृत्तं संभव
दपीत्यर्था। नव्यवहारविषयतावच्छेदकं। गौरवादिति। अव्यभिचरितत्वविशिष्टसामानाधिकरण्यरूपव्याप्यताभावरूपा व्यभिचारस्य लघुत्वादिति
भावः। केचित्तु। व्याप्यत्वासिद्ध्युन्नायकत्वं स्वाव्याप्यत्वेन विशेषितानिशेषितस्यासाधारणेन व्याप्यत्वाभावोन्नायकत्वं। संभवदपीति। पृथिवीत्वाभावा
दिसाधारणं संभवदपीत्यर्थः। गौरवादिति। स्वमते पृथिवीत्वाभावादावतिप्रसंगस्य दोषत्वसंभवेपि पूर्वपक्षिणा पृथिवीत्वाभावादेरप्युपाधिव्यवहारस्येष्ट
त्वात्तरति व्याप्ति नेषा। दर्शितमाह इति व्याचक्षुः। अत एव। निरुक्तव्याप्यत्वासिद्ध्युन्नायकत्वसाकांक्षहेतुकेद्रव्यत्वाद्युपसंग्राहकस्य व्याप्यत्वासिद्ध्युन्नायकत्वा

व्याप्यत्वासिद्धिप्रतियोगित्वस्य गौरवेण व्यवहारविषयतानवच्छेदकत्वादेवं स्वव्याप्यत्वेनेति। आकाशं जलत्वाव्याप्यं द्रव्यत्वाव्याप्यत्वादित्यर्थः
एवं लाघवस्यादरणीयत्वे। स्वव्यभिचारेण। विशेषिता विशेषितेन। तथा व्यवहारविषयतावच्छेदकं लाघवादिति। यत्किंचिदधिकरणत्वस्य सा
मान्यस्य प्रवेशाल्लाघवं। उपाधौ पृथिवीभावरूपोपाधौ। नहीति। यदि लाघवपुरस्कारो व्यवहारानादरे लोकरूपविषयतावच्छेदकत्वस्वीकारस्तदेत्य
र्थः। साध्याभावेति। रूपाभावद्रव्यत्वाद्यन्यतमाधिकरणं यत्साध्यादितन्निष्ठाभावप्रतियोगित्वाभावात् पृथिवीत्वाभावादेस्तद्वारणमेवेति भावः। अति
लाघवादिति। उन्नायकत्वे व्याप्यत्वादेः प्रवेशात्तदपेक्षया लाघवमिति भावः। ननु यद्व्यभिचारित्वेति मूले उन्नायकत्वस्यैव विषयतावच्छेदकत्वक
थनात्तद्विरोध इत्यत आह। एकैकेति। सहार्थेति। यद्व्यभिचारित्वेन सह साधनस्य साध्यव्यभिचारित्वमिति मूलार्थः। तद्रूपेति। तद्रूपस्य विरुद्धसा
धारणत्वात् साध्यसामानाधिकरण्यविशेषणेपि तद्रूपे व्यभिचारस्य निस्फुटतया तज्ज्ञानस्योपाधित्वव्यवहाराजनकत्वादिति यदि तदा पृथिवीत्वाभा
वसंग्राहकत्वं तु तेपि रूपे तुल्यमित्यर्थः। ननु पृथिवीत्वाभावादौ तेषां नोपाधिव्यवहार इत्येवं कुतो निर्णीतमित्यत आह। अत एवेति। यत एव व्यभिचारानुमा
पकत्वमात्रेण नोपाधिव्यवहारः किंतु यद्धर्मावच्छिन्नेत्यादिरूपेणैव अत एवेत्यर्थः। साध्ये व्याप्यतावच्छेदकं साध्यनिष्ठं उपाधिनिष्ठं पितव्याप्यतावच्छे
दकं। नियमत इति। कदाचिदनुसरणे यथाकथंचिद्व्यभिचारोन्नायकतामात्रेणापि उपाधित्वव्यवहारः प्रसज्येतेति भावः। यद्वेति। यद्वा तु उपाधिव्यभिचारोपि स

राम

तिअवश्यं साध्यव्यभिचार इत्येवंरूपनियम इत्यर्थः। यथा स श्यामो मित्रातनयत्वादित्यत्र शाकपाकजत्वोपाधौ मित्रातनयत्वं ताद्रशो धर्मस्तद्वति शाकपाकज
त्वव्यभिचारस्य श्यामत्वव्यभिचारनैयत्यात्। वायुः प्रत्यक्षः प्रमेयत्वादित्यत्रोद्भूतरूपोपाधौ वहिर्द्रव्यत्वं ताद्रशो धर्मस्तद्वति उद्भूतरूपव्यभिचारस्य प्रत्यक्षत्वव्यभिचा
रनैयत्यात्। अन्यथा स श्यामो मित्रातनयत्वादित्यत्र मित्रातनयत्वमात्रविशेष्यकधीविशेष्यत्वे सति शाकपाकजत्वव्यभिचारित्वादित्यादिक्रमेण तत्र व्यभिचारानुमानसंभ
वेपि नियमनस्याद्रशधर्मानुसरणं तेषां निष्फलं स्यात्। तथा च ताद्रशधर्मानुसरणादेवं जानीमो यदेकाधिकरणं तत्त्वेन यद्व्यभिचारः साध्यव्यभिचारनियतः सैवोपा ए ४
धिस्तेषामभिमतो नान्यः। अतः पृथिवीत्वाभावादौ न तद्वारणमनुचितमेवेति भावः। ननु महाकालान्यो घटादिः सत्त्वे दैशिकविशेषणतया साध्यतायां कालिकेन
हेतुतायामेवं उक्तलक्षणे पृथिवीत्वाभावानुपमयाग्नुपाधावतिव्याप्तिः एवं उक्तलक्षणे दशाभाववति एवं उ काले कालिकतया वृत्तित्वस्य महाकालस्य दाभाववन्महाकाल
वृत्तित्वरूपसाध्यव्यभिचारव्याप्यत्वात्। न च तद्धर्मावच्छिन्नाभावाधिकरणीभूतयत्किंचिदधिकरणवृत्तित्वस्य साध्यव्यभिचारव्याप्यतायां अधिकरणस्यापि व्याप्य
तावच्छेदककोटिप्रविष्टत्वविवक्षणान्नातिव्याप्तिः। अत्र तु कालिकसंबंधेन वृत्तित्वमात्रस्यैव महाकालवृत्तित्वव्याप्यतया वैयर्थ्येनाधिकरणस्याप्रवेशादिति वाच्यं
तथा सति तत्र स्वसदुपाधौ महाकालान्यत्वप्रकारकप्रमाविशेष्यत्वादावव्याप्तिः तत्र तद्व्यभिचारस्यापि व्याप्यतायां वैयर्थ्येनाधिकरणस्याप्रवेशात्। एवमिदमेतद्रू
पात्मिन्नं गुणत्वादित्यत्रापि एतद्रूपभेदेनुपाधावतिव्याप्तिः एतद्रूपभेदाभाववदेतद्रूपसमवेतत्वस्यैतद्रूपभिन्नासमवेतत्वव्याप्यत्वात्। एतेन नादृशं यत्किंचिदधि

करणवृत्तित्वस्य तादात्म्येन साध्यव्यभिचारव्याप्यत्वं विवक्षितं । महाकालखंडकालवृत्तित्वयोः स्वरूपसंबंधात्मकत्वेन महाकालखंडकालस्वरूपपर्यवसा-
नात् तादात्म्येन व्याप्तिरिति परास्तं । एतद्रूपसमवेतत्वस्यैतद्रूपभिन्नसमवेतत्वस्य चैकेन तथापि वारणात् । हेतुनिष्ठस्वरूपसंबंधेन साध्यव्यभिचारोन्नायके
उक्तव्याप्तियोग्यत्वाभावाच्च स्वरसतः आह वस्तुतस्त्विति । यद्भावेनेति खंडकालभेदाभावस्य महाकालभेदाभावासाधकत्वान्नोक्तस्य नेति व्याप्तिरिति । ननु
ध्वंसत्वादिरत्र संयोगाभावे रूपाधिः स्वेन स्यात् साधनवति गुणादौ संयोगाभावेन ध्वंसत्वाभावानुमानासंभवात् । न स्य केवलान्वयितया गुणवृत्तित्वादिविशि-
ष्टस्य तस्य हेतुतायां विशेषणवैयर्थ्यात् । न च गुणादिवृत्तित्वविशिष्टत्वादिना संयोगाभावस्य हेतुत्वमस्त्वन्तमेवेति वाच्यं । तथा सति गंधवद्द्रव्यत्वादिस-
त्त्वसाधनव्यापकतयानुपाधेः संयोगाद्यतनित्याप्तेः । भवति हि जलं गंधाभाववज्जलवृत्तित्वविशिष्टत्वादित्यनुमितौ तादृशविशिष्टत्वेन संयोगाभावस्या-
पि हेतुत्वमतो यद्भावमात्रवृत्तिधर्मत्वेनानायकताया । तथा च व्याप्तिस्तदवस्थैवेत्यत आह यद्दन्यत्वेनेति आद्यपादिति । पूर्वत्र यद्व्यभिचारसाध्य- वे१
व्यभिचारयोर्वृत्तित्वे भेदाभेदस्वमिति भावः । अत एवेति । जलत्वतेजस्त्वोभयवतो प्रसिद्ध्या तदन्यत्वस्याप्रसिद्धत्वादिति भावः । पूर्वविवक्षायां तु ह्रदत्वेहवद्द्रव्य-
त्वादिसत्र जलत्वतेजस्त्वयोरन्यतरत्वेनोपाधित्वं स्यात् । यद्धर्मावच्छिन्नाभावाधिकरणीभूतयत्किंचिदधिकरणक पृथिव्यादिवृत्तित्वस्य स्नेहव्य-
भिचारव्याप्यस्य द्रव्यत्वेसत्त्वात्तत्रातिव्याप्तिः स्यादिति भावः । अत्र च साध्यसमानाधिकरणत्वेनावच्छिन्नस्य धर्मितावच्छेदकस्यापि विशेषणीयत्वात्तेनैवा

राम

१९

स्य१

स्यापि वारणात् इत्यपि वेत्यादिपाठः अप्रामाणिक इति केचित् । वस्तुतस्तु उपाधितावच्छेदकपर्याप्त्यवच्छिन्नं साध्यसमानाधिकरणत्वं उपाधि-
तावच्छेदकस्य वा साध्याधिकरणवृत्तित्वावच्छेदकत्वं पूर्वकल्पे वक्तव्यं । अतः कल्पे उपाधितावच्छेदकाश्रयस्य साध्यसमानाधिकरणत्वं अवच्छेदक-
ना२ स्य वा साध्यसमानाधिकरणवृत्तित्वमात्रं वक्तव्यं न तु पर्याप्तिरपि प्रवेश्या इति लाघवं । न च धूमवान्वह्नेरित्यत्र ह्रदवृत्तित्वविशिष्टद्रव्यत्वादि-
ना अत्र कल्पे उपाधितापत्तिः । तदवच्छिन्नाभावस्य तदवच्छिन्नवद्भेदस्य वा वैयर्थ्येन धूमाभावाद्युन्नायकत्वाभावादिति । प्रकृतमनुसरन्
वाक्यमपि तत्परतया व्याचष्टे । यद्व्यभिचारित्वेनेत्यादिना । हेतुमद्वृत्तीति । साधनवान्साध्याभाववानुपाध्यभाववानित्यनुमाने न साधनवत्त्वेनोपा-
ध्यभावरूपहेतुमत्त्वभाने साध्याभावरूपसाध्यवत्त्वभाने च तद्वृत्तित्वमपि प्रविष्टावच्छेदके साधने भासत इति उपाधिव्यभिचारित्वस्यानुमितिजन-
कतानतिविषयत्वरूपहेतून्नायकत्वं साध्यव्यभिचारस्यानुमितिविषयत्वं च संभवतीति भावः । अत्र चेति । अनयोः कल्पयोरित्यर्थः । अवच्छिन्न इति । उपाधि-
तावच्छेदकावच्छिन्न इत्यर्थः । उपाधित्वे पुनरिति । व्यभिचारानुमानस्यार्द्धं धनत्वेनोपाधिव्यवहारस्य च साध्यसमानाधिकरणव्यत्वेवोपपत्तेः उक्तस्यो-
पाधित्वाभावेपि न क्षतिरित्यर्थः । अत्र च यद्धर्मावच्छिन्नयन्निष्ठाधिकरणता साध्याधिकरणे तद्धर्मावच्छिन्नतन्निष्ठक्तिरुपाधिरिति पूर्वस्य यद्धर्मावच्छिन्ना-
धिकरणता साध्याधिकरणे तद्धर्मावच्छिन्नमुपाधिरिति द्वितीयस्यार्थः । तेन विशिष्टस्यानतिरिक्तत्वाद्धूमवान्वह्नेरित्यादौ ह्रदवृत्तित्वविशिष्टद्रव्यत्वादिनो-

MEMORIA

नउपाधित्वमितिभावः। प्रथमविवरणानुसारेणाह तेनेत्यादि। द्वितीयविवरणीयानुरुद्धत्वाभावस्य व्यभिचारितयाकिंचिद्विशेषणदानेन च व्यर्थ
तया साध्याभावासाधकत्वात्तदनुसारेणाह नवेति। इदं च नोद्व्यत्वादित्यत्र स्पर्शसामान्याभावो जातिसाभावश्च विरुद्धः। तदभावविशेषस्य शीतस्प
र्शजलत्वाभकस्य साध्याभावोन्नायकत्वं संभवात्तत्रापि तद्विशेषणं। तत्रापि स्पर्शाभावस्य जन्यतेजसि स्वमते उत्पत्तिकालावच्छेदेन साध्यसमानाधिक
रणत्वाज्जातिसभावपर्यंतानुधावनं। शीतस्पर्शेति। द्रव्यं तेजस्त्वाभाववदशीतस्पर्शवत्त्वात् जलत्वाद्वा इत्यनुमानाकारो बोध्यः। पूर्वविवरणीयापि वा
वृत्तिः पूर्ववदनातयापि तत्र रुद्धत्वाभाववद्योगोलकवृत्तित्वस्योन्नायकतायां रुद्धत्वाभावस्य वैयर्थ्येनायोगोलकवृत्तित्वस्यैव सामर्थ्यात् यदभावस्योन्नायकता
वच्छेदककोटिप्रविष्टत्वविवक्षणेपि तद्वारणसंभवात् इदं तन्नाव्याप्तिनत्रेव्याहृतिमाह। तद्वृत्तित्वेन वेति। अथमोपन्यस्तस्यापि चरमव्यावृत्तिदानेतच्छेदे नतद
भावस्य परामर्शशब्दाघराय। एवमुत्तरत्रापि यथायथं बोध्यं। इदं च प्रौढिवादेनोक्तं। तथाविवरणीयामहाकालान्यघटादित्यत्र कालिकसंबंधेन हेतुतायां
सद्धुपाधावव्याप्तिः कालिकसंबंधेन वृत्तित्वमात्रस्यैव साध्यव्यभिचारव्याप्यतया उपाध्यभावस्य वैयर्थ्येनाप्रवेशादित्युक्तत्वादिति। द्रव्यं तेजस्त्वव्यभिचारि
तस्पर्शवद्वृत्तित्वान्न्यतरत्ववद्वृत्तित्वाद्वा इत्यनुमानशरीरं बोध्यं। जातिसभावादौ नवा तिव्याप्तिरित्यनुषंगेनान्वयः। नन्विदं कंबुग्रीवादिमद्व्यत्वादित्यत्र घटत्व
व्यभिचारित्वेऽवसमालाऽवच्छिन्नकांतित्वसत्तावच्छेदकस्याव्याप्तिः। न व्यभिचारित्वस्य तदभावस्य वा वैयर्थ्येन साध्यव्यभिचारे साध्याभावेवासाधकतया

राम

२

त्। तथाहि। द्रव्यं कंबुग्रीवादिमत्त्वव्यभिचारिघटत्वव्यभिचारित्वव्यभिचारित्वाद्गगनपरिमाणवदित्यत्र घटत्वादिरूपस्यैव सामर्थ्येनाधिकस्य स्वरू
पासिद्धिवारकतया वैयर्थ्यात्। तथा च द्रव्यं कंबुग्रीवादिमत्त्वाभाववद्घटत्वव्यभिचारित्वाभावाद्गगनवदित्यत्र घट[illegible]वादित्यस्यैव सार्थकत्वेऽधिकस्य
वैयर्थ्यादत आह। द्रव्यत्वादिनेति। घटत्वव्यभिचारित्वघटत्वाभाववति संयोगेन समवायेन वा वृत्तित्वं घटोपरि उत्पन्नविनष्टघटस्यापि घटत्वाभाववत्त्व
ध्वंसनघटावयवे संयोगेन वृत्तित्वात्। न साध्यव्यापकत्वं संयोगेन गगनादिवृत्तित्वे तु न स्पसाधनव्यापकतया घटत्वाभाववत्त्वमेव तत्र मेवोपाधिरिति ध्येयं
घटत्वादेरिति व्यभिचारसाधनमभिप्रेत्य। यद्यपि घटत्वाभावाधिकरणीभूतगगनवृत्तित्वादेस्तादृशेण हेतुनाम घटत्वादेरप्रवेशान्न वैयर्थ्यसंभावनापि
तथापि प्रौढिवादेन यदभावस्यापि व्याप्यतावच्छेदककोटिप्रवेशमभ्युपेत्य वैयर्थ्यसमाहितमिति ध्येयं तदभावस्येति। साध्याभावसाधनमभिप्रेत्य भूमघा
गभाववदिति। न च तथापि घटत्वव्यभिचारित्वव्यभिचारित्वे घटत्वव्यभिचारित्वस्य सत्त्वात्तद्रूपावच्छिन्नस्यैव व्याप्यतायामधिकस्य वैयर्थ्यमेवेति वाच्यं संयोगे
न घटत्वव्यभिचारित्वस्योपाधितायामुपाध्यभाववति हेतुनावच्छेदकेन समवायेन वृत्तित्वप्रवेशादेव वैयर्थ्याभावात् समवायेन घटत्वव्यभिचारित्वस्यो
पाधितायां तु घटत्वव्यभिचारित्वस्य घटत्वव्यापकतया तदभावस्यारवंड स्वेन घटिक्तिमद्वृत्तित्वहेतौ घटत्वव्यभिचारित्वस्याप्रवेशान्न वैयर्थ्यमिति। वस्तुतः पू
र्वकल्पे यदभावस्य व्याप्यतावच्छेदककोटिप्रवेश एव न विवक्षितः घटत्वव्यभिचारित्वेनापि उपाधिना यां उपाधित्वानपायादित्येवसमाधानं बोध्यं। य

गादाधरी।

यद्यपि व्यभिचारित्वे यदभावेवाय द्धर्मावच्छिन्नप्रतियोगितया व्याप्यतावच्छेदककोटिप्रवेशात् एवं तद्धर्मावच्छिन्नस्योपाधित्वमित्याशयं मत्वा शंक
ते न चेति। धूमवान्वह्नेरित्यादावयोगोलकत्वाभावेनोपाधिः स्यात्तस्योन्नायकतायामप्रवेशादित्यर्थः। साध्याभावोन्नायकतायां प्रतियोगिनः
व्यभिचारोन्नायकतायां तद्वृत्तित्वस्य हेतुत्वादिति तस्य तदभावस्यावक्तते। वक्तव्यगत्या। व्यभिचारसाधने यदभावत्वप्रवेशेपि वैयर्थ्याभावकं वाचि
न्नतेदर्शयति। यदभावेत्यादि। अयोगोलकत्ववद्वृत्तित्वस्यानुपस्थितावयोगोलकत्वाभाववद्वृत्तित्वस्य व्यभिचारोन्नायकतायां हेतुत्वेन वैयर्थ्यमित्यन्वयः
व्यभिचारसाधने वेति। साध्याभावसाधने तु हेतुतावच्छेदकरूपेणोपस्थितत्वादेव वैयर्थ्यं भवेति। वदन्ती। स्वरसः। तद्बीजं तु महाकालान्यायधटादित्यत्र व्यभि
चारसाधने केवलवृत्तित्वस्यैव व्याप्यतयोपाधेस्तदभावस्य वाप्रवेशेन तु क्तमेव समाधानं। अभावस्य कचिद्व्याप्यतावच्छेदकत्वोक्तिः प्रौढिवादेनेत्येव सारं के
चित्तु कम्बुग्रीवादिमत्त्वादेर्यथा न प्रतियोगितावच्छेदकत्वं तथा व्याप्यतावच्छेदकत्वमपि तत्र समानाधिकरणलघुधर्मप्रवेशेपि व्याप्यतावच्छेदकत्वमेवेत्य
प्यस्वरसमाहुः। यद्धर्मावच्छेदेनेत्यत्र यद्धर्मस्यावच्छेदकत्वमन्यूनवृत्तित्वमनतिरिक्तवृत्तित्वं स्वरूपसंबंधविशेषो वा न संभवति सर्वमोमित्रानन्तयत्वादित्याशोमि
त्राननयत्वादीनां तथात्वसंभवादत आह। यद्धर्मवतीति। एवं यद्धर्मवति साध्यप्रसिद्धं तद्वच्छिन्नसाध्यव्यापकत्वस्य विवक्षणे। सपक्षे केति। वह्निमान् धूमादित्यत्र महा
नसत्वावच्छिन्नवह्निव्यापकं यन्न नवत्वादाविस्यर्थः। अयेति। अभावच्छेदकत्वं व्यापकत्वं महानसत्वं च तद्धूमवद्वृत्तित्वविशिष्टवह्निव्यापकं। तेन च यत्तन्नवत्वादावतिप्रसंग

राम

२१

इति भावः। साधनवद्वृत्तित्वविशिष्टसाध्यव्यापकीभूतधर्मावच्छिन्नसाध्यव्यापकत्वापेक्षया साधनविशिष्टसाध्यव्यापकत्वस्यैव लघुत्वात्तदेवाह साध्यसाधनसं
बंधेति। साधनविशिष्टसाध्येत्यर्थः। नन्वेवं विरुद्धस्थलीयोपाधावव्याप्तिस्तत्र साध्यसाधनसंबंधाप्रसिद्धेः अत आह विरुद्धमात्रेति। मात्रपदं कृत्स्नार्थकं। यथाश्रुति
गगनादौ विरुद्धे उपाध्यभावेन द्वृत्तिः तथा विरुद्धान्तरेपीत्यस्य सूचनाय। नन्वेवं तत्सत्तावच्छेदकस्य तत्साधारण्यान्नभः लक्षणाभावे व्याप्तिरेवेत्यत आह। तत्सत्ताव
च्छेदकेवेति। धूमवान्वह्नेरित्यत्र धूमसमानाधिकरणवह्नेर्धूमव्याप्यत्वात्तत्र व्यभिचारोन्नायकत्वमसंभवीत्यतस्तादृशवृत्तित्वेनेति। साध्यसमानाधिकरणवृत्तित्वेनेत्य
र्थः। ननु साध्यसाधनसंबंधव्यापकत्वमपि यथाश्रुतमशब्दान्तरभ्यत इति साधनवतीतिपदपूरणेन तदर्थलाभ इति तद्धर्मपदस्य साधनव्यापकधर्मपरतया विरुद्ध
स्थलीयोपाधिसंग्रहसंभवेन तदसंग्रहोन्याय इत्यत आह साधनेति। सद्धेतौ तु साधनव्यापकीभूतधर्मावच्छिन्नसाध्यव्यापकस्य साधनव्यापकत्वनियमात्सपक्षैक
देशवृत्तिधर्मेतिप्रसंग इति। अन्नत इति। तादृशधर्मोत्तरास्फूर्तावप्यनन्तरत्वमादायैव लक्षणगमनमिति भावः। ननु वायुः प्रमेयत्वादित्यत्र प्रमेयत्वव्यापक
धर्मावच्छिन्नप्रसक्तस्य प्रसक्तमात्रेण स्वत्वान्तद्व्यापकतया नोद्भूतरूपवत्त्वमुपाधिः स्यादित्यत आह। प्रमेयत्वादिनेति। आदिपदाद्व्यत्वादिव्याप्तिरिक्तधर्मपरिग्र
हः। तत्सत्तावच्छेदकस्य तत्साधारण्यं वारयति तत्सत्तावच्छेदकेति। प्रयोजकत्वं वाचीति। प्रयोजकत्वं चात्र तादृप्येण व्याप्यत्वं तदेव दर्शयति। यद्यभिचारस्येत्यु
द्भूतरूपव्यभिचारस्य नादृशप्रयोजकत्वं आत्मादौ प्रमेयत्वस्य तत्सत्त्वेपि प्रसक्तत्वव्यभिचाराभावादिति। वह्निदीलानुकूलधर्मसमवायीदाहजनकत्वादित्यनुमाने
न गुरुत्वादेर्दीलानुकूलत्वाभावान्नोक्तरूपावच्छिन्नसाध्याव्यापकत्वं प्रत्यनुमानाकारं दर्शयति जनकत्वेनेति। तथा च वह्निः कार्यानुकूलादिष्टानो द्रियधर्म

समवायीजनकत्वादित्यनुमानेजनकत्वावछिन्नस्यगुरुत्वात्मकसाध्यस्यघटादौसत्वात्तद्व्यापकतयानोपाधित्वंस्यादित्यर्थः।बहिरिंद्रिया
प्रत्यक्षत्वस्यागुरुत्वावछिन्नसाध्यव्यापकस्याप्रसिद्धिस्यापकस्यपृथिवीमात्रवृत्तित्वमितिमतेनेदं।तेनालोकादौनसाध्यव्यापकतेति।ग्रंथकृतैवेति।अ
न्यैनोद्भावनेग्रंथकृतांतन्नसंभवतमित्यादिकंतत्रोत्तरंस्यादितितन्निराकरणार्थमिदमुक्तं।उत्तरग्रंथविरोधस्यजरूणयाप्यन्योपाधिपरतयोद्धर्तुं
शक्यत्वादतआहदूषकेनेति।जनकत्वंकार्यानुकूलत्वादिह्यानीद्रियधर्मसमिचारिअगुरुत्वंबहिरिंद्रियाप्रत्यक्षत्वव्यभिचारित्वादित्यादिरीत्याव्यभिचा
रोन्नायकत्वमस्त्येवेत्यर्थः।यद्धर्मेति।महानसत्वावछिन्नव्यापकत्वंजनकत्वादेर्महानसत्वावछिन्नधूमव्यापकत्वान्नोपाधित्वमितिभावः।घटोत्पत्तिरूपवान्पृथिवी
त्वादित्यत्रनतुघटोत्पत्तिकालावछेदेनतद्घटेरूपस्याभावात्पृथिवीत्वस्यस्यतत्रसत्वाच्चतद्घटोत्पत्तिकालीनत्वावछिन्नरूपव्यापकस्यतद्घटान्यत्वस्यत
द्घटोत्पत्तिकालीनेदैवन्नपृथिवीत्ववतितद्घटेवर्त्तमानस्योपाधित्वंस्यादतआह।अवछेदकत्वंचेति।तथाचयद्धर्मसामानाधिकरण्यविशिष्टत्वमेवयद्धर्मा
वछिन्नत्वंनतुस्वरूपसंबंधरूपंविवक्षितमितिभावः।अन्वेकस्मिन्नेवोपाधौव्याप्यतावछेदकधर्मभेदाद्व्याप्तिरूपणभेदःस्यादतआहसाधर्म्यास्वानधिकरणीभूत
साधनाधिकरणवृत्तिधर्मत्वेनानुगमय्यसाधनाव्यापकत्वविशेषणपरित्यागेनलाघवंचेत्यादिनाव्यापकत्वरूपणमाहस्वानधिकरणेति।स्वंउपाधित्वेनाभिमतं।
अार्द्रेन्धनादि।तदनधिकरणीभूतंयत्साधनाधिकरणंतद्वृत्तीत्यर्थः।सद्धेतौतुस्वानधिकरणीभूतंयत्साधनाधिकरणंतद्वृत्तिधर्मावछिन्नसाध्यस्यस्वानधिकरणे

पितत्साधनाधिकरणेऽवश्यंसत्वात्तन्नव्यापकत्वमितिभावः।तद्धर्मेति।तादृशावछेदकधर्मेत्यर्थः।अत्रचतादृशाभावप्रतियोगितावि शिष्या
पादेया।तेनैनतद्रूपवान्द्रव्यत्वादित्यादौतत्तद्रूपाभावप्रतियोगितावछेदकत्वस्यैवावछेदकतयायत्किंचिद्धर्मावछिन्नेतद्रूपाधिकरणघटितस्यगो
त्वादनवछेदकत्वेपिनाव्याप्तिः।अतएवोपाधेरार्द्रेन्धनादेस्तादृशान्योन्याभावप्रतियोगितावछेदकत्वादाह।आद्येति।तथाचोपाधितावछेदकेता
दृशान्योन्याभावप्रतियोगितावछेदकत्वंविवक्षितमितिभावः।नन्वयंप्रत्यक्षोगुणत्वादित्यत्रोद्भूतरूपवत्त्वंनोपाधिःस्यात्तस्यशुद्धसाध्याव्यापकत्वेन
बहिर्द्रव्यत्वावछिन्नसाध्यव्यापकतयोपाधित्वेबहिर्द्रव्यत्वस्यस्वानधिकरणीभूतसाधनाधिकरणवृत्तित्वाभावेनतमादायोक्तलक्षणस्यतत्राभावादत
गुणत्वादिनेति।घाणकजन्यत्वेत्युद्भूतरूपानधिकरणंसाधनाधिकरणंघ्राणकगुणस्तद्वृत्तिघ्राणकजन्यत्वंतदवछिन्नप्रत्यक्षत्वंत्रसरेणौनत्रोद्भूतरू
 पमितिलक्षणसमन्वयः।बहिर्द्रव्यत्वमादायैवलक्षणगमनमितिनियमाभावादिति।केचित्तुशुद्धसाध्याव्यापकेसाधनावछिन्नपक्षधर्मावछिन्नसाध्य
प्रतिव्यापकतयोपाधित्वं।तथाचघटःप्रत्यक्षोगुणत्वादित्यत्रतथात्वाभावान्नोद्भूतरूपमुपाधिःस्यादतआहगुणत्वादिनेति।घ्राणकजन्यत्वेति।तादृशाय
त्किंचिद्धर्मावछिन्नसाध्यव्यापकत्वेनैवनियमोनतुतादृशार्थस्यसाधनादिरूपत्वेनापीतिभावइतिव्याचक्षुः।उक्तरूपोपाधेर्व्यभिचारानुमानमपिस्फुकर
मित्याह।एवंचेति।वायुःप्रत्यक्षोद्रव्यत्वादित्यत्रोद्भूतरूपवतिपरमाणौवायौद्रव्यत्वसाध्यव्यभिचारसत्वात्तत्परमाणुघटान्यतरस्मिन्द्रव्यत्वस्योद्भूतरूपव्यभिचाराभावा

उपाधिव्यभिचारस्यहेतोः स्वरूपासिद्धिरतः स्वानधिकरणेति। उद्भूतरूपानधिकरणेऽतीन्द्रियगुणादौ सत्तायाः साध्यव्यभिचारसत्त्वात् गुणघटान्यतरस्मि
न् व्यभिचारे उद्भूतरूपव्यभिचाराभावात्तथैवासिद्धिरत आह साधनस्येति। स्वानधिकरणीभूतसाधनाधिकरणात्मघटान्यतरस्मिन्नुद्भूतरूपव्यभिचारस्य प्रत्य
क्षत्वव्यभिचाराव्याप्यत्वात्तस्य पक्षे साध्यव्यभिचार इति। विशेष्यभागस्य सार्थक्यार्थं यत्रचेत्यादि। तत्रापि स्वानधिकरणतद्भेदयप्रवेशे तु आत्मनि वृत्तिधर्मेऽउ
पाधिव्यभिचारिणि साध्यव्यभिचाराभावेन तथैव व्यभिचार इति। स्वाधिकरण इति। ननु नयवृत्तिधर्मस्य स्वानधिकरणसाध्याधिकरणवृत्तित्वेन पक्षे व्यभिचा
रस्यतोऽन्यत्रेति। तद्व्यभिचारेणोपाधिव्यभिचारेण। यदभावेन साधनवति साध्याभाव उन्नीयत इति कल्पानुसारेणाह साधनवतीति। मित्रातनयत्वेन श्यामत्वाभा
वव्याप्तिमत्तनयत्वे सति शाकपाकजत्वाभावात्। एवं द्रव्यत्वात्प्रत्यक्षत्वाभाववान् वह्निर्द्रव्यत्वे सत्युद्भूतरूपाभावादित्यादिक्रमेणानुमानं। काकादौ आत्मादौ व्य
भिचारवारणाय पक्षस्थं तं। एतस्यापि लक्षणस्यासंघटितत्वेनेतत्साध्यकतत्साधनक यावदुपाधिसाधारणत्वं न यत्नेत्यतिलक्षणान्तरमाह। साध्यासमानाधिक
रणस्येति सद्धेतावुपाधिलक्षणातिप्रसंगवारणाय। अधिकरणभिन्नं साधनवद्विशेषणं। साध्यासमानाधिकरणत्वं च साध्यवदवृत्तित्वं सद्धेतुमतश्च साध्य
वदवृत्तिमत्त्वाभावान्नातिप्रसंगः। धूमोक्तसाध्यव्यापकतापरित्यागेनैव लक्षणं कर्तुं गुर्वपि विशेषणमाह साध्यव्यापकाभावस्येति। साध्याभावस्येति सर्वोपेरूपाल्लघ्वपि
नोक्तेऽउपाधिशरीरभाने व्यभिचारस्य प्रथमतः स्फूर्तावुपाधिना व्यभिचारानुमानस्य सांप्रदायिकस्य वैयर्थ्यादिति। पृथिवी गंधवती द्रव्यत्वादित्यत्र साधनव्याप
कस्य वारणाय व्यधिकरणांतं। तत्रैव पृथिवीत्वविशिष्टद्रव्यत्वादिनाऽउपाधित्ववारणाय प्रतियोगितावच्छेदकावच्छिन्नेति। उपाधेस्तादृशाभावप्रतियो
मयोगस्य

राम

२३

त्वोक्तौ पृथिवीत्वसंयोगोभयत्वावच्छिन्नाभावस्य तादृशाप्रतियोगित्वेन तथैवातिव्याप्तिरतः प्रतियोगितावच्छेदकेति। लघुसमनियतकं बुद्धेत्वादिम
त्त्वादिनानुतोपाधित्वमिति भावः। विरुद्धवारणाय साध्यसमानाधिकरणेति। साध्यासमानाधिकरणाई न व्यक्तिसंग्रहाय अवच्छेदकेवच्छिन्नत्वं विशे
षणं। अत्र च व्यापकताघटकसंबंधेन साध्यव्यापकाभावः। साधनवत्त्वं हेतुतावच्छेदकसंबंधेन। प्रतियोगिवैयधिकरण्यं साध्यसामानाधिकरण्यं च
उपाधिताघटकसंबंधेन। व्याप्तिनिरुक्तव्याप्तिलक्षणवद्बोध्या। ननु मूलोक्तलक्षणे साधनेपदस्य सामान्यशब्दस्य साध्यव्यापकाभावादिसमानाधिकरण
साधनविशेषपरतया तथा लक्षणार्थो वर्णनीयः तत्र च साध्यवदवृत्तिवारणे फलकं पर्यवसितसाध्यव्यापकपर्यन्तं व्यर्थं साध्यसामानाधिकरण्येनैव
तद्वारणसंभवादत आह एवं चेति। कश्चित्पर्यवसितेत्यादेवपाभः पूर्वलक्षणादेन लक्षणस्योत्कर्षं दर्शयति तत्साध्यकेति। सकलोपाधीति। एकसं
बंधावच्छिन्नसकलोपाधीत्यर्थः। तेन संबंधभेदेन प्रतियोगिवैयधिकरण्यादेरुपाधितावच्छेदकसंबंधभेदेन साध्यसमानाधिकरणवृत्तित्वस्य भेदेपि
न दोषः। यथाश्रुतमूलमनुसंधायाह। साध्यव्यापकत्वेति। सद्धेतावतिप्रसंगवारणाय हेतुंत्वं। वह्निमान्धूमादित्यत्र द्रव्यत्वादेरपि भिन्नरूपेण साध्यव्यापक
त्वसाधनाव्यापकत्वोभयवत्त्वात् तदनतिरिक्तवृत्तिरूपेणोपाधितास्यादतोऽवच्छेदकेति। तत्र च तदुभयस्यैकावच्छेदकाभावान्नातिव्याप्तिः। धूमवान्वह्नेरि
त्यादावयोगोलकवृत्तित्वमेव तादृशरूपं तदाऽनतिरिक्तवृत्तित्वस्य हृदे सत्त्वादतिव्याप्तिरतः साध्यसमानाधिकरणेत्यादि। साध्यसमानाधिकरणवृत्त्यभिधा
ने हृदवृत्तित्वविशिष्टद्रव्यत्वादिनोपाधित्वं स्यादतस्तस्यैवायं निष्कर्षः कृतः। अवच्छिन्नसाध्यव्यापकोपाधिसाधारण्याय साध्यव्यापकतावच्छेदकेति न कृते

नागानंदी

केवलान्वयितावच्छेदकस्यैव साध्यसमानाधिकरणधर्मसामान्यव्यापकतावच्छेदकत्वादसंभवइत्यतो यत्किंचिदिति। न च यत्किंचित्साध्यव्या
पकवृत्तितावच्छेदकत्वेनैव सामंजस्ये गुरुतरारंभो व्यर्थ इति वाच्यं साध्यवद्भिन्नतायाः स्वरूपसंबंधरूपावच्छेदकत्वानभ्युपगमादननिरिक्तवृत्तित्वादेश्च
स्वदवृत्तित्वविशिष्टद्रव्यत्वत्वादिसाधारणत्वात् यद्रूपावच्छिन्नाधिकरणतासाध्याधिकरणतद्वत्त्वयोः कोय स्वतत्त्वयोरननुगमादननुगमः। अत्र व
केवुष्यीवादिमत्त्वादिनानुपाधित्वे यत्किंचिदभावप्रतियोगितावच्छेदकत्वमपि विशेषणं देयं। अवच्छिन्नसाध्यव्यापकोपाधौ लक्षणं समर्थयति अवच्छि
न्नेति। सत्यामोमित्रातनयत्वादित्यादौ गौरमित्रातनयवृत्तित्वमेवं तादृशो धर्मस्तदननिरिक्तवृत्तित्वस्य शाकपाकजसत्त्वान्नाव्याप्तिरिति भावः। शाकपाकज
त्वविशिष्टद्रव्यत्वस्यापि अवच्छिन्नसाध्यव्यापकोपाधित्वात् तस्य गौरमित्रातनयावृत्तित्वाभावान्नतस्योपसंग्रह इत्यत आह न त इति। तत्रापि गौरमित्रातनय
भेदविशिष्टद्रव्यत्वत्वस्य तादृशत्वाद्धननिरिक्तवृत्तित्वेनैव लक्षणगमनमिति भावः। गंधवती द्रव्यत्वादित्यत्र पृथिवीवृत्तित्वविशिष्टद्रव्यत्वत्वस्य साध्यव्याप
कत्वसाधनाव्यापकतावच्छेदकत्वानदननिरिक्तवृत्तित्वस्य द्रव्यत्वे सत्त्वादतिप्रसंगः। तदवच्छिन्नाभाववदसंबद्धस्वविशिष्टसामान्यकत्वात्तु क्लौ नु स्व
त्वस्य प्रवेशान्न तत्साध्यकतत्साधके यावदुपाधिसाधारण्यमिति सत्त्वरसोवदंती सन्निनसूचितः। रूपादीति। कथकव्यवहारमतिक्रम्य व्यभिचारोन्नायकतामात्रे
णोपाधित्वसंग्राहकत्वेइत्यर्थः। पृथिवीत्वाभावात्मकस्वानधिकरणीभूतसाधनाधिकरणं यत्पृथिवी तद्वृत्तिधर्मावच्छिन्नसाध्यस्य पृथिव्यां सत्त्वेन पृथिवीत्वाभा

राम

२४

वस्य तदव्यापकतया पूर्वोक्तलक्षणस्य तत्राभावात्तत्साधारण्यार्थमाह स्वविशिष्टेति। स्वं उपाधित्वेनाभिमतं तद्विशिष्टं यत्साध्यं तदनधिकरणं यत्साधनाधि
करणं तद्वृत्तिधर्मावच्छिन्नेत्यर्थः। रूपवान्द्रव्यत्वादित्यादौ पृथिवीत्वाभावविशिष्टरूपानधिकरणं यद्वाय्वादि तद्वृत्ति यद्वायुजलान्यतरत्वं तदवच्छिन्नरूपव्यापकत्व
मस्त्येव पृथिवीत्वाभावस्येति तस्य संग्रहः। साध्यानधिकरणसाधनाधिकरणवृत्तिधर्मावच्छिन्नेत्युक्तौ उपाधिशरीरे ज्ञानेनैव व्यभिचारज्ञानं स्यादिति न तत्स
करणार्थं स्वविशिष्टेति। साध्यविशेषणं विशिष्टाभावसंपादकं। वह्निमान्धूमादित्यत्र महानसत्वादेरपि विशिष्टसाध्यानधिकरणसाधनाधिकरणपर्वतादिवृ
त्तिधर्मावच्छिन्नसाध्यसमानाधिकरणत्वादतिव्याप्तिरतो व्यापकतापर्यंतानुधावनं। इदं गुरुरूपादित्यत्र पृथिवीत्वाभावादावतिव्याप्तिवारणमाह अत्र चेति।
पूर्वदलेनेति। स्वविशिष्टसाध्यानधिकरणयत्साधनव्यक्त्यधिकरणवृत्तिधर्मावच्छिन्नसाध्यव्यापकत्वं तत्साधनव्यक्त्यव्यापकत्वमित्यर्थः। पृथिवीत्वाभावविशिष्टगु
रुत्वानधिकरणं रूपाधिकरणं द्विविधं पृथिवी तेजश्च तत्र पृथिवीवृत्तिधर्मावच्छिन्नसाध्यव्यापकत्वं पृथिवीत्वाभावस्य नास्तीति तेजोवृत्तिजलतेजोन्यतरत्वा
वच्छिन्नसाध्यव्यापकत्वे तेजोवृत्तिरूपस्य पूर्वदलप्रविष्टत्वात्तद्व्यापकत्वादेव नातिव्याप्तिरिति भावः। ननु द्रव्यत्वेन रूपे साध्ये पृथिवीत्वाभावः संग्राह्यो न तु रूप
गुरुत्वे साध्ये इत्यत्र किंबीजमत आह विवेचयिष्यत इति। तत्र द्रव्यत्वस्य हेतोरेकतया प्रागुक्तरीत्या पृथिवीत्वाभावव्यभिचारेण रूपव्यभिचारानुमानसं
भवाद्दूषकताबीजं संगच्छत्ते। अत्र तु पृथिवीत्वाभावव्यभिचारित्वस्य अधिकरूपं तत्र न गुरुत्वव्यभिचारो गुरुत्वव्यभिचारित्वे जोरूपं तन्न पृथिवीत्वाभावव्यभिचार
तिदूषकताबीजाभावादेतस्य सत्त्वमिति भावः। प्रकृतलक्षणस्य स्वघटितत्वेनाननुगमात्पृथिवीत्वाभावसंग्राहकमापत्ते पूर्ववत्तत्साध्यकतत्साधनकयावदुपा

MEMORIAL

धिसाधारणे लक्षणांतरमाह। साध्यासमानाधिकरणस्येति। पूर्वलक्षणे स्येनुरूपवान् द्रव्यत्वादित्यत्र साध्यासमानाधिकरणस्या
धिकरणं यत्साधनाधिकरणं वा तद्वृत्तिनिशाभावप्रतियोगित्वाभावादेव पृथिवीत्वाभावो वारणीयः। अत्र तु साध्यासमानाधिकरणस्य स
मानाधिकरणं यत्साधनं द्रव्यत्वं तत्समानाधिकरणाभावप्रतियोगित्वस्य सत्त्वात् सत्त्वादेव नाव्याप्तिरिति व्याख्या। सर्वत्रपदव्यावृत्तिः पूर्व
वद्बोध्या। पृथिवीत्वद्रव्यत्वेनोपाधितावारणाय। साध्यसमानाधिकरणेति। अस्यापि पूर्ववन्निष्कर्षो बोध्यः। पृथिवीत्वाभावस्या
संग्राह्यत्वे संग्राह्यत्वे च निरुक्तलक्षणयोर्न व्यभिचारानुमानसौकर्यं दर्शयति निरुक्तं चेति। निरुक्तप्रकारेणोपाधौ ज्ञाते इत्यर्थः।
साधनवतीति पूर्वनिरुक्त्यभिप्रायेण। साधने चेति प्रकृताभिप्रायेण। धर्मादिनेत्यादिनादिना साध्यव्यापकाभावपरिग्रहः। तत्सामा
नाधिकरण्येन वेति। साध्यासमानाधिकरणधर्मादिसामानाधिकरण्येन वेत्यर्थः। न तु साधनवान् साध्याभाववान् साध्यासमानाधिकरणध
र्मवानिति। साधनं साध्यव्यभिचारि साध्यासमानाधिकरणधर्मसमानाधिकरणत्वादिति क्रमेणेदं बोध्यम्। इदं तु बोध्यम्। उपाधिकरीत्या तासा
धनवृत्तित्वस्यादौ साध्यासमानाधिकरणधर्मस्य साध्यासमानाधिकरणधर्मसमानाधिकरणत्वस्य वाभानेनोद्भावनेनैवानिमन्त्रसिद्ध
त्वाद्युद्घटितोपाधित्वरूपेणावच्छिन्नस्योद्भावनं व्यर्थमिति। तत्र कथं संप्रदायरक्षा रणमिति सहि स्तु नायोक्तिरिति। उपाध्युपन्यासानन्तरं व्यभिचारा
नुमानं तु सिसाधयिषाधीनमेवेति भावः। अव्यभिचरितसामानाधिकरण्यरूपव्याप्यत्वस्याभावज्ञाने व्यभिचारज्ञानानवकाशाभावात् तथा बाधितेनोपकृततया

२५

पि व्यभिचारानुमानं समर्थयितुमाह। साध्याव्याप्यत्वेन वेति। लक्षणं त्वित्यादेः पौनरुक्त्यमनाशंक्य पर्यवसितमित्याह। व्यभिचारोन्नायकताप्रयोजकेति।
इत्थं च लक्षणमित्यस्य व्यभिचारोन्नायकतावच्छेदकमित्यर्थः। प्रतीकं दर्शयति व्याप्तेरिति। प्रदर्शनार्थमित्यग्रिमेणान्वयः। व्यापकव्यभिचारस्य व्याप्यव्यभिचारव्या
प्यत्वादिति भावः। द्वितीयं। उत्तरं प्रतीकं। पक्षधर्मताया इति। साधनाव्यापकव्यभिचारस्य साधने सत्त्वादिति भावः। न च महानसत्वावच्छिन्नव्यापकत्वं जन
कत्वादावतिप्रसंगः। तस्यापि महानसत्वावच्छिन्नवह्निव्यभिचारानुमापकतया न दोष इति प्रसंगस्यादोषत्वात्। विशिष्टसाध्यव्यापकस्य भेनु विशेषणव्यभिचा
रित्वेन निर्णीतिसाधने विशिष्टव्यभिचारनिर्णयस्य विशेष्यव्यभिचारपर्यवसानेन शुद्धसाध्यव्यभिचारसिद्धिसंभवादिति। उक्तव्याख्यायामुपष्टंभको
त्तरमाह। एवं चेति। यद्व्यभिचारित्वेनेत्यादिलक्षणस्वरूपत्वे चेत्यर्थः। एतत्साधननिष्ठेति। उन्नायकव्यभिचारे विशेषणं। कथमस्येति। यद्युन्नायकत्वं तद्योग्यता
सा च व्याप्तिपक्षधर्मतारूपा तथापि उन्नायकतावच्छेदकत्वेनैव तस्य प्रवेशो न तु ताद्रूप्येणेति न वस्तुतः काक्षतिरिति भावः। व्यभिचारानुमानमपीति। अथायमत्रोपाधिरि
त्युद्भावनेनैव वादिनिग्रहाद्व्यभिचारानुमानोद्भावने वैयर्थ्यं स्यादिति भावः। लक्षणे त्वित्यस्यापदार्थव्याख्यानमित्येवास्वरसोभिः आर्तित्वान्नेन सूचितः।
योगवदन्यत्वेनेति। द्रव्यं सत्त्वादित्यत्रापि संयोगाभावस्य केवलान्वयितया द्रव्यत्वाभावसाधकत्वेनोपाधित्ववत् द्रव्यत्वाभाववान् सत्त्वादित्यत्रापि संयोगाभा
वदन्यत्वोप्रसिद्ध्या साध्याभावासाधकत्वेपि संयोगाभावाभावस्य संयोगस्य तत्साधकत्वसंभवात् तस्याप्युपाधित्वमुचितं। एकदेशस्थानयोरेकस्यैवोपाधित्वं नापर
स्येत्येवंरूपस्य। तस्यापि संयोगाभावस्यापि। अन्यथा तथात्वे अन्योन्याभावयोरेव साधकत्वेनोपाधित्वे संयोगाभावस्याप्युपाधित्वं न स्यादिति भावः। संयोगाभा

वस्य साधनव्यापकत्वात्सर्यवसितेत्यादि लक्षणे व्याप्तिरत आह। लक्षणे त्विति। तादृशप्रतियोगिनः प्रमेयत्वादिनोपाधित्वनिराकरणाय प्रतियोगिताव-
च्छेदकेति। संयोगावदन्योन्याभावे संयोगस्यापि प्रतियोगित्वात्तत्राव्याप्तिरत आह प्रतियोगित्वमिति। तादात्म्येन प्रतियोगित्वमन्योन्याभावइत्यत आह। अत्यादि-
ते चेति। तादात्म्यस्याधिकरणत्वानियामकत्वात्प्रतियोगिनि प्रतियोगितावच्छेदकाधिकरणतायाः कृप्तत्वात्तस्याभावत्वमात्रं कल्प्यते लाघवादिति भावः। ओषधि-
ति। इदं तेजो द्रव्यत्वादित्यत्र आत्मभावादौ विरुद्धेति व्याप्तिवारणाय साध्यसमानाधिकरणत्वं विशेषणं देयमित्यर्थः। ननु विशिष्टव्यभिचारत्वेन साध्यतायां कथं
गुरुसाध्यव्यभिचारसिद्धिः व्यापकतावच्छेदकप्रकारेणैव व्यापकस्यानुमितौ भानादत आह सामान्यत इति। विशिष्टव्यभिचारित्वं हि विशेषणविशिष्टव्यभिचा-
रित्वात्मकं तत्र विशेषणव्यभिचारित्वरूपे कविशेषबाधे विशिष्टव्यभिचारसिद्धेरेव विशेष्यव्यभिचारित्वेन तद्विषयीकरोतीति प्राचीनमतेनेदमिति
भावः। भावयति। जनयति। ननु साधनवति साध्याभावानुमानमेव व्यभिचारानुमानं विशिष्टसाध्यव्यापकाभावेन कथं निर्वाह्यं विशिष्टाभावस्या-
तिरिक्तत्वेन विशेष्याभावस्य विशिष्टाभावत्वरूपव्यापकतावच्छेदकानवच्छिन्नत्वादत आह। न चातिरिच्यत इति। स्वमतेनेति। एकविशेषबाधेपि व्यापक-
तावच्छेदकप्रकारेणैव विशेषांतरानुमानं न तु विशिष्यापीति स्वमतं। उद्भूतरूपस्यान्यथासत्वेन न द्रव्यप्रत्यक्षव्यापकत्वमतः कथं तदभिप्रायेणेदं व्यभि-
चारानुमानमत आह। प्रत्यक्षसंख्येति। यथाश्रुतमेवेति। द्रव्यप्रत्यक्षत्वव्यापकेति पदं यथाश्रुतमेव साध्यमित्यर्थः। नन्वात्मैकत्वपरिमाणयोः प्रत्यक्षत्वेनापेतत्वा-
रपि न द्रव्यत्वं प्रत्यक्षव्यापकत्वमाह। आत्मैकत्वादेरपीति। इदमुपलक्षणं। अर्द्धनिःखातवंशादौ दूरत्वादित्वचमजनकदोषस्थले तत्परिमाणैकत्वस्य च

राम

२६

ग्रहतद्वांतरवैजात्यस्वपरं न ग्रहः। प्रत्यक्षस्वरूपयोग्यादिसंख्यादिमत्त्वं वोपाधिरिति बोध्यं। अथ उद्भूतरूपस्यैवोपाधित्वप्रदर्शनात्तदनुसारेणाह। उ-
द्भूतरूपेति साध्येहेतौ चेति। साध्ये प्रत्यक्षपदस्य सामान्यपरत्वे आत्मादौ व्यभिचारः। हेतौ च सामान्यपरत्वे उद्भूतरूपस्य द्रव्यप्रत्यक्षत्वाव्यापकत्वादसिद्धिरिति
भावः। ननु तत्कथं च वायुर्बहिरिन्द्रियप्रत्यक्ष इति स्थापनानुमानं बोध्यं। अनेकत्र संकोचकल्पनापेक्षयाप्यदरूचिं भावयन्नाह द्रव्यपदेवेति। आत्मादौ व्यभि-
चारवारणाय प्रथमस्य उद्भूतरूपे द्रव्यप्रत्यक्षत्वाव्यापकत्वादसिद्धिवारणाय द्वितीयस्य द्रव्यपदस्य बहिर्द्रव्यपरत्वं। बहिष्ट्वमात्मभिन्नत्वं। नन्वत्र कथं महत्त्व-
त्वसामान्यस्य दृष्टांतत्वं न संभवति तस्यात्मभिन्नद्रव्यत्वव्यभिचारित्वादत आह महत्त्वे चेति। जन्यमहत्त्वेति। यद्यपि जन्यमहत्त्वसामान्यस्यापि न दृष्टांतत्वं
पटादिमहत्त्वे उद्भूतरूपव्यभिचाराभावेन हेतुत्वसत्त्वात् दुग्धादिनिष्ठमहत्त्वपरत्वे च महत्पदस्यैवाहत्यतत्परत्वमस्तु किमनर्गडेन जन्यमहत्त्वपरत्वोपवर्णनेन
न तथापि व्याप्यपदं अव्यभिचारित्वपदं चान्वयितावच्छेदकावच्छेदेनैव स्वार्थान्वयं बोधयंतीति भूमोवह्निव्यभिचारीति वन्नद्रव्यत्वं वह्निव्यभिचारीत्यप्र-
योगात्। तथा च महत्त्वत्वरूपेण दृष्टान्तप्रयोगमहत्त्वत्वावच्छेदेन बहिर्द्रव्यत्वाव्यभिचारित्वाभावेन। नन्वयमेव स्यादतो जन्यमहत्त्वपरत्वमुक्तं। ज-
न्यमहत्त्वत्वावच्छेदेन बहिर्द्रव्यत्वाव्यभिचारस्य तत्सामानाधिकरण्येनोद्भूतरूपव्यभिचारस्य संभवात्तेन रूपेण दृष्टान्तोपन्यासेनानन्वय इत्यभिप्रा-
येण तथाव्याख्यानमिति भावः। ननु व्यापकव्यभिचारित्वं यदि व्यापकप्रतियोगिकाभाववद्वृत्तित्वं तदा द्वित्वावच्छिन्नाभावमादाय नद्धटत्वादौ व्यभिचा-
रः। यदि च व्यापकत्वावच्छिन्नाभाववद्वृत्तित्वं तदा सिद्धिसत्त्वादरपितद्व्यापकत्वादत आह व्यापकेति। तादृशव्यापकतावच्छेदकमुद्भूतरूपवत्त्वं त-
दवच्छिन्नाभाववद्वृत्तित्वस्य प्रत्यक्षस्पर्शाश्रयेसत्त्वान्नासिद्धिरिति भावः। न च द्रव्यपदेति। प्रत्यक्षव्यापकतावच्छेदकरूपावच्छिन्नाभाववद्वृत्ति

स्येन व्याप्यत्वसंभवेऽव्यपदस्य व्यभिचाराचारकतया सिद्धिमात्रवारकत्वादिति भावः। विशिष्टाभावस्येति। प्रत्यक्षत्वसमानाधिकरणसंताभा
वप्रतियोगितावच्छेदकत्वाभावात् इत्यप्रत्यक्षत्वसमानाधिकरणसंताभावप्रतियोगितावच्छेदकत्वाभावप्रतियोगितावच्छेदकत्वाभावस्यातिरिक्त
त्वादित्यर्थः। प्रत्यक्षत्वव्यापकतावच्छेदकरूपावच्छिन्नाभावात् इत्यप्रत्यक्षत्वव्यापकतावच्छेदकीभूतरूपत्वावच्छिन्नाभावस्यातिरिक्तत्वादित्यर्थ इति
तु कश्चित्। न तु चेत्। उभयपदार्थस्य प्रतियोगितावच्छेदककोटिप्रविष्टत्वाभावेन विशिष्टाभावस्येतिग्रंथविरोधादिति। नादृशव्यापकतावच्छेदकत्वे
नोद्भूतरूपवत्त्वादेरस्थाने प्रकृतहेतौ रेवदुर्स्रैयत्वं तन्नाने च तथैव हेतुकरणमुचितमिवेत्याशयेनाह। उभयत्वेति। अव्यभिचार इतिमूलस्यतत्
त्परत्वभ्रमं वारयितुं व्याचष्टे। इयत्ताव्यभिचार इति। तथा च न विशेषवैयर्थ्यमेवेति भावः। ननु शाकपाकजत्वस्य संदिग्धोपाधिमध्ये समारा
त्व्यभिचारानुमाने हेतौ स्वरूपासिद्धिसंदेह इत्यत आह। अनुमानमिदमिति साधनविकलोयमिति। अन्वयदृष्टान्तमुदासार्थं। साध्यवानिति व्यति
रेकदृष्टान्तमुदासाय। एवं मित्रातनयत्वव्यापकत्वस्य संतार्थत्वे। धूमप्रागभाववदिति। व्यभिचारित्वनिष्ठव्याप्तेस्तद्विशेषणं विनापि दुर्ग्रहत्वान्नय
न्निष्टेत्यादिन्यायेनावैयर्थ्यमिति भावः। विशेषितो। सामानाधिकरण्येन व्यापकत्वविशेषितो। वृत्तिमत्त्वमिति। व्यभिचारित्वे वृत्तिमत्त्वस्य विशेष्यत्वा
दिति। फलतइति। यत्किंचिदधिकरणनिष्ठात्यंताभावाप्रतियोगित्वबुद्धेः सामानाधिकरण्यबुद्धेः फलत्वादिति भावः। ननु एवं श्यामत्वे व्यभिचारः त
स्यापि मित्रातनयत्वसमानाधिकरणस्य शाकपाकजत्वव्यभिचारिणः श्यामत्वव्यभिचाराभावादत आह। तन्नायमर्थ इति। यत्तदर्थयोरनुगमालि
ङ्कृप्यादृ मित्रातनय इति। नेनेति। श्यामत्वस्य मित्रातनये शाकपाकजत्वव्यभिचारित्वं नास्ति किंतु काकादावितित्युदासः। अनंतरमाह व्यभिचारस्य राम

२९

ति। शेषवैयर्थ्यं न यथाराह। बहुव्रीहिरिति। मित्रातनयत्वमव्यभिचारित्वव्यापकं यस्येति बहुव्रीहिरित्यर्थः। मित्रातनयत्वव्याप्यत्वे च फलितार्थः। इदं तु श्याम
त्वादौ व्यभिचारवारणाय दृष्टांतासिद्धिनिरासाय। आह यदिति। इदं गुणवत्त्वाघटत्वादित्यत्राघटत्वे अघटत्वाव्यभिचारित्वेसति अघटत्वावच्छिन्नगुणवत्त्वव्याप
कघटभिन्नद्रव्यत्वव्यभिचारि। अयं च गुणवत्त्वव्यभिचारी तस्य घटत्वे दृष्टांतः। यथाश्रुताव्यभिचारित्वेनैव सामंजस्ये व्यभिचारपरस्य व्यापकत्वमर्थकस्यापि
ताधुनर्बहुव्रीहिणा व्याप्यत्वेपर्यवसानं संदर्भविरुद्धमित्यस्वरसः। आहुरित्यनेन सूचितः। विशिष्टसाध्यव्यापकोपाधिस्थलीयव्यभिचारानुमाने हेतौ विशे
षणाव्यभिचारित्वेसतीत्यस्य विशेषणवतीत्यर्थकरणस्य फलांतरमाह। मेयत्वाराबपीति। वायुः प्रत्यक्षः प्रमेयत्वादित्यत्र प्रमेयत्वस्य बहिर्द्रव्यत्वाव्यभिचारि
त्वाभावेपि प्रमेयत्वे प्रत्यक्षत्वव्यभिचारिबहिर्द्रव्योद्भूतरूपव्यभिचारित्वादिसत्त्वेन व्यभिचारानुमानं सुकरमेवेति भावः। एवं उक्तक्रमेण उपाधित्वं उपाधिव्य
वहारविषयत्वं सामान्यत्वपरेति। विशिष्टसाध्यव्यापकं व्यभिचारेण विशिष्टसाध्यव्यभिचारः। तेन च किंचिद्विशिष्टेन शुद्धसाध्यव्यभिचारः साधनीय इति परंप
रंपरयेत्यर्थः। तदुन्नायकतेति। शुद्धसाध्यव्यभिचारोन्नायकतेत्यर्थः। तथात्वं उपाधिव्यवहारविषयत्वं। पूर्ववदिति। तेजोद्रव्यत्वादित्यादौ। स्पर्शाभावादौ
आत्मत्वाभावादौ प्रागुक्तरीत्या व्यभिचारोन्नायकस्पर्शाभावादिवारणायेत्यर्थः। व्यभिचारोन्नायकत्वं यदि साधननिष्ठसाध्यव्यभिचारोन्नायकव्यभिचारप्रतियो
गित्वं तदा साधनव्यभिचारी। तस्य वैयर्थ्यमित्यतो व्याचष्टे। व्यभिचारेति। यत्र कुत्रचिदिति। साधननिष्ठत्वं न विवक्षितमिति भावः। एवं च साधननिष्ठत्वे विवे स्या२

माथानंदी

रूपे च। साधनव्यभिचारित्वस्य यथाश्रुतस्य पृथिवीत्वव्यभिचारिणि रूपवत्त्वे सत्त्वादाह। बहुव्रीहिरिति। साधनं व्यभिचारि यस्येत्यर्थः। एवमपि बहुव्रीहिणा सा-
धनाव्यापकत्वार्थलाभेऽपि। जलत्वनिष्ठ इति जलत्वादौ व्यभिचारवारणाय। साधने निष्ठमिति। रसवत्त्वनिष्ठं पृथिवीत्वव्यभिचारित्वं न तु गुरुत्वव्यभिचारोन्नायकमिति भा-
वः। उक्तिवैचित्र्यादिति। साधनविशेष्यकसाध्यव्यभिचारोन्नायनयोग्यव्यभिचारित्वमिति पूर्वलक्षणार्थः। तत्र योग्यतापदार्थमुद्याह साधननिष्ठत्वव्यभिचारित्वे
न च। अत्र साधननिष्ठव्यभिचारित्वमित्यत्र उन्नायकत्वमपि यदि याच साध्यव्यभिचारित्वमात्रव्याप्यत्वस्य तात्पर्यं तस्य उक्तिवैचित्र्यमिति भावः। तद्व्याप्येति। व्यभिचा-
रव्याप्येत्यर्थः। कोटिप्रविष्टेनेति। उपाधिव्यभिचारित्वस्य साध्यव्यभिचारव्याप्यतायामुपाधेस्तदवच्छेदककोटिप्रविष्टत्वादिति भावः। मात्रेणेति। ननु व्यभिचारो-
न्नायकप्रतियोगित्वेनेत्यर्थः। इत्थं चोक्तरूपव्यभिचारोन्नायकत्वस्याविवक्षणे च स्नेहव्यापकत्वात्। स्नेहसमानाधिकरणान्योन्याभावप्रतियोगितावच्छेदक-
त्वेऽसति द्रवत्वभिन्नत्वात्। एतेन प्रमेयत्वादिना स्नेहव्यापकत्वस्यासम्भवेऽपि व्यभिचारवारणाय इति परास्तम्। स्नेहस्य जलत्वव्यभिचारित्वेन पायपाक्रान्तसाधनव्यभिचारि-
त्वेनापि वारणसम्भवात्। बहुव्रीह्याश्रयणफलं दर्शयितुमुदाहरणान्तरमाह घटेन चेति। जन्यद्रव्यत्वादिति। घटत्वव्यभिचारित्वं हि घटत्वाभाववत्त्व-
मवेतत्वं तथा च नित्यद्रव्ये तद्भावाद्व्यभिचारवारणाय जन्येति। घटरूपादौ व्यभिचारवारणाय द्रव्येति। द्रव्यत्वे घटव्यभिचारित्वस्य सत्त्वात् साध-
नव्यभिचारि यस्येति बहुव्रीहिराश्रयणीय इति भावः। व्यभिचारोन्नायकस्य तद्व्याप्यकोटिप्रविष्टस्य साध्यसमानाधिकरणो इति। तेजो द्रव्यत्वा-
दिसत्त्वस्पर्शसामान्याभावस्याविरुद्धस्य तादृशव्याप्यकोटिप्रविष्टत्वाभावेनैव वारणसम्भवान्नोक्तम्। साध्यसामानाधिकरण्ये चासाधनाव्यापकत्वादि-

राम

२८

व्यापकसंबंधेन बोध्यं। तेन संबंधान्तरेण तेषां शब्दादेर्न क्षतिः। इत्थं च सन्दिग्धे तो साध्यसमानाधिकरणस्य साधनाव्यापकस्य वारणाय परं व्यभि-
चारोन्नायकत्वमुक्तं न च प्रकृतसाधने साध्यव्यभिचारानुमितिजनकतावच्छेदकव्याप्यवच्छेदककोटिप्रविष्टत्वं सन्दिग्धे तो च साध्यव्यभिचारानुमि-
तिप्रयोजकाभावाभावाद्व्याधर्मेष्वदासः। इदं गुरुरूपादिस्यत्र पृथिवीत्वाभावेतिव्याप्तिमाशंक्य निराकरोति। एवं च रूपेणेत्यादिना। पृथिवीत्वाभावस्य वारणी-
यताप्रयोजकं रूपमादर्शयति। गुरुत्वेनेति। गुरुत्वव्यभिचारि यत्तैजससरूपं तन्निष्ठव्यभिचारप्रतियोगिन इत्यर्थः। पृथिवीत्वाभावव्यभिचारिणि पृथिवीरूपे गु-
रुत्वव्यभिचाराभावात् गुरुत्वव्यभिचारिणि तैजसरूपे पृथिवीत्वाभावव्यभिचाराभावात् व्यभिचारोन्नायकत्वाभावेन तस्यालक्ष्यत्वमिति भावः। यत्रेति। यदधिक-
रणावच्छेदेनेत्यर्थः। तत्रावच्छेदेन। पृथिवीत्वाभावस्य पृथिव्यवच्छेदेन साधनाव्यापकत्वं तदवच्छेदेन च न गुरुत्वव्यभिचार इति तत्प्रदासः। नन्वेवं रूपवान्द्रव्य-
त्वादित्यत्रापि पृथिवीत्वाभावस्य सत्ताद्रव्यत्वजलत्वमात्रविशेष्यकधीविशेष्यत्वे सतीत्यादिप्रागुक्तरीत्या व्यभिचारोन्नायनक्रमस्य वारणमयुक्तमत आह
यथाकथंचिदिति। यत्साधनव्यक्तीति। तत्र द्रव्यत्वस्य ऐक्यादिहेतुरूपस्य साधनस्य भेदादिति भावः। ननु उक्तायकत्वं व्यभिचारोन्नायकत्वं। अत्राभावमात्रस्या-
नुपाधितापत्तिः वैयर्थ्यात् तस्य व्याप्यतावच्छेदककोटावप्रवेशादित्यस्वरसः केचिदित्यनेन सूचितः। मूलेऽर्थान्तरस्येत्यादि। तथा चार्थान्तरं लघुरूपस्य दुष्टत्वेऽपि
परंपरया व्यभिचारोन्नायकतया उपाधेरनुमानदूषकत्वं नानुपपन्नमित्यर्थः। अर्थान्तरमपि नारसीत्याह। आभासंतरेति। सोपाधौ व्यभिचारादेरानासस्या-
वश्यकत्वादाभासान्तरस्य तत्राभावादित्यसंगतमित्यतः पूर्वपक्षदीधितौ तदानीमिति। तथा च व्यभिचारस्याऽस्फुरणे उपाधिमात्रोद्भावने न व्यभिचारादिनिश्च

भावनंदी

हानस्यावश्यं दोषत्वमनुपेयमतस्तस्यापि दोषत्वेनाकांक्षितत्वात्तदुद्भावनेनापि नरमित्यर्थः। मूले नाव त्वादिकं दोषइत्यस्य ध्वंसो विनाशी जन्यत्वादित्यादिः। उपाधेर्दूष
णत्वं हेत्वाभासविधया निग्रहस्थानांतरत्वेन वा। आद्येन दोषस्य व्यभिचारादेरिति। उपाधेरनुमितितत्कारणज्ञानं प्रति साक्षाद्विरोधित्वेन हेत्वाभासत्वाभावा
दिति भावः। तद्व्यभिचारादिकं। तत्साधकस्य व्यभिचारादिसाधकस्य। अप्राप्तकालत्वादिनातदानीमनाकांक्षितत्वादिति भावः। परं परेति। शुद्धसाध्यव्यभिचारसाधकी
भूतावच्छिन्नसाध्यव्यभिचारकादिद्वारेत्यर्थः। अवच्छिन्नसाध्यव्यापकस्येति। उद्भावने इति पूर्वेणान्वेति। ननु साक्षात्परंपरासाधारणतत्साधकएव तदानीमाकां
क्षितत्वमत आह अन्यथेति। अन्यथा तत्साधकपरंपरायाअपि तदानीमाकांक्षितत्वे। तथात्वं। अप्राप्तकालत्वं। द्वितीयं निराकुरुते नचेति। दोषइति। तत्साधकपरंप
रया निग्रहस्थानत्वाभावादुपाधेश्च निग्रहस्थानत्वात्ततो विशेषइति भावः। तथात्वायोगात्। निग्रहस्थानत्वायोगात्। विभाजकेति। प्रतिज्ञाहानिः प्रतिज्ञांतरं प्र
तिज्ञाविरोधः प्रतिज्ञासंन्यासो हेत्वंतरं अर्थांतरं निरर्थकं अविज्ञातार्थकमपार्थकमप्राप्तकालमन्यूनमधिकं पुनरुक्तं अननुभाषणं अप्रतिभा विक्षेपो मतानुज्ञा
पर्यनुयोज्योपेक्षणं निरनुयोज्यानुयोगोऽपसिद्धांतो हेत्वाभासाश्च निग्रहस्थानानीति विभाजकं सूत्रं। एतेन ज्ञानरूपासिद्ध्यादीनां निग्रहस्थानत्वप्राप्तये हेत्वाभासाश्च यथा
काइति चरमसूत्रस्थ चकारस्यैवानुक्तसमुच्चयपरतया मिश्रादिव्याख्यानमपाकृतं तत्र यथोक्तस्यैव विधेयतया निग्रहस्थानत्वस्य विधेयत्वादि। व्यभिचारस्येवे
ति। उन्नायकस्येत्यंतोन्नयनेऽन्वयि। नतु भेदे इति। व्यभिचारोन्नायकमात्रस्याप्तिसुन्नायकं च न तदुक्तयंतु यावावानां निग्रहस्थानत्वापादनानुरूपं संप्रदायानुरो
धादिति। कथकानां तादृशव्यवहारादित्यर्थः। नतद्भावकं उपाध्युद्भावके। अप्राप्तकालत्वेन निग्रहस्थाने पराभवतः पराभवं कुर्वतः शुद्धसाध्यव्यभिचारत्व। ननूपाधेः

राम
२९

नत्र शुद्धसाध्यव्यभिचारोरूपंनायां। कुतइत्याकांक्षायां नहेतुत्वेन शुद्धसाध्यव्यभिचारहेतुत्वेन। विशिष्टसाध्यव्यापकोपाधिस्थले आह विशेषणेति। विशिष्टसा
ध्यव्यापकस्य परंपरया व्यभिचारानुमानपक्षे आह। विशिष्टेति। अत्र च विशेषणव्यभिचारित्वे सति विशिष्टसाध्यव्यभिचारहेतौ। विशेष्ये। विशिष्टसाध्यव्य
भिचारे। प्रपनमनमुपाधेरुपन्यासं समर्थयितुमाह वस्तुतश्चेति। साध्यव्यभिचारव्याप्यत्वेनोपाधिव्यभिचारस्योद्भावनेऽनुमितिप्रतिबंधस्योक्तक्रमेण प्रथ
मस्युपन्यासः समर्थितो भवतीति भावः। व्यभिचारित्वादेः संबंधतो विवादादुपाधिमान्नियुपेस्यउपाधिव्यभिचारवानित्युक्तं। यत्किंचिद्धर्मावच्छिन्नसाध्यव्यापक
त्वनिश्चयस्य यत्केनचिदपि सत्त्वादाह उपाधित्वोपयिकेति। स्वानधिकरणीभूतसाधनाधिकरणवृत्तिधर्मावच्छिन्नसाध्यव्यापकत्वमुपाधित्वोपयिकं तस्याभि
श्चयादित्यर्थः। ननु यत्र कथंचित्तादृशनिश्चयो जातस्तत्रोपाधिः स्यादत इष्टापत्तिमाह। अनुक्तत्वेति। तर्कादिनेति। आदिपदात्स्वतःसिद्धव्यभिचाराग्रहादिपरि
ग्रहः निश्चितोपाधिरिति। उपाधिनिश्चयत्वेनानुमानदूषकः संदिग्धोपाधित्वस्याग्रेशंकनीयत्वान्निश्चितोपाध्यभिप्रायकत्वमस्य स्फुटीकर्तुं निश्चितेत्युक्तं। स्व
व्याघातकत्वेनानुपाधावितिमूलोक्तयुक्तिं निराकरोति। नचस्वव्याघातकत्वादिति। स्वं अनुमानसामान्यं व्याघातकत्वं दूषणतापादकत्वमित्यभिप्रायेणाह न
हीति। स्वव्याघातकत्वं हीत्यर्थः। साधारण्ये दूषणतापादकत्वं। तदभावात्। तत्र साध्यव्याप्याव्यापकत्वेन साध्याव्यापकत्वनिश्चयेन पक्षेतरस्य दूषकत्वाभावात्। स्व
स्यापि स्वप्रयुक्तव्यभिचारानुमानं। व्याघातकत्वं स्वसमानज्ञानीयपक्षेतरांतरेण दूषणतापादकत्वमित्यभिप्रायेणाह नापीति। नच व्यभिचारिणापक्षेतरव्यभिचारेण
धूमोवह्निव्यभिचारी पर्वतेतरत्वव्यभिचारित्वादित्यत्रापि धूमेतरत्वस्योपाधित्वसंभवइत्यर्थः। अपवरत्वं भावेन। अपवरत्वाभावनिश्चयेन। तदयोगात्। साध्यव्यापा। व्या

DR. BHAU DAJI

पकत्वेनोपाधेः साध्याव्यापकत्वनिश्चयेन उपाधित्वायोगात्। व्यभिचारानुमापकव्यभिचारे प्रतियोगित्वमुपाधित्वं न पक्षेतरस्योपाधित्वेऽनुमानमात्रोच्छेदात् व्यभिचा
रानुमानस्याप्युच्छेद इति त्वदीयस्योपाधित्वदूषणस्य व्याघातकत्वान्न सदुपाधिरिति मिश्रव्याख्यानमाक्षिपति। अत एवेति। अनुकूलतर्कादिना साध्यव्यापकताग्र
हे व्यापकव्यभिचारित्वे व्याप्यव्यभिचारावश्यंभावेन व्यभिचारानुमानस्यानुच्छेदादेव दूषकताबीजसत्त्वे पक्षेतरत्वस्यानुपाधित्वप्रवादः किंमूलस्तत्राह कपक्षेति
नोद्भाव्य इति। स्वार्थानुमाने दूषणसंभवत्वेनैवेति भावः। निर्युक्तिकप्रवादो न श्रेयः इत्यस्वरसो वदंतीत्यनेन सूचितः। ननु पर्वतावयववृत्त्यन्यत्वं। तस्य पर्वतावयवरूपादेः
पक्षस्यैवेति। पक्षस्य व्यावृत्तिः साधनाव्यापकत्वेऽप्युश्च न्यूनतापर्वतावयवरूपादेर्व्यावृत्तिस्तु न कुत्राप्युपयुज्यत इति भावः। तथा चोपाधित्वौपयिकपक्षमात्रीयव्यावृत्तिप्रयो
जकविशेषणवत्त्वादिति मूलार्थः। केचित्तु विशेषणवत्त्वादिति न मतुप् किन्तु तुल्यार्थको वतिप्रत्ययः। तथा च पक्षमात्रव्यावर्तकं विशेषणं यस्य स तथा पक्षेतरः। साध्यव्या
पकताग्राहकानुकूलतर्काभावेनेत्युक्तत्वादित्यर्थमाहुः। इदं पक्षमात्रव्यावर्तकविशेषणवत्त्वं। तादृशेति। उपाधित्वौपयिकेत्यर्थः। व्यापकताग्राहकानुकूलतर्काभावस्यैव पू
र्वग्रंथे प्रक्रांतत्वात्तत्परामर्शकत्वासंगतिरतस्तत्परामर्शकतया व्याचष्टे अत एवेति। अत्र क्रमेणेत्यन्तेनेति। आर्द्रेन्धनत्वेन वह्नित्वेन कारणतानयोः संयोगः प्रत्यासत्तिः। पर
स्परप्रत्यासन्नानामेव कारणानां कार्योपधायकत्वादिति भावः। आर्द्रेन्धनप्रभववह्नित्वस्य कारणतावच्छेदकत्वस्वीकारे। आर्द्रेन्धनप्रभववह्नित्वस्य कारणतावच्छेदक
त्वाभावे किं तेन रूपेण व्यापकत्वेनानिर्वहतीति तद्रूपावच्छिन्नव्यभिचारेण व्यभिचारानुमानं संपाद्येत न हीत्यादि। तत्त्वात् व्यापकतावच्छेदकत्वात्। द्वितीयेन तदवच्छिन्नेति। अति
रिक्ततयेति। आर्द्रेन्धनत्वव्यक्तित्वावच्छिन्नाभावाभ्यां अनतिरिक्ततयेत्यर्थः। वस्तुगतिमनुरुध्य चेदं। तेन रूपेण कारणत्वमपि व्यवस्थापयति सत्यपीति। विशेषरूपेण। आर्द्रेन्धन

प्रभववह्नित्वेनाप्यल्पत्वेति। दाहप्रतिबंधकाभावानां दाहं प्रति कारणत्वस्य क्लृप्तत्वात् धूमं प्रति कारणत्वस्याक्लृप्तत्वादिति भावः। प्रतिबंधकाभावानामिति। बहुवचनेन म
णिमंत्रौषधिभेदेन कार्यकारणभावानां बहुत्वं सूचितं। इंधनव्यक्तिभेदेन कार्यकारणभावस्यानंत्यादिति गौरवं दर्शयति। एकस्यामिति। तत्रैव तदिंधनव्यक्तावेव।
व्यक्त्यंतरात्। आर्द्रेन्धनव्यक्त्यंतरात्। एतेन प्रतिबंधकाभावानां कार्यस्य संयोगघटितसामानाधिकरण्यप्रत्यासत्त्या कार्यकारणभावकल्पनयापि गौरवस्य समाधा
नेनान्वतीति सूचितं। ननु मण्यादीनां प्रतिबंधकत्वे संयोगः प्रत्यासत्तिः मंत्रस्य चेदमादहत्विति उद्देश्यत्वं। कार्यस्य धूमस्य न संयोगो जन्यताघटकप्रत्यासत्तिर्व्यभिचा
रात्। किंतूपधायकत्वं। तथा च पत्रोपधायकतासंबंधेन धूम उत्पद्यते तत्र संयोगेन तादृशोद्देश्यत्वेन वा मण्यादिमत्त्वयोरभावद्वयस्यैवं रूपसामानाधिकरण्यप्रत्यासत्त्या का
र्यकारणभावस्य कल्पने कथमतिगौरवं। अत एव यत्रेंधने मण्यादिसंबंधोऽग्नानादेर्वा धूमो न जातस्तत्राप्युक्तसंबंधेन सामान्यसामग्रीतोऽग्निसंबंधेऽपि न धूमोत्पत्त्यापादनं।
अन्यथा तदिंधनजन्यधूमस्याप्रसिद्ध्या उक्तक्रमेण प्रतिबंधकाभावस्य हेतुताकल्पनात्सामान्यसामग्रीतो धूमसामान्योत्पत्त्यापादनात् इति चेन्न। उपधायकत्वादीनां कार्यता
वच्छेदकसंबंधत्वे मानाभावात् धूमानुपधायकवह्निप्रकृतिस्वेंधनव्यक्तेः फलाभावेन विशिष्य हेतुताकल्पनात् धूमोपधायकेंधनानां विशिष्य हेतुत्वकल्पनात्ता
दृशसामग्रीविशेषविरहेणापि धूमानुत्पादनसमर्थनसंभवात्। एवमपि मणिमंत्रादिभेदेन कार्यकारणभावबाहुल्यस्यातिस्फुटत्वाच्चेति। अत एवार्द्रेन्धनत्वेनेव व
ह्नित्वेन धूमं प्रति हेतुतानयोर्जन्यजनकभावः प्रत्यासत्तिः। परस्परप्रत्यासन्नानां कारणानां कार्योपधायकत्वादित्यपास्तं। यत्तु धूमजनकतावच्छेदको जातिविशेष एव
वह्नित्वेष्ट इति। तन्न। नानात्वादिना संकरप्रसंगेन जातेरसंभवात्। न च तज्जन्यतावच्छेदकतया तार्णत्वादेर्नानात्वेऽपि दोषाभावात् तार्णत्वादिव्यापकं वैजात्यमिति वाच्यं। अपरं

श्री वानंदी

नानावैजात्यान्नानातदवच्छिन्नं प्रतिः सन्नं तानो कारणत्वान्नां प्रतिबंधकत्वान्नोच कल्प्यनेऽतिगौरवात्॥ आर्द्रेन्धनजन्यवह्नित्वेनैवोपाधिना कारणत्वकल्पनस्य लघुत्वात्।
एवंविलक्षणेंधनजन्यवह्निनापाकेरसविशेषो भवति। हरिद्राजलेन पक्वं हरिशान्तत्वेन सिक्कमांसहारिणेऽपयोगात्स घामारयति तत्र तुल्यन्यायेन मारसविशेषजन
कतावच्छेदकत्वेनैव हरिद्राजलादौ सिद्धयानासासकरमसंगाबेति। उत्तानोक्ता। रूपादिम रागनित्व करणादाह वह्निधूमजनकतावच्छेदकीनोदनान्नियानत्वादिविरु
द्धंधनवह्निसंयोगगतजातिविशेष एव कल्प्यते दाहप्रतिबंधकत्वेनास्तिमतानोच मणपदीनां तदवच्छिन्नं प्रत्येव प्रतिबंधकत्वं कल्प्यते रूपरसादिभेदेन दाहस्य नानात्वा
द्दाहेवमन्यादौ च तत्प्रतिबंधकत्वं कल्प्यते कार्यकारणभावबाहुल्यप्रसंगादित्याशयः। मुक्तानुसारेण मुक्तांतरमाह महतीति। आर्द्रेन्धनत्वेन वह्नित्वेन च धूमं प्रति हेतुत्वे तदव
च्छिन्नप्रकर्षादेव प्रकृष्टधूमोत्पत्तिर्वाच्या। प्रकृते तत्त्वेप्यार्द्रेन्धनप्रभवप्रकृष्टवह्न्यनुमादे प्रकृष्टधूमानुमापकत्वेन हेतुत्वमिति समुदायार्थः। दाहप्रतिबंधकस्यापि स
त्त्वं प्रदर्शयितुमाह। तस्मिन्नवेचेति। वह्न्यंतरे शुष्केंधनजवह्नौ। विद्यती सस्वरसोऽद्भावनंत बीजंतु धूमस्य प्रकर्षे न जातिविशेषः किंतु महत्त्वातिशयः स च न कार्यताव
च्छेदकः धूमस्य स्वकारणात् प्रकृष्टमहत्त्वस्य चावयवगतबहुत्वातिशयादेवोत्पत्तेरित्यादिकमिति मूलानुक्तमपि न्यूनताभंगाय पूरयति। आर्द्रेन्धनजन्यवह्नि
सामान्यमिति। नादृशेति। आर्द्रेन्धनप्रभवेत्यर्थः। अर्थवशात्संपन्नमिति। वस्तुतः आर्द्रेन्धनयोर्धूमजनकयोर्जन्यजनकभावः अस्यासत्त्वेऽप्यतिरिक्तमिति प्रायः फलत इति। आर्द्रे
न्धनप्रभववह्नित्वेन व्यापकत्वस्योभयथापि संभवादिति भावः। नादृशान्वयेति। उद्भूतरूपवत्त्वं बहिरिंद्रियस्य प्रत्यक्षं न तु तच्छून्यस्येत्येवमाकारकेत्यर्थः। नत्व
भवनरिति। बहिरिंद्रियस्य मूर्त्तस्य वा प्रत्यक्षं प्रति तादृशवायुद्भूतरूपत्वेनैव कारणत्वं तत्र प्रत्यक्षस्य विषयतासंबंधेन समवायपदस्य स्वरूपसामान्याधिकरण्यं प्रसज्यत इति:

राम

३२

विषयस्य सामान्यतो विषयत्वेन विशेषमनस्त्वं न घटत्वेन बाधस्य हेतुत्वे न तु यावानेव विषयनिष्ठधर्मस्तेनेत्यादि प्रागेवोक्तमित्यर्थः। मूले घटादिनिरूपा
मत्वेनाकाधाहारवशेणामस्य प्रयोजकतया विघ्नकेन प्रतिपादनादिति भावः। घटोत्पत्त्यनंतरं स्यादिति ध्वंसप्रागभावेति तन्यत्वे नाविनाशित्वे साध्ये घटध्वंसः प्रसज्येत तथा च
इदानीं घटध्वंसस्य तत्प्रागभावस्य चासत्त्वे उभयाभावबलात् घटसत्त्वप्रसंग इत्यर्थः। न च प्रागभावस्येति। अन्यथा प्रागभावस्य ध्वंसप्रतियोगिनो ध्वंसकाले प्रागभावो नन्त्व
नं स्यादिति भावः। प्रतियोगिध्वंसो यथा प्रागभावस्य ध्वंसस्तथा ध्वंसध्वंसोऽपि प्रतियोगिध्वंसस्तथा च तत्काले प्रतियोगिध्वंसानधिकरणत्वमेव नाशीति न दुःकल्पनमिति
भावः। अप्रामाणिकेति। न च तन्नत्वावलोपे हपासाधवान्यत्वे नैव ध्वंसं प्रति कारणत्वं कल्प्यते साधवीव जातं ध्वंसस्यापि ध्वंसः फलमुखगौरवं चाहोसत्त्वादितिवा
च्यं। तथापि प्रागभावप्रतियोगित्वरूपान्यत्वाजायवेन सत्त्वेनैव ध्वंसहेतुतायाऽवितत्वान्निरस्य चैवमाहैरसमवायिकारणनाशान्वा दुःखादेराश्रयविशे
नाशाविरोधिगुणयोरभावे न विशेषसामग्रीविरहेण विनाशोपपत्तेः पाकस्यापार्थिवरूपाधनाशकत्वात् अन्यथा जन्यत्वेन हेतुत्वेऽपि पाकजनतेनोवपविरूप
शेनो विनाशः स्यात्। यदि च कालिकसंबंधेन सत्ताव्याप्यरूपासमवायेन तद्घटत्वेन तावत्कालिकसंबंधेन तद्घटत्वेन ध्वंससाधारणमिति तन्न स्यापि विनाश
अपायापत्तेन तदा विशेषसामग्रीनिरपेक्षस्य तत्त्वात्र स्यध्वंसप्रयोजकत्वेन न्यमात्रस्यैव रूपोक्तापत्तिः। विशेषसाभव्यपेक्षणे च इत्यादि ध्वंसध्वंसे कृताजीवेनो
विशेषसामग्र्यकल्पनात्तस्य विनाशइति। अनुदवाह। अप्रामाणिकध्वंसतत्कारणधारेतिं ध्वंसानंतत्वेति। ध्वंसस्याविनाशित्वनियमः शाकपाकजत्वादेरकारणस्या
पिव्यापकत्वोपदर्शनार्थ कार्यकारणयोरेवेत्याशाकनमुनुचितमतो व्याचष्टे कार्यकारणभावयादकेति। तक्रोशीकृतत्वनियमन तत्स्ततन्मात्रतीति विषयत्वं तच्च कार्यका

रणयोस्तत्वयोर्घ्याप्तत्वमिति भावः। मूले नद्रुपजीव्येति। नचस्वत्वेन गगनादेः परिमाणवत्त्वानुमाने कथं कार्यकारणभावरूपजीव्य इति वाच्यं घटादौ परिमाणद्रव्यत्वयो
निरुपाधित्वसहचारग्रहणेन तादृशव्याप्तौ मूले घटादौ परिमाणसत्त्वे चावयवगतमहत्त्वबहुत्वादीनां तत्कारणत्वकारणत्वकल्पनमेव तादृशव्याप्तौ मूलमित्यादिरीत्यास
र्वत्रैव तस्योपजीव्यत्वादिति। ननु समशीले निरुपाधिसहचारादिकमुपजीव्यमिति वार्थः। ननु निहितमेवमूले स्वव्याघातकत्वमत आह। स्वव्याघातकत्वं चेति। निराकृतमेवेति। त
द्धिसर्वानुमानसाधारण्यमित्यादिना। शंकाविरहाच्चेत्यादि ति शंकासुमध्ये सर्वत्रसंभावितत्वेपि पिशाचीतुल्यत्वादित्यर्थः व्यभिचारशंकाधाधानप्रयोजकशंकास्त्वेतदा
धानमावश्यकमित्याशयेनाह। तदाहितापीति। पक्षेतरोपाधित्वशंकाहितापीत्यर्थः। पक्षे व्यभिचारशंकेति। पक्षेयथा व्यभिचारशंकानप्रतिबंधिका तथा तदाहितापिशंका
नप्रतिबंधिकेत्यर्थः। नंगप्रसंगमात्रेणेति। मात्रपदेन कार्यकारणभावादिव्युदासः। अनुमानानां। गगनं परिमाणवत् द्रव्यत्वादित्यादीनां। विलयप्रसंगादिति। सर्वत्रैव पक्षेतरो
पाधित्वशंकायाः संभवे निरुपाधित्वाप्रसिद्धेरिति भावः। अथात्र कश्चिदित्यादिग्रंथकृत्यं दुर्बोधयति संदिग्धोपाधीति। साधनाव्यापकत्वसंदेहे साध्यव्यापकव्यभिचारित्वस्य
साध्यव्यभिचारव्याप्यत्वात्तत्संदेहेन व्यभिचारसंदेहः। साध्यव्यापकत्वसंदेहे च साधनाव्यापकव्याप्यत्वस्य साधनाव्यापकव्याप्यत्वात्तत्संदेहेन साध्ये साधनाव्यापकत्वस्य
संदेहसंदेहे च। प्रयोजकं रूपं साधननिष्ठसाध्यव्यभिचारव्याप्यसंदिग्धव्यभिचारप्रतियोगित्वं साध्ये साधनाव्यापकत्वव्याप्यसंदिग्धव्याप्यत्वप्रतियोगित्वं पक्षेतरेष्व
स्तीत्यर्थः। प्रयोजनं कृतेः। अनुमानविलयरूपाया। तदाहितापीत्यादि द्वितीयकल्पं दूषयति। व्यभिचारस्यानवतारनैवेति। कारणेति। पक्षेतरस्यानतिरिक्तकारणत्व
र्थः। अजन्यत्वादित्यादिना पक्षीयव्यभिचारसंशयान्यत्वपरिग्रहः। ननु पक्षेतरोपाधित्वेशंकाहितव्यभिचारशंकासत्त्वेपि व्याप्तिग्रहप्रतिबंधाभावान्नयान्वयव्यतिरेका

राम
३२

नुविधानमेवमानमत आह कथमन्यथेति। अन्यथा पक्षेतरोपाधित्वशंकाजन्यत्वस्य पक्षीयव्यभिचारसंदेहाजनकस्य वा निवेशने। करवह्निसंयोगमात्रस्य पक्षत्वे संयोगा
न्तरे पक्षातिरिक्ते व्यभिचारसंदेहस्य संयोगान्यत्वस्य पक्षतावच्छेदकावच्छिन्नभिन्नत्वरूपपक्षेतरत्वादन्यस्य शुद्धसाध्यव्यापकस्योपाधित्वसंभवाद्वाह सर्वः संयोगी वेति। प्रत्यक्षो
यः संयोगधर्मस्तदतिरिक्तो धर्मो द्वैधा संयोगावृत्तिरप्रत्यक्षः संयोगधर्मश्च तत्राद्ये बाधात्यक्षधर्मताबलात्प्रत्यक्षधर्मसिद्धिरित्यर्थः। अत्र व्याप्तिग्रहप्रतिबंधकोतरस्याज्ञाबाद
पक्षीयव्यभिचारसंशयः पक्षेतरत्वोपाधिशंकाहितव्यभिचारसंशयश्चानायत्या प्रतिबंधकोस्तु येप इति भावः। निरुपाधित्वेपीति। तथा च तदनुरोधात्पक्षेतरोपाधित्वं नस्वी
कर्तव्यमिति भावः। अप्रयोजकत्वादिति। कार्यकारणभावादिव्याप्तिग्राहकतर्कशून्यत्वादित्यर्थः। इतरेषां गगनं परिमाणवत् द्रव्यत्वादित्यादीनां। तथात्वात्। अप्रयोजकत्वात्
अत्र चेति। पक्षातिरिक्ते साधनवति सर्वत्र साध्यनिर्णयसत्त्वादिति भावः। तथाच तायत्यात्तत्र पक्षीयव्यभिचारसंदेहएव प्रतिबंधक इति पक्षेतरस्यानुपाधित्वेपि तदनुमा
नो निरुपाधित्वं नास्तीत्याह। कथमिति। द्रढनरेति। निर्दोषेत्यर्थः। अंततः इति। शुद्धसाध्यव्यापकास्फूर्तिदशायामपीति। पक्षेति। तद्धर्मावच्छिन्नसाधनाव्यापकत्वरूपा
र्थः। तद्धर्मावच्छिन्नसाध्यव्यापकत्वरक्षणाय सपक्षैकदेशेति। सपक्षैकदेशावृत्तिधर्मस्य सपक्षांतरेऽभावो यावत्पक्षावृत्तिधर्मावच्छिन्नसाध्यस्य चेत् सर्वत्र सपक्षे सत्त्वात्साध्या
व्यापकत्वपरिहाराय सपक्षैकदेशेति। तादृशोपाधेः पक्षवृत्तित्वे साधनव्यापकत्वमेव स्यादतः पक्षावृत्तित्वं। तत्र सपक्षैकदेशेति। यथा गगनं परिमाणवत् द्रव्यत्वादित्यादौ गगनपृथि
व्यन्यतरत्वावच्छिन्नसाध्यव्यापके पृथिवीत्वमुपाधिरित्यर्थः। ननु पक्षेतरस्यापि संदिग्धोपाधित्वे पक्षीयव्यभिचारशंकायाश्च प्रतिबंधकत्वे पर्वतोवह्निमान् धूमादित्यादिप्र
सिद्धानुमानविलयप्रसंगः स्यात अत आह। इत्थं चेति। तादृशशंकायाः प्रतिबंधकत्वे चेत्यर्थः। वस्तुमम इति। अपसुकृतकीन वतारवृत्तायां तत्प्रतिबंधकत्वमिदमेव तर्कावतरो
कानिवृत्तावेवानुमानप्रवृत्तिरिति हेत्वाभासादौ वत्तसनद्वस्यर्थः। सर्वत्रैवानुकूलतर्कस्य व्याप्तिग्रहहेतुकत्वमिति च अभिप्रायेणशंकते मूले। ननु यत्रोपाधिरित्यादिना। ५

पाधेरिति। उपाधेरुपाधित्वेन तज्ज्ञानस्यात्मनाभावार्थत्वनियमस्यार्थः उपाधेरुपाधिस्वरूपस्यात्मनाभावार्थः उपाधित्वेन स्वज्ञानार्थमिति वार्थः। अननुकूलतर्काभावोपजीवकत्वेने
ति। अननुकूलतर्कसत्त्वे साधने साध्यव्याप्यत्वग्रहात् साध्यव्यापकत्वेनोपाधेः साध्यव्यापकत्वनिर्णये साध्यव्यापकत्वघटितोपाधित्वस्यानवगमनस्यादतउपाधित्व
ज्ञाने ऽनुकूलतर्काभावउपजीव्य इत्यर्थः। अननुकूलतर्काभावस्यापि कुतउपाधिरूपजीव्यः। साध्यसहचरितेहेतौ साध्याभावसामानाधिकरण्यज्ञानजननेनहिते
स्य दोषत्वं तज्ज्ञाने च साध्यसंबंधितावच्छेदकविधयोपाधिज्ञानमुपजीव्यं साध्याभावसंबंधिनि विरुद्धस्य साध्यसंबंधस्यावच्छेदकमेवं विनाज्ञानादित्युपाधेरात्मला
भार्थमनुकूलतर्काभावस्य वनस्य फले साध्याभावसंबंधबोधे उपाधेरुपजीव्यत्वाद्विनिगमनाविरहात् दुर्नयो दोषत्वमिति सोपाधेर्विलासादिमूलस्यार्थः तद्दूषयितुमाह
उक्तलक्षणमिति। एतदुपाधेरुपजीव्यत्वाभिधानं उपलक्षणं सन्दर्शयति व्यभिचारिणीति। उपलक्षणत्वाभिधाने बीजमाह उपजीव्येति। असंभवादिति। उपाधिस्वरूप
स्यानुकूलतर्काभावस्वरूपस्य परस्परोपजीव्योपजीवकभावाभावात् अनुकूलतर्केण हेतौ साध्यव्याप्यत्वग्रहेपि तद्व्यापकत्वाप्रतिसंधानदशायामुपाधेः साध्यव्यापक
त्वग्रहसंभवात् साध्याभावसंबंधिनि साध्यसंबंधस्य विरुद्धत्वेनावच्छेदकग्रहानपेक्षणादनुकूलतर्काभावफलेप्युपजीव्यत्वासंभवादित्यर्थः। व्याप्यव्यापकभावस्थि
ति। यद्युपाधेरनुकूलतर्काभावव्याप्यत्वेनानुकूलतर्काभावस्य सन्देहोऽपि कश्चित्संभवेन सोपाधिव्याप्यत्वं तथाप्यनुकूलतर्कपदसत्तर्कविषयीभूतोपाधिव्यतिरेकप
रतद्भाववस्तुनः सन्देहो नाविति भावः। अकिंचित्कर इति। व्याप्यत्वेनोपजीव्यत्वेऽस्य निर्युक्तिकत्वादिति भावः। ननु स्वरूपसद्दूषकतायां व्यापकस्याधिकदेशवृत्तेरन्यत्र दू
क षकत्वकल्पने नैवान्यथासिद्धत्वान्न्यूनदेशवृत्तेर्व्याप्यस्य न दूषकत्वं कल्पनमिति तस्यैव विनिगमकमतमतआह। विशेषणत्वेति। एकतरज्ञानकालेपि अन्यतरज्ञानाद्व्याप्ति
ग्रहप्रतिबंधो न स्यादन्येन तद्बीजमिति भावः। अननुकूलतर्काभावस्यानुमानविधया व्यभिचारधीद्वारा दूषकत्वमित्यभिप्रायेणाह अनुकूलतर्कस्य व्याप्तिग्रहेकारणत्वान राम

३३

तदभावः कारणाभावतया स्वरूपसन्नेव व्याप्तिग्रहप्रतिबंधकइत्यभिप्रायेण शंकते नचानुकूलेति। व्यभिचारशंकाप्रतिबंधमात्रे प्रयोजकत्वं न तु तस्य कारणत्वमि
त्यभिप्रायेण परिहरति विनापीति। तथाचानुकूलतर्कं विनापि व्याप्तिग्रहप्रसक्तौ न प्रतिबंधकीभूतव्यभिचारधीसंपादनद्वारा उपाधेर्दूषकत्वमक्षतमिति भावः। प
र्वतो वह्निमान् धूमादित्यत्र महानसत्वादावतिव्याप्तिः दृष्टो बहुशो भावबाधे न दमहानसान्यतरत्वे तन्मते महानसत्वाभावादिति क्रमेणतथा हेतोरपि कश्चित्साध्यव्यावर्त्तक
त्वादत आह अत्र पक्षेति पक्षनिष्ठा या साध्यव्याप्तस्तु अपि काव्याप्तिरित्यत्रेति योगित्वमित्यर्थः। उभयकत्वं तद्योग्यतातेन व्याप्तेर्नैः। नतु हेतोर्वह्निमान् धूमादित्या
दौ वह्निसामग्रयावौ न दृश्यति व्याप्तिः तेषां व्यभिचारानुभावकत्वादत आह सत्वतिपक्षेति। तत्रेषांलक्षत्वमिति भावः। नत्र। सत्वतिपक्षोन्नयनेनान्वेवं यद्भावृत्या साध्ये
निवर्त्तत इत्यत्र एवसाभंजस्य साधनस्येति व्यर्थमत आह साधनस्येति। यत्साधनीयसाध्ये निवर्त्तते न साधनं सोपाधिरिति एवं परं परा संबंधज्ञानापेक्षया। केवलप
दमवारणेन तु लक्षणेवि वक्षितमिति अवधारणार्थः लक्षणे तत्र वैराम्यमुपपादयितुं कल्पांतरमाह यद्वेति। नन्वेवं यदभावेन साधनवति साध्यं निवर्त्तत इति पूर्वलक्षण
स्यैनपौनरुक्त्यमत आह तथा चेति। तथाच पक्षमित्रव्यभिचारित्वेन लक्ष्यतदर्थपरतया व्याख्यानं न कर्त्तव्यमिति भावः। ननु पक्षावृत्त्या साध्यं व्यावर्त्तत इति लक्षणेनपक्ष
स्य साध्यसाधनसंबंधव्यावर्त्तकत्वरूपतदर्थोपवर्णनेनोपसंहारो विरुद्ध इत्यत आह शुद्धस्येति। तथाचोन्नयनप्रकारमात्रकथनेन न तु लक्षणोपवर्णनमिति न विरोधः।
प्रथमव्याख्यानानुसारेणाह पक्ष इति। द्वितीयव्याख्यानानुसारेणाह कश्चित्साधनवतीति एकमिति। साधनावच्छिन्नसाध्यव्यापकोपाध्यनुरोधेनैतत्प्रकारस्याप्र
यणीयत्वात् शुद्धसाध्यव्यापकस्थलेपि नत्प्रकारः संभवतीत्याशयेनान्यसाधारणोन्नयनप्रकारकथनमिति भावः। साध्यसाधनसंबंधाभावसिद्धौ कृपे साध्याभावतमि
त्यत आह साधनवत्त्वेनेति। विशिष्टाभावस्येव तत्संबंधाभावस्यापि प्रतिरिक्तत्वादिति। ननु साध्यसाधनसंबंधाभावोन्नायकत्वप्रदर्शनेप्रकृते कर्त्तव्ये शुद्धसाध्या

भावोन्नायकत्वप्रदर्शनमसंगतमत स्तत्संगमयितुं शंकामवतारयति। नन्विति। साध्याभाववत्त्वेइति। तथा च साध्याभावस्य साध्यसाधनसंबंधाभाव व्याप्यत्वाद्व्याप्य
स्यमुनरंधा व्यापकत्वादित्यभिप्रायेण। साध्याभावे साध्याभाव व्याप्यत्वं दर्शयितुं शुद्धसाध्याभावकत्वं उक्तमिति भावः। बाधेति प्रत्यक्षत्वे साध्यप्रसिद्धिः स्याद् अप्रयोज्यत्वे दूषणप्रति
पादनात् इत्यत्वे सती मूलमनुपपन्नमत आह इत्यत्र इतीति। एषु पदं बहिरित्यपरं प्रसंगत्वपदं वा बहिरिन्द्रिय प्रसंगत्वपर। ननु क्रमेणोन्नायकतया पाधि दूषकत्वेय अ
साधनसंबंधाप्रसिद्ध्या परस्य साधनत्वस्य नेनानेनाव्यापकत्वेन वा उपाधेर्नैतस्य व्युत्कारसंभवः। तत्र निरुक्तलक्षणस्यासंगतत्वादसंगतिरत एव प्रयं चेति प्रा
मशङ्गनि। तथा च प्रापि कोपप्रकारेण सार्वत्रिक इति भावः। शुद्धसाध्याभाववदिति साधनी यस्य धर्मिणेन्व्यापः। अवच्छेदकवतीति। विशेषणत्वेन ज्ञानेन विशि
ष्टाभाव बुद्धेर्विशेष्याभावावलंबित्वादिति भावः। विशिष्टाभावस्यातिरिक्तत्वपक्षेप्याह। अवच्छेदकत्व विशेषितेनेति। प्राथमिकस्य व्याप्तिस्वरूपस्य यति। गगनत्वे
ति। गगनं प्रसज्य स्पर्शवत्त्वात्प्रमेयत्वाद्वा इत्यत्र गगनेन उभयसंबंधाभावतुङ्गरूपाभावादित्यत्र पक्षो गगने स्पर्शाभावकसाधनवत्वेन ज्ञानाभावान्नोक्त
क्रमेण शुद्धसाध्याभावसिद्धिपर्यवसानं। अत्र कश्चित् स्पर्शवति तदुभयसंबंधाभावस्य साधनेन शुद्धसाध्याभावोन्नायकत्वसंभवान्नाद्धितीयपदे सत्यनुसरणोत्त
गुणादौ व्यभिचारात् प्रसक्तत्वप्रमेयत्वसंबंधव्यापकत्वाभावात् तुङ्गरूपस्य न तयोन्नायकत्वमिति। ताद्दशसाध्याभावेति। वह्निं धूमेन विशेषितं गगने बहि
र्व्यावृत्तबुद्धि प्रमेयत्वाभावस्य बहिरिन्द्रियत्वेसति उद्भूतरूपाभावादित्यनेन दप्रसक्तत्वरूपशुद्धसाध्याभावस्योन्नायकत्वमिति सूर्यः। यथा श्रुतार्थत्यागे
प बीजं दर्शयितुं व्याप्यमुनार्थं मानमाह परस्येत्यादिना। पक्षसाधनसंबंधी पक्षता तन्मात्रेण साधनविशिष्टसाध्याभावोन्नायकत्वमाभाति स्वत आह। प
साधनविशिष्टमिति। वैयर्थ्यमुक्तादिपरीतार्थकत्वमाह जलत्वमिति। तत्र पृथिवीत्वे स्नेहनेद्व्याप्तानावनुन्नायकत्वेमात्रेत्साध्यविशिष्टद्रव्यत्वाभावो
न्नायकत्वेन च जलत्वस्यादिस्यर्थः। एवमग्रे पक्षेन देशादिदूषणेष्वपि बोध्यं। साधनविशिष्टसाध्यप्रसिद्ध्यैति साध्यसाधनोभयनिवर्तन राम

इत्यर्थेनु यद्यपि तायं दोषविरुद्धयोरत्र यत्वेनाभावस्यसुलभत्वान्न यापि यत्र भिन्नसाध्यसाधनाभावस्तत्र सद्धेतौ पर्वतो वह्निमान् धूमादित्यादौ
हेतुता वच्छेदकेन समवायेन साध्यतावच्छेदकेन वा संयोगेनोभयाभावस्य केवलान्वयितयानन्नायकत्वपर्वतत्वाविरूपव्यतिरेकप्रतियोगिपर्वतत्वाभावो
दाववनिवार्यत्वात् इति साध्यवत्त्वप्रकारकप्रमाविशेष्यत्वसाधनवत्त्वप्रकारकप्रमाविशेष्यत्वोभयाभावे न इत्यर्थे तु प्रदर्शितहेतुकेन साधके चाप्रसिद्धिरित्यादिक
मूलं। यथासंभवमसिद्धः सम्प्रति परस्य उन्नायकत्वस्य सतानिबाम कमिति परस्य वनिष्कर्षमाह साध्यवत्वेति। साध्यवत्त्वप्रकारकसमसाधनवत्त्वप्रकार
कबोधत्व द्विरोधिनी बुद्धिर्यस्य एवं तो यान्नासाध्यस्य साधनस्य वा भावः परस्तदुन्नायकत्वात् प्रकारकप्रतियोगित्वमित्यर्थः। पर्वतत्वावच्छेदेन वह्न्यभावस्य वा
यापर्वतत्वादिबुद्धेरपि व्याबर्तकधर्मदर्शनविधया ताद्दशबोधविरोधित्वात् न्नायकेतिया प्रवारणाय भावेति प्राप्तेन वसुद्र्याविलक्षणविरोधित्वाभिप्राय
क। अत्र यद्यपि साध्यसाधनघटादिमत्त्वबोधस्यापि ताद्दशत्वात् न हि विरोधिबुद्धिकघटाभावस्यावापके नियापि ताद्दशबोधत्वावच्छिन्नविरोधित्वं वाप्रसिद्धे
तन्मात्रप्रकारकबोधविरोधित्वं चाप्रसिद्धं तन्मात्र प्रकारकबाधविरोधित्वं साध्यतावच्छेदकाभावादावपि तथापि धर्मितावच्छेदकविशिष्टधर्मत्व पदं भावचे
त्वतानियमतस्ताद्दशसाध्यसाधनवत्त्वबोधप्रतिरोधकत्वं भावविवक्षितः साध्यतावच्छेदकापत्रावस्कसाध्यादिवृत्तित्वयोस्य मानणएवं ताद्दशबाधवि
रोधी न तु धर्मितावच्छेदकविशिष्टइति नातिप्रसंगः। भ्रमरूपेति। एकधर्मिकसाध्यवत्त्वसाधनवत्त्वबोधस्य चर्मे कस्यपत्वादिति भावः। प्रमादिरूपेतिपाठे
एकधर्मिकत्वं ताद्दशबाधेन विवक्षितं किंतु साध्यसाधनप्रकारकबोधं प्रति समानधर्मितावच्छेदकत्वप्रसाससाविरोधित्वं विवक्षितं। न च वायुः लोहिता
गंधादिसाधनत्व पृथिव्योः स्नेहगंधप्रकारकप्रमाया दापापि सुलभत्वं प्रवृत्तिहेतुकेन साध्यकेवान्नमशायावप्रसिद्धिरिति। एवंव्याख्यानेपि साधन
स्य साध्यमिति यथा श्रुतार्थत्यागे वा वृत्तिहेतुकादिस्थले नमासनवेन त्वदोषणसाधाप्ति। मतेचलत्वरूणमुक्तसाध्यव्याबर्तकेमवसर्वत्र दर्शयितुं ननु

MEMORIAL

क्वापि साधनव्यापकत्वमित्यादिरस्वरसोऽपि वदंति न्मांसूचितः। अस्मिन्नेव पक्षे सार्वभौमव्याख्यानं दूषयितुमुत्थापयति यत्किंचिति यत्र साध्यसाधनान्तरव्यावर्त्तकत्वं लक्षणे वक्तव्यं तत्र गन्धवत् प्रमेयात् प्रमेयवद्गन्धादित्यादौ सत्प्रतिपक्षस्यासिद्धेर्वा दुर्ज्ञेयत्वं पृथिवीत्वादौ तद्गगनमेतायप्रमेयत्वावच्छिन्नभेदघ
टितस्यान्यतरस्याप्रसिद्ध्याऽन्यथा तन्निर्वह्नि साध्यावृत्तित्वसत्त्वीति। तत्र चावृत्तिरेव तादृशाप्रसिद्ध इति नाव्याप्तिः। तादृशाभावः किं साध्यतावच्छेदकसंबंधेन हेतु
तावच्छेदकसंबंधेन यत्किंचित्संबंधेन वाऽऽद्ययोराह यत्रेति न्नत्तिन्नेति। पर्वतो वह्निमानेतद्रूपादित्यादौ समवायसंबंधेन वह्न्यभावो व्यापकेतद्वयवत्वादौ
संयोगेन तद्रूपाभावस्य व्यापके व्यतिरेकिणि धर्ममात्रे निव्याप्तिः चरमेव्याह। अन्यत्रापि चेति। एकसंबंधे न साध्यसाधनभावेऽपि वह्निमान्धूमादित्यादौ समवायादिना
वह्न्यभावस्यान्व्यापकेवमत्ववत्त्वादाववनिव्याप्तिरित्यर्थः। न च साध्यतावच्छेदकसंबंधावच्छिन्नसाध्यनिष्ठप्रतियोगितासाधनतावच्छेदकसंबंधावच्छिन्नसाधननिष्ठ
प्रतियोगितान्यतरवदभावोन्व्यापकत्वोक्तौ नायं दोष इति वाच्यं जलं प्रमेयवन्सत्त्वादित्यादौ स्वरूपसंबंधेन साध्यतायां प्रमेयत्वेन सत्त्वस्यापि हेतोः साध्यतया स्वरूपसं
बंधेन तदभावोन्व्यापकेऽतिव्याप्तेरिति संबंधभेदेन प्रतियोगितावच्छेदकत्वेऽनापि दूषणेदानुमाह किं चेति। साध्यसाधनान्यतरवत्त्वीति। न च प्रतिपक्षस्यासिद्धेर्व्यापक
कव्याप्तिरिति भावः। महानसीयेति। न च साध्यतावच्छेदकसाधनतावच्छेदकान्यतरावच्छिन्नाप्रतियोगिताकाभावो व्यापकत्वं वाच्यं यत्र भिन्नभिन्नसंबंधेन साध्य
तासाधनता तत्रागुरुशरीर्यात तदवच्छिन्नतादृशाभावोन्व्यापकेऽतिव्याप्तेः। प्रमेयपक्षके प्रमेयहेतुके वा तदभावत्वस्याप्रसिद्धेः। अन्यथा तन्निर्वह्निपक्षावृत्तित्वसत्त्वी
ति। साधवादाह पक्षसाधनवंतावितिपक्षतावच्छेदकस्यसाधनस्य वा प्रमविशेषेष्वेव वह्निव्यावर्त्तकेति व्याप्तिवारणाय प्रमेति। तादृशाप्रमा च सा मूहालंबनरू
पा पर्वतग्याहिकंयोयादेया। तेन पर्वतो वह्निमान्धूमादित्यादौ पर्वतधूमवंतौ जलह्रदश्चेति समूहालंबनप्रमाविशेष्ये ह्रदे वह्निव्यावर्त्तके वह्निसामग्र्यादौ ना
तिव्याप्तिः पक्षतावच्छेदकादेरपि विषयत्वाद्विशेष्येतिदोषपक्षसाधनवंतौ। तत्र तादृशी प्रमा विशेष्या। अवृत्तिहेतुके वक्ष्यमाणाव्याप्तिदूषणस्य जलत्वेति

राम

३५

६

यामकमिति शेषः। अफलमिति। सत्प्रतिपक्षोन्नयने साधनवतः व्याप्तिचारोन्नयने च पक्षस्यानुपयोगित्वेनोपादानं निष्फलं स्यादिति भावः। अवृत्तिहेतुकमिति। जलं वह्निमदाका
शादित्यादावित्यर्थः। अव्याप्तिरिति। साधनवतोऽप्रसिद्ध्या निरुक्तलक्षणासंभवादिति। पक्षतावच्छेदकमनुपादायापि पक्षस्य तद्घटितत्वेनोपादाने वृत्तिपक्षतावच्छेदकस्थले व्यभि
चारोन्नायकेऽव्याप्तिर्न संभवतीति सा नोक्ता। अवृत्तिहेतुके सत्प्रतिपक्षोन्नायकेऽव्याप्तिमुद्धर्तुं प्रकारान्तरमुपन्यस्यति यद्वेति। पक्षतावच्छेदकसाधने इति। अत्रापि प्रतीतिवि
शेषो विशिष्य्योपादेयः। तेन समूहालंबनमादाय दोषः यद्यपि साधनतावच्छेदकस्यानुपादाने द्रव्यं विशिष्टसत्त्वादित्यादौ सत्ताश्रये द्रव्यत्वाभावोन्व्यापकेति व्याप्तिः तदुपादाने
च न द्रुममादाय व्याप्तिव्याप्तिवारणाय प्रमात्वोपादानमुचितं तथापि तादृशाप्रतीतिविशेषस्य तद्घटितत्वेनोपादाने कर्त्तव्ये प्रमात्वं न निविशते इत्याशयेन प्रमात्वं नोपात्तं। तत्रापि
तादृशावाक्यार्थेऽपि अनभिमतमित्यनेनान्विसंनेनेत्यादित्ततीयांतत्रिकं तादृशाधर्माश्रयद्रव्यत्वेन संबध्यते। संयोगेनेति समवायेन हेतोर्जलत्वस्य समवायेनाश्रये वह्निव्यावर्त्तकत्वेन
लक्षणसंगतिरिति भावः। पक्षतावच्छेदकस्येति। तथा च तदाश्रयेऽपि साध्याव्यावर्त्तकत्वेन लक्षणगमनमिति भावः। संयोगेन साधनवतः प्रसिद्धावपि तत्र साध्यव्यावर्त्तकत्वाभावान्न ल
क्षणगमनमिति निष्कर्षः। संयोगेन धूमवत्त्वेनेति। समवायित्वादाविति पक्षतावच्छेदकतापक्षकसमवायेन मेयत्वस्यावृत्तेः पक्षतावच्छेदकघटत्वाश्रये ज्ञानित्वस्य साध्यस्य सत्त्वनिय
मादिति। अत्रैव कल्पेऽतिव्याप्तिमप्याह वह्निमत्पर्वतेति। निर्वह्निपर्वतपक्षके सत्प्रतिपक्षोन्नायकत्वेन संग्राह्यत्वात् वह्निमदिति। धूमाव यवइति। तस्य पक्षतावच्छेदकतापक्षकसमवायि
न साधनाश्रयत्वादिति भावः। अनया वा उक्ताव्याप्तिरेवोपाधिपदव्याच्यत्वादिरूपाश्रयस्यानाप्रसिद्धिरतोऽयाचेष्टे। अपाद्यस्येत्यादिना वक्ष्यतीति। न च धूमाव्यापके पक्षेतरे कश्चिद्व्यापकत्व
स्यापाद्यत्वेनाप्रसिद्धिरिति वाच्यं। व्यतिरेकिधर्मस्य मदव्याप्यत्वेनानापादकत्वादिति। नन्वनुक्तं यद्व्यभिचारित्वेनेत्यादिकमपि नानुमितिप्रतिबंधकतावच्छेदकमिति तु स्पष्टत्वानुपोग

भावानंद

इति ध्वंत आह अस्य दुष्कमिति तदुन्नयनस्वरूपयोग्यत्वमिति फलोपधानरूपतदुन्नायकत्वस्य व्याप्तिपक्षधर्मतारूपत्वासंभवादिति भावः। न आद्यमिति साध्यव्यभिचारव्याप्ती
त्यर्थः व्यभिचारस्येव तद्व्याप्यत्वस्यापि ज्ञानस्यापि व्याप्तिधीविरोधित्वादिति भावः। पर्यवसितेत्यादिकं चेति उपाधिशरीरभागे व्यभिचारादिविषयकत्वसद्विभुतायां साध्यव्यभिचारित्वे
न साधनविशेषणत्वात्। इतरथा तु व्यभिचारव्याप्यतावच्छेदकसाध्यव्यापकाभावसामानाधिकरण्यत्वावच्छिन्नघटितत्वात् तदपि प्रतिबंधकतावच्छेदकमेवे
ति भावः। व्याप्तत्वोपयिकं ननु दूषकं पक्षेतरत्वस्य साध्याव्यापकस्याभावान्नातिव्याप्तिः संभवतीति तदुपेक्ष्याह यतिः यथाश्रुतत्वादिना। यथाश्रुतोपयुक्तव्या
पकत्वघटिते। वह्निना धूमस्येति पर्वतो धूमवान्वह्नेरित्यत्र धूमवत्त्वं वन्त्यपक्षतायां। पक्षेतरस्येति हुक्त पक्षधर्मावच्छिन्नसाध्यव्यापकत्वादिरूपपर्यवसितसाध्यव्यापक
त्वाद्युपाधिलक्षणानाक्रांतत्वात् सिद्धांतिनयेऽपि असत्त्वादिति भावः। न दूषयति। यत्किंचिद्धर्मावच्छिन्नसाध्यव्यापकत्वघटितोपाधिलक्षणत्वानादिमित्यर्थः। व्यवहारौपयिकमिदं
ननु दूषकमिति यदि ब्रूयात्तत्राह व्यवहारौपयिकत्वे चेति। ननु मयापि पक्षधर्मावच्छिन्नसाध्यव्यापकत्वे तद्धर्मावच्छिन्नसाधनाव्यापकत्वमेव तद्घटितं यदुक्तमत आ
ह पर्यवसितेत्यादीति। मतांतरमाह व्यवहारौपयिकमित्यादिना। व्यवहारौपयिकं उपाधिव्यवहारौपयिकं तत्साधारणं दूषकं। तेन समानि पक्षे व्यापकके साधनव्यापक
त्वसमानरूपलक्षणव्याप्तिर्न दोषायेति भावः। नन्वसाध्येति। धूमसमानाधिकरणत्वे सति वह्न्यव्यापकत्वमित्यादिकमित्यर्थः। नन्वेवमननुगम इत्यत आह साध्यसाधने
ति। तस्यस्याप्यननुगतत्वादिति भावः। नन्वेवं वह्निमान्धूमादित्यादौ धूमाव्यापके वह्निसमानाधिकरणे महानसत्वादावतिप्रसंग इत्यत आह वस्तुतः इति। व
स्तुतस्तु ननु व्यभिचारित्वेन तत्प्रवेशो येनोपाधिशरीरभाने व्यभिचारानुमानमफलं स्यादिति भावः। नातिप्रसंगः वह्निमान्धूमादित्यादौ। न च तद्वैपरीत्ये इत्यादि। रूप

राम

३६

वद्द्रव्यत्वादित्यादौ पृथिवीत्वाभावः संयोगस्य व्याप्यतावेति भावः। इदं गुरुरूपादित्यादौ पृथिवीत्वाभावो न संयोगस्य व्याप्यतावेति भावः। पृथिवीत्वाभावादेरिति। तस्यापि गुरुत्वसमाना
धिकरणस्य रूपाव्यापकत्वादिति भावः। गुरुत्वव्यभिचारीति नादरेणोक्तं सत्यं के सत्वाप्यत्वात् पृथिवीत्वाभावव्याप्यत्वात्। न तद्व्याप्येति। पृथिवीत्वाभावव्याप्येत्यर्थः।
तथा च वस्तुतो यद्व्यभिचारि साधनं तद्व्यापकत्वं लक्षणार्थो ननु व्यभिचारितावच्छेदकसाधनतावच्छेदकावच्छिन्नाव्यापकत्वं येनातिव्याप्तिः स्यादिति भावः। दूषणे
दूषणौपयिकं त्विति। दूषणं व्यभिचारोन्नयनादि। यद्धर्मावच्छिन्नसाध्यव्यापकत्वं तद्धर्मावच्छिन्नसाधनाव्यापकत्वं व्यभिचारोन्नयनौपयिकं। पक्षधर्मावच्छिन्नसा
ध्यव्यापकत्वे सति पक्षावृत्तित्वे च सत्यपि पक्षस्येत्यादिकमित्यर्थः। साध्यतावच्छेदकगर्भत्वेऽपीत्याह नन्विति। सकलगुणव्यक्तिष्विति। यदि कस्यांचिद्गुणव्यक्तौ द्रव्य
त्वं निरुपाधि स्यात्तदा गुणत्वेन निरुपाधिव्यवहारे सर्वव्यक्तिविषमत्वेऽपि परिहारसंभवे साध्यतावच्छेदकगर्भतानोपादीयेत रत्वं तत्संभवतीति भावः। निरु
पाधित्वादिति। तथा च साध्यतावच्छेदकाप्रवेशे तत्तद्गुणसमानाधिकरणद्रव्यत्वाव्यापकस्य गुणत्वावच्छिन्नसाध्यकेऽपि उपाधिव्यवहारः स्यादिति भावः। साध
नतावच्छेदकताघटितमाह गुणत्वेन गुणत्वादिना। गुणकर्मान्यत्वेति। साधनतावच्छेदकाप्रवेशे गुणत्वावच्छिन्नसमानाधिकरणस्य द्रव्यत्वस्य सत्ताव्यत्यव्यापक
स्य विशिष्टसत्तात्वावच्छिन्नहेतुतायां मधुपाधिव्यवहारः स्यादिति भावः। उक्तातिप्रसंगवारणाय साध्यतावच्छेदकादिगर्भं नु पाधित्वं वस्तुतश्चेवलत्वं दर्शयितुं जिज्ञासा
माह तथा चेत्यादिना। अननुगतमित्यतो न तद्रूपावच्छिन्नसाध्यसाधनकयावदुपाध्यनुगतमित्यर्थः। ननु साधनतावच्छेदकानुप्रवेशे पुरःसरमेव च न व्यक्तिगर्भतायां न
रूपेण गुरुत्वे साध्ये पृथिवीत्वाभावादावतिव्याप्तिर्न वा गुणत्वेन गुणे साध्ये सत्तायाः सोपाधित्वे गुणकर्मान्यत्वविशिष्टसत्तात्वेन सोपाधितापत्तिरित्यादिदोषोऽत आह न
त्विति। अननुगमादिति। व्यभिचारि साधनं व्यक्तीनां मध्ये कव्यक्तिव्यापकस्यापि व्यक्त्यंतरव्यापकस्य व्यक्त्यंतरव्यापकस्यापि नैकत्र व्यापकत्व सोपाधित्वेन न व्यक्तिघटितत्व

रूपस्य तत्तत्साधकयावदुपाधिसाधारण्यादिति भावः। रूपत्वावच्छिन्नाव्यापकस्येति। न चात्र रूपत्वावच्छिन्नत्वेऽपि रूपव्यापकत्वेनेति वाच्यमिति सूक्ष्मं। तथा सति शब्दे व्याप्ता
वादिति। ननु साध्यव्यभिचारिणः साधनतावच्छेदकावच्छिन्नं तदव्यापकत्वस्योक्तौ नाननुगम इत्यत आह व्यभिचारित्वेनेति। उपदर्शितमिति। उपाधिशरीरे साधनस्य साधनति
साध्य ष्ठव्यभिचारादिविषयत्वस्य सहिष्णुतायामित्यादिना। नन्वन्यं चितिकर्तृत्वायन्मतमनुपन्यस्तं तत्रापि साधनाव्यापकत्वस्योपाधित्वरूपेणाप्रवेशादर्थतः साधनव्यापकस्यो
पाधित्वस्वीकारान्ना केचित्त्वित्यादिना तन्मतोपार्थक्ये नमनोपन्यासोनुचित इत्यत आह उपाधित्वरूपेणेत्यादिना। दूषकतायां तन्त्रत्वेपदोन्नायकतायोः अनुकूल्या
वमुक्तोत्रानिकल्पसमप्याह। अव्याप्तीति। करकापृथिवीकठिनसंयोगवत्त्वादित्यत्रानुष्णाशीतस्पर्शवत्त्वादौ साधनव्यापकेऽव्याप्तिकरत्वादित्यर्थः। अप्रतिज्ञापप्रकाशप
िनित याचान्ये चितिकर्तृत्वायन्मतमनुपन्यस्तं तस्य बाशयप्रकाशे केचित्त्वित्यादिनाक्तं तं मनुमतान्तरमेतदिति भावः। ध्वंसवान्वह्नेरित्यादौ साध्यस्याप्ययोगोलकावृत्ति
त्वादिनोपाधित्वादाह साध्यतावच्छेदकेति। साध्यतावच्छेदकरूपेणापि साध्यव्यापकत्वरूपोपाधित्वस्य सत्त्वात्तन्मात्रनिक्षेपो संशयन इत्यत आह परं प्रतीति। साध्या विशे
षस्य दूषकताबीजं दर्शयति प्रसन्नरागइत्यादिना। प्रकृते च स्थापनो हेतुरेव पक्ष स्तत्र साध्यव्यभिचारस्य साधनस्यानिर्णयेऽनुमानमेव प्रवर्तते। अनिर्णये च पक्ष
तायाः अपि प्रनिर्णयात्तस्यानुमानस्यायोगादित्यर्थः। ननु उद्भावनं। साध्यतावच्छेदकावच्छिन्नसाध्योद्भावनं। ननु यत्रानुकूलतर्कादिना हेतौ न साध्यव्यभिचारसंदे
हस्तत्रानुमानं भविष्यतीत्यतो दूषणं स्वयमाह हेतावित्यादिना। संदिग्धोपाधिना साध्यव्यापकत्वादिरूपेणोपाधित्वसंदेहेन कथं तस्येति। साध्यस्य व्यापकताया नि
र्णयात्साधनाव्यापकतासंदेहेनैव संदिग्धोपाधित्वप्रसिद्धत्वादिति भावः। ननूपाधित्वसंदेहः किंविधया साध्यव्यभिचारसंशयाधायक इत्यत आह व्याप्यसंशयस्येति
साधनाव्यापकत्वसंदेहे साध्यव्यापकोपाधिव्यभिचारस्य साध्यव्यभिचारव्याप्यस्य साध्यव्यापकत्वसंदेहे च साध्यसाधनाव्यापकव्याप्यत्वस्य साधनाव्यापकत्वव्याप्यसंदे
हस्तद्व्यापकसंशयाधायक इति भावः। ननु तेन विना संशयानुपपत्तिरेव तत्र मानमत आह। कोटिस्मरणादित इति एव कारेण व्याप्यत्वसंशयव्युदासः। अनुपपत्तेः। व्या

पकसंशयानुपपत्तेः। ननु संशयसामान्यव्याप्यसंशयं विनासंभवेऽपि संशयविशेषतदन्वयाद्यनुविधानाद्धेतुत्वं भविष्यतीत्यत आह क्वचिदिति। तदनुविधानस्य व्या
प्यसंशयानुविधानस्यानस्मरणएव व्यापकतदभावयोः स्मरणं वनतु संशय इति भावः। ननु यत्र पक्षसाह संगृहीते तत्रैव तदनुविधानात्कारणत्वं भविष्यती
त्यत आह तदग्रह इति। नाद्यशास्ताहत्व योग्रह इत्यर्थः। स्मरतामिति। तथा च व्याप्यकोटिः संशयस्य कोटिस्मारकतयानोपयोग इति भावः। धर्मिज्ञानादिकारणान्तरेण
यासिद्धिं निरसितुमाह। पर्वतादिकमपीति। आदिना धूमसंशयशून्यचत्वरादिरूपधर्मिपरिग्रहः। धूमादीनि। पर्वते धूमादिसंशयस्याभावेन हृताश संशयस्याभावः
चत्वरादौ धूमसंशयस्याभावेन वह्निसंशयस्याभावस्तयोर्दर्शनादित्यर्थः। अतएव व्याप्यसंशयस्य कारणत्वादेव। व्याप्यांशेऽत्कटकोटिका संशयाद्व्यापकांशेऽपि
उत्कटकोटिकः संशय इत्यर्थः। उत्कटकोटिकत्वं वात्राव्याप्यवृत्तिजातिविषयताविशेषो वेति भावः। कारणोत्कर्षेणैवैव कारेण कारणोत्कर्षस्य व्यवच्छेदः। नन्वे
वं सूत्रे व्याप्यसंशयस्य हेतुत्वादर्शनान्नाद्विरोध इत्यत आह। समानेत्यादिसूत्रं त्विति। उपलक्षणपरं व्याप्तिसंशयोपलक्षकत्वे तात्पर्यग्राहकं चकारस्यानिरर्थका
त्वापत्त्यानस्यैवनर्थकत्वापत्त्यानस्यैव तदर्थकत्वसंभवे पदान्तरलक्षणान्याय्येत्याशयेनाह। तत्रस्य चकारो वेति। समानानेकधर्मोपपत्तेर्विप्रतिपत्तेरुपलब्ध्यनुप
लब्ध्यव्यवस्थातश्च विशेषापेक्षो विमर्शः संशय इति सूत्रं। अस्यार्थः। समानेनैकेषांतत्कोटितदभावकोटिमतां धर्मः। तदुपपत्तेः धर्मिणितद्दर्शनाद्विप्रतिपत्तेर्वि
रुद्धकोटिद्वयप्रादवाक्छेदो नित्यो न वेत्यादिवाक्यादुपलब्धिरनुपलब्धिश्च तत्कोटेः। तथा च पत्रतत्कोटेरुपलब्धिर्यत्र वानुपलब्धिः अभावोपलब्धिः कार्यकारणेोपचा
रात्तयोरव्यवस्थातः अभावनिश्चयस्तस्मात्सपक्षविपक्षव्यावृत्तधर्मवत्त्वज्ञानादिति यावद्विशिष्यते। व्यावर्तते विशेषदर्शनं विशेषो यस्मात्सविशेषो विशेषादर्शनं तस्मा
पेक्ष इत्यनेन कारणमुक्तं लक्षणमाह विमर्श इति। एकधर्मिकविरुद्धोभयार्थीविमर्श इत्यर्थः। अत्र च शब्दो नित्यो न वेति संशयस्य साधारणादिधर्मदर्शनादितः अस्य

कंसंभवात्। न रामसर्गानुमित्योरिवाप्यवहितोत्तरत्वं कार्यतावच्छेदकोक्तसहेतुभावग्रहः। साधारणधर्मस्य धर्मितावच्छेदकत्वे संशयविषयत्वसंभवेपि असाधारणत्वस्य
रूपसत्साध्यतदभावानिश्चयगर्भतया विप्रतिपत्तेस्तथात्वासंभवादिति भावः। यथाश्रुतमेवस्तु अनुपपादयितुम् मानान्तरमाह। कोटिद्वये सादिनान कोटिसहचरितध
र्मवत्ताज्ञानेन तदभावकोटिसहचरितधर्मवत्ताज्ञानं चेत्यर्थः। धर्मस्य चैकत्वमिति कोटिद्वयसहचरितो यदा को धर्मस्तद्रूपताज्ञानत्वेन हेतुत्वमित्यर्थः। इदमुपलक्ष
णं कोटिद्वयाधिकरणएकसंबंधेन धर्मस्य वृत्तित्वमपि नापेक्षितमित्यपि बोध्यं। एतावता कथं लिंगसंदेहस्य तत्रांतर्भाव इत्यत आह दर्शयति अपवगाहते चेति लिंगिकेति
भाव ५ लैंगिकं तदभावश्च तयोः सहचरितो साध्यसहचरितलिंगतदभावसहचरितलिंगाभावमित्यर्थः। साधारणधर्मएव तज्ज्ञानएव। अस्य व्याप्यसंशयस्य। अत्र
वह्निसहचरितधूमे वान्त्वत्वाभावसहचरितधूमाभाववान्वेत्याकारकसंशयाभावेपि धूमवान्न वेत्याकारकसंशयादनुभवसिद्धस्य वह्निसंशयस्यानुपपत्तिः
अननुवृत्तत्वव्यावृत्तत्वसंबंधेन वह्नितदभावसहचरितधूमत्वाज्ञानात् संयोगेन वह्निसहचरितधूमत्वावगाहिनः समवायेन वह्न्यभावसहचरितद्रव्यत्वावगाहि
तोज्ञानादपि संशयापत्तिश्चास्वरसो न व्याप्त इत्यनेन सूचितः। मिलितयोरिति। अपत्रमित्यनेनापेक्षाबुद्धिविशेषविषयत्वरूपं तदुभयत्वं तथा सति संयोगसंबं
धावच्छिन्नप्रतियोगिताकस्य लिंगतदभावोभयत्वावच्छिन्नाभावस्य केवलान्वयिनः कोटिद्वयसहचरिततया तत्प्रतियोगितावच्छेदकसंयोगसंबंधेनालिंग
तदभावोभयवत्ताज्ञानस्यासंभवात्। असाधारणस्य तेयत्संबंधावच्छिन्नाभावस्य कोटिद्वयसाहचर्यं तेन संबंधेनालिंगतदभावोभयवत्ताज्ञानस्य। प्रति
योगितावच्छेदकावच्छिन्नप्रतियोगिनः धर्मिवृत्तिताज्ञानस्यैव संशयहेतुत्वात्। अन्यथा समवायसंबंधावच्छिन्नधूमाभावस्य वह्नितदभावसाहचर्यग्रहे
संयोगेन धूमवत्ताज्ञानेनापि संशयापत्तेः। नाप्येकविशिष्टापरत्वं। धूमधूमाभावपाविरुद्धत्वज्ञानेएकविशिष्टापरत्वेन तज्ज्ञानासंभवात् ज्ञानस्य धूमस्य संयो

राम

३८

धर्मिता
ननु तदभावस्य विशेषणत्वेनैव संशयविषयत्वे अपेक्षाबुद्धिविषयत्वरूपोभयत्वावच्छिन्नग्रहे तादृशसंयोगविशेषेणनारूपान्यतरसंबंधेन तदुभयत्वावच्छि
न्नप्रतियोगिकाभावत्वेनाभावस्य कोटिद्वयसाहचर्यग्रहाद्भवति कथंचित्संशयोपपत्तिरिति भावः। टीकाकारेति। टीकाकृतास्वातिप्रकस्य विरुद्धयोरेतोः प्रसक्तं एकैक
कोटिसाधारण्येपि मिलितयोरसाधारण्यविधया संशयजनकत्वस्वीकाराल्लिंगसंदेहस्थले तथात्वस्यानुक्तत्वादनुपायिन इति। [illegible]। अत्रापि वह्नितदभावसहच
रितव्यतिरेकप्रतियोगितावच्छेदकाभयत्ववद्धूमतदभाववान्न यमित्याकारकज्ञानाभावेपि धूमवान्नवेति संशयादनुभवसिद्धस्य वह्निसंशयस्यानुपपत्तिरन्यतर
संबंधेनाभावज्ञानासंभवाद्व यरूपतादृशज्ञानेनापि नोपपत्तिरित्यस्वरसः। इत्यवेति। व्याप्यसंशयस्य स्वातंत्र्येण साधारणधर्मादिज्ञानविधया संशयहेतुत्वे चेत्यर्थः
स्फुटत्वे सुपाधौ साधनसमानाधिकरणाभावप्रतियोगित्वसंदेहसाधनेषूपाध्यभाववद्वृत्तित्वसंदेहस्यैव। विसागर्जिनत्वात्तस्य च साध्यव्यभिचारव्याप्यतया हेतौ साध्य
भाववद्वृत्तित्वस्य च साध्यव्यभिचाररूपतायाः स्फुटत्वादित्यर्थः। साधनाव्यापकत्वसंदेह इति। साधनाव्यापकव्याप्यत्वस्य साधनाव्यापकव्याप्यहानात् साधने साध्याभा
ववद्वृत्तित्वस्यैव साध्यसाधनवद्वृत्त्यभावप्रतियोगित्वस्यापि व्यभिचारत्वाद्व्यभिचारसंशयाव्यापकत्वोपपत्तिरिति भावः। मनोनरमाह उपाधेरित्यादिना वदंती संतेना। यथा
दंडवत्त्वेन पुरुषस्य निश्चयत्वेपि न दंडे रक्तत्वसंदेहात् पुरुषो रक्तदंडवान्न वेति संशयः तस्योपाधिव्यभिचारित्वेन निर्णीतसाधने तदुपाधौ साध्यव्यापकत्वसंदेहात् सा
धनं साध्यव्यापकोपाधिव्यभिचारि न वेति संशय इत्यर्थः। इत्यमेवेति। साध्यव्यापकत्वस्यानिर्णयात् अथमप्रकारस्य साधनाव्यापकेस्यानिर्णयान्नद्वितीयप्रकारस्य व
तत्र संभवादिति भावः। अत्र साध्यव्यभिचारित्वेन तद्व्यापकतावच्छेदकावच्छिन्नाभाववद्वृत्तित्वं साध्यव्यापकस्य प्रमेयत्वादेः सर्वत्र संभवेन तदभावग्रहासंभवात्
यावदिन्धनत्वधूमव्यापकतावच्छेदकसंदेहे तद्व्यभिचारित्वेन निर्णीते वह्नौ कथं धूमव्यापकतावच्छेदकार्द्रेन्धनत्वावच्छिन्नाभाववद्वृत्तित्वसंदेहः तादृशयणाको

ध्युपस्थितिसाधारणादिधर्मदर्शनस्य चाभावात् किंच यद्यार्द्रेन्धनं धूमव्यापकं तदा वह्निर्धूमव्यापकव्यभिचारी भविष्यति यदि न तद्व्यापकं तदा नेति क्रमेण संशया
धायकत्वं न सम्भवति संशयकोटितावच्छेदके धूमव्यापकतावच्छेदकार्द्रेन्धनत्वानुल्लेखे तादृशकोट्यप्रसिद्धेः। आर्द्रेन्धनत्वानुपधेरेव धूमव्यापकार्द्रेन्धनत्वावच्छिन्नव्य
भिचारी न वेति संशयस्य च धूमव्यापकार्द्रेन्धनादिव्यभिचारस्य वह्नौ निश्चयेनासम्भवादार्द्रेन्धनत्वमनुल्लिख्य धूमव्यापकतावच्छेदकयत्किंचिद्धर्मावच्छिन्नस्य च संश
ये आर्द्रेन्धनत्वे धूमव्यापकतावच्छेदकत्वसंदेहे प्रयोजकत्वादित्यस्वरसोऽनवतीसंनेन सूचितः। यथोक्तदूषणस्य दोषत्वाव्यवस्थितदोषमाहुः एकांशइत्यादिना। पक्षप्रसेक्त
रूपेण साध्यतापानुभयस्य साध्यतापानुभयस्य समूलंबनरूपानिमित्तत्रएकांशपरस्येति। श्यामत्वांशे शाकपाकजत्वस्य शाकपाकजत्वांशे श्यामत्वस्य सुर्थः। यदि वा
भयत्वमेकविशिष्टापरत्वमपक्षाबुद्धिविशेषविषयत्वं वा साध्यतावच्छेदकं तत्रापि एकविशिष्टेत्यादिना मूलेन तु त्यंशभागद्वयपरिति। सहचारदर्शनव्यभिचारादर्शनव्य
भिचारादर्शने सव्याप्तिग्राहकसत्वेन तुल्ययोगक्षेमयोः साध्यसाधनयोः साध्योपाध्योश्च सर्थः। क्षित्यादिकं सकर्तृककार्यत्वादित्यस्य सदनुमानत्वात्कथं तत्रोपाधिः
संभवतीत्यत आह यत्र तु इति। तत्राग्रहनिःसंदेहत्वायाम् इत्यर्थः। उपाधित्वसंदेहेन उपाधित्वघटकसंदेहेनेत्यर्थः। तथा च साध्यव्यापकस्य हेतुसंदेहस्य व्यभिचारसंशया
धायकत्वेन तु दृढाहरणदर्शनमिदं न तु वास्तविकोपाधिप्रदर्शनपरमिति भावः। दृष्टान्तासिद्धिमाशंकते नैकांतिकत्वेनेति। तत्संदेहत्तां नाथ्योतदर्थं तत्संदेह इत्यर्थः
तदुद्भावनं अनैकांतिकत्वसंदेहोद्भावनं। इत्यभिप्रायेण तदुद्भावनस्यासप्रदोषिकत्वादित्यग्रिमेणान्वयः। आहेत्यानस्यापि वतेकिमर्थमत आह प्रागमिति
अज्ञानरूपासिद्धेरपि तेषां हेत्वाभासत्वेनासाधकतानुमानांगतत्वयासिज्ञानार्थं तदुद्भावनमित्यर्थः। नवीनमतानुद्भावनेनो प्रयोगदर्पयतिजिज्ञासा
दीति। अनैकांतिकत्वसंदेहोद्भावने तद्बीजजिज्ञासायां तद्बीजस्य धर्मवत्त्वादितानस्यतद्बीजस्यानुसरणस्य स्यापि साधारणधर्मवत्तादिज्ञानेकाद्युपस्थितो

राम

संशयस्यापरीहारादिति भावः। जिज्ञासादीत्यादिना कोट्युपस्थित्यादिपरिग्रहः। तदुद्भावनस्यानैकांतिकत्वसंदेहोद्भावनस्य संदिग्धोपाधेरपि निश्चय
दशायां सत्प्रतिपक्षोन्नायकत्वस्य सत्त्वाद्दूषकत्वसंभवादित्यसंगतमत आह उपाधित्वस्येति। सत्प्रतिपक्षोन्नायकत्वेनोपाधित्वस्य संशयेन तत्र नवीनोत्तिदूष
कताबीजमिति भावः। साध्यव्यापकत्वसंदेहे साधनाव्यापकत्वस्य लेतद्व्यतिरेकस्य पक्षे निःसंदिग्धत्वमनसत्प्रतिपक्षोन्नायकत्वेनेति। साध्यव्यापकत्व
स्थले पक्षे इत्यस्य व्याख्या क्वचिदिति। क्वचित्साधनाव्यापकत्वस्यापि पक्षधर्मत्वेनेति। अत एव बाधावतारादेवा कृतमुपाधिनेति। तथा चेष्टापत्तिरिति भावः।
ति भावः। व्यतिरेके साधारण्यादिहेतुं पूरयति। नचेति। पक्षस्येव सपक्षस्यादिति। हेतोरनन्तत्वान्नावादिति भावः। अनवतीर्णेति बाधेनोपाधित्वेनोदूषकत्व
पक्षेतरांतरवादिति। यथा चैव वह्निमान्धूमादित्यत्रनोपाधिस्थापात्रापि। अत्र हेतुमाह। साध्यव्यापकतायाइति। तथा च पक्षे साध्यसंदेहात्तव्यापकत्वनिश्चय इति भावः। अ
नुकूलतर्कादिनेत्यादिना स्वतःसिद्धव्यभिचारायस्य संग्रहः। नद्रूह। साध्यव्यापकतायेहे। नासाधारण्यंक्षतिकरं असाधारण्यस्य हि साध्यसहचारधीप्रतिबंधेना
न्वयव्याप्तिधीप्रतिबंधः व्यतिरेकव्याप्त्यादरे तु साध्यतदभावयोरपि तदविशेषात्सत्प्रतिपक्षो दूषकताबीजं। तदुनयमप्यत्र न संभवतीत्याह व्यतिरेकितस्यादि
ना। व्याप्तिग्रहस्याकिंचित्करत्वादित्यग्रिमेणान्वयः। पक्षवृत्तेरपि पक्षवृत्तित्वाग्रहदशायां सत्प्रतिपक्षोन्नायकत्वेन वादाद्यपक्षे तद्धेतोरिति। पोनरुक्त्यपरीहाराय अध्या
वष्टे व्याप्तिविरहेति। व्याप्तिस्तानाभावकारकतामिति। व्याप्यत्वासिद्धेस्तद्भावइत्यग्रिमस्य पद्यारूढत्वानुरोधेन दमुक्तं। सोपाधिकत्वस्तानस्य प्रतिबंधकतायाः पूर्व
पक्षितोभिप्रायविषयत्वे वक्तव्यानावस्थेत्यादिना तत्र दूषणदानमसंगतमस्तदनिप्रायेणैव व्याचष्टे। औपाधिकत्वेति। तथा च तदर्थसोपाधिकत्वस्तानेन समन्वयइ
तिभावः। तत्प्रतिबंधकत्वरूपस्य विघटकत्वस्यासंभवोदाहरणंकारणाभावरूपेति। तादृशस्तानं। औपाधिकत्वस्तानं। तदर्थसोपाधिकत्वस्तानेन समन्वयं समर्थ्यम्

ति ५

MEMORIAL

तांतरमाह। अनौपाधिकत्वज्ञानस्येत्यादि। इत्यादिना विनाकारणीभूतेनेति। सारूप्यादपि विरोधिनो ज्ञानस्य जनकीभूतज्ञानविघटनद्वारैव प्रतिबंधकत्वादिति। कल्पनीयमिति। का
रणत्वमिति पूर्वेणान्वितं। सेव। सोपाधित्वज्ञानस्य प्रतिबंधकत्वेनादूषणे इति। न त्वन्यस्य साध्यव्यापकेत्यादिदूषणग्रंथ इत्यर्थः। यथाश्रुतमेवेति। प्रतिबंधकत्वेऽपि [illegible] यथाश्रु
त विघटकत्वस्यैव संभवादिति भावः। एतद्व्याख्याने दूषणग्रंथेऽस्वरसः प्रतिबंधकत्वमित्यत्र स्वरसः इत्यस्वारस्यं सोपि वदंतीत्यनेन सूचितः। व्याख्यानद्वयेऽपि व्याप्यत्वासिद्धेस्ता संगतिरिस ३
दिवस्थ्याकस्यार्थमाह। व्याप्यत्वासिद्ध इति। व्याप्यत्वाज्ञाने व्याघेरंतर्भावात् संभवादाह। अंतर्भाव इति। साध्यव्यापके साधनाव्यापकत्वे साधने वा साध्यव्यापकाव्याप्यत्वमिस
न्योर्विशेषणविशेष्यभावमात्रस्य भेदेऽपि तुल्यत्वादेकदूषणेनैवोभयोर्दुष्टत्वात्पुनराशंकनमनुचितमत उक्तं बीजमाह भिन्नधर्मिकत्वमिति। न त्वन्यस्येत्यादिना
भिन्नधर्मिकत्वमेवाप्रतिबंधकत्वे बीजमुक्तं न देव पुनः परिहृत्य शंकेति भावः। कारणविघटकत्वाभावेनाप्रतिबंधकत्वाशंकनमनुचितं सारूप्यात्प्रतिबंधकत्वस्यापि
संभवादत उक्तदसंभवमाह विरोधविषयत्वेति। तदभावव्याप्याविषयत्वेनेत्यर्थः। उभयत्रैवेति। साध्यव्याप्यव्यभिचारित्वेनैकत्र बहुव्रीहौ करणे व्यभिचारः स्या
दतः साध्यव्याप्यं व्यभिचारि यस्येति बहुव्रीहिणा साध्यव्याप्याव्यापकत्वेनेत्यर्थः करणीयः। साध्यव्यभिचारित्वमित्यत्र तदकरणे प्रकृतान्वितानि साध्यव्यापकत्वादिघटि
तोपाधित्वस्याकरणेऽतः साध्यं व्यभिचारि यस्येति बहुव्रीहिणा साध्याव्यापकत्वमर्थः करणीय इति भावः। तस्मादिति मूलस्य कृतं दूषकताबीजस्याभावादित्यर्थः। त
तोऽदूषकत्वस्यापि संभवाद्धेत्वाभासांतरमिति निर्धारणमनुचितमतः पूरयति। तस्मादित्यादेरिति। ननु साध्यव्यापकत्वादिनिश्चयदशायामुपाधेर्दूषकत्वे संदिग्धोपाधेर
दूषकत्वप्रसंग इत्यत आह। निश्चयदशायामिति। नन्वेवं संदेहदशायां दूषकताबीजस्याकल्पनान्न्यूनत्वमत आह। यन्निश्चयद्वारेति। न त्वेतावता स्पष्टोपाधित्वसंश
यस्य। यद्वेत्यादिव्याख्याने पौनरुक्त्यमाशंक्याह मानस इति। वाय्वादिरूपतन्निश्चयस्य च साध्योपाधिव्यभिचारनिरूपकाधिकरणसंनिकर्षाधीनत्वेनानंतरं सं

राम

६

निकर्षसंभवे युगपदेवोभयनिर्णयादुपाधिनिर्णयस्य प्रयोजकत्वं न संभवतीति भावः। पक्ष एवोपनीतभानात्मकवाय्वादिरूपतन्निश्चयेऽप्युपाधिनिर्णयस्य क्वचि
दुपयोगः संभवत्येव तथापि परार्थाभिप्रायेणेदं। परार्थाभिप्रायेणेदं। तथा चोपाध्युपन्यासे परस्य क्वचिन्मानसे क्वचिच्चानुमानिकव्यभिचारज्ञानमिति भावः। अत्र यद्वेत्या
दिग्रंथे व्यभिचारानुमानाद्व्याप्तिविरहानुमानस्य पृथगभावं दर्शयति साध्यसंबंधितेत्यादिना। ननु द्रव्यं सत्त्वादित्यादौ गुणकर्मान्यत्वविशिष्टसत्त्वादेः संबंधितावच्छे
दकस्य सत्त्वात्तादृशव्याप्तिविरहानुमानं बाधितमित्यत आह साधनतावच्छेदक इति। तथा च साधनतावच्छेदकमेव पक्षीकृत्योपाधिव्यभिचारित्वेत्यादिना
साध्यसंबंधितानवच्छेदकत्वमनुमेयमिति भावः। व्यभिचरितसामानाधिकरण्यं कारणीभूतज्ञानविषयतावच्छेदकमिति मतमनुसृत्याह साध्यवदन्यत्वा
दिना। स्वत्वस्याननुगतत्वेति। अननुगतत्वे संभवे तु साधनतावच्छेदकप्रसिद्ध्या प्रकृतसाधने तदनुमानं संभवतीति भावः। कृतार्थत्वादिति। वह्निसमानाधिकरण
संताभावप्रतियोगिधूमत्वग्रहे धूमे वह्निसमानाधिकरणसंताभावप्रतियोगित्वस्यापि विषयीकृतत्वेन व्यभिचारधीमुद्रायां तस्यैव विरोधित्वसंभवादित्यर्थः। व्या
प्तिविरहानुमानेनेति भावः। नन्वेवं व्यापकसामानाधिकरण्यरूपव्याप्तावुपाधिज्ञानमकिंचित्करमतस्तत्प्रतिबंधकत्वाभिप्रायेणाह साध्यव्यापको यावानित्या
दिना। साधनाव्यापकोपाधीति। तथा च व्याप्तिविरहज्ञापकत्वेनेति ग्रंथस्य धूमत्वं वह्निसमानाधिकरणसंताभावप्रतियोगितावच्छेदकं व्यापकादि [illegible]
नादिव्याप्यतावच्छेदकत्वादिसनुमानेनान्वयमिति भावः। वह्निमान्मेयत्वादित्यादि केवलान्वयिसाधने व्यभिचाराद्यनुमाने साध्याभावस्याप्रसिद्ध्या न द्वेति
त्वस्योपाधित्वासंभवादाह व्यतिरेकिणीति। अथ वह्निन प्रक्रांत व्यभिचारानुमानेऽवास्तवोपाधित्वमिति शंकानिराकरणायाह व्याप्तिविरहस्येति। अपि तत्
वाष्टनिगगनादावपि निर्दूषणं वदंतीति। ननु वह्निधूमव्यभिचारी अपारेंधनव्यभिचारित्वादित्यत्र वह्न्यभाववद्वृत्तित्वं [illegible] स्यानोपाधिः तस्याप्यव्याप

पक्षत्वात्। साध्यव्यापकत्वघटितोपाधित्वज्ञानादनुमितिप्रतिबन्धः स्यादित्यपि न धूमव्यभिचारनिरूपकायोगोलकवृत्तिधर्मस्य धूमव्यभिचारिणि वह्न्यभाववद्वृत्ति
त्वस्यासत्त्वेन साध्यव्यापकत्वायोगाद्वा ग्रहादत आह। व्यभिचारास्फुटत्वेनेति। अयोगोलकवृत्तिधर्मान्तरे धूमव्यभिचारस्फुरत्वेऽपि तुल्यसामग्रीकतया व्यभिचारः स्या
न्तदानीं चोपाध्यनुसरणमनर्थकमिति भावः। तथा च धूमाभाववद्वृत्तित्वे दृष्टान्तेनैव तत्र वह्न्यभाववद्वृत्तित्वमपि वर्त्तते इति तस्य व्यापकत्वमित्यर्थः। अस्य साधनाभाववद्वृ
त्तित्वस्योपाधेः। ननु नोपाधिमात्रोच्छेदः। अस्यैवोपाधेः सत्त्वादत आह। तेनाप्यानितेन साधनाभाववद्वृत्तित्वेन तथाविधेति। साधनाभाववद्वृत्तित्वोपाधिनाय
त्र साधने व्यभिचारोऽनुमेयस्तत्साधनाभाववद्वृत्तित्वोपाधेस्तत्र सत्त्वादार्द्रेन्धनव्यभिचारित्वं धूमव्यभिचारित्वव्यभिचारि वह्न्यभाववद्वृत्तित्वव्यभिचारित्वादि
व्यभिचारित्वे तिना तद्व्यभिचारानुमाने आर्द्रेन्धनाभाववद्वृत्तित्वस्योपाधेः सत्त्वादित्यर्थः। ननु नोपाधिमात्रोच्छेदः केवलान्वयिसाधनीयोपाधेरसम्भवादृते किं साधनेऽपि तथावि
धोपाधेरप्रतिसन्धानेऽनुपाधित्वसम्भवादत आह वस्तुत इति। व्याप्यव्यापकभावबाध्यतेति। व्याप्यव्यापकव्यभिचारिणोऽपि व्याप्यव्यभिचारित्वं व्यापकव्यभिचारनिरू
पकाधिकरणे व्याप्यसत्त्वे एव सम्भवति तथा च व्यापकाभाववति व्याप्यसत्त्वे कुतो व्याप्यव्यापकभाव इति भावः। हेतोः व्यभिचारानुमानहेतोः आर्द्रेन्धनादिव्यभि
चारित्वस्य साध्यव्याप्यत्वेन धूमादिव्यभिचारित्वरूपसाध्यव्याप्यत्वेनेसाध्याव्यापकत्वादिसत्स्य साध्यव्याप्यहेतुव्यापकत्वेऽपि स्यादिः। व्यभिचारसाधन इति गगना
दौ व्यभिचाररूपसाध्यस्यैवासत्त्वेन कथं तत्र साध्याव्यापकत्वमत आह व्याप्यत्वाभावेनात्रापि साध्याव्यापकत्वं परिहरति। साधनाव्याप्यत्वस्येति। मूले संयो
गादाविति। रूपवत्त्वं संयोगादिसत्त्वस्पर्शाद्युपाधित्वेन व्यभिचारानुमाने संयोगरूपव्यभिचारी स्पर्शव्यभिचारित्वादित्येवं रूपे संयोगाभाववद्वृत्तित्वे स्पर्शव्यभिचारित्व
रूपसाधनव्यापकता नोपाधिरित्यर्थः। दूषकतामप्युद्धरति प्रतिवादीत्यधिकरणेति। संयोगात्संयोगाभाववद्वृत्तित्वस्य सत्त्वेऽपि प्रतियोग्यधिकरणे संयोगा

राम
६२

भाववद्वृत्तित्वस्यासत्त्वात् साधनाव्यापकत्वमक्षतमिति भावः। प्रतियोगित्वस्यैकस्याभावात्मकत्वेन संयोगाधिकरणे हि संयोगाभाववद्वृत्तित्वं फलितं तत
त्र च संयोगाभावो शास्यवे पृथ्व्यादिरेवाश्रयः साधनवदन्येति। तथात्वासम्भवात्। साधनव्यापकत्वासम्भवात्। यदर्थं व्यभिचारोन्नायकत्वेन तत्संशया
धायकत्वेन चोपाधेर्दूषकत्वं यदस्यापि न दूषयतीति। एवं चेति। संदिग्धोपाधिरिति। निश्चितोपाधिना व्यभिचारनिर्णयवत्संदिग्धोपाधिना व्यभिचार
संशयोऽपि व्याप्यग्रहे हेतोस्तुल्यबलत्वाभावेन सत्प्रतिपक्षविशेषादिनिरूपणीयभावः। तत्कर्त्तव्यस्य संदिग्धोपाधिकर्त्तव्यस्य। समाजः संवलनं। तेन संदिग्धोपा
धिना। तथा च प्रतिहेतुसंवलनाधीनव्यभिचारसंशयात्कादितस्यैवोपाधिसंशयाधीनव्यभिचारसंशयात्कादितस्यापि सत्प्रतिपक्षत्वापकत्वस्याद्भुतत्वेन
तत्र संदिग्धोपाध्युपन्यासः स्यादित्यगत्वाभावादिति भावः। सत्प्रतिपक्षे व्यभिचारसंदेहस्यानावश्यकत्वे दूषकतातत्स्वरूपमतस्तदाह परस्परेति। तथा
च साधारणादनुमितिप्रतिबन्धेनैव तस्य दूषकत्वमिति। तत्र सत्प्रतिपक्षे क्वचिदुपाधिसंदेहवशात्तत्रापि व्यभिचारसंदेहो भवेदेवेत्यत आह। अवश्यमिति। उपाधि
अनय संदेहात्कथं सत्प्रतिपक्षविच्छेदः। तदाहुः उपाधीति। अन्यतरैक्ये बाध्यमिति क्रमेण अन्यतरत्वेन व्यभिचारसंदेहस्य साधारण्यस्याप्रतिबन्धकत्वेऽपि विशिष्य
व्यभिचारसंदेहोऽवश्यप्रतिबन्धक इत्याह विशिष्येति। विशिष्यतद्धेतुनावच्छेदकधर्मितावच्छेदकीकृत्य। सत्प्रतिपक्षे प्रतिहेतुघटितानुमितिप्रतिबन्धकत्व
त्र व्याप्त्यादिप्रतिबन्धद्वारा सत्प्रतिपक्षस्य दूषकत्वमिति मतमनेदमनुसृत्याह। व्यभिचारशंकेति। स्वरूपसतउपाधिसंदेहं विना साधारण्यादिधर्मज्ञानेन व्य
भिचारादौ सादिना व्याप्तिपक्षधर्मतादिरूपपरिग्रहः। तथात्वप्रसंगात्। सत्प्रतिपक्षस्य व्यभिचारशंकाधानस्यावश्यकत्वप्रसंगादित्यर्थः। नन्वेवमुपाधिर्व्यभि
चारतानं जनं नद्वारा वा दूषकत्वे तदस्फूर्तौ सत्प्रतिपक्षोन्नायकता प्रयोजकव्याप्त्यादिस्फूर्तौ तिनोऽनुमितिप्रतिबन्धो न स्यादेन मसाधारण्याविपर्य

पादीनोवस्समाणाभासत्वानुपपत्तिः सत्प्रतिपक्षोन्नयनएव तदाभासत्वात्तं बादेत आह यं पूरयति। अत्रेत्यादिना। तुल्यबलत्वे समानव्याप्तिपक्षधर्म
धर्मतात्तापकसामग्रीसमवहितव्यतिरेकप्रतियोगित्वात् नकीदिसाध्यिव्यात्। प्रतिबध्यपरामर्शाप्रामाण्यप्रसंजकत्व कीविसाचिव्यात् न कोर्दी इत्यादिना वि
शेषदर्शनादिषु विग्रहः। अधिकबलत्वे प्रतिबध्यपरामर्शाप्रामाण्यज्ञानकालीनप्रामाण्यज्ञानानास्कंदितपरामर्शविषयव्यतिरेकप्रतियोगित्वे। बाधोन्नाय
कत्वे वा। बाधस्य साध्याभाववत्पक्षादेरनुमित्सुप्रधायकतया व्याप्तिवाशेन्नायकस्य कथं तदुन्नायकत्वमत आह। व्याप्त्यादीति। आदिना पक्षधर्मतापरिग्रहः। ननु
न्नयनस्य सत्प्रतिपक्षबाधान्यतरोन्नयनस्य सत्प्रतिपक्षोन्नयने चस्वव्यतिरेके साध्याभावनिरूपितव्याप्त्यादिमत्त्वं बोधजनने। अपन्तस्तदुन्नयनासंगति
ति। इत्थं च व्यभिचारोन्नायकत्वस्यासार्वत्रिकत्वेपि मूलेतन्मात्रोपदर्शनमुपलक्षणपरमिति भावः। वस्तुतस्तु। उपाधित्वरूपविशेषसाधनाव्यापकत्वदशायां तस्य व्यभिचा
रोन्नयनोपयोगो न तु सत्प्रतिपक्षोन्नयन इति तन्मात्रमुपदर्शितमिति भावः। ननु साधारणव्यतिरेकप्रतियोगिनाप्युपाधिना व्यभिचारोन्नयनस्य निःप्रत्यूहसंभ
वात्कथं तस्याभावस्त्वमत आह। इदमिति। असाधारणविपर्ययस्याभासत्वाभिधानं। तत्रापि तदाभासत्वं न संभवतीति शंकते यद्यपीत्यादिना। अन्वयव्याप्ति
रूपत्वनिबंधो साधारण्यस्य दूषकता बीजं नात्र संभवतीत्याह। व्यतिरेकिणीति। सत्प्रतिपक्षोन्नायकतया दूषकत्वं न संभवतीत्याह। सत्प्रतियके सत्प्रतिपक्षोन्नायके इति। इहस्व स्येति
व्यतिरेके णोपाधेः सत्प्रतिपक्षोन्नायकत्वे। असाधारण्ये स्वव्यतिरेकस्यासाधारण्ये। साध्यव्यापकतायाह कप्रमाणाभ्यन्याभोसत्वेवच्छिन्नसाध्यव्यापकस्यापि प्रा
कृपाकत्वादेराभासत्वं स्यात्। सत्प्रतिपक्षोन्नयनोपयिकेति। प्रतिपक्षः साध्याभाववत्त्वेन पक्षादृतित्वे सति पक्षे धर्मावच्छिन्नसाध्यव्यापकत्वं तदुन्नयनोपयि
के। यद्यपि पक्षवृत्तावप्युपाधेस्तदस्ति तथापि तस्याभासत्वपारान्तदं तन्नोर्विरवेति भावः। उपाध्याभासान्तर्गते ऽनाभासनाप्रयोजकं रूपमाह तदयमिति। यत्र

राम

८२

यत्र पक्षमात्रसाध्यकयत्साधने। यद्दोषः व्यभिचारः सत्प्रतिपक्षो वा। सामान्यतो। निर्हितः। उदाहरणविशेषं दर्शयति। एवं येत्यादि। सामानाधिकरण्येन तन्मात्रे
णोद्देश्याप्रकृता। प्रकृतानुमित्साविरोधिनस्त्वाभासत्वमिति दर्शयति। तद्व्यतिरेकेत्यादिना। पदैकदेशे। तादृशोपाध्यभाववति एकदेशांतरे तादृशोपा
ध्यभावभ्रमो। तथा साध्यासिद्धिरुद्देश्या। तादृशो व्यापकस्य पक्षः विपर्ययस्य। एकदेशीय तिपक्षस्यापि इति पक्षैकदेशमात्रविषयकतदभाववृत्त्यापत्त्या निर्णयस्ये
त्यर्थः। तादृशासिद्धीति पक्षतावच्छेदकावच्छेदेनासिद्धीत्यर्थः। अप्रसिद्धसाध्यविपर्ययस्याभासत्वमुपलिप्तं तत्राप्रसिद्धपदस्यासदर्थकत्वे असतानार्थकत्वे दूषणं दर्श
यति साध्यविपर्ययस्येत्यादिना। साध्यविपर्ययस्यासत्त्वं साध्यव्यतिरेकाप्रतियोगित्वं अनुपाधित्वेप्रयोजकमिति भावः। साध्यव्यतिरेकाप्रतियोगित्वनिश्चये साध्य
व्यतिरेकसिद्धेरसंभवादिति भावः। तस्या साध्यविपर्ययस्यासिद्धिसंभवादिति। अप्रसिद्धसाध्यव्यतिरेकि सिद्धसंभवादिति भावः। पूर्वसाध्यव्यतिरेकत्वेनासत्त्वे
नंत्रनिनिवर्त्तकं विशेषनिषेधबलात् प्रसक्तं शेषाभ्यनुज्ञामपि निषेधति पूर्वेत्यादिना। क्रमेणदूषणमाह वह्निनेति। उपाधित्वनियमेन्यं धूमवान् वह्नेरित्यत्रनार्द्रधू
मवान्नार्द्रेन्धनाभावादित्यत्र वस्तुगत्यावस्योपाधित्वप्रसंगात्। अनुपाधित्वनियमे। धूमाभाववान्नार्द्रेन्धनाभावादित्यस्य प्रतिहेतौ धूमवान्वह्नेरित्यत्रार्द्रेन्धनाभावाभा
वात्मकपूर्वसाधनव्यतिरेकस्यार्द्रेन्धनस्यानुपाधित्वप्रसंगादित्यर्थः। उपाधिताया इति प्रसंगादिति। अभिनेणान्वयः। सत्प्रतिपक्षमात्रमिति। व्यतिरेकिणः पूर्व
हेतोरिति विशेषः। तत्संभवात् पूर्वसाधनव्यतिरेकिणः पूर्वहेतोरिति विशेषः। तत्संभवात् पूर्वसाधनव्यतिरेकस्योपाधित्वसंभवात्। ननु धूमवान्वह्नेरित्यत्र स्थापना
यां नधूमवानार्द्रेन्धनाभावादित्यत्र प्रतिस्थापनायां पूर्वसाधनवह्न्यभावे नोपाधिरपोगोलकेधूमाभाववति वह्न्यभावस्यासत्त्वेन साध्याव्यापकत्वादत आह।
अप्राणास्तत्वपीति। उत्क्रमेण साध्याव्यापकत्वं यहेस्थापने हेतोर्व्यभिचारस्य हरावस्थात् धूमवति वह्न्यभावाभावस्य वह्नेर्ग्रहादुक्तरूपादिशेषाग्रहदशायामेव प्रति

गादाधरी॥

पक्षोपन्यासानन्तरं नीलसाध्याव्यापकत्वग्रहादित्यर्थः। वस्तुतो वह्निकरणस्य तदानीं स्थापनाहेतोर्व्यभिचाराग्रहकाले। तत्त्वेन साध्याव्यापकत्वेन। यद्यपि धू
माभाववति वह्निरिति साकारकं यत्र ज्ञानं न जातं व्यक्त्याभावाभाववद् इति साकारकं यज्ञातं तत्रैव स्थापनाहेतोर्व्यभिचाराग्रहात् साध्याव्यापकत्वग्रहाभावाच्च सत्प्रतिप
क्षत्वमेव न यापि विचारकस्य धूमाभाववति वह्न्यभावाभाववद् इति ज्ञानकाले वह्नित्वेनापि ज्ञानसंभवात् तादृशाभिलापविचारकस्य सत्प्रतिपक्षोद्भेदो बोध्यः। उपन्या
सासंभवादिति। पूर्वसाधनव्यतिरेकस्येत्यनुवर्तते। तेः सत्प्रतिपक्षमात्रोच्छेदाधिकृतिनिया। बलावत्तुरेति। प्रतिस्थापनाहेतुव्याप्तिग्राहकानुकूलतर्कादिबलवत्त
रत्वमित्यर्थः। बलवत्तरेत्यादिना उक्तायाः इत्येककथकसमयस्यैवाकारइति कथकसमयेति। इत्याकारकं कथकसमये त्यर्थः। विशादेवेति। न त्वाभासत्वादित्येवकारार्थः। इत्य
प्रसौ पूर्वसाधनव्यतिरेकः। ननु हिंसादिकं सकर्तृकं कार्यत्वादित्यत्र स्थापनायामनित्यत्वस्य प्रागभाववृत्तेः कार्यत्वाव्याप्यत्वेनानित्यत्वं पूर्वसाधनव्याप्यव्यतिरेको
न भवति। एवं हिंसादिकं न सकर्तृकं शरीराजन्यत्वाद्व्योमवदित्यादौ हिंसादिव्योमान्यतरत्वावच्छिन्नसाध्यव्यापकं नित्यत्वं सदुपाधिरेवेति कथमाभासत्वमि
त्यत आह कादाचित्कत्वेनेति। तथा च हिंसादिकं सकर्तृकं कादाचित्कत्वादित्यत्रानित्यत्वं कादाचित्कत्वव्याप्यं तद्व्यतिरेकश्च नित्यत्वमिति न पूर्वदोषः। हिंसादि
कं न कर्तृकजन्यत्वादित्यत्र प्रतिहेतोर्हिंसादिव्योमान्यतरत्वावच्छिन्नसाध्यव्यापकं नित्यत्वं यथा न तथा तदवच्छिन्नाजन्यत्वरूपसाधनव्यापकत्वमपीति
न सदुपाधित्वमिति नाद्यतोयोपि दोष इति॥ उपाधिवादः समाप्तः।

प्रतियोग्यसमानाधिकरणत्वविशेषणविरहे हेत्वे वपाठः॥ तत्रापि अनुमितिहेतुज्ञानाविषयेऽप्यन्योन्याभावघटितव्याप्तावपि। अपि नाऽ
तादृशघटितव्याप्तिसमुच्चयः॥ तत्प्रतियोग्यसामानाधिकरण्यं। एवं प्रतियोग्यसामानाधिकरण्यस्यानुमितिहेतुज्ञानविषयतानैयत्ये। प्रतियोगि
सामानाधिकरण्यादीतिपाठः॥ प्रतियोग्यसामानाधिकरण्यादीत्यपपाठः। न च तत्रादिना साध्यतावच्छेदकसंबंधावच्छिन्नत्वसमुच्चयः॥ समवायाव
च्छिन्नवह्न्याद्यभावमादायासंभवितया तद्विशेषणस्यावश्यकत्वादिति। उपाध्यायमतेनिरस्यति नत्वेति। नत्वेवं प्रतियोगिसामानाधिकरण्यग्रहस्य
विशेष्यतयाभावावच्छिन्ना यावन्तस्तादृशाभावास्तत्प्रतियोगितावच्छेदकत्वग्रहः तत्पुरुषीयानुमितौ हेतुरित्यर्थः। तादृशाभावः। हेतुसमानाधिकरण
प्रतियोगिसमानाधिकरणत्वेनाज्ञायमानाभावप्रतियोगितावच्छेदकत्वाभावः। तदसंभवादिति। नीलघटत्वेन ज्ञाने घटत्वे न पीतघटज्ञानासंभ
ववत्प्रतियोगिसमानाधिकरणतादृशाभावप्रतियोगितावच्छेदकत्वग्रहे प्रतियोगिसमानाधिकरणत्वेनाज्ञायमानाभावप्रतियोगितावच्छेदकत्वा
नां तादृशाभावप्रतियोगितावच्छेदकत्वेनाभावज्ञानासंभववदित्यर्थः॥ प्रातिस्विकरूपेण तत्तदभावप्रतियोगितावच्छेदकत्वग्रहेनाकृतांतरेण।
येनकेनचिद्रूपेण। तथा च कपिसंयोगी एतद्वृक्षत्वादित्यत्र प्रतियोगिव्यधिकरणतादृशाभावप्रतियोगितावच्छेदकत्वेन तदभावज्ञानं हेतुः संभवत्ये
वेति भावः। इष्टापत्तिवारणाय वह्नित्वावच्छिन्नप्रतियोगिताकेत्यादि भ्रमेपीत्यंतं। उक्तभ्रमकाले तादृशावच्छेदकत्वसामान्याभावस्य दुर्ग्रहत्वात् वह्नि
त्वानवच्छिन्नेत्यादि। धूमसमानाधिकरणेति विशेषणविशेष्यभावापन्नतादृशपदार्थतानरूपार्थमुक्तं। नन्वेवेति। तर्हि एवं वह्न्यभावस्यापि हेतुसमा

नाधिकरणत्वेन ज्ञायमानत्वात् वह्नित्वानवच्छिन्नप्रतियोगिताकत्वेन तदपरिग्रहात् प्रतियोगितावच्छेदकताभावाज्ज्ञानादेव नानुमितिरिति
भावः। वह्नित्वे इति। तथा च वह्न्यभावस्य धूमसमानाधिकरणत्वेनाज्ञानात् वह्नित्वानवच्छिन्नप्रतियोगिताकत्वेन तादृशानिरुक्ताभावपरिग्रहसं
भवत्येवेति भावः। उक्तरूपेण वह्नित्वानवच्छिन्नप्रतियोगिताकधूमसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वेन। ननु यदा धूमसमानाधिकर
णतासम्भावनेव वह्नित्वावच्छिन्नप्रतियोगिताकत्वभ्रमः तदा ह्रदादिवृत्तिवह्न्यभावस्यापि भ्रमे बाधकाभावात् उक्तरूपेण तादृशाभावपरिग्रह इत्यतो दो
षान्तरमाह। धूमाधिकरणान्तरेति। अधिकरणान्तरोपस्थितौ तद्वृत्त्यभावस्यापि हेतुसमानाधिकरणत्वेन ज्ञायमानत्वसंभवादे तदधिकरणवृत्त्यभाव
त्वेन तत्परिग्रहसम्भव इतीदमुक्तं। इत्थं चाधिकरणान्तरस्याभाववनिष्ठवृत्तित्वनिरूपकतयाऽनुपस्थिताविति अर्थः। अधिकरणान्तरवृत्त्यभावस्य हेतुसमाना
।नाधिकरणत्वेन अनुपस्थितावित्युक्ते बाधः। एकस्यैव घटात्यन्ताभावस्याधिकरणान्तरवृत्तेरस्मिन्नधिकरणे धूमसमानाधिकरणत्वेनाज्ञानादित्यस्याभि
धानं। अनुमितेरानुभविकत्वाभावदर्शनाय तादृशाभावादाविति। तादृशप्रमोत्पादेपि। धूमसमानाधिकरणवृत्त्यभावप्रतियोगितानवच्छेदकत्वप्रमोत्पाद
पि। तथा च धूमाधिकरणे तन्महानसनिष्ठाभावप्रतियोगितानवच्छेदकवह्नित्वावच्छिन्नं धूमसमानाधिकरणं वा न्यवर्तत इति स्मरणात्मकात्परामर्शादनुमित्यापत्तिरित्य
र्थः। एतेन तदधिकरणोपदर्शितासत्त्वेऽनुमिताविशिष्टापत्तिरधिकरणान्तरे वानुमित्यापादने पक्षधर्मताज्ञानार्थं तदुपस्थित्यावश्यकत्वेऽधिकरणान्तरानुपस्थिताविति
विरुद्धं। सामान्यलक्षणयाधिकरणान्तरवृत्त्यभावस्यापि धूमसमानाधिकरणत्वेनोपस्थितिसंभवात् तद्विरुद्धमिति दूषणमनवकाशं। ननु पर्वतादौ वह्निसंदे
हाभावदशायां महानस एवानुमित्यापत्तिः। संदेहदशायां हेत्वधिकरणत्वेन ज्ञायमानधर्मिवृत्तित्वेन वह्न्यभावस्याप्युपस्थितत्वात् प्रतियोगितानवच्छे राम
१

दकत्वाग्रहादेव नानुमितिरत आह एवमिति। धूमवति वह्निर्नास्तीति भ्रमदशायामपि वह्न्यभावस्य शुक्तप्रतियोगिकत्वेन इतरेषां तु वह्नित्वानवच्छिन्नप्रतियोगिता
कत्वेन परिग्रहे धूमसमानाधिकरणत्वेन ज्ञायमानानां यावतामभावानामुक्तरूपेण प्रतियोगितानवच्छेदकत्वं वह्नित्वे सुग्रहमिति। व्यभिचारज्ञानदशायामपि अनु
मित्यापत्तिरित्यर्थः। वह्निशुक्तं इति ज्ञानदशायां शुक्तप्रतियोगिकत्वे वह्न्यभावस्यापि ज्ञानसंभवात् तेन रूपेण प्रतियोगितानवच्छेदकत्वं वह्नित्वे दुर्ग्रहमतो वह्नि
त्वावच्छेदेनेति। यत्किंचिद्वह्नौ शुक्तत्वज्ञानसत्त्वेपि तथैव दोषः इत्यतोऽवच्छेदकानुसरणं वह्नौ शुक्तत्वाज्ञानदशायामपि वह्नित्वं शुक्तप्रतियोगिकाभावप्रतियोगि
तावच्छेदकं न वेति संशयसंभवात् तस्मिंश्च तादृशानवच्छेदकत्वनिर्णयासंभवात् सामग्रीविघटनाय शुक्तत्वाभावभ्रमपर्यन्तानुधावनं। अग्रहेपि वह्नेरनुमानाद्य
त्यन्वयः। तादृशावच्छेदकत्वानां विशिष्टाभावघटितावच्छिन्नाभावज्ञानमादायानुमित्यापत्तिर्नोक्ता प्रतियोगितावच्छेदकत्वे त्वातिरिक्तानवच्छेद्यप्रतियोगिताकतादृशा
वच्छेदकत्वाभावज्ञानहेतुत्वोक्तौ न त्वपरिहारसंभवात्। विशिष्टाभावस्थले च विशिष्टत्वादेरेव तादृशावच्छेदकत्वादिति। तेषां उपदर्शितद्विविधाभावानां। ननु विषयानु
गमय्य तद्विषयकज्ञानत्वेन हेतुत्वोक्तौ प्रमेयत्वेन तज्ज्ञानमादायातिप्रसंग इत्यतो ज्ञानमिवानुगमयति तद्बुद्धीनां वेति। ननु यदि तादृशावच्छेदकत्वग्रहत्वावच्छिन्नं प्रति
विरोधित्वमुच्यते तदा हेतुसमानाधिकरणाभावप्रतियोगितानवच्छेदकत्वबुद्धेरसंग्रहः प्रतियोग्यसमानाधिकरणत्वघटिततादृशग्रहत्वस्य तत्प्रतिबध्यतानवच्छेद
कत्वात्। अथ यत्किंचिद्रूपावच्छिन्नतादृशग्रहप्रतिविरोधित्वं तदा वह्नित्वं तादृशावच्छेदकं घटवदिति समूहालम्बनविरोधि निघटाभाववद्वह्नित्वमिति ज्ञानेतिप्रसं
ग इति चेन्मैवं। वह्नित्वविशेष्यकतादृशावच्छेदकत्वप्रकारकग्रहत्वधर्मावच्छिन्नविषयतावच्छिन्नप्रतिबध्यतानिरूपितविरोधित्वस्योक्तत्वात्। भवति हि प्रतियोग्यसमा
नाधिकरणहेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वप्रकारकवह्नित्वविशेष्यकग्रहत्वं घटकं हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वप्रकारक

वह्नित्वविशेष्यकग्रहत्वेन घटप्रकारकवह्नित्वविशेष्यकत्वमिति नोक्तदोषः। द्रव्यं नास्तीति ज्ञानेपि नीलघटवदिति ज्ञानोदयादाह। सामान्यघटितेति। सामान्यघ
टितया विशेषवत्तानवच्छिद्विरित्यर्थः। सामान्यघटितत्वं च प्रतियोगितया। तेन द्रव्यं नास्तीति ज्ञानेपि द्रव्यवृत्तित्वविशिष्टघटोस्तीति बोधेनानुपपत्तिः न देवानुभवेन ह
ष्टयत्ति। ससाहीति। नीलो घटोस्तीति ज्ञाने नीलो नास्ति घटो नास्ति नीलो घटो नास्तीति त्रितयमपि ग्राह्याभावावगाहितया विरोधीति भावः। पृच्छति तत्केत्यति। पू
नरपीति। तद्विशिष्टेति। प्रतियोगितावच्छेदकताघटकसंबंधेन तद्विशिष्टत्वप्रत्यायपितुं प्रतियोगीति। अत एव तादृशग्रहविरोधित्वे न हेतुत्वादेवान्योन्येति। ना
चैवमवच्छेदकत्वाभावव्याप्यधर्मस्याप्युपसंग्रह इति वाच्यं। तादृशावच्छेदकत्वप्रकारकग्रहत्वघटकीभूतविषयितानिरूपकधर्मावच्छिन्नप्रतियोगिताकत्वसंबंधे
न यत्किंचित्प्रकारतानिरूपिताभावप्रकारतानिरूपितसाध्यतावच्छेदकनिष्ठविशेष्यताशालिग्रहत्वेन प्रतिबंधकत्वस्य विवक्षणात्। न वैतिर्हि तादृशविषयितानि
तादृशा° रूपको धर्मस्तादृशावच्छेदकत्वं अवच्छेदकत्वं चेति न वह्निन्नान्योन्याभावसंग्रहः। व्याप्यदर्शनस्थले वा तादृशाभावप्रकारतानिरूपितान साध्यतावच्छेद
कनिष्ठविशेष्यता किंतु तद्व्याप्यप्रकारतानिरूपितेति नातिप्रसंगः। ननु साध्यतावच्छेदकनिष्ठविशेष्यतानिरूपितयदभावप्रकारकत्वं प्रतियोगितान्यसंबंधेन य
त्किंचित्प्रकारेण न वह्निन्नतदवच्छिन्नप्रतिबंधकत्वविवक्षणात् तदभावव्याप्यनिरासः। अत्र हि प्रतियोगितान्यसंबंधेन व्याप्तिप्रकारकत्वावच्छिन्नस्यैव प्रकारकत्वस्य सा
ध्यतावच्छेदकनिष्ठविशेष्यतानिरूपितस्य प्रतिबंधकतावच्छेदकत्वादिति। तदसत्। तादृशावच्छेदकत्वव्यापकाभाववद्वह्नित्वमिति ग्रहानिप्रसंगादिति। ननु
प्रतियोग्यसमानाधिकरणहेतुसमानाधिकरणाभावप्रतियोगितानवच्छेदकवह्नित्वेन साध्यतायां तादृशसाध्यतावच्छेदकविशेष्यकप्रतियोग्यसमानाधिक
रणधूमसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वाभावप्रसिद्ध्या कथं तद्विरोधित्वेन तादृशज्ञानद्वयानुगम इत्यत आह। हेत्वाभासेति। तादृशस्याऽपाहार्यज्ञानस्य राम

२

नव भावप्रतियोगिता
तद्विषयविषयकग्रहविरोधित्वेनानुगम इति भावः। वह्नित्वं तादृशावच्छेदकमिति ज्ञानं तद्विषयविषयकं तद्विरोधि च वह्नित्वं तादृशाभावप्रतियोगितानव
२ प्रतियोगिता च्छेदकमित्यपि ज्ञानं भवति। निनतोपि तादृशानवच्छेदकवह्नित्वावच्छिन्नवानित्यनुमित्यापत्तिरिति वाच्यं। तादृशसाध्यतावच्छेदकविशेष्यकं यद्विरोधित्वानंत
त्वेन हेतुत्वस्य विवक्षणात्॥ नन्वेवं वह्नित्वमभावप्रतियोगितावच्छेदकमित्यादिग्रहस्यापि तादृशग्रहविरोधित्वात् नानुमितिः स्यादित्यत आह। यद्वेति॥
आदिनासमानाधिकरणाभावप्रतियोगितावच्छेदकत्वसंग्रहः। वस्तुतस्तादृशग्रहादनुमितिर्भवत्येव। अत एव केवलान्वयिसंबंधज्ञानादनुमितिरेकदेशिनां सं
मतेत्याशयेन यद्वेत्युक्तं। तादृशावच्छेदकत्वेति। समानाधिकरणाभावप्रतियोगितावच्छेदकत्वग्रहविरोधित्वमित्यर्थः॥ तेनाभावप्रतियोगितावच्छेदकत्ववृत्तिमद
भावप्रतियोगितावच्छेदकत्वादीनामपि ग्रहस्य निरासः। नचैवं वह्नित्वमभावप्रतियोगितावच्छेदकं धूमसमानाधिकरणाभावप्रतियोगितानवच्छेदकं चेति समूहाल
बनात्मकग्रहस्यासंग्रह इति वाच्यं। समानाधिकरणाभावप्रतियोगितावच्छेदकत्वग्रहविरोधितानवच्छेदकं सत् यत्प्रतियोग्यसमानाधिकरणतादृशाभावप्रति
योगितावच्छेदकत्वग्रहविरोधितावच्छेदकं तदवच्छिन्नत्वस्योक्तसमूहालंबने साधारण्यात्। नचैवमपि वह्नित्वं धूमसमानाधिकरणाभावप्रतियोगितावच्छेदकं
वह्निसमानाधिकरणधूमवानिति ज्ञानादप्यनुमितिः स्यादिति वाच्यं। तादृशविरोधितावच्छेदकीभूतायाः वह्नित्वस्य विषयतातन्निरूपिता या वह्नेर्विषयता तन्निरूपिता या सा
मानाधिकरण्यविषयता तन्निरूपितं यत्पदं तेन हेतुमत्तावगाहित्वेन रूपेण हेतुत्वस्योक्तत्वात्। समूहालंबनेतु तादृशानवच्छेदकवह्नित्वविषयतानिरूपितान वह्नेः सामानाधि
प्रतियोगितया करण्ये विषयतेति नातिप्रसंगः। सुतरामिति। अन्योन्याभावस्याप्यवृत्तित्वेतत्कारणीभूतज्ञानानुगमाय तद्विषयतावच्छेदके एव विशेषणे। ननु व्याप्तिलक्षणेऽव्यावर्तकत्वात्।

अव्याप्यवृत्तित्वे तु अव्याप्तिवारणाय लक्षणेपि तद्विशेषणमिति भावः। न चापि। तादृशान्योन्याभावविशेषणं तत्र प्रवेशोपि। प्रतियोग्यवृत्तित्वस्यैवेति। अत्यंताभावे तु प्रतियोगिता
वच्छेदकावच्छिन्नानधिकरणवृत्तित्वं विशेषणमिति। तत्रावच्छेदकांशस्याधिकरणांशस्य प्रवेशाद्गौरवमिति भावः॥ लाघवोत्तरमाह न चेति साध्यवत्ःसंबंधान्तरेण हेतुमन्नि
ष्ठान्योन्याभावप्रतियोगित्वाभावादन्योन्याभावस्य तादात्म्यातिरिक्तसंबंधावच्छिन्नप्रतियोगिताकत्वाभावादिति भावः॥ न च समवायेन वह्निमद्भेदस्य धूमसमानाधिकरणत्वा
त्साध्यतावच्छेदकसंबंधेन प्रतियोगितावच्छेदकत्वस्याभाववदिवृत्तावश्यकत्वे कथमेतदिति वाच्यं। तथापि विषयितादिना वह्नित्वस्यापि तादृशात्यंताभावप्रतियोगितावच्छेदकतया साध्यता
वच्छेदकताघटकसंबंधेन तादृशावच्छेदकत्वस्याभाववदिवृत्तावश्यकत्वेन साध्यतावच्छेदकसंबंधावच्छिन्नत्वस्यापि प्रतियोगितायां निवेशेन गौरवादिति। यथाश्रुतेति। अत्यंताभा
वगर्भायामपि निष्कृष्टायां विशेषणताविशेषादिगर्भायां प्रतियोग्यधिकरणत्वादेरनिवेशात्कुतो लाघवमिति। अपरे त्वित्यारभ्य वदंतीत्यंतमेकं मतं। प्रानुभविकत्वादि। तथा च प्रा
मात्मिकगौरवं न दोषायेति भावः। इंद्रियेति। अव्यवहितोत्तरत्वघटितं तद्व्यक्तित्वमेव वा कार्यतावच्छेदकमिति भावः। यत्तु यद्रूपावच्छिन्नेति पाठः अग्रे च विरोधित्वेनेत्यनंतरं वाक्या
रमन्यपाठः। यद्रूपेति। साध्यतावच्छेदकं तदवच्छिन्नसाध्यवत्त्वं च। तेन साध्यतावच्छेदकावच्छिन्नात्यंताभावतादृशसाध्यवदन्योन्याभावयोरुपसंग्रहः। व्याप्तिवुद्धेः। अत्यंतान्योन्या
भावघटितव्याप्तिवुद्धयः। साध्येति। साध्यपदं तदोर्थासंख्यमन्वयः। तद्ग्रहस्य। तादृशसामानाधिकरण्यावगाहिग्रहस्य। कथंचिदिति। अत्यंताभावे अन्योन्याभावे च साध्यस
साध्यवतः तादृशप्रतियोगितासंबंधेनारोपे योग्यत्वः। व्यतिरेकिणि। तादृशसाध्याभावसामानाधिकरण्यावगाहिज्ञानं प्रमारूपमपि प्रसिद्धमस्त्येव। प्रकृतहेतौ परं तद्भ्रमः। केवला
न्वयिनि तु तादृशसामानाधिकरण्यावगाहिज्ञानं प्रमारूपमपि संभवतीतीदमुक्तमिति भावः। नह्वि समिति। चिंतामणौ च यत्वतत्त्वयोरननुगमान्नोक्तरूपेणोऽनयानुगमः। एवं
साध्यभेदस्याध्यवदत्यंताभावासामानाधिकरण्यग्रहेतिप्रसंगः। न च साध्यवत्त्वग्रहविरोधिग्रहविषयतावच्छेदकरूपेणात्सामानाधिकरण्यावगाहिमज्ज्ञानं तद्विरोधित्वं वं
कचप्रागुक्तरीत्या च व्याप्यादिव्यावृत्तविरोधित्वादिकं च निर्वचनीयमिति वाच्यं। एवमपि हेतुसमानाधिकरणात्यंताभावप्रतियोगितानवच्छेदकत्वादिग्रहस्याभिन्नप्रकारकतया सा राम

३

ध्यात्यंताभाववद्वृत्तित्वादिग्रहं प्रति विरोधित्वासंभवान्नोक्तानुगमः सम्यगिति। अत एव विषयानुगमपूर्वकं ज्ञानानुगमं परित्यज्य तादृशव्यभिचारज्ञानमेवानुग
मय्य व्याप्तिज्ञानमनुगमयति। साध्यतावच्छेदक इत्यादिना योग्रह इति। न चावता तादृशसमूहालंबनरूपग्रहविरोधित्वेनानुगम इति भावः। अत्यंताभावघटितानाम
अ साध्यात्यंताभाववदवृत्तित्वस्यैव अन्योन्याभावघटितानां मध्ये च साध्यवदन्यावृत्तित्वज्ञानस्यैव लाघवाद्धेतुत्वमिति केवलान्वयिदेशेनेत्थं पंचस्वमाणमतमनुसृत्य सा
हसाध्याभाववद्वृत्तित्वेति। केवलान्वयिनि साध्याभावाप्रसिद्ध्या कथं तद्ग्रह इत्यत आह प्रसिद्धिरिति। पूर्ववत्। एवं शाः प्रसिद्ध्या। ननु धूमव्यापकवह्निमान्धूमादित्यत्र सा
ध्यतावच्छेदके तादृशग्रहाप्रसिद्धेः कथमनुगम इत्यत आह। अधिकमिति। प्रागेव व्याख्यानं वैतत्। नन्वेवं व्याख्याने अन्योन्याभावगर्भैवेति ग्रंथासंगतिरित्यत आह ग्रंथस्त्वि
ति। उपलक्षणपरो अञ्जहत्स्वार्थलक्षणया। अन्योन्याभावगर्भात्यंताभावगर्भव्याप्तिप्रतिपादकः। उपलक्षणपरत्वे बीजं दर्शयति। पद्यंतीति। विशेषनिषेधस्य विशेषाभ्यनु
ज्ञाफलकत्वादिति भावः॥ वदंतीत्यस्वरसः। तद्बीजं तु अत्यंतान्योन्याभावघटितव्याप्तिज्ञानादनुमितिर्न तु भाविका येनेंद्रियसंनिकर्षादिवत् विशिष्य कार्यकारणभावः
कल्प्यते। अनुभवस्य संदेहे तु साध्याभाववदवृत्तित्वज्ञानस्यैवातिलघुनो हेतुत्वं कल्प्यतामुचितं समूहालंबनात्मकव्यभिचारधीविरोधित्वेन हेतुत्वकल्पनेऽपि घटविषयता
दृशसमूहालंबनग्रहविरोधी घटाभावग्रहोऽपीति तस्यापि हेतुत्वापत्तिः। न च तावन्मात्रविषयकसमूहालंबनं धर्तव्यं। तथाप्यभावो न हेतुसमानाधिकरण इत्यादिग्रहस्या
पि साध्यतावच्छेदकादौ तादृशप्रतियोगितावच्छेदकावच्छिन्नसाध्यवत्त्वं च यत्तादृशात्यंताभावावच्छेदकत्वादिग्रहविरोधित्वात्तस्यापि हेतुत्वप्रसंगः। तादृशग्रहत्वावच्छिन्न
विरोधित्वस्य निवेशे पुनरसिद्धिः। न च साध्यतावच्छेदके साध्यतेऽन्योन्याभावप्रतियोगितावच्छेदकतावगाहित्वं तदन्यतरावच्छिन्नप्रतिबंध्यतानिरूपितप्रतिबंधकता

शालित्वेनानुगमेनोक्तदोषइतिवाच्यं।तथासतिसमूहालंबनपर्यंतानुधावनवैयर्थ्यात्।लाघवान्मादृशाव्याप्तिज्ञानद्वयान्यतरत्वादिनैवहेतुत्वकल्पनस्योचितत्वात्।न
चतदपि।अन्यतरत्वघटकभेदयोःपरस्परंविशेषणविशेष्यभावेविनिगमनाविरहेणगौरवेणचतादृशान्यतरत्वघटकप्रातिस्विकरूपेणैवलाघवात्प्रथमोपस्थितत्वाच्चहे
तुत्वकल्पनस्योचितत्वात्।विभिन्नलिंगकसंबंधव्याप्तिज्ञानजन्यानुमितित्वानुरोधेनकार्यतावच्छेदककोटौतस्यसर्वसंमतत्वादिति।नन्वेवमुपाधिरसिद्धउपजीव्यत्वेनेत्या
दिमूलग्रंथस्यसमाधानग्रंथमध्यत्वेवतात्पर्यार्थमाह।व्यभिचाराज्ञानस्येत्यादिना।साक्षात्।किंतुउन्नयनमद्वारीकृत्य।विरोध्यविषयत्वात्।ग्राह्याभावानवगा[illegible]विष
यकत्वादित्यर्थः।ननुव्यभिचाराद्युन्नयनद्वाराविरोधित्वेपिहेत्वाभासत्वंकुतोनइत्यतआह।वस्तुतश्चेति।साक्षाद्ग्राह्याभावानवगाहित्वाद्व्याप्त्यन्तरावगाहितया।तेनासिद्धसाधनव्यु
दासः।नचानौपाधिकत्वज्ञानंव्याप्तिधीहेतुरितिमूलस्यविवक्षितार्थवर्णनंयथाश्रुतार्थमनुवदति।निरुपाधित्वज्ञानेत्विति।तथात्वेपि।निरुपाधित्वज्ञानस्यव्याप्तिधीहेतुत्वे
पि।उपाधेरिति।अनुमितिंप्रतिकारणज्ञानस्यवासाक्षादविरोधित्वादितिभावः।इदंपुनरित्यादि।इदंकिंतत्राह।यदिति।वक्ष्यमाणवाक्यार्थपरामर्शकं।वक्ष्यमाणंयत्तदवधे
यमित्यन्वयः।तदेवाह।अन्योन्याभावस्येत्यादिना।नञ्घटितलक्षणस्य।अन्योन्याभावघटितलक्षणस्य।अतिव्याप्तिरिति।संयोगीसत्त्वादित्यादौसंयोगिभेदस्यप्रागुक्तरीत्यानु
लावच्छेदेनापिसंयोगिरूपप्रतियोग्यवृत्तित्वात्तादृशघटादिभेदप्रतियोगितानवच्छेदकंसंयोगवत्त्वंइतिव्याप्तिरित्यर्थः।प्रतियोगिभिन्नंयद्धेत्वधिकरणंतद्वृत्त्यन्योन्याभावेत्या
द्युक्तौचसंयोगीद्रव्यत्वादित्यत्राव्याप्तिः।तत्रहेत्वधिकरणस्यद्रव्यस्यसंयोगिरूपप्रतियोगिभिन्नत्वात्।नचगुरुधर्मावच्छिन्नसाध्यकेव्यभिचारिणि।प्रतिप्रसंगवारणा
यप्रतियोग्यवृत्तिहेतुसमानाधिकरणान्योन्याभावप्रतियोगितावच्छेदकंयद्धर्मविशिष्टसंबंधिनिष्ठान्योन्याभावप्रतियोगितानवच्छेदकंतद्धर्मभिन्नंयत्साध्यतावच्छेदकं राम

४

मित्येतावन्मात्रमेवतस्यावश्यंविवक्षणीयत्वेतथाविधद्रव्यभेदमादायैवसंयोगीसत्त्वादित्यत्रनातिव्याप्तिरितिवाच्यं।अवच्छेदकत्वंयदिसाध्यतावच्छेदकसंबंधेन(नैर)संयोगेनसाध्य
तायामव्याप्तिःप्रतियोग्यवृत्तेरन्योन्याभावस्यसंयोगेनप्रतियोगितावच्छेदकस्याप्रसिद्धेःप्रतियोग्यवृत्तिपदवैयर्थ्यंच।अथैकसंबंधेनविशेषणताविशेषणतावानदासुनरो
प्रतियोग्यवृत्तिपदवैयर्थ्यमिति।तस्माल्लघुगुरुसाधारणस्वरूपसंबंधरूपमवच्छेदकत्वमादृत्यवायंविचारइति।व्याप्यवृत्तीति।तत्रप्रतियोग्यवृत्तित्वादेरप्रवेशादितिभावः
स्वव्यापकेति।स्वंहेतुः।तद्व्यापकंयत्साध्यंतत्सामानाधिकरण्यमित्यर्थः।अन्योन्याभावघटितव्यापकत्वंऽत्रनिर्वाच्यंप्रतियोगितावच्छेदकसंबंधाप्रवेशेनलाघवादि
तिभावः।स्वव्यापकतावच्छेदकेति।स्वं।साध्यं।संयोगीसत्त्वादित्यत्रसंयोगव्यापकतावच्छेदकद्रव्यत्वत्वावच्छिन्नाभावेनसमंसत्तायाःसामानाधिकरण्यान्नातिव्याप्तिरितिभा
वः।ननुस्वसमानाधिकरणान्योन्याभावप्रतियोगितावच्छेदकतानवच्छेदकरूपावच्छिन्नात्यंताभावेनसममसामानाधिकरण्यमित्यपेक्ष्यस्वसमानाधिकरणान्योन्या
भावप्रतियोगितानवच्छेदकरूपावच्छिन्नप्रतियोगिकान्योन्याभावेनसममसामानाधिकरण्यमित्यनलघीयोवाह।तादृशरूपविशिष्टावच्छिन्नेति।तादृशं।स्वव्यापक
तावच्छेदकं।इदंतुवक्तव्यकथनंनतुलक्षणेऽनेनरूपेणप्रवेशः।लक्षणंतूक्तमेवधर्मीत्यभिनिधेयं।अन्योन्याभावस्यदैशिकमव्याप्यवृत्तित्वमनभ्युपगच्छतांपाकरक्तेऽदा
नीमयंनश्यामइतिधीबलात्कालिकमव्याप्यवृत्तित्वमभ्युपगच्छतांमणिकारादीनांमतेसंयोगाभाववत्साध्यकेस्वव्यापकसाध्यसामानाधिकरण्यरूपलक्षणम[illegible]न
मतस्तदुपेक्ष्यान्यत्राव्याप्तिमाह।स्मृतीत्यादि।इदंस्मृतिविषयःसंस्कारविषयोवाच्यत्वादित्यादावित्यर्थः।तत्रस्मृतेरुद्बोधकाधीनत्वेनसंस्कारविशेषस्याप्युपेक्षणीय
विषमेऽसत्त्वेनसार्वत्रिकत्वानियमात्।जन्यज्ञानेति।नित्यज्ञानविषयतायाःसर्वदैवसत्त्वाज्जन्येति।तस्यचप्रलयकालावच्छेदेनव्योमादावभावस्यसत्त्वात्प्रतियो
गिवैयधिकरण्याघटितंनस्वव्यापकत्वं।नव्यापकत्वापरिचायकेवलान्वय्यन्तरस्याभावाप्रसिद्ध्याचोक्तलक्षणमपितत्राव्याप्तमितिभावः।नचतद्व्यापकस्याकाशाभावस्येति

वेऽप्याकाशो हेतुसामानाधिकरण्याभावसत्त्वान्नाव्याप्तिरिति वाच्यं। अप्रकाशाभावस्य केवलान्वयित्वेन तदभावासंभवस्य स्वयं वक्ष्यमाणत्वादिति। सर्वसाधार
णोऽलक्षणेन तं समाशंकते। अथेति। स्वं हेतुः। धूमवान् वह्नेरित्यादौ धूमवद्भेदस्यापि वह्न्यधिकरणवृत्तिधर्मावच्छिन्नप्रतियोगिताकत्वादतिव्याप्तिरतो यत्किंचिदिति। स्वाधि
करणीभूतयत्किंचिद्व्यक्तिवृत्तिधर्मावच्छिन्नेत्यपपाठः। वह्निमान्धूमादित्यत्र हेत्वधिकरणीभूतपर्वताद्यवृत्तिर्महानसीयवह्निस्तद्वच्छिन्नप्रतियोगिताको वह्निमद्भे
दोऽपीत्यव्याप्तिः। नन्विदं संयोगिगुणकर्मान्यत्वे सति सत्त्वादित्यत्राव्याप्तिः विशिष्टस्यानतिरेकादत आह तद्धर्मेति। तद्धर्मः हेतुतावच्छेदको धर्मः। रासभादिसाधारण्येवार
णाय तद्धर्मविशिष्टत्वमिति। महाकालो घटवान् कालपरिमाणादित्यादौ च हेतुनियामकसंयोगेन गगनादिमद्भेदस्य एव तादृशः प्रसिद्ध इति नाव्याप्तिः। गुण इति। अनि
त्यस्य यत्किंचित्स्पंदावृत्तित्वाद्गुणत्वपर्यंतानुधावनं। स्वरूपसंबंधः कालिकविशेषणताविशेषः। तादृशेति। न च तादृशभेदाप्रसिद्धिः। अजातत्वव्यक्तिमद्भेदस्यैव तादृश
स्य प्रसिद्धत्वात्। तत्। जातिमदिति। मेयत्वाधिकरणीभूतयत्किंचिद्व्यक्तिसमवेतधर्मानवच्छिन्नप्रतियोगिताको न जातिमद्भेदः। किंतु घटादेर्भेदः। नन्वप्रतियोगितावन जाति
मत्त्वेनावच्छिन्ने जातिशून्ये मेयव्यक्तौ समवेताप्रसिद्ध्या जातिमत्त्वावच्छिन्नाभावस्यासंग्रहादिति भावः। न च स्वाधिकरणीभूतयत्किंचिद्व्यक्तौ येन येन संबंधेन धर्मस्य
वर्तमानत्वं तेन तेन संबंधेन तत्तद्व्यक्तिधर्मानवच्छिन्नप्रतियोगिताकत्वाद्युक्तौ दोषद्वयस्यापि नावतारः समवायेन गुणत्वभेदस्य जातिमद्भेदस्य च स्वाधिकरणीभूतस्य
दसामान्यादिवृत्तित्वानियामकसंबंधेन तदनवच्छिन्नप्रतियोगिताकत्वादिति वाच्यं। अप्रमात्मा ज्ञानादित्यत्र कालिकसंबंधेनाप्रमात्ववद्भेदस्यापि तादृशतया तत्प्रतियोगि
तावच्छेदकत्वेनात्मन्यव्याप्तिः। साध्यतावच्छेदकसंबंधेन तत्प्रतियोगितावच्छेदकं यत्तदन्यत्वं स्वविवक्षणे च महाकालो घटवान् कालपरिमाणादित्यादावप्रसिद्धिरिति। एतेन ग्रहविषय
स्यानिर्वचनेनाग्रहोऽपीति। व्याप्तिग्रहस्येत्यर्थः। व्याख्यानतः। उर्वच न तथा व्याख्यानतः न संभवतीत्यर्थः। एवं अन्योन्याभावस्याव्याप्यवृत्तित्वे अव्यापकमेवेति। संयोगानधि राम

५

करणवृत्तित्वस्य घटत्वाद्यवच्छेदेन द्रव्येऽपि सत्त्वादिति भावः। स्वाधिकरणयत्किंचिद्व्यक्त्यवृत्तीति। न च स्वाधिकरणयत्किंचिद्व्यक्तिपर्वतावृत्तिमहानसीयवह्नि
प्रतियोगिकस्य वह्नित्वावच्छिन्नाभावस्य प्रतियोगितावच्छेदकत्वाद्वह्नित्वस्य वह्निमान्धूमादित्यादावव्याप्तिरिति वाच्यं। स्वाधिकरणयत्किंचिद्व्यक्तिवृत्तितानव
च्छेदकरूपावच्छिन्नप्रतियोगिताकेत्यस्य तदर्थत्वात्। अत एव गुणकर्मान्यत्वविशिष्टसत्तावान् ज्ञानादित्यादावतिव्याप्तिः। स्वाधिकरणीभूतयत्किंचिद्व्यक्तिवृत्तिप्रतियोगिके पिना
ति वनोक्तं। वह्निमान्धूमादित्यादौ घटाद्यभावस्यापि घटमेयत्वान्यतराभावाभिन्नतया तादृशाभावाप्रसिद्धिरिति। पूर्ववदिति। यत्किंचित्संबंधेन साध्यतावच्छेदकसंबं
धेन वाऽवृत्तित्वविवक्षणे इत्यर्थः। गुणः स्पंदत्वादिति। साध्यसमानाधिकरणहेतुत्वमित्यत्र साध्यतावच्छेदकसंबंधविवक्षायां व्यापकतादलस्य केवलस्य वाऽतिव्याप्तिः
इतरथा तु। गुणत्वस्पंदान्यतरत्ववान् स्पंदत्वादित्यत्रातिव्याप्तिर्बोध्या। यथाश्रुते तु स्पंदत्वे गुणत्वरूपसाध्यसामानाधिकरण्याभावादेव नातिव्याप्तिरिति भावः। स्वप्र
तियोगिनिरूपिताधेयत्वेति। साध्यतावच्छेदकसंबंधेन स्वप्रतियोगितावच्छेदकावच्छिन्ननिरूपिताधेयत्वं बोध्यं। तेन गुणः स्पंदत्वात् गुणान्यत्वविशिष्टसत्तावान् ज्ञानादित्यादौ
च नातिव्याप्तिः। तादृशनिरूपकत्वं अव्याप्यवृत्तिव्याप्यवृत्ति वा। आद्ये दोषमाह उत्पत्तीति। उत्पत्तिकाले घटो न संयोगनिरूपिताधेयत्वनिरूपकः प्रलये परमाण्वादिन संयोग
निरूपिताधेयत्वनिरूपक इति प्रतीतेर्विवादग्रस्तत्वादाह उपगम इति। अंत्ये दोषमाह कालपरिमाणे चेति। कालिकसंबंधेन घटादौ साध्य इति शेषः। साध्यतावच्छेदकसं
बंधेन स्वप्रतियोगिनिरूपिताधेयत्वानिरूपकहेत्वधिकरणवृत्त्यभावस्याप्रसिद्धत्वादिति मन्तव्यं। महाकालस्यैव महाकालाधेयत्वात्। अवृत्तेश्चाधेयत्वाभावादिति। यत्तु आधेयत्वनि
रूपकत्वस्य कालस्यान्यावच्छेदेनाधेयत्वानिरूपकत्वाद्व्याप्तिरिति व्याख्यानं तदसत्। उत्पत्तिकाल इत्यादिना तत्केऽप्यदोषदानेन पृथक्करणानुत्थानादिति। या
वत्साध्यव्यापकव्यापकत्वं यावत्साधनाव्यापकव्यापकसाध्यकत्वं वा अनौपाधिकत्वं क्रमेण सिद्धांतयति। साध्ये। त्यादिना। प्रथमे अभावद्वयप्रवेशे गौरवादाह स्वसमाने

स्वसमानेति। स्वं हेतुः। अनयोश्चपदव्यावृत्तिः पूर्वमेव व्याख्याता। लाघवादन्यदाह स्वसमानाधिकरणेति। स्वं हेतुः। इदं गुणकर्मान्यत्वविशिष्टसत्ताव ज्ञातेरित्यादाव
तिव्याप्तेराह। यद्धर्मावच्छिन्नेति साध्यतावच्छेदकावच्छिन्नेत्यर्थः। सर्वत्वस्य व्यापकत्वादन्यस्य दुर्वचत्वाद्व्याप्तिविशिष्टकार्यरूपवत्त्वे वा तु कथ्याह। साध्यसामानाधिकरण्येति।
यद्यपि स्वसामानाधिकरण्यव्यापकतावच्छेदकसाध्यसामानाधिकरण्यलकत्वमेव वक्तुमर्हति तथापि हेतौ तादृशसाध्यसामानाधिकरण्यत्वस्य संबंधः स्वहृत्त्ववच्छेद
कत्वप्रतियोगिव्यापकताप्रतियोगिसामानाधिकरण्यप्रतियोगित्वरूपः। प्रकृते वाच्यस्तथा चातिगौरवं तादृशसामानाधिकरण्याभावत्वकत्वमित्यत्र तादृशाभावत्वस्य हेतौ
संबंधः स्वनिरूपकसामानाधिकरण्यप्रतियोगित्वमिति लाघवं। एवं व्यापकत्वं तत्समानाधिकरणान्योन्याभावप्रतियोगितानवच्छेदकत्वं न तु सामानाधिकरण्यघटितनाभे
देन संभवस्तत्तत्र तत्सामानाधिकरण्यत्वेन समानाधिकरणासंताभावप्रतियोगितानवच्छेदकत्वादिरूपं तद्यथा तथा च सामानाधिकरण्यत्वादिप्रवेशादतिगौरवं मतोऽ
भावस्यापरं वरत्वादन्योन्याभावप्रतियोगितानवच्छेदकत्वमेव व्यापकत्वमकृतमित्यतो येवमभिधानमिति मंतव्यं। तादृशव्यापकतावच्छेदकस्वसामानाधिकरण्यसामान्या
भावत्वकत्वमित्यत्र तंत्राभावघटितव्यापकत्वाभिप्रायेण। अन्योन्याभावघटितव्यापकत्वप्रवेशे तादृशव्यापकस्वसामानाधिकरण्यसामान्याभावकत्वं तद्वाच्यमिति। साध्यता
वच्छेदकेत्यादि। समवायेन साध्यतायां वह्निमान्धूमादित्यादावतिव्याप्तिवारणाय। साध्यतावच्छेदकसंबंधेनेति वह्निमान्धूमादित्यत्र संबंधे तो साध्यसामानाधिकरण्याभाव
तो धूमाभावपवनरूपस्य धूमसामानाधिकरण्यसत्त्वाद्व्याप्तिवारणाय हेतुतावच्छेदकसंबंधेनेति ध्वंसत्वादित्यत्र साध्याधिकरणसंबंधसामान्येनाहतोगगनादौ हेतुसामा
नाधिकरण्यसत्त्वादतिव्याप्तिवारणाय। एकेनेत्यादि। एकत्वस्याननुगततादाह विशेषणताविशेषेणेति ॥ ॥ ६॥ इति व्याप्त्यनुगमः। ४॥ ॥ राम
१

प्रसंगादिति। कार्येण व्याप्तिग्रहे रागसमनायाः कारणेन तत्सामान्यलक्षणायाः अनुपेक्षणीयत्वादित्यर्थः। समानाधिकरणेति। अन्यथा तादृशवह्निसमानाधि
करणवृत्तिधूमत्वरूपाव्याप्तिर्महानसीयधूमवह्निसन्निकर्षकाले गृहीतायाः स्मरणसंभवेन पर्वतीयवह्निग्रहे पि पर्वतीयधूमे विशिष्टज्ञानसंभवादिति भावः। सच पर्वतीय
वह्निव्याप्तिग्रहश्चालक्षणेति। अनुमितिलक्षणेत्यर्थः। उपयोगितोपि सपिनाप्रसंगसंगतिः समुच्चीयते। अस्वरसबीजं तु पर्वतीयवह्निव्याप्तिग्रहं विनापि द्रव्यत्वपृथिवीत्वव्याप्तिग्रहा
धीनानुमितिवृत्तिलानसीयवह्निधूमव्याप्तिप्रत्यक्षाधीनासिसाध्यपि याधीनोवानुमितिवादाय जातिघटितलक्षणस्य पर्वतो वह्निमानित्यनुमितावपि सत्त्वान्नोपि तुल्यतावस
रइति। साचेत्यनेन परामृश्यपो सामान्यलक्षणप्रत्यासत्तौ इंद्रियसंबद्धविशेषणतेत्यस्यातिरिक्तैवेत्यस्य चानेदान्वयरहायै। अमत्रैव सामान्यलक्षणप्रत्यासत्तिशब्दस्य सत्त्वे दर्शय
ति। अत्रवेति। तज्ज्ञानमिति। सामान्यज्ञानसामान्यनिरूपत्वादिति भावः। नन्वेवं धूलीपटलेधूमत्वभ्रमे तत्तुल्यरत्तकलधूमगोचरो व्याप्तिग्रहो न स्यात्। धूमत्वस्य धूलीपटलाविशेषणत्वात्तस्य
तो विशेषणशब्दार्थमाह। तद्विशेष्यकेति। इंद्रियसंबद्धविशेष्यकेत्यर्थः। भावार्थविवक्षितत्वाह। तत्रेति। इंद्रियसंबद्धे सप्तम्यर्थश्च विशेष्यतासंबंधेनावच्छेदकत्वे। विशेषणत्वं प्रकारत्वं। न
न्वेवं व्यधिकरणबहुव्रीह्यापत्तिरतः प्रकारान्तरमाह संबद्धपरस्येवेति। परंपरासंबंधं दर्शयति। तत्संबद्धेति। सैवेति। तां त्रिकेस्तपैव परिभाषितत्वादिति भावः। अत्रवेति। इंद्रियसंबद्ध
विशेष्यकज्ञानप्रकारकत्वेवेत्यर्थः। बहिरिंद्रियस्येत्यत्र बहिःपदस्य फलमाह। एवं चेति। ज्ञानलक्षणानिरासार्थं यत्किंचिदिति। यदं त्वस्वरसबीजं तु सौदामिनीसंपातस्थले वक्ष्यमाण
तिप्रसंगवारणाय तदिंद्रियकरणकतद्धर्मवत्त्वबोधसामग्रेपेक्षणीयत्वस्यावश्यं वाच्यत्वेनैवातिप्रसंगभंगे किं तदिंद्रियजन्यत्वादिविशेषणेनेति। विशेषणशब्दस्य ज्ञानप्रकारार्थ
कत्वकरणेबीजं दर्शयति एतेनेत्यादिना। धूलीपटलइति। सावधारणं। तेन धूलीपटलएव वह्निसहचारग्रहात्प्रमतो व्याप्तिग्रहइत्यर्थः। अपि यापूर्वधमेपि व्याप्तिग्रहसंभवे तत्रैव
सामान्यलक्षणया सकलधूमगोचरव्याप्तिग्रहसंभवेन तन्मूलकसमस्तपरामर्शसंभवादिति भावः। हेतुत्वनावेनेति। धूमीयव्याप्तिज्ञानरूपहेतुत्वनावेनेत्यर्थः। चरमोत्कर्कमेणावि
शेषणशब्दस्यान्यार्थकरणेबीजमुक्त्वा शिष्यन्ति सा विषयतया प्रयमनः प्रदर्शयंक्रमोत्कर्कमेणैवविशेषणानरपेक्षफलं दर्शयति किंवेत्यादिना। तत्र ज्ञानस्यतदिंद्रियजन्यत्वमित्यस्य

फलमाह। धर्मिणीति। लौकिकसंनिकर्षकालेन दण्डग्रहासंभवादाह। दोषवशादिति। ज्ञानप्रकारत्वरूपेणार्थमाह स्मरणेति। सामान्येन चाक्षुषज्ञानापत्तिरिति योजना। लौकिकः संबं
धइत्यस्य फलमाह गृह्यमाणेनेति। नयनेनेत्यस्यानुषंग इत्यन्वयः। विशेषेपीति। न च रूपमात्रं सामान्यलक्षणयाजन्यज्ञानीयकोटौ करणतिरिति वाच्यं। तादृशसामान्यजज्ञानमूलक
सामान्यजज्ञानधारायाएव सामग्रीसंभवेनापादनानीदनुभवसिद्धमिति भावः। ननु धूमत्ववह्नित्वप्रत्यासत्त्या निखिलधूमवह्निग्रहसंभवेपि निखिलवह्निमतामेकसामान्या
भावेनाग्रहाद्वह्निसंयुक्तसंयोगित्वरूपेण सामानाधिकरण्यग्रहासंभवः। न च वह्निसंयोगित्वेन सामान्येन सर्वेषां वह्निमतां ग्रह इति वाच्यं। वह्निसंयोगित्वस्य वह्निसंयोगात्मकतया नाना
त्वादतो व्याप्तेर्नानात्वाभिप्रायकं। व्याप्तिग्रहश्च सामान्यलक्षणप्रत्यासत्त्येति फलमनुपपन्नमतः प्राह सामान्यं चेति। सत्वेनानेकवृत्तितावच्छेदकानुगतरूपावच्छिन्नवह्निमत्त्वादिकं
अखंडं चानेकवृत्त्येकघटत्वादिकं। सखंडं। वह्निमत्त्वादौ। अखंडं। वह्नित्वादिकं। परंपरासंबद्धं। स्वाश्रयद्वारकसंबंधेन प्रत्यासन्नं। ननु समवायेन पुरोवर्त्तिनि घटत्वप्रकारकज्ञाने
घटत्वसामान्यलक्षणया कालादेरपि भानं स्यात्। तस्यापि कालिकतया घटत्वाश्रयत्वादत आह। येनेति। इत्थं च वह्निमत्त्वदण्डित्वादौ परंपरासंबंधेन वह्निदंडइत्याकारकवह्नि
त्वदंडत्वप्रकारकज्ञानानंतरमेव सामान्यजन्यज्ञानमिति ध्येयमेव कृतत्वं। सामान्यभेदेन कार्यकारणभावस्यापि भिन्नतया वह्नित्वरूपेण वह्निप्रकारकज्ञानस्यैव वह्निसामा
न्याश्रयप्रत्यासत्त्वं कार्यतावच्छेदककल्पने। न च परंपरासंबंधेन वह्नित्वप्रकारकज्ञानस्य तेन संबंधेन वह्नित्वाश्रयप्रत्यासत्तिकारणत्वस्यावश्यककल्पनेनैव यावद्वह्निमत्प्रत्य
क्षोपपत्तौ न कार्यकारणभावांतरं कल्पनमिति वाच्यं। परंपरासंबंधेन वह्नित्वानवगाहिवह्निमानिति बोधानंतरं निखिलवह्निमत्प्रत्यक्षस्य सर्वानुभवसिद्धतयानुपपत्तेः।
वं तथा कल्पनादिति। अखंडं एवाशंकते नन्विति। सामान्यत्वं भावोक्तं। नानाधिकरणेति। अखंडत्वं भावे एकव्यक्तिरिति। सखंडत्वे तु परंपरासंबद्धघटत्वादेरेवा
सन्निधापोक्तत्वेनाशंकायाएवानवतारादिति भावः। परंपरासंबंधत्वाकुल्पप्रदर्शयति घटप्रागभावादिरिति। आदिपदग्राह्यमनित्यं वा व्यत्ययति। अनित्य इति। तत्र। कपालादौ। राम

९

तदभावेति। घटादिनाशेत्यर्थः। घटप्रागभावादिरिति वपि। तद्व्यक्तिद्वारा तद्घटव्यक्तिद्वारा तद्घटप्रागभावव्यक्तिद्वारा चानन्वेवं तद्व्यक्तित्वेन तद्घटव्यक्तिभानेन प्रत्यास
त्तिजंभानं न स्यात्। तद्व्यक्तित्वस्य तद्व्यक्तिरूपतयात्मकतया नीलत्वात्। किंच तादृशपरंपरासंबंधेन घटत्वादेरज्ञाने कथं तस्या प्रत्यासत्तित्वमत आह। एतद्वस्तुसंबंधेनेति। तथा
पदार्थातिरिक्तत्वस्यानभ्युपगमादन्यथाव्याप्तिरप्यतिरिक्तेति। तादृशातदिंद्रियजन्यं यत्सामान्यज्ञानं तदात्मिकेत्यर्थः। नवीनमतमाह। अतीतायेति। आदिना ऽनागतपरिग्रहः
सामान्यज्ञाने। सामान्यज्ञानमात्रे। ननु तदिंद्रियजन्यत्वं तदिंद्रियसंबद्धसामान्यप्रकारकत्वं वा विवक्षितमित्यर्थः। इत्थं च स्मरणात्मके निर्विकल्पके वा सामान्यज्ञानमपि प्रत्यक्षं कल्प्ये प्रत्यासत्ति
त्तिरिति ध्येयं। पूर्वोक्तातिप्रसंगवारणायाह। अपेक्षणीयं चेति। तदिंद्रियकरणकेति। स्वरूपकथनमात्रं त्वाचादिसामग्र्याश्चाक्षुषादिकं प्रतिसामान्यत एव विरोधित्वेनैवानतिप्र
संगात्। विशिष्टतत्सामग्रीपदं असाधारणपरं न तु फलोपधायकमनुत्पन्न एव ज्ञानांतरमिति। सामान्यज्ञानातिरिक्तमित्यर्थः। तथा च तादृशचाक्षुषादिहेतुनामालोकादीनां समवधा
नमपेक्षितं। तेषां हेतुत्वं च तेन रूपेण चाक्षुषादिज्ञाने तत्वमित्याशयेनैव तदिंद्रियकरणकेत्युक्तमिति मंतव्यं। तत्र च सुरभि चंदनं घटाभाववद्भूतलमित्यादिचाक्षुषे सौरभत्वेन घट
त्वेन च निखिलानां सौरभाणां घटानां च यदि विषयता ऽनुभवविरुद्धा तदा तद्धर्मप्रकारकलौकिकचाक्षुषसामग्रीतद्धर्माश्रयचाक्षुषादिहेतुत्वेन वाच्या। लौकिकत्वं तद्धर्मप्रकारतानि
रूपितविशेष्यतायदंशे तदंशे बोध्यं। तेन यत्किंचिद्विशेष्यांशे लौकिकस्यान्यांशे लौकिकस्यापि प्रत्यक्षस्य निखिलसामान्याश्रयविषयकत्वमुपपन्नं। वस्तुतस्तु वह्निरिंद्रियप्र
त्ययोग्यमुख्यविशेष्यकज्ञानकत्वरूपेणाप्यसौरभत्वेन सौरभमुख्यविशेष्यकचाक्षुषज्ञानवारणाय सौरभत्वेन सौरभमुख्यविशेष्यकचाक्षुषे प्रति सौरभत्वविशि
ष्ट लौकिकचाक्षुषसामग्रीत्वेन हेतुवाच्या। न चाक्षुषत्वावच्छेदेनैवातिप्रसंगभंगे सामान्यज्ञानं प्रति तद्धर्मप्रकारकबाधसामग्र्या हेतुतायां न लौकिकत्वनिवेशः। सुरभिचंदनमिति चाक्षु
षानुपस्थितसौरभाणां विशेषणत्वासंभवात्तत्र सामान्यजन्यज्ञाने मुख्यविशेष्यत्वस्यैव संभवात्। सौरभत्वविशिष्टलौकिकचाक्षुषसामग्र्या चंदने सौरभमिति चाक्षुषव
मदशायामिदमुपप्रसिद्ध्या। न च येनातींद्रियमात्रवृत्तिनाधर्मेण कदाचिदपि तादृशाश्रमस्यानुप्रसिद्ध्या तादृशकार्यकारणभावस्याकल्पनादुपनीततद्धर्मवद्विशेष्यलौकिकचाक्षु

MEMORIAL

प्रत्यक्षं वारणमिति वाच्यं। न च तेन रूपेण तद्धर्मा अपि विशेष्यकत्वात् प्रत्यक्षाप्रामाण्यापत्तिः। इति चेन्न। तत एव। उक्तसामग्र्या अपेक्षणीयत्वादेव सौदामिनीति। आलोक
स्यान्तरकालासत्त्वप्रतिपत्तये नादिन्द्रियजन्यत्वसंपादनाय बोध्यं। चरमं। सौदामिनीसंपातजनितचक्षुर्जन्यद्रव्यत्वप्रकारकज्ञानोत्तरं आलोकापेक्षणे चपलिङ्गे चक्षुषे
चक्षुर्लौकिकसंनिकर्षस्यापि सत्त्वं दर्शितं। निखिलद्रव्येति। द्रव्यत्वसामान्यलक्षणमधिकृत्यानुमानसीयमानस्यादित्रिसाक्षात्कारस्य स्वीकारे बलवत्तरबाधकाभावा
दात्मस्मरणमिति। सौदामिनीसंपातजनितप्रत्यक्षस्यापि नादिन्द्रियजन्यत्वानादृशावादृष्टपथारोपायोपायत्वात्। न चैवं तत्तदानुभविकमिति भावः। नन्वस्माज्ञानात्मकत्वे
ज्ञानलक्षणातोऽभेद इत्यतः प्रार्थपिबद्धेनेति। धर्मिणो। पद्धर्मविषयकं ज्ञानं तदाश्रयाणां इतरज्ञानलक्षणा अत एव ज्ञानलक्षणा न एव। ननु सामान्यलक्षणातः सौर
त्वस्य स्वरूपसतएव प्रकारतया न द्वित्तिधर्मस्याज्ञानात् सामान्यलक्षणया न प्रत्यासंभवात्। नवीनमते पूर्वोक्तयुक्त्या विशेष्ये लौकिकसंनिकर्षस्यानपेक्षणात् सौरभस्य
सामान्यलक्षणया पिज्ञानसंभवात् ज्ञानार्थं ज्ञानलक्षणायाः प्रभावरूपकत्वात् सौरभत्वप्रयत्नानुभावनं। अपि काकेणप्रमुखतत्वाकरज्ञानत्वप्रकारकमुक्तिस्मरणमूल
करजनत्ववदित्याकारके उपनीतभाने शुक्तेरपि भानं समुचितं। तत्र मुक्तिवृत्तिधर्मस्याज्ञानेन सामान्यलक्षणायाः असंभवादिति। अत्रेदमवधेयं। स्वसंयोगजन्यस्वि
षयकज्ञानाजन्यघटप्रत्यक्षं प्रति घटत्वज्ञानत्वेन न हेतुता। द्रव्यत्वज्ञानादपि तत्प्रसंगोदयात्। घटत्वातिरिक्तघटवृत्तिधर्मज्ञानाजन्यस्य चैव परापरकार्यकारणभाव
स्यानन्तकल्पनापत्तिः। तस्मात् घटत्वप्रकारकघटप्रत्यक्षं प्रति घटत्वज्ञानत्वेन हेतुतेति घटत्वनिर्विकल्पकोत्तरं चक्षुःसंयुक्तघटस्य प्रत्यासत्तिद्वयेनैव यद्बाधका भा
वदिति। ज्ञानलक्षणायास्तु। तद्घटवृत्तिधर्मप्रकारकतद्घटेन्द्रियसंयोगजन्यतद्घटप्रत्यक्षं प्रति तद्घटज्ञानत्वेन हेतुता। येन येन संबंधेन तद्घटवृत्तित्वं धर्माणां तेन
तेन संबंधेन तद्घटेतरप्रकारकत्वे बोध्यं। तेन प्रमुखतत्ताकस्य समवायेन घटत्वप्रकारकतद्घटस्मरणजन्य घटोपनीतभानस्य कालिकसंबंधेन तद्घटवृत्तियत्सरत्वेस राम
८

मवायेन घटवृत्तित्वस्यापि न संग्रहः। एवं विषयान्तरेऽपि बोध्यं। ननु तत्सामानाधिकरण्यरूपा व्याप्तिः। एवं च यावत्सु तानद्विशिष्टबुद्धौ भ्रमत्वापत्तिः धूमसमानाधिकरणेति।
लाघवादाह। वह्निमदिति। केवलान्वयिसाधारण्यादाह। वह्निसंबंधितेति। ननु महानसे गृहीतयत्नाद्दशमहानसीयवह्निसमानाधिकरणवृत्तित्वविशिष्टधूमत्वं तत्र पर्वतीयधूमे
इत्यत आह। एकैवेति। तथा च तादृशवृत्तित्वोपलक्षितं धूमत्वमेव व्याप्तिः। तच्च पर्वतीयधूमेऽप्यविकलमिति भावः। सामानाधिकरण्यव्याप्ति प्रायकत्वे दोषमाह। व्याप्तिनानात्वे इति।
तत्र पर्वतीयधूमे नानुशात्मनुभवशात्मस्मरणयोः समानप्रकारतामात्रेण हेतुहेतुमद्भावेऽनुभवविषयस्य स्मृतिविषयकत्वे बाधकाभावात्। स्मृतेरगृहीतयाहित्वापत्तिरतआ
ह। शात्मनुभवेति। हेतू। प्रयोजके तिनशाब्दानुभवस्य शाब्दबोधं प्रति हेतुत्वाभावेऽपि न क्षतिः। पदार्थस्मृतिव्यापारकत्वेन हेतुत्वात् यद्ज्ञानमिव शाब्दानुभवोऽपि हेतुरिति कश्चित्
तथा च शाब्दबोधं प्रति पदानुभयोर्हेतुत्वं तदेव दर्शितं तत्र मिति भावः। एवं समानप्रकारकत्वेन शक्तिज्ञानस्य शाब्दबोधहेतुत्वाङ्गीकारे। जातिशक्तीति। समानप्रकारकत्वेन
हेतुत्वेऽप्याकृतावपि शक्तिस्वीकारात्। अन्यथा शक्तिज्ञानस्य भ्रमत्वापातात्। जातिविषयत्वेनैवेति। ननु शाब्दबोधविषयीभूतव्यक्तावपि शक्तिग्रहः प्रागपेक्षणीयः सैव कारार्थः
जातिविषयत्वेन। जातिप्रकारकत्वेन। तत्तीयाद्विशेषणतो जातिमिद्व्यापसइति वत्। तदर्थज्ञाते तत्र ज्ञाने त्वेति। तथा च जातिप्रकारकज्ञानविषयाः शक्तिः व्यक्तिमनुभा
वयतीत्यर्थः। तथा च गोत्वप्रकारकशक्तिज्ञानत्वेनैव हेतुतेत्यर्थः। एतेन गोपदं गोत्वे शक्तमिति वंशक्तिग्रहे समानप्रकारकत्वविरोधः। गोशक्तं पदं गौः शक्येति वा शक्तिग्रहे जाति
विषयकत्वज्ञानानुपपत्तिः। शक्तिग्रहस्येव गोत्वप्रकारकत्वात् शक्तौ तत्प्रकारकज्ञानानुपपत्तिः। संबंधविधया गोगोपदीयाद्याकारेण शक्तिग्रहाङ्गीकारेऽनुनितरामेवेति दूषणं
निरस्तं। पश्वादीति। नियतसंस्थानव्यङ्ग्यस्यैव न जातित्वा द्रव्ये श्रवसितैतस्य हेतित्वेन पचित्वेन संकराच्च न पशुत्वं जातिः। किं तु लोमवत्त्वाङ्गूलवत्त्वमिति भावः। पचिवो
त्वादिनाप्यनानापशुत्वस्यैव शास्यत्वेनाह। लिङ्गादीति। कार्यत्वेन घटादावेव शक्तिग्रहे योग्यतावलाद पूर्वव्यक्तिलानस्यवसमाणत्वादिति भावः। तत्कुल संविज्ञान बहुव्रीहि

मप्युपदायति। परेति। परो नैयायिकः। पक्षतावच्छेदकेति। पर्वतो वह्निमानित्यनुमितौ। पर्वतत्वस्यापि विशेषणत्वादिति भावः। ननु प्रतियोगित्वस्य संबंधविधया भानसं
भवेपि गुणभावत्वाप्रकारकाभावप्रत्यक्षस्यानुभवादभावप्रत्यक्षे तु पस्थितमेवाभावत्वं प्रकारोऽनायत्यास्वीकरणीयः तथा च सामान्यव्याप्तेर्व्यभिचारो यन्न तत्त्वा
ननुगमश्चेत्यत आह वह्नीति। ननु यत्र गुंजापुंजे वह्नित्वभ्रमो व्याप्यकतायस्तत्र तदधीनानुमितौ वह्निभानार्थमुक्तकार्यकारणभावबलात्सामान्यलक्षणासंभवे
पि वह्न्यंतरव्यापकताग्रहाधीनपर्वतीयवह्न्यनुमितौ न सा यानि। वह्न्यंतरज्ञानजन्यत्वेन सिद्धसाधनादाह तद्व्यक्तीति। ननु विशिष्टवैशिष्ट्यबुद्धौ विशेषणतावच्छे
दकप्रकारकधियो हेतुत्वे दंडिमानित्यनुमितौ विशेषणतावच्छेदकाभावेन प्रकृतदंडभानार्थं सामान्यलक्षणा स्यादत आह विशिष्टवैशिष्ट्यमादीति। विशेषणता
वच्छेदकादीत्यादिना विशेषणविशेष्यपरिग्रहः। तादृशां दंडिमानित्याकारकं। तद्रूपेण दंडत्वादिना व्याप्त्यादिग्रहः। व्याप्यताग्रहः शक्तिग्रहश्च तेन रूपेणानुमि
तौ शाब्दे च हेतुरित्यर्थः। ननु युगपद्विशेष्यविशेषणादिसन्निकर्षेस्यापि दंडो रक्तो न वेति संशयानंतरं जायमानो रक्तो दंड इति निश्चयानंतरं जायमाने रक्तदंडवा
निति निखिलरूपबोधे न व्यभिचारिकाण्याभावरूपविशेषणतावच्छेदकप्रकारकनिश्चयस्य हेतुत्वं कल्पनीयमत आह प्रत्यक्षे वेति। विशेषणत्वस्यैकस्याभावात् दंडिमा
निति बुद्धौ दंडत्वेन यत्किंचिद्दंडप्रकारकाधीनत्वेनैव हेतुत्वात् प्रकृतदंडप्रकारकज्ञानाभावेपि न क्षतिरिति भावः। प्रत्यक्षस्थले संशयपदर्शायोग्यताबोधाभावादुक्त
कार्यकारणभावकल्पनमित्याशयेन प्रत्यक्षे त्वित्युक्तं। वस्तुतः कार्यतावच्छेदके विशिष्टवैशिष्ट्यबोधत्वमिति ध्येयं। तेन रक्तो दंडो न वेति संशयोत्तरं रक्तदंडवानरवा सा
पर्वबोधं विनेव रक्तदंडवानिति विशिष्टवैशिष्ट्यबोधापत्तिरिति [illegible] विशेष्यतानाशेत्यादिना संबंधज्ञानपरिग्रहः। एतेन माना भावेन। ननु घटत्व
सामान्यलक्षणाजन्यज्ञाने तीतानागतघटादेरपि विशेष्यत्वात् अजन्यतानस्य च प्रागभावादिविशेष्यज्ञानं व्यभिचारीत्यत आह जन्यतावेति। निर्विकल्पके राम ८

अज्ञानसामान्याश्रयेतत्सामान्यवैशिष्ट्यानवगाहि। नन्वेवं मेयत्वसामान्यलक्षणया विश्वगोचरनिर्विकल्पकजननेन सर्वज्ञः स्यादत आह सार्वज्ञेति। यद्यपि
एतादृशसार्वज्ञस्वीकारे क्षतिविरहः। न च संशयानुपपत्तिः इदंत्वावच्छेदेन घटादिनिर्णयस्येव अयं घटो न वेत्यादिसंशयविरोधित्वात्। तस्य तत्संशयजनकदोष
वशेन तत्र निबंधात्। तथापि निखिलज्ञातं शेऽन्यप्रकारकनिखिलज्ञानिप्रकारकज्ञानापत्तिः सामग्रीसत्वात्। न चैतदनुभवसिद्धमिति भावः। ननु घटत्वस्येव घटत्व
वृत्तिधर्माणामपि निर्विकल्पकेन विषयीकरणात् यदा घटे घटत्वावगाहनं तदा घटत्वेपि तद्वृत्तिधर्मावगाहनमतो घटत्वांशेऽन्यप्रकारकघटत्वप्रकारकज्ञानासंभव
इति कथं सार्वज्ञापादनमिति। तत्र घटत्वांशेऽन्यप्रकारकघटत्वप्रकारकज्ञानं प्रति घटत्वांशेऽन्यप्रकारकज्ञानस्य हेतोः सत्त्वेन तादृशज्ञानापत्तेर्वक्षणेपि दुर्वारत्वा
त्। अन्यथा मानिमान्घट इति प्रत्यक्षं न स्यात् तस्यां योगिनामपि सार्वज्ञमितिरिक्त। तस्याः सामान्यलक्षणायाः तदजनकत्वे निर्विकल्पकाजनकत्वे तत एव पूर्वोक्तव्यभिचारादेव।
तत् विशेषज्ञानं। ननु अप्रसिद्धधर्मेपि संशयोत्पत्तेः स्यानुपपत्तिः धर्मिज्ञानस्य संशयहेतुत्वाभावादत आह। धर्मिज्ञानस्येति। संशयेऽपि वेति। विशेषेंद्रियसन्निकर्षस्य प्रत्यक्षे हे
तुत्वादिति भावः। धर्मिभानार्थं धर्मिविषयतार्थं सा सामान्यलक्षणा। ननु सामान्यलक्षणां विनापि धर्मितावच्छेदकप्रकारकज्ञानादेवास्तु धर्मिणः संशयविषयता तस्यान्
तथा च तीनलक्षणये वोपपत्तिरत आह। विवादादिति। अविवादे स्वपति। तद्धर्मेति। यद्यपि घटत्वप्रकारकज्ञानत्वेन घटत्वज्ञानत्वेन वा प्रत्यासत्तितायां विवादस्तथापि घटत्व
प्रकारकज्ञानोत्तरं निखिलघटप्रत्यक्षस्य संप्रतिपन्नत्वात्। प्रत्यासत्तिता घटत्वप्रकारकज्ञानत्वेन घटविषयकज्ञानत्वेन वा स्यादित्यत्र तात्पर्यकमात्रमिति भावः। अत्रक
श्चित्। स्वरूपसदीयज्ञानमेव विषयतया सर्वत्र प्रत्यासत्तिरस्तु घटत्वपरत्वादीनां तथात्वे गौरवात्। तस्याश्च सप्रकारकस्वाश्रयप्रत्यक्षत्वं स्वाश्रयविशेष्यकप्रत्य
क्षत्वं वा उपनीतभाने लौकिकप्रत्यक्षसाधारणमेव कार्यतावच्छेदकमतो न विश्वगोचरनिर्विकल्पकोत्पादेन सार्वज्ञापत्तिः। न वोपनीतभानादिधावर्तकमन्यदन्यता

दिग्देशकार्यकारणभावस्यानंत्येनालाघवानवकाशादिति। इत्थं च घटत्वांशेन्यप्रकारकघटत्वोपनीतभानस्थले घटत्वस्याविशेष्यत्वान्न तत्र प्रत्यक्षोपपत्त्यर्थं ज्ञानलक्षणा
पेक्षा कार्येति। यदा च यदिंद्रियजन्यतद्धर्मप्रकारकज्ञानसामग्री तदा तदिंद्रियजन्यतद्धर्मप्रकारकस्यात्मविशेष्यकप्रतीतिनियमनियतिः अतो न घटत्वादिप्रकारकप्रत्यक्षकाले
घटादीनां साक्षात्कारापत्तिः। न वा रसत्वगंधत्वाद्युपस्थितौ रसो गंध इति वा रूपापत्तिः। न च घट इत्याकारकप्रत्यक्षकाले घटत्वरूपेणैव विश्वविशेष्यकप्रत्यक्षापत्तिः।
प्रतिबंधकत्वात्। अस्य तु तस्यैव कारणस्याभावात्। अन्यथा प्रमेयत्वादिज्ञानकाले विश्वविशेष्यकप्रत्यक्षापत्तिः। कारकप्रत्यक्षस्य तदापि दुर्वारत्वादिति। तन्नासा
धापः। विनिगमनाविरहेणाभिधेयत्वादीनां च प्रत्यासत्तितापादुर्वारत्वात्। न च घटत्वज्ञाने नापि समं विनिगमनाविरहः। तस्यान्वयव्यतिरेकानुविधायित्वपाहेतुत्वस्या
वश्यकत्वादिति। धूमत्वेनाधूमत्वावच्छेदेन। तद्धूमत्वेन। धूमत्वसामानाधिकरण्येन। प्रसिद्ध इति। धूमत्वावच्छेदेन तदभावनिर्णयस्य सामानाधिकरण्येन संशयं प्रत्य
पि विरोधित्वादिति भावः। द्वितीय इति। धूमत्वसामानाधिकरण्येन व्याप्तिनिश्चये धूमत्वसामानाधिकरण्येन व्याप्तिवारसंशये बाधकाभावादिति भावः। ग्रहस्यैवेत्येव
कारेण धूमत्वसामानाधिकरण्येन व्याप्तिग्रहस्य व्यवच्छेदः। न हि विरोधितया धूमत्वसामानाधिकरण्येन व्याप्तिसंशयमविरोधितया मतः। धूमत्वसामानाधिकरण्येन व्याप्ति
संशयः। तथा च प्रसिद्धधूमे एव धूमत्वेन व्याप्तिसंशय इति भावः। अन्यथा समानविषयकतामात्रेणैव प्रतिबंधकत्वे। पृथिव्यादीति। पृथिवीरूपं वायुत्वाभावव्याप्यं जलरूपं वायु
त्वाभावव्याप्यं तेजोरूपं वायुत्वाभावव्याप्यमित्याकारकेत्यर्थः। तत्र व्याप्तिग्रहविषयातिरिक्तस्य धूमान्तरस्य सत्त्वासंदेहोपपादने व्याप्तिग्रहविषयेभ्यः पृथिवीजलतेजो
रूपेभ्योऽन्यद्रूपांतरं नास्तीति कुत्र संदेहः स्यादिति भावः। स्वरूपसंभव इति। समानविषयत्वेन विरोधित्वमभ्युपेत्याह। अतिरिक्तसंभावनया प्रसिद्धातिरिक्तरूपं न वेति संभाव
नया तथा। गृहीतव्याप्तिकेष्वेव रूपं वायुत्वाभावव्याप्यं न वेति संशयः। नन्वेवं गृहीतव्याप्तिकेष्वेव धूमेषु तावदतिरिक्तो धूमो न वेति संभावनया धूमो वह्निव्याप्यो वा

राम

२

री न वेति संभावः स्याद्। तथा च सामान्यलक्षणावतार इत्यत आह। विशेषतेति। विशेषतो घटत्वपटत्वादिना। विशेषदर्शनं रूपत्वाभावनिर्णयः। अतिरिक्तांतरेति। अनुपस्थिता
तिरिक्तेत्यर्थः। सा सामान्यलक्षणा। रूपेष्विति। रूपं पार्थिवाप्यतैजसभिन्नं न वेत्येवंरूपेत्यर्थः। विशेषदर्शनात्। पार्थिवाप्यतैजसभिन्नत्वाभावदर्शनात्। नापीति। पार्थिवाप्यतैजसभि
न्नरूपं न वेत्याकारेत्यर्थः। विशेषतोपि निर्णयमाह। द्रव्यादय इति। द्रव्यकर्मसामान्यविशेषसमवायाभावा इत्यर्थः। ननु संशयस्य धर्मितावच्छेदकेन छतिनरूपेण तत्र धर्मिणि
निर्णयः संशयविरोधी। अत एव धूमो वह्निव्याप्यो न वेति संशयं तद्धूमत्वेन निर्णयो विरुणद्धि प्रकृते संभावनाया अधर्मितावच्छेदकं प्रसिद्धरूपभिन्नत्वं तद्भिन्नरूपेण न छुटि
तधर्मिणि निर्णयः संभावनास्यादेवेत्येतदनुपपत्तेः पपादयति। प्रसिद्धेति। प्रसिद्धरूपभिन्नं न रूपमिति निश्चये संशयायोगादाह रूपभिन्नमिति। न हि तत्र धर्मावच्छेदेनैव विशिष्यापि
निर्णयमाह। द्रव्यरसादिवेति। तथा च प्रसिद्धरूपभिन्नं रसादि वा न रूपमित्यर्थः। तादात्म्येन रूपकोटिकसंभावनायां रूपभेदनिर्णयबाधकमुक्त्वा रूपत्वकोटिकसंभावनायां
तदत्यंताभावनिर्णयं बाधकमाह। रूपत्वेति। तस्याः संभावनायाः। ननु तदानीं संशयो न भवत्येवेत्यत आह। तदानीमिति। नाद्रशाविशेषदर्शनकाले इत्यर्थः। उक्तेति। रूपं वायुत्वा
भावव्याप्यं न वेत्याकारेत्यर्थः। ननु संशयश्चेदनुभूयते तदा तज्ज्ञानकदोषप्रतिबंधात् संशयविषयीभूतधर्मावच्छिन्नदर्शनाभावविषयत्वेनैव फलबलात्कल्प्यत इत्यत आह। अति
रिक्तेति। गौरवेणेति। रूपत्वावच्छिन्ने व्याप्तिनिर्णयाभावमपेक्ष्य प्रसिद्धरूपातिरिक्तरूपं न वेत्याकारकातिरिक्तसंभावनाविरहस्य हेतुत्वे धर्मिकव्याप्तिनिर्णयाभावकारणता
यां गौरवेणेत्यर्थः। सामान्याभावज्ञाने तत्कारणीभूतसकलज्ञानार्थं सामान्यलक्षणाविषयीभूतसकलव्यक्तिप्रतियोगिसंनिकर्षापेक्षणं नाप्यत आह। प्रागभावमतमास्कंद्येति
इति त्वा सामान्यलक्षणा तत्प्रतियोगीति सामान्याभावप्रतियोगीत्यर्थः। नहीति। तथा नैयायिकमते। सामान्यलक्षणया। तत्त्वादिना। ननु तल्लौकिकप्रत्यक्षेण तत्
कारणमत आह। इदं त्वादिनेति। ननु अभावत्वप्रकारकलौकिकप्रत्यक्षेण तत्कारणमत आह। भाना भावाविति। ननु तत्प्रतियोगितभावत्वमेवेदंत्वं तथा च तत्प्रतियोगि
गिभावभाने कथं तत्प्रतियोगिधियो व्यभिचार इत्यत आह। अत एवेति। यत एव तज्ज्ञो भावत्वेनेदंत्वे किंतु स्वरूपेणैव तदभावव्यक्तिज्ञानविशेषो वा अत एवेत्य

र्थः। नमो ऽस्मिन्निदंत्वेन भावेविवादान्नमसीति पर्यन्तानुधावनं। तद्योगात् अभावत्वसंज्ञायायोगात्। ननु रूतनत्वे घटवत्त्वमकाले घटो नास्तीति बुद्ध्यनुपपत्तावपि घटत्वस्यावच्छे
दकत्वानवगाहिनः घटप्रतियोगिकोऽभावः इत्याकारस्यैतेनाकारकस्य वानुभवस्यापत्तिरत इंद्रियसंबद्धविशेषणतायाः कार्यतावच्छेदकं तत्प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिता
कत्वावगाह्यभावप्रत्यक्षत्वं इदंत्वप्रकारकाभावप्रत्यक्षत्वेन नानेन। तथा च घटत्वावच्छिन्नप्रतियोगिताकाभावप्रत्यक्षत्वावच्छिन्नं प्रति घटत्वरूपेण घटज्ञानं कारणमित्येव पर्यवसि
तं। तत्र व्यभिचार इत्यत आह। प्रतियोगीति। तज्ज्ञानं। अभावज्ञानं। विशिष्टवैशिष्ट्येति। घटत्वविशिष्टवैशिष्ट्यबोधे घटत्वप्रकारकज्ञानं कारणं। तेन तन्निर्विकल्पकानंत
रं विशिष्टवैशिष्ट्यबोधनिरासः। ननु तत्र घटविषयत्वमपेक्षितं कुतो यावद्घटविषयकत्वमिति भावः द्वितीयेत्वाह संसर्गकत्वेनेति। तस्य सामान्याभावज्ञानस्यापूर्वोक्तकार
णतावच्छेदके घटविषयत्वस्यानिवेशमभ्युपेत्याह। प्रतियोगिज्ञानस्येति। ननु तद्घटस्य विशिष्टाभावद्धित्वावच्छिन्नाभावादिसाधारणं तद्धर्मप्रतियोगिताकाभावप्रत्यक्ष
त्वावच्छिन्नं प्रति तद्धर्मज्ञानत्वेन हेतुता। घटसामान्याभावे तत्तद्घटानामभाव इति तत्प्रत्यक्षे तत्तद्घटानां ज्ञानं कारणमतो यावत्प्रतियोगिज्ञानमपेक्षितमित्याशं
क्य तानवेति। तदभावेति। तत्प्रतियोगिकाभावेत्यर्थः। न चायं सिद्धांतोपीत्याह ध्वंसेति। घटध्वंसोपटतत्प्रागभावतदत्यंताभावानामभावः घटध्वंसकाले घटो नास्तीति घ
टप्रागभावो नास्ति घटात्यंताभावो नास्तीति बुद्धीनां घटध्वंसेनैवोपपादनात्। एवं घटप्रागभावो घटतद्ध्वंसतदत्यंताभावानामेकैकाभावः। एवं घटात्यंताभावो घ
टतत्प्रागभावध्वंसानामभावः एकैकप्रतियोगिज्ञानादेव गृह्यत इत्यर्थः। ननु स्वमते ध्वंसप्रागभावयोरत्यंताभावेन सह विरोधाभावादत आह। अभ्युपगमात्वेति। भा
वी नैरिति शेषः। ननु स्वपरप्रकाशकयावत्तेजःसंसर्गाभावोऽधकारो यावत्तेजोज्ञानादेव गृह्यते यावत्तेजोज्ञानं च न सामान्यलक्षणां विनेति तत्र्यैसांगीकार्येत्यत आह
अंधकारस्त्विति। तेजोविशेषेति। स्वपरप्रकाशकेत्यर्थः। सामान्याभाव इति। ध्वंसप्रागभावाधिकरणेपि सामान्याभावस्य प्राग्भवस्यापि सत्त्वादिति भावः। यावत्त्वमभावे

राम
११

तर्क६२ वै१

विशेषणमाशंक्य निराकुरुते नाभावेति। एकत्रेति। अधिकरणे तेजसां प्रागभावध्वंसयोरेकत्रासंभवादिति भावः। तेनैतत्र यावद्धित्वेजोभिन्नमो व्यवहारः
तावता एव तमोऽधकारमिति किंच यावत्तु प्रतियोगिविशेषणमेव यावत्तेजसां तद्व्यक्तित्वेनाभाव एवांधकार इत्यत आह। अननुगमादिति। नन्वनुगतप्रत्ययोऽसि
द्ध एवेत्यत आह गौरवादिति। एकस्य सामान्याभावस्यांधकारप्रतीतिविषयत्वकल्पनामपेक्ष्य यावदभावेन तत्कल्पने गौरवादित्यर्थः। ननु यावदभावग्राहकसामग्रीस
त्वे त्त्वे यावदभावेपि तत्प्रतीतिविषयत्वमावश्यकमत आह तेजोविशेषेति। अत्यंताभावग्रहेऽधिकरणे तेजसां ध्वंसप्रागभावग्रहे च तदधिकरणे तत्त्वेन तत्तेजोव्य
क्तीनां तद्व्यक्तित्वेन ग्रहस्यावश्यकत्वादिति। नन्वत्यंताभावग्रहे तदधिकरणवृत्तितेजस्त्वादिना ग्रहः संभवति प्रागभावध्वंसग्रहे च तेजस्त्वेन तत्कालावच्छेदेन
तदधिकरणवृत्तितेजस्त्वेन वा प्रतियोगिज्ञानं संभवतीति। न चेन्द्रियसंबद्धविशेषणतायाः तत्तत्प्रतियोगितावच्छेदकावच्छिन्नाभावप्रत्यक्षत्वमेव कार्यतावच्छेदकमतः कथं ते
जस्त्वादिप्रकारकज्ञानात् प्रागभावादिप्रत्यक्षमिति वाच्यं। अत्यंताभावे इंद्रियसंबद्धविशेषणतामात्रत्वात्। अन्यथा एवं इदानीं घटध्वंस इति प्रत्यक्षे घटत्वा
वच्छेदेनैव घटध्वंसप्रत्यक्षं सर्वानुभवसिद्धमत आह तेजःसामग्र्यात्वेति। तेजःप्रागभावस्य तेजःसामग्रीव्याप्यत्वादंधकारप्रत्यक्षकाले च तदधिकरणे तेजस उत्पत्ते
रभावव्यापकत्वादिति भावः। ननु मास्तु यावत्प्रतियोगिज्ञानं कारणं तथापि प्रागभावप्रत्यक्षानुरोधात् सामान्यलक्षणा या स्यादिति तत्रानागतघटस्यैव प्रतियोगित्वे
न तज्ज्ञानस्यासंभवादित्याशंक्य विशिष्टवैशिष्ट्यबोधमर्यादां नातिशेत इति क्रमेण समाधत्ते प्रागभावेति। घटत्वादीति। इदं चातिप्रसक्तघटत्वावच्छेदेनापि प्रागभावप्रत्यक्ष
मितिमतुकदिशावगंतव्यं। नन्वनागतघटगोचरप्रागभावप्रत्यक्षमनागतघटसंनिकर्षं विनानस्यादतस्तत्र ज्ञानरूपसंनिकर्षार्थमेव सामान्यलक्षणा त्वाशंकेनेत्यपेति
घटो भविष्यतीति। यद्यपीदं प्रत्यक्षं न बहिरिंद्रियेणोपनीतमुख्यविशेष्यकज्ञानजननेनेतेमामसामर्थ्यात्। न मनसा। तत्र सामग्र्यान्यंजकत्वोपवर्णनविरोधात् तथापि घटवि

शेषणेन प्रागभावविशेष्यकप्रत्यक्षमेवानेनोक्तमिति ध्येयं। प्राचीनास्तत्तत्क्षणकालीनध्वंसप्रतियोगिकालवर्तिनः तत्प्रतियोगिनः नाऽदृशाप्रत्यक्षविषयप्रागभावप्रतियो
गिनः। ननु प्राचीनाप्रतियोगित्वेनाऽसंभवात आह तत्प्रतियोगिकत्वेनास्मन्तव्येति। विशिष्टबुद्धिं प्रति विशेषणधियो हेतुत्वान्निर्णयेनाक्रुतरथानुसामान्यलक्षणयैव प्रागभा
वप्रत्यक्षे नागतघटस्याज्ञानसंभवात् इति ध्येयं। तं अनागतघटं। ननु प्रागभावप्रत्यक्षं। प्रागभावस्य प्रत्यक्षमेव नास्तीत्याशंकते। नचेत्यादिना। कालादिघटितसामग्र्या
व्यंजकत्वे मानाभावादाह। चरमेति। अन्यदा चरमकारणाभावदशायां स्वरूपेण सामग्रीत्वेन। व्याप्यत्वेन प्रागभावव्याप्यत्वेनाग्रहीतायाः इति। कपालादावितिशेषः।
अन्यथैदानीं घटप्रागभाव इति नियताधिकरणप्रत्यक्षानुरथात् तथा च पक्षधर्मताज्ञानमपि संपादितं। तत्त्वां व्यंजकत्वं न हेतुत्वा। व्याप्यत्वज्ञानहेतुत्वा। कपालादौ
प्रागभावव्याप्यत्वेन सामग्र्याः ज्ञानतदनुमितिरेव स्यात्। अनुमितिसामग्रीसत्त्वादितिभावः। ननु समानविषये लौकिकसामग्र्या बलवत्त्वात् प्रत्यक्षमेव स्यात् अतः प्रत्य
क्षसामग्र्यभावमाह तावत्कालमिति। तावत्कालं व्याप्यत्वग्रहकालपर्यंतं। असत्त्वेनेति। लौकिकप्रत्यक्षे विषयस्यापि हेतुत्वादलौकिकप्रत्यक्षसामग्र्याश्च सर्वापेक्ष
या दुर्बलत्वादितिभावः। तद्बुद्धेरेवेत्येवकारेण कारणकलापघटितप्रागभावव्याप्यत्वबुद्धेर्व्यवच्छेदः। नचैवं कपालद्वयसंयोगरूपकारणानां कपालद्वयसंयोगत्वादि
नाऽज्ञानस्य कारणत्वेऽतिप्रसंग इति वाच्यं। कार्येण धानव्याप्यत्वेन ज्ञानस्यैव व्यंजकत्वादत आह। कार्येत्यादौ इष्ट इति। तत्कार्यपर्यावव्याप्तिस्थचतुःक्षणानंतर्भावेन
व्याप्यानद्ध (मत्वमादेप) प्रागभावस्यापि संभवतीति न विषयाभावात्प्रत्यक्षासंभव इति। ननु विनिगमनाविरहात् प्रागभावव्याप्यत्वज्ञानमेव किं न व्यंजकं स्यात्। एवं च प्रागभावस्य प्रत्यक्षेऽभ्युपगमे
पि विषयीभूतप्रागभावस्य तत्संनिकर्षस्य च कारणत्वकल्पनागौरवादनुमितिरेव प्रागभावे स्वीत्याशंक्य प्रत्यक्षमंतरेणानुमितिरेव न संभवतीत्याह। अथ प्रागभावत्वरूपसा
ध्यतावच्छेदकरूपेण साध्यस्याप्रसिद्धेराह। अनुयोगितेति। अनुयोगिताविशेषः स्वरूपसंबंधविशेषः। आदिना मतभेदेनाखंडोपाधिरूपप्रागभावत्वपरिग्रहः। यद्वा घटविशेष्य राम

कानुमाने प्रागभावप्रतियोगित्वस्यानुमेयत्वात्तत्प्रतियोगितापरिग्रहः। प्रागभावत्वादेरित्यादिना प्रागभावप्रतियोगित्वपरिग्रहः। तादृप्येण प्रागभावत्वादिना। ननु
घटो भविष्यतीति शब्देनाभिलप्यमानो योऽर्थस्तज्ज्ञानमेव प्रागभावप्रत्यक्षं किं वा कार्यानुत्पत्तिदशायामिह कपाले घटो नास्तीत्याकारकं। इहेदानीं कपाले घटप्रागभाव इत्याका
रकं वा प्रागभावप्रत्यक्षं। घटो भविष्यतीति शब्देन कथ्यते इति तत्र नाद्य इत्याह। भविष्यत्त्वं हीति। श्वोभाविनीति। श्वोभावि . प्रागभावस्याऽवर्त्तमानत्वादिति भावः। उक्तविशे
षणासंबंधरूपाया क्रियायाश्च कृत पातत्प्रागभावोपि प्रामाणिकः। प्रागभावमात्रस्यास्वीकारादाह। वर्त्तमानकालीनेति। इदं न भविष्यत्त्वं। नन्वद्यतनरूपो यो वर्त्तमानका
लः तद्वृत्ति प्रागभावप्रतियोग्युत्पत्तिकत्वं तदुत्तरकालोत्पत्तिकत्वं वा श्वोभाविन्यपीति तत्राद्य भविष्यतीति प्रतीत्यापत्तिरत आह। इहेति। नाद्य इति। वर्त्तमानप्रागभावप्रतियो
गीत्यर्थः। तथा चैत्राद्य घटो भविष्यतीत्यादौ एतद्देशवृत्तिरद्यतनी या वर्त्तमानप्रागभावप्रतियोगिनी उत्पत्तिस्तदाश्रयो घट इत्यन्वयबोधः। अतएवेति। यतएव प्रागभावस्याधि
करणत्वेन तद्देशादिप्रतीयते किंतूत्पत्तेरेवेत्यतएवेत्यर्थः। तत्प्रागभावेति। घटप्रागभावेत्यर्थः। तत्र घटनाशजनकनाशप्रतियोगिनि कपाले। इह घटध्वंसो भविष्यतीति न
बुद्धिरित्यर्थः। कालविशेषस्य प्रागभावेन्वये श्वोभाविन्यद्य भविष्यतीत्यनेन वर्त्तदोषत्वाभ्युपगमे। देशविशेषस्य कालविशेषस्य चोत्पत्तिमत्यन्वये बाधकमाह। नवेति। अत्र
भवनदेशो यस्मिन्नद्यतनः कालो यस्मिन्नेव प्रागणरूपदेशाधिकरणकत्वस्य परश्वोरूपकालविशेषाधिकरणकत्वस्य चाबाधितत्वात्तथा प्रयोगापत्तिरिति भावः। गामिष्यन्नि
नतु गच्छति गते वा। तदा वर्त्तमानप्रागभावप्रतियोगित्वाभावादिति। ननु धातुनाऽत्पत्तिप्रत्यापनात्प्रत्ययेन तद्देशोत्पत्तिकत्वमुपस्थाप्यते तथा चानन्वयः। प्रत्ययस्यापि भा
शास्य सार्थकत्वेऽत्पत्तेरपि उत्पत्तिमत्त्वस्य कुसुमांजलिप्रकाशादावभिहितत्वादन्वयसंभवेऽप्यनुभवविरोधो भविष्यतीत्यनेन वर्त्तमानप्रागभावप्रतियोग्युत्पत्तिकत्वबोधे
वानुभवसिद्धत्वान्नतु तादृशोत्पत्तिकोत्पत्तिमत्त्वबोधः स्यादत आह। अत एवेति। तादृशेति। वर्त्तमानप्रागभावप्रतियोगित्वमित्यर्थः। प्रागभावस्यास्वीकारादाह तादृशेति। वर्त्तमा

MEMORIAL

कालोत्तरकालीनत्वमित्यर्थः। नन्वेवं नंसतीत्यादौ धात्वर्थेन समं कालविशेषादेरन्वये ध्वंसादिनाशप्रतियोगिनि परध्वंसे नंसतीति स्यादत आह नं सतीति। नंसतीत्यत्रा
नागतानद्यतनीत्यत्र वर्तमानाननद्यतनसत्रचातीतोत्पत्तिः प्रत्ययार्थः। अत्र धातुनोत्पत्तेर प्रत्यायनात्। न चात्र नशधातोरेव नाशोत्पत्तौ लक्षणा। तथा सति प्रत्ययार्थप्र
तियोगित्वेनान्वयापत्तेरिति। तस्यामेव प्रत्ययार्थे उत्पत्तावेवानन्वयात्। एतेन। नंसतीत्यादौ नाशोत्पत्तेः प्रत्ययार्थत्वव्यवस्थापनेनाध्वंसादीति। ध्वंसादावनाशो
यस्येत्यर्थः। उत्पत्तेरलाभे धात्वर्थनाश एव कालविशेषादेरन्वयो वाच्यः तथा च ध्वंसादिनाशप्रतियोगिनि तन्नाशस्य परध्वंसकालवृत्तित्वात् परध्वंसे नंसतीति व्यव
हारः स्यात्। एवं वर्तमानस्य नाशेऽन्वये नष्टे नंस्यतीति स्यात्। अतीतत्वस्य कार्यस्य नाशे भावान्नष्टइति न स्यादित्यर्थः। आदिनानंक्ष्यत्यनष्टवानित्यादेः परिग्रहः।
नष्टमत्रोपपत्तिमाशंक्य निराकुरुते नचेति। तत्र। नष्टइत्यादिस्थले। लाघवादाह। वर्तमानत्वेवेति। चिरेति। निष्ठार्थकालविशेषेण सह प्रातिपदिकार्थकालवि
शेषस्याभेदान्वयेपि नाशकालस्य नाशान्वयेपि चिरविनष्टेप्यपि पूर्वेद्युरुत्पातीतकालवृत्तित्वस्य नाशे सत्त्वात्पूर्वेद्युर्नष्ट इति व्यवहारः स्यात्। एवं वर्तमानत्वस्य नि
वर्तमान
ष्ठार्थत्वे अधुनात्वरूपकालवृत्तित्वान्नाशस्य चिरनष्टेपि अधुना नष्ट इति व्यवहारः स्यादित्यर्थः। ननु नविष्यतीत्यादौ नंस्यतीत्यादौ च वर्तमानप्रागभावप्रतियोगित्वाउ
त्पत्तेः वर्तमानप्रागभावप्रतियोग्युत्पत्तिकस्य नाशस्य च धातुप्रत्ययाभ्यां प्रत्यापनेन धात्वर्थस्य प्रातिपदिकार्थेन समं अन्वयासंभवः धात्वर्थप्रातिपदिकार्थयोर्भे
देन साक्षादन्वयस्याव्युत्पन्नेरत आह। कर्तरीति। यथा यथमिति। नविष्यतीत्यादावुत्पत्तेराश्रयत्वं नंसतीत्यादौ नाशस्य प्रतियोगित्वं। नविष्यन्घटइत्यादौ कृत्यर्थे
भेदान्वयानुरोधाद्वुत्पत्तेराश्रयः। नष्टइत्यादौ च नाशप्रतियोगी सर्थः कृतिरूपकर्तृत्वस्यात्र यत्रानभिहितत्वात्तृतीयापत्त्यादित्याशंकामपनेतुं कर्तरीत्वं कर्तृत्वमात्रयुक्तं
मुख्यत्वाकसाधारणकर्तृत्वस्यानभिधानेऽपि तृतीयायाः साधुत्वात्। कृतेश्च भावकर्तृत्वस्याश्रयत्वादेरेवाभिहितत्वादिति। केचित्तु नंधातोः स्वरूपसत्तैवार्थः नसत्ता

सर्वत्रैव
भिसनुशासनात्। नचैवमाकाशेपि भवतीत्यपि प्रयोगः स्यात्। आकाशमस्तीतिवदिष्टत्वात्। नविष्यत्पत्यर्थश्च वर्तमानप्रागभावप्रतियोगित्वं। आश्रयेवलदृ
णा सर्वसिद्धेवाइत्याद्यघटोऽभविष्यतीत्यादौ देशविशेषस्य कालविशेषस्य च प्रागभावे प्रतियोगिनि चान्वयः उभयत्रान्वयसंभव एव प्रयोगात्। नंसतीत्यादावपि ना
शप्रतियोगिनो भ्रमत्वे घटाद्यन्वयइत्याहुस्तन्न। तथा सति दर्शीयदृशो यत्समानवैचित्र्ये दर्शेन नविष्यतीति व्यवहारो नस्यात्। दर्शस्य चैत्राधिकरणत्वेपि तत्प्रागभावान
धिकरणत्वेनोभयत्रान्वयासंभवात्। तथातीप्सारीरकौभवतीत्यादौ सत्तामात्रार्थकत्वेपि घटोऽभविष्यतीत्यादौ उत्पत्तित्वप्रकारकबोधस्यानुभविकत्वादुत्पत्तिरेवार्थः। अ
त्र वशात्क्विल्लक्षणावेसम्भवेत्। अत एवाह। अत्र च धातुनेति। अत्रानुसर्वत्रेत्याशयइति। अन्येतु दर्शेचैत्रोऽभविष्यतीत्यादौ सप्तम्यर्थउत्पत्तिः तस्य धात्वर्थस्वरूपसत्ता
इत्यादौ यां स्वरूपात्मिकायामन्वयः। शरदि पुष्यंति सप्तच्छदा उत्पत्तेरपि सप्तम्यर्थस्य चाव स्थापितत्वात्। एवं चेहाद्यघटोऽभविष्यतीत्यादौ एतद्देशोत्पत्तिकाएतत्कालोत्पत्तिकाव
र्तमानप्रागभावप्रतियोगिनीया स्वरूपसत्ता तदाश्रयइत्यर्थः। एवं नंसतीत्यादावप्यूह्यं। तथाच नयान्वयनियमोपि न कल्पनीयः। नक्ष्यतीत्यादौ पुनरनागतस्य वर्तमानोत्प
त्तिः प्रत्ययार्थः। नष्टइत्यादौ वर्तमानत्वमेव निष्ठार्थः। अधुनेत्यत्र सप्तम्या उत्पत्त्यर्थकत्वेनैव पूर्वोक्तातिप्रसंगनिरासात्। अथोत्पत्स्यतइत्यादौ च सप्तम्याआधेयत्वमेवार्थः
सत्तोत्पत्त्योरेव धात्वर्थत्वेनेत्याहुः। ननु घटानुत्पादशायामिदानीमिह कपाले घटो नास्तीत्याकारकमेव प्रागभावप्रत्यक्षं घटोऽभविष्यतीत्यादेनानित्यत्वे इति मध्यमेव रूमाश्रि
त्य समाधत्ते। कार्यानुत्पादेति। अत्यंताभावमिति। तदज्ञानार्थं च न सामान्यत्वरूपेति पूर्वोक्तमिति भावः। ननु तत्र घटोनास्तीति प्रत्ययस्य तत्रोत्पत्स्यमानघटप्रागभावः तत्रोत्प
न्नघटध्वंसो वा विषयइत्यत आह। नहीति। अयंइह कपाले घटो नास्तीति प्रत्ययः यत्किंचिदिति। यत्किंचिद्घटत्वस्यापि घटात्यंताभावप्रागभावध्वंसानां घटप्रतियोगि
कानां संभवादिति भावः। परंत्विति। घटत्वावच्छिन्नप्रतियोगिताकमेवगाहतेइत्यन्वयः। न याघटत्वावच्छिन्नप्रतियोगिताकौ। ननु ध्वंसप्रागभावाधिकरणे सामान्या

घटत्वावच्छिन्नप्रतियोगिताकस्य संभवादाह तत्र कपालइतिं इदानीन्तन
ष्टो कार्यो १ | कपालइत्यर्थः । ततः पूर्वमिति ॥ १

भावानंगीकृतंमतेनाभावपि सामान्यावच्छिन्नप्रतियोगिताकौं अनन्यगतिकत्वादत आह । संभवतो वेति । ध्वंसप्रागभावयोः सामान्याभावतास्वीकर्त्रापि यत्का
लावच्छेदे नसर्वेषां सामान्याक्रांता नां प्रागभावएव तत्र प्रागभावस्य । एवं यत्कालावच्छेदे न सर्वेषां ध्वंसएव तत्र ध्वंसस्य सामान्याभावतास्वीक्रियते । न चात्र प्रा
गभावस्य सामान्याभावता अतीतघटानां प्रागभावासंभवादित्याह । ततः पूर्वं बहूनां घटानां नष्टत्वादिति । न चात्र ध्वंसस्य सामान्याभावता । अनागतघटानां ध्वंसा
संभवादित्याह । ततः परतो बहूनां घटानामुत्पत्स्यमानत्वाच्चेति । सर्वोच्चकालाभावात्प्रागभावस्य घटत्वावच्छिन्नप्रतियोगितानसंभवतीति धीर्येयं । ननु तत्रैव तत्कपाल
वृत्तिघटत्वावच्छिन्नप्रतियोगिताकौ ध्वंसप्रागभावौ वाच्यौ स्तामालंबनमत आह । संभवतो वेति । तत्र कपाल इत्यस्य सिद्धांते प्यनुषंगः । तत्र कपाले । ततः पूर्वं बहूनां घ
टानां नष्टत्वादित्यनेनैव ध्वंसस्यैव तत्कपालवृत्ति प्रागभावस्य परतो बहूनां घटानामुत्पत्स्यमानत्वादित्यनेन । घटत्वावच्छिन्नप्रतियोगिताकत्वं प्रतइत्याहुः । ननु इदं तद्व
टत्वावच्छिन्नप्रतियोगिताकस्यैव तत्कपालवृत्तिघटत्वावच्छिन्नाभावस्य घटो नास्तीति प्रत्ययविषयतायां चानुक्तिसंभवादिति । एवं प्रतियोगिसमवायिन्यपि सम
यावच्छेदेनात्यंताभावस्वीकारे । कथमिति । अभावप्रतियोगिकातिरिक्ताभावानंगीकारादित्याशयः । पटध्वंसादीत्यादिना पटप्रागभावपरिग्रहः । अत्यंताभाव
स्येति । न केवलं तद् इति शेषः । ममम तेपटात्यंताभावस्यैव पटध्वंसादिविरोधितया तदभावत्वमिति भावः । तन्नदिति । कपालादौ घटध्वंसादिशून्यताबुद्धिरिति प्रथमं
तेनान्वयः । यदि तु सिद्धांतभंगप्रसंगादित्येषि नदाः नायस्यैव न तदधिकरणैरेव तदभावबुद्धिरित्युपेयतामिति भावः । अधानुगतानामधिकरणानां अननुगतध्वं
सात्यंताभावधीविषयत्वासंभवं नावेः अभावबुद्धेर्न्नमत्वापातं अनेकेषांताद्दशाभावधीविषयत्वे च गौरवं च वीत्येसेन तदा लाघवादतिरिक्तएवाभ्युपेयतामित्याह । अति
रिक्तादौ वेति । नन्विहेदानीं घटप्रागभाव इत्याकारकमेव प्रागभावप्रत्यक्षं तदेव घटो भविष्यतीत्यादिशब्देनाभिलप्यमिति तदूलादेव सामान्यलक्षणास्त्विति च रसंप राम

१७
१५४

ताना
क्रमाच्छाक्तनिराचष्टे इहेदानीमिति । शब्दप्रयोगः संभवदिषयांतरतया न ताद्दशावस्थंतरसाधकोऽन्यथाऽऽत्मादिपदादन निमित्तार्थसिद्धिः स्यादिति भावः । ननु प्रा
गभावकार्यस्यान्यथोपपादनेपि प्रत्यक्षबलादेव प्रागभावोस्त्वित्यत आह एवमिति । एवं । अत्यंताभावादिविलक्षणतया प्रागभावप्रत्यक्षानंगीकारे । ननु का
र्यानुमादकालीनाभावप्रत्यक्षस्य सामयिकात्यंताभावविषयत्वे कार्योत्तरकालीनाभावप्रत्ययोपि तथा स्यात् । तथा च ध्वंसोपि नातिरिच्येतेत्यत आह उत्पन्नो
घटध्वंसइति । तथा तत्राबाधितात्वन्निधीवलादेवातिरिक्ताभावविषयकतेत्यर्थः । न चोत्पन्नेत्यनीतेभानं वाच्यं तद्भूतविषयकत्वस्यापकमिति वाच्यं । तथा
सति घटोत्पत्तिरपि नसिद्धेत् । अन्यथानन्यथासिद्ध उपनीतभानेमपि न वस्तुसाधकं तत् एव ध्वंसोत्पत्ताविपि तुल्यं तत्प्रति यदिस्फूर्चं यत एवोत्पन्नो घट इति वदितुं न के
ननु महाप्रलयप्रयोगात्त्वं सामान्यतः पूर्वत्वं प्रागभावाधिकरणकालवृत्तित्वं घटादि पूर्वत्वं च तत्प्रागभावाधिकरणकालवृत्तित्वं तस्य च प्रागभावं विना कथमि
त्याशंक्य तत्राह । पूर्वत्वेति । सामान्यतः । पूर्वत्वं अतीतकालवृत्तित्वं अतीतत्वं च ध्वंसप्रतियोगित्वं तत्पूर्वत्वमत आह । तदुत्पत्तीति । स्वीयद्वितीयक्षणवृत्तिध्वंसप्रति
योगिप्रथमक्षणवृत्तित्वं सर्वस्यैव स्वपूर्वत्वापत्तिरतः तदुत्पत्तीति । कालोपाधिक्षणः । तेन सर्वस्यैव स्वोत्पत्त्यधिकरणमहाकालवृत्तिध्वंसप्रतियोगि कालवृत्ति
त्वपि न स्वपूर्वत्वापत्तिः स्वोत्पत्तिक्षणवृत्त्यत्यंताभावप्रतियोगिद्वितीयादिक्षणवृत्तित्वात्सर्वस्यैव स्वपूर्वत्वापत्तिरतो ध्वंसेति । घटादेरपि स्वोत्पत्तिक्षणवृत्तिध्वंसप्रतियोगिना
दौ विषयतया वृत्तित्वात्स्वस्यापि स्वपूर्वत्वापत्तिरतः समयेति । कालिकसंबंधेन वृत्तित्वलाभायेत्यर्थः । ननु प्रागभावानंगीकारे दुःखप्रागभावार्थिकतया प्रायश्चि
त्तादौ प्रवृत्तिरनुपपन्नेत्यत आह । दुःखात्यंताभावस्येति । अत्यंताभावस्य सदातनत्वेन स्वतएवोत्तरकालेनुवृत्तेः क्षणंस्थायित्वात् किमिति । ननु उत्तरकालानुवृत्तिः उत्तर
कालसंबंधः स चोत्तरकालस्वरूपोत्यंताभावस्वरूप एव नप्रायश्चित्तादिजन्यो उत्तरकालस्य स्वकारणाधीनत्वादत्यंताभावस्य चनित्यत्वादनोनवीनमत आह । दुःखना

धनध्वंसेवेति। नवीनमतदुःखसाधनध्वंसस्यैवस्वतःपुरुषार्थत्वादिति भावः। ननु यद्यपि प्रवृत्तिः सफलाप्रेक्षावत्प्रवृत्तित्वादित्यनुमानस्य दुःखसाधनध्वंस
फलकतयाऽन्यथासिद्धिः। तथापीयं प्रवृत्तिः प्रागभावफला प्रागभावेतरफलकप्रवृत्तित्वादित्यनुमानात्फलत्वेन प्रागभावः सिध्येदत आह प्रमाणेनेति। तथा च प्रा
गभावे प्रमाणेनराभावात्साध्यसाधनयोरप्रसिद्ध्या नैतादृशानुमानमिति भावः। ननु तद्घटोपधायकतत्कपालसंयोगादीनां तद्घटोत्पत्तिकालेपि सत्त्वात्पुनरपि घ
टोत्पत्त्यापत्तिः। अत एव च नाप्यप्रसिद्धिः। तद्घटद्वितीयक्षणो यदि स्वाव्यवहितप्राक्कालवृत्तितद्घटसामग्रीकः स्यात्तद्घटोत्पत्तिमान्स्यादित्याकारतानात्। प्रागभावोङ्गी
कारे च तदभावादेव न पुनस्तदुत्पत्तिरतस्तदन्यथोपपादयति उत्पन्नेति। कार्यादेरित्यादिना कार्योत्पत्तिक्षणोत्पत्तिकध्वंसपरिग्रहः। तेन निर्विकल्पकस्य चतुर्थक्ष
णे न पुनरुत्पादापत्तिः। न च तत्कालीनानां तद्ध्वंसाद्यभावानां कारणतामपेक्ष्य लाघवादेकस्य प्रागभावो हेतुः कल्प्यत इति वाच्यं। प्रागभावकल्पनेपि तत्कालोत्पत्ति
हेतुताया। कानां तत्पदार्थप्रतियोगिकानां नानाप्रागभावानां विनिगमनाविरहेण दुर्वारत्वात्। तथा च प्रागभावकल्पनागौरवं परमतिरिच्यते। अत एवाह लाघवादिति। प्राग
भावकल्पने तु धर्मिकल्पनागौरवादिति भावः। एतेन धर्माधर्मौ प्रति मिथ्याज्ञानवासनायाः कारणत्वे तत्तज्ज्ञानितो धर्माधर्मवशात्कल्पते तथा च मिथ्याज्ञानवासनाना तुल्यत्ति ५
मनंतत्वाराद्यतत्त्वज्ञानप्रागभावस्यैव धर्माधर्महेतुत्वे लाघवादिति परास्तं। आद्यतत्त्वज्ञानोत्पत्तिकालोत्पन्नानां नानातदात्मसंयोगादित्वादिप्रतियोगिकानामनेनानां प्रागभा
वानां विनिगमनाविरहेण हेतुतायादुर्वारत्वात्तेषां नानाकारणत्वकल्पनस्याविशेषे प्रागभावकल्पनागौरवमधिकं। किं चाद्यतत्त्वज्ञानकालोत्पत्तिकनाशप्रतियोगि
धर्माधर्महेतुश्वकल्पनातिरिक्तएवपदार्थः स्यात्तस्य चाभावत्वे मानाभावः। न च ध्वंसप्रतियोगित्वविशिष्टसत्त्वावच्छिन्नं प्रतिद्रव्यस्य समवायिकारणत्वादनादित्वापत्तिः
अत एव न सत्ताश्रयः सदिति वाच्यं। समानाश्रयत्वेपि सामान्यादिषु सत्त्वसंभवात्। तथा च भावत्वेनाभावत्वेन चानिर्णीतमतिरिक्तमेवपदार्थान्तरं स्यादिति जिने

रामः
२५

वेशातिनिनेश्च। अपि कारेण प्रयोजकत्वं सामग्र्यव्यवहितोत्तरकालस्य कार्यवत्त्वे नैव नियमो न तु कार्योत्पत्तिमत्त्वे नेति भावः। ननु तत्पूर्वत्वं क्षणप्रविष्टानदधिकरण
क्षणवृत्तिप्रागभावप्रतियोगि क्षणसंबंधरूपान्तरधिकरणयावत्कालप्रागभावाधिकरणकालसंबंधरूपान्तदुत्पत्तिर्विना प्रागभावं कथं निर्वाह्यते अत आह न तु स
त्तिश्चेति। तत्पदं घटादिपरं। स्वाधिकरणेति। स्वोत्पत्त्याश्रयत्वेनाभिमतं घटादि। सर्वस्यैव समयस्य विषयितया घटाद्यधिकरणज्ञानध्वंसस्याधिकरणत्वादस्येन वस्यादतः
प्रथमसमयपदं कालिकसंबंधेनाधिकरणत्वप्रापकं न तद्घटाधिकरणसमयध्वंसानधिकरणं नाविनद्घटगोचरज्ञानस्य विषयतासंबंधेनात्र व्याप्तिवारणाय द्वितीयसमय
परं। कालिकसंबंधत्वप्रापकं। ननु क्षणमिति। अवस्तुतः क्षणयोगी यस्य घटादेरित्यर्थः। अत्र च स्वाधिकरणस्थूलसूक्ष्मसमयमात्रीयध्वंसानधिकरणत्वस्य द्वितीयक्षणोत्स य ५
न्नध्वंसप्रतियोगिनि आद्यक्षणे स्थूलकालेपि च सत्त्वात्संबंधस्यैवोत्पत्तित्वे अन्यत्र क्षणपदं व्यर्थमत आह क्षणः समय इति। महाप्रलयस्वीकारे च चरमध्वंसोत्पत्ताविद
मव्यापकं स्वाधिकरणसमयध्वंसरूपकालोपाधेर्महाकालस्य च ध्वंसाप्रसिद्धेरिति भावः। तदंगीकारे। महाप्रलयोगीकारे। घटीयेति। यत्पदमुत्पत्तिमत्त्वेनाभिमत
घटादिपरं। घटीयतृतीयक्षणसंबंधे द्वितीयक्षणवृत्तिध्वंसप्रतियोगित्वाभावस्य सत्त्वाद्वितीयादिक्षणसंबंधेऽतिव्याप्तिरतः कविदिवापीति। घटीयसंबंधत्वावच्छे
देनाभावसत्त्वार्थमुपात्तं। द्वितीयक्षणवृत्तिध्वंसप्रतियोगित्वस्य घटीयाद्यक्षणसंबंधे सत्त्वात्तद्घटक्षणवृत्तिध्वंसप्रतियोगित्वाभावस्य घटीयसमयसंबंधत्वावच्छेदेन
सत्त्वान्नातिप्रसक्त्यप्रसक्तौ। भाविघटविषयकज्ञानरूपेण घटीयविषयतासंबंधे आद्यक्षणवृत्तिध्वंसप्रतियोगित्वस्य संभवादसंभवरूपस्यतः प्रथमसमयपदं। यत्र घटोत्प
त्तिक्षणेऽविनश्यदवस्थमाद्यक्षणात्मकं सर्वध्वंसाद्दृश्याकारकं ज्ञानं तत्राद्यक्षणात्मकतज्ज्ञानसंबंधस्याप्युत्पत्तित्वात्तत्राव्याप्तिः। विषयितया तज्ज्ञानवृत्तिध्वंसप्रतियो
गित्वस्य घटीयसंबंधसामान्ये एव सत्त्वादतो मध्यमसमयपदं। घटीयद्वितीयादिक्षणसंबंधे प्याद्यक्षणवृत्तिसंतानाभावप्रतियोगित्वस्य सत्त्वादसंभववारणाय ध्वंसेति। नावि
घटविषयकज्ञानवृत्तिध्वंसप्रतियोगित्वाभावस्य घटीयसमयसंबंधत्वावच्छेदेन सत्त्वानदोषविषयतासंबंधेनाव्याप्तिरतः तृतीयसमयपदं। महाप्रलयोत्पन्नावयव्यत्र नाव्या

यकानंदी त्तिः। विरमध्वंसीयसमयसंबंधस्य तत्समयवृत्तिध्वंसप्रतियोगित्वाभावादिति। ननु क्रियामात्रस्य महाप्रलयानुरोधात् ध्वंसस्य च कालोपाधित्वांगीकारे यत्र घटोत्पत्तिक्षणमारभ्य द्वि
त्रिक्षणमध्ये क्रियाया विनाशो न जातस्तत्र तद्धटीयद्वितीयतृतीयक्षणसंबंधे। क्षणत्रयात्मकस्थूलकालसंबंधे चाति व्याप्तिः स्ववृत्तिध्वंसप्रतियोगित्वाभावस्य तद्धटीयसमयसं
बंधावच्छेदेन वसत्वात्। न च घटोत्पादद्वितीयादिक्षणविशिष्टपदार्थस्य कालोपाधित्वाभावात्। प्रतिक्षणं क्रियायाविनाशाद्रसन्नभ्युपगमाद् तोगुर्वपि क्षणघटितत्वक्षणमादे नदधि सव ३
करणेति। यद्यपि स्ववृत्तिध्वंसप्रतियोगित्वाभावव्याप्यतदीयसमयसंबंधताकसमयसंबंधो निरुक्तलक्षणार्थः। ननु तदधिकरणक्षणेत्यादि वसमाणस्तथापि विशेषणानां भेदे यदि
शेष्यस्य तत्समयसंबंधस्यैक्यात् स चेति निर्देशोपपत्तिरिति भावः। तत्सदंघटादिपदं। यत्समयवृत्तिध्वंसप्रतियोगितानद्धटाधिकरणक्षणवृत्तित्वव्याप्यात्तत्समयइत्यर्थः। द्विती
यादिक्षणवृत्तिध्वंसप्रतियोगितानुतदधिकरणक्षणवृत्तित्वव्याप्या तदधिकरणक्षणेनाद्दशध्वंसप्रतियोगित्वस्य सत्त्वादिति। आद्यक्षणवृत्तिध्वंसप्रतियोगिनामपि तद
१० धिकरणस्थूलकालमहाकालादौ वृत्तेरसंभवादिति। क्षणेति। द्वितीयादिक्षणवृत्तिध्वंसप्रतियोगिनामपि चिरातीतानां तद्धटाधिकरणक्षणावृत्तित्वात्। द्वितीयादिक्षणसंबंधेऽतिव्या
प्तिरतो व्याप्येति। पूर्वोक्तरीत्या सर्वध्वंसाऽऽसाकारकं तान्यं यत्राद्यक्षणात्मकं तत्र विशेषणतया तद्भिन्नध्वंसप्रतियोगित्वस्य तद्धटाधिकरणक्षणवृत्तीनामपि सत्त्वादाद्यक्षणात्मकतान
त्व ५ संबंधे व्याप्तिरतः स्ववृत्तिध्वंसस्य कालिकसंबंधेन बोध्यं। नाविद्यरविषयकतानस्य तद्धटविषयितासंबंधेति व्याप्तिरनस्तद्वारणाय चिरमसमयपदं। ननु तदधि
करणक्षणेत्यत्र क्षणत्वं स्वजन्यविभागप्रागभावोपहितकर्मत्वं। स्ववृत्तिप्रागभावाप्रतियोगिस्ववृत्तियावत्पदार्थविशिष्टसमयत्वं वा प्रागभावं विना कथं निर्वाच्यं इ
त्यत आह। क्षणत्वं चेति। स्ववृत्तीति। स्वं क्षणत्वेनाभिमतं शब्दादिकं। स्ववृत्तिर्यो ध्वंसस्तत्प्रतियोग्यनाधारत्वमित्यर्थः। यावद्ध्वंसविशिष्टसमयत्वमात्रस्यानंगी
कारेत्वाह स्ववृत्तीति। स्ववृत्तिर्यो ध्वंसास्तत्प्रतियोगिप्रतियोगिकाः यावंतो ध्वंसास्तद्विशिष्टसमयत्वमित्यर्थः। यावद्ध्वंसविशिष्टसमयत्वे कृते महाप्रलयातिरि
क्तक्षणे व्याप्तिरतः प्रतियोगिकांतं ध्वंसविशेषणं। स्ववृत्त्यत्यंताभावप्रतियोगिप्रतियोगिकयावदभावविशिष्टत्वे। नाद्दशयावद्ध्वंसविशिष्टसमयत्वे वा तत्पेवाव्याप्तिः
यत्संताभावप्रतियोगिनोरेकस्मिन्क्षणे सत्त्वात् ध्वंसेति। एकस्मिन्क्षणे ध्वंसप्रतियोगिनोरसत्त्वादिति भावः। [illegible] ध्वंसत्वनिरूपिका प्रतियोगिता याहेति [illegible] पेरूपि १६
कपदार्थ

इदानींतनक्रियायात्मकक्षणादिवृत्त्यत्यंताभावप्रतियोग्यनागतपदार्थप्रतियोगिकध्वंसविशिष्टत्वस्येदानींतनक्रियादावभावात्। न च स्ववृत्तिध्वंसप्रतियोगिप्र
तियोगिकयावदभावत्वमेव सम्यगिति वाच्यं ध्वंसत्वस्याखंडोपाधित्वात्तत्राभावत्वस्याप्रवेशेन वैयर्थ्याभावात्। अत्र च स्ववृत्तिध्वंसस्य प्रतियोगिप्रतियोगिकयाव त्व २
ध्वंसविशिष्टत्वं च कालिकसंबंधेन ग्राह्यं। एतदर्थमेव समयपदं। तेन संवेध्वंसाऽऽसाकारकज्ञानस्यांशे क्षणावच्छिन्नस्य क्षणत्वात् विषयितया नद्धटनागतध्वंसविशिष्ट
त्वाभावेपि तत्रनाव्याप्तिः। न वा स्ववृत्तिध्वंसप्रतियोगिप्रतियोगिकयावद्ध्वंसानां विषयितया वैशिष्ट्यस्य क्षणद्वयावच्छेदेनैव तत्र ज्ञाने सत्त्वादतिव्याप्तिरिति। अत्र परत्रे च स्थि
रक्षणमेव क्रियादीनामेस। क्षणावच्छिन्नानामेव क्षणत्वं। अतः तत्क्षणोत्पन्नध्वंसघटितनाद्दशाभावध्वंसवैशिष्ट्यस्योपेत्यादिक्षणावच्छेदेनाभावादिति ध्येयं। ननु स्ववृत्तित्ववि
शिष्टध्वंसानेवयावत्त्वेन विशिष्यतद्वैशिष्ट्यस्यैव लक्षणत्वे गुरुतरांतेनानुवितइत्यत आह। स्ववृत्तियावद्ध्वंसेति। स्ववृत्तिध्वंसविशिष्टत्वस्य स्थिरक्षणसर्वदैव सत्त्वादतिव्या
प्तिरतो यावदिति। अत्रापि वृत्तित्वे वैशिष्ट्यं च कालिकसंबंधेन बोध्यं तत्प्रयोजनं च पूर्वोक्तमिति। ननु ध्वंसस्याखंडोपाधित्वानंगीकारे तन्याभावत्वं किंचित्कालावृत्तिभाव
त्वं वा विशेषणे व्यर्थं। प्रागभावानंगीकारे स्ववृत्तियावदभाववैशिष्ट्यस्यैव सम्यक्त्वादित्यत आह स्ववृत्तीति। स्ववृत्तियावत्पदार्थवैशिष्ट्यं न कस्यापि स्थिरस्य प्रतिक्षणं कस्यचिदुत्पन्न
त्वाद्विनाशाद तदुक्तेरभावेति। यावदभाववैशिष्ट्यं महाप्रलयात्मक्षणव्यापकेचरमध्वंसवैशिष्ट्यस्येदानीमभावादतः स्ववृत्तीति। समयपदव्यावृत्तिस्तु पूर्ववत्। ध्वंसक्ष
णावच्छिन्नानां स्थिराणां क्षणत्वमुक्त्वा आद्यक्षणावच्छिन्नानां तदाह स्वस्वपूर्वेति। अतिरिक्ताभावानंगीकारे स्वस्वपूर्वेति कश्चित्। तन्न। स्वपूर्वत्वं च स्वाधिकरणयावत्का
लवृत्तिध्वंसप्रतियोगित्वमिति ग्रंथविरोधात्। स्वाध्यक्षत्वेनाभिमते क्रियादिके। स्ववृत्तियावत्पदार्थवैशिष्ट्यं न कस्यापि स्थिरस्य प्रतिक्षणं कस्यचिदुत्पन्नत्वात्कस्यचिद्वि
नाशात्। एवं स्वपूर्ववृत्तियावत्पदार्थवैशिष्ट्यं न कस्यापि चिरातीतानां तत्राभावात्। [illegible] अनुपपत्तिः। स्ववृत्तिः सत् स्वपूर्ववर्तियावत्तद्वैशिष्ट्यं स्थिरक्षणमाद्यक्षणावच्छेदेन। द्वितीयादि

क्षणावच्छेदेनप्रथमक्षणवर्त्तिपदार्थानांनाशादिति ध्येयं। अत्रस्वपूर्ववृत्तित्वं वैशिष्ट्यं च कालिकसंबंधेन तत्त्वाभावसमयपदं। तेन स्वद्वितीयक्षणोत्पन्नस्य का
लिकतया स्ववृत्तेः स्वपूर्वस्मिन्ज्ञानादौ विषयितया वृत्तेश्चाद्यक्षणे तद्वैशिष्ट्याभावेपि नासंभवः। न वा पूर्वतर्वकालीनात्तत्कालीनाश्च सर्वे पदार्थाः तत्साक्षात्कारात्मज्ञानस्याप्या
द्यक्षणोत्पन्नत्वाच्चिरातीतानामेव क्षणत्पूर्ववर्त्तिनामपि विषयितया स्ववृत्तित्वात्तद्वैशिष्ट्यस्याद्यक्षणे सत्त्वेपि स्वस्वपूर्ववर्त्तिनां विषयितया वैशिष्ट्यस्य क्षणद्वयांतर्भावे
न सत्त्वेपि वाव्याप्तिरतिव्याप्तिर्वा। ननु स्वपूर्ववर्त्तित्वं स्वोत्पत्तिकालध्वंसप्रतियोगिकालवृत्तित्वं। तथा चान्योन्याश्रयः। उत्पत्तिलक्षणघटितक्षणलक्षणस्योत्पत्तिपरिच
यादत आह। स्वपूर्वत्वं चेति। स्वानंतरोत्पन्नस्य स्वाधिकरणस्य चतुर्थादिक्षणवृत्तिध्वंसप्रतियोगिद्वितीयादिक्षणवृत्तेराद्यक्षणे वैशिष्ट्याभावात् द्विक्षणवस्थापि
ज्ञानादिस्थलेपि स्वाधिकरणमहाकालवृत्तिध्वंसप्रतियोगिस्वद्वितीयक्षणोत्पन्नानां स्वद्वितीयानां वैशिष्ट्यस्याद्यक्षणेभावान्महाप्रलयातिरिक्तेव्याप्तिरतः स्वनिष्ठ
क्रियावदिति। ननु क्रियामात्रस्य कालोपाधित्वेनतत्पूर्वत्वलक्षणमारभ्य सर्वोपि वलक्षणस्यानुपपन्नानि। तथाहि। प्रतिक्षणं क्रियाया विनाशस्यानभ्युपगमात् यत्र घ
टोत्पत्तिपूर्वतनीयक्षणे क्रियायानाशो जातनघटोत्पत्तिक्षणेन आक्षणे वा तत्र घटोत्पत्तिप्राक्क्षणोत्पन्ने तत्पूर्वद्वितीयक्षणोत्पन्ने वा पदार्थे घटपूर्वत्वव्यवहारो न
स्यात्। एवं यत्र घटोत्पत्तिमारभ्य क्षणद्वयांतर्भावेन क्रियाध्वंसो न जातस्तत्र द्वितीयक्षणसंबंधे स्वाधिकरणसमयध्वंसानधिकरणेत्यादिकं। यदीयसमयसंबंधइत्या
दिकं चोत्पत्तिलक्षणमतिव्याप्तं। एवं यत्र क्षणद्वयमध्ये क्रियायान विनाशसामग्रीन वोत्पत्तिस्तत्कालोत्पन्नज्ञानादिवृत्तेन तदधिकरणक्षणवृत्तित्वघटितलक्षणमव्याप्तं
ज्ञानाधिकरणक्षणस्याप्रसिद्धेः। एवं यत्र घटादेराद्यक्षणे क्रियायानोत्पत्तिः विनाशसामग्रीवा किंतु द्वितीयादिक्षणे तत्र द्वितीयादिक्षणसंबंधेतिव्याप्तिः। एवं यदा क्रियाया
न विनाशसामग्रीनदोत्पत्तिक्षणावच्छिन्नक्षणत्वक्षणे। यदानोत्पत्तिस्तदाद्यक्षणावच्छिन्नक्षणत्वक्षणमव्याप्तं। महाप्रलयोत्पन्नो महाप्रलयक्षणे च सर्वलक्षणानामेवाव्याप्ति

राम

८७

रत आह जन्यमात्रस्यैवेति। मात्रपदं कृत्स्नार्थकं। नित्यस्य कालिकसंबंधेनाव्यावर्त्तकतयाव्यावर्त्तकत्वार्थं जन्यानामनुप्रवेशाव्यापकत्वेनेषामेव कालोपाधितायायुक्तत्वादि
ति भावः। तथा च प्रतिक्षणं कस्यचिदुत्पत्तिः कस्यचिद्विनाशइत्यभ्युपगमान्नात्र तत्र तत्र तत्तत्पदार्थानामेवोक्तरूपावच्छिन्नानां क्षणत्वान्न कोपि दोषः। महाप्रलयेपि चरमध्वंस
स्यैव क्षणत्वान्नाव्याप्तिरिति भावः। ननु क्षणत्वव्यवहारविषयो महाकालएव तथा संभवः तत्र निरुक्तस्वपूर्वत्वस्याप्रसिद्धेरत आह। जन्यमात्रस्यैवेति। मात्रपदेन नित्यव्यावृत्ति
रिति नु कश्चित्। क्षणघटितमुत्पत्तिलक्षणमाह यो यत्कालेति। यत्पदं घटादिपरं। आद्यक्षणवृत्तिध्वंसप्रतियोगिनि समये घटादेरवृत्तेः। द्वितीयादिक्षणवृत्तिध्वंसप्रतियोगि
नि चाद्यक्षणे वृत्तेर्नाव्याप्तिरतिव्याप्तिः। अत्र संबंधध्वंसादाइत्याकारकाद्यक्षणमकस्मात्ज्ञाने विषयितयाभावादिध्वंसानां वृत्तेस्तत्प्रतियोगिकालवृत्तित्वाद्धटस्य तादृशज्ञानानामकाद्य
क्षणसंबंधे व्याप्तिरतो यत्कालवृत्तीत्यत्र कालिकतयावृत्तिर्वाच्या। आद्यक्षणवृत्तिध्वंसप्रतियोगिन्यतीतज्ञाने विषयितया घटादेर्वृत्तेरसंभवरसनः प्रतियोगिवृत्तीत्यत्रापि का
लिकतया वृत्तिः। एवमतीतज्ञानवृत्तिध्वंसप्रतियोग्यवृत्तेर्घटस्यातीतज्ञाने विषयितया वृत्तित्वेऽतिव्याप्तिरतस्तत्कालवृत्तित्वमित्यत्रापि कालिकतया वृत्तित्वं वाच्यमिति। अत्र
पि क्रियामात्रस्य कालोपाधित्वस्वीकारे। यत्र क्षणद्वयमध्ये क्रियाया विनाशो न जातस्तत्र द्वितीयक्षणवृत्तिध्वंसप्रतियोगिनि घटादेरवृत्तेर्द्वितीयादिक्षणसंबंधेतिव्याप्तिरिति ध्ये
यं। एवं प्रागभावानंगीकारे। स्वानधिकरणे इत्यादि। ननु अनेन तत्पटजनकत्वादिति। न च तंतुत्वेन कार्यकारणभावे पटत्वाक्रांतायाः यत्किंचिद्व्यक्तेस्तत्र सत्त्वात्कार्यं स्वानधिकर
णे तत्पटाद्यानित्यिति वाच्यं। यथा कार्यस्य कादाचित्कत्वं कारणस्य कादाचित्कत्वाधीनं तथा कार्यस्य कादाचित्कत्वस्यापि कारणकादाचित्कत्वाधीनत्वादन्यथा तंतोर्नेष्टादीनां कार्यका
रणभावेपि सामानाधिकरण्यप्रत्यासत्त्यपेक्षान स्यात् घटत्वप्रकारकधीश्रन्येन्याश्च निततत्प्रकारकेच्छापादनस्योक्तक्रमेणैव रवेऽनसंभवादिति। नवनंतुत्वेनेति। नवतनं
तुत्वेन कारणत्वकल्पने कथमनतिप्रसंगः। तत्परत्वावच्छिन्नकारणतानिरविशिष्टया एवसामान्यसामग्र्यास्तत्सटव्याप्यत्वोपगमात्। तत्पटानधिकरणतंतुषुतत्पटत्वाव

MEMORIAL

छिन्नत्वप्रतियोगितायाश्चाभावात्। अत्रेदमवधेयं। तंतुत्वेन पटत्वेन कार्यकारणभावे पटस्य समवायेन व्याप्यता। तंतूनां तादात्म्येन व्यापकता। एवं यदा पटोत्पत्ति
सम्बन्धेन पटो वा तत्पूर्वकाले तंतुरित्येवंरूपकालिकव्यापकतापि। निव्यापकताद्वयमेव तत्र निवेश्यते। तन्तुत्वेन पटत्वेन कार्यकारणभावे तु यदा तत्पटस्तदा तंतुरित्ये
वंविधकालिकव्यापकतापि निविष्टा न तु यत्र तत्पटस्तत्र तंतुरित्येवंविधा दैशिकी व्यापकतापि तंतुभिन्नेपि तत्पटस्य समवायेन वृत्तेर्व्यभिचारात्। तत्पटानधिकरणत्वेनैतौ।
तंतुरूपसामान्यसामग्र्यां तंतुरूपविशेषसामग्रीवैशिष्ट्याभावादेव तत्पटानुपधायकत्वं। विशेषसामग्रीवैशिष्ट्यं च तत्तंतूनां तादात्म्ये। तत्तत्संयोगानां समवायप्रतिक्रमेण
स्वयमूह्यं। केचित्तु तादात्म्येन पटस्य व्याप्यतास्वानुयोगिकसमवायेन तत्तंतूनां व्यापकता। यत्र तत्पटस्तत्र तत्तंतुरित्यत्र व्यभिचाराभावात्। एवं संयोगादिकं प्रतिक्रियादीनां
कारणत्वेपि तादात्म्येन संयोगस्य व्याप्यता सामानाधिकरण्येन क्रियाया व्यापकता। एवं कालिकव्यापकतापीति सर्वत्र कारणतायां व्यापकताद्वयं निविशते इत्याहुः। स्वा
श्रयत्वेति। सामानाधिकरण्यप्रत्यासत्त्येव तस्य हेतुत्वमिति भावः। इत्थं चऽकल्पलाघवेनेत्यर्थः। अनेकत्रेति। बहुषु समवायिकारणेष्विति भावः। छिन्नं तु कपटेष्येति। तत्र तंतु
भयोरेव तत्त्वोरेकस्या एव संयोगव्यक्तेर्वर्तमानत्वेनान्यसिद्धत्वमात्रकल्पने लाघवं प्रागभावकल्पने तु धर्मिकल्पनात्र अनन्यथासिद्धत्वनियतपूर्ववर्त्तित्वयोश्च कल्पने गौ
रवादित्याशयः। तत्सिद्धिः प्रागभावसिद्धिः। प्रागभावकल्पनेपि तत्तंतूनां तंतुत्वेन हेतुत्वकल्पनस्यावश्यकत्वेन तत्त्वातिप्रसंगभंगे किं प्रागभावकल्पनयेत्याह। त्रिचतुरे
ति। असमवायिकारणसत्त्वार्थमाह संयुक्तेष्वेति। न चैवं दशातंतुकपटोत्पत्तिकालेनवतंतूनां तत्संयोगानां च सत्त्वात्तन्नवतंतुकपटः कथं नोत्पद्यत इति वाच्यं तत्र दशातं
तुकपटध्वंसस्यापि तत्त्वेन हेतुत्वात्। इदं चात्रावधेयं। दशातंतुकपटोत्पत्तिप्राक्कालेपि नवतंतुकपटोत्पत्तिर्नवनिरुद्धतरात्मकदेशान्निधाने तन्नाशे तंतरसंयोगाद्दशतंतुक
पटोत्पत्तिस्तत्काले च न पूर्वोत्पन्ननवतंतुकपटस्य पुनरुत्पत्तिस्तत्कालोत्पन्नध्वंसविशेषस्य प्रतिबंधकत्वात् तन्नाशकतत्प्रतियोगिन्याः संयोगव्यक्तेर्विशिष्य हेतु राम

१८

पा

त्वात्। दशातंतुकस्यैकतंतुत्वपकर्षणानंतरं योगनवतंतुकस्य तत्र च दशातंतुकध्वंसस्यैव तत्त्वेन हेतुत्वान्न तस्य दशातंतुकोत्पादकालेऽप्युत्पाद इति। तत्रविदितं तु कपटस्य त्रि
स्प २ तंतुकैकैकस्योत्पादात्पटसामान्योत्पादने प्रौति न थच्चेत इत्यतः तत्पटोत्पत्तीति। विनाकारणविरहमिति। तंतूनां तत्संयोगानां च तंतुत्वेन विभागीयसंयोगत्वेन वा हेतुताया
तदवच्छिन्नव्यतिरेकस्यासंभवादिति भावः। कार्यानुत्पादेऽनुगमकत्वा कार्योत्पादप्रसंगप्रयोजकमाह। सामग्रीसत्त्वे इति। प्रवेशेति। प्रवेशे कारणतावच्छेदकत्वेनान्य
थासिद्धिः। अप्रवेशे तु तत्तत्तंतूनामेव विशिष्य हेतुत्वावश्यकत्वे तत्प्रागभावस्य हेतुत्वेनेति भावः। तत्त्वकारणत्वेपि अवच्छेदकतयैव प्रागभावः सिध्येत्। अवच्छेदकत्वेपि वा
स्वतंत्रान्वयव्यतिरेकित्वात्कारणत्वं स्यादत आह। परस्परेति। कतिपयेति। तेनासमवायिकारणस्य पुंक्तिं चित्संयोगस्य सत्त्वेपि तत्पटानुत्पत्त्या तावत्संयोगानामेव विशि
ष्यहेतुत्वं वक्तव्यं तथा च तंतुत्वेन कारणत्वेपि न क्षतिरिति प्रागभावस्यावच्छेदकत्वं नेति भावः। अपनागतेष्विति। तंतुमात्रवृत्तीनामेव संयोगानां दैशिकतया तत्प्रागभावव्या
प्यत्वादिति भावः। ननु तत्पटप्रागभावाधिकरणे यः कालस्तद्वृत्तिः सन् यस्तत्पटप्रागभावानधिकरणकालवृत्तित्वाभावः तस्य तत्पटप्रागभावव्याप्यत्वं संयोगत्वेन तत्तत्त्वे। तत्रै
वसन्नतीतानागतसंयोगमादाय दोषस्तेन वः। न तेषामव्यवहितपूर्वक्षणवृत्तित्वेन तत्पटप्रागभावव्याप्यतावत्संयोगानामेवोक्तरूपावच्छिन्नत्वादत आह। तत्प
न९ टप्रागभावमिति। तथा च तत्प्राधिकरणकालध्वंसानधिकरणसमध्वंसानधिकरणकालिकतया तद्वृत्तिः सन् यस्तत्पटवृत्तिः तादृशतत्पटव्याप्यतावत्संयोगत्वेन तत्त्वात्प
वमिति भावः। अपि च तत्पटोत्पत्तिकालोत्पत्तिकध्वंसप्रतियोगिसंयोगव्यक्तिवारणाय कालिकसमयानतत्पटवृत्तित्वं। पूर्वं च तत्पटप्रागभावानधिकरणकालवृत्तित्वसंयोगवि
शेषणे। तेन तत्पटस्य तत्क्षणिकत्वमिति तुष्येयं। केचित्तु पत्रातीतानागतसंयोगानां वस्तुत्वेवनावत्संयोगानुगमकत्वेन प्रागभावः सिध्येदित्यत आह तत्पटप्रागभावमिति। न च म
त्रित्रिचतुरेष्वेव तंतुषु संयोगउत्पन्नस्तत्र तत्तन्नरेसंयोगादुत्पादद्दशायां तत्पटोत्पादप्रसंगेन ये नोक्तरूपेण तावत्संयोगानां हेतुत्वस्योक्तत्वात् त्रिचतुरेषु तंतुषु संयुक्तेषु वद्दि

त्रितंतुकादिपरस्पराणामादावश्यकत्वे संयोगनाशाधीनतन्नाशानंतरमेव दशतंतुकपटस्योत्पादेन तत्र नाशद्वयसंयोगस्य कस्यचिदनीतत्वमिति वाच्यं यत्र त्रिचतुरेषु
तंतुषु संयोगोत्पादे त्रितंतुकादिपटोत्पत्त्यनंतरं सर्वैः तंतुभिः संयोगोत्पन्नः । अथैकतंतुनाशात्त्रितंतुकस्य नाशे अवशिष्टसंयोगेभ्यो दशतंतुकोत्पादः तत्रानीतानागतसंयोगवि
रहस्य संभवादिति चेत् । ननु तत्पटस्यैव तत्प्रागभावस्याप्यस्त्वनंतयानत्वेनैव प्रवेशो कल्प्य एवमतआह । यावत्त्वेति । संयोगे यावत्त्वमपेक्षाबुद्धिविशेषः तथा च तत्प्रागभावव्या
प्यसंयोगत्रयविषयिण्या अपेक्षाबुद्धेर्विरहेणापि न तत्संयोगव्यक्तेः प्रातिस्विकरूपेणादापनं न संदर्भगोहि त्वेन नाशापेक्षाबुद्धिविशेषस्योपादानेन तदवगाहित्वानोपर
स्परं विशेषणविशेष्यभावे विनिगमनाविरहेण तावत्संयोगसमसंख्याककार्यकारणभावकल्पने त्वेति गौरवादिति भावः । आचार्यमतं दूषयति । एतेनेति । यावत्त्वि
त्वादिप्रागभावः तावत्त्वेवच्छित्वादिः । अन्यथा ध्वंसस्य समवायिनो नानैकत्वावच्छि/हधियोपि निमित्तस्य चाविशेषात्रद्धित्वाद्युत्पत्तिनियमो न स्यादित्याचार्याः । तत्रापि द्वयो
रुत्पादे परस्यानुत्पाददशायां त्रित्वाद्युत्पादापत्त्या तन्नदाश्रयाणामेव विशिष्य हेतुत्वस्यावश्यकत्वात् । द्वित्वस्थले चाधिकरणद्वयस्यैव विशिष्यान्यथासिद्धत्वद्वयकल्प
नेलाघवं प्रागभावकल्पने च धर्मिण्यन्यत्रानन्यथासिद्धत्वनियतपूर्ववृत्तित्वकल्पनेन गौरवमिति ध्येयं । आधारतानं स्वीयपरिभाषानिरूतत्वनिरूतसाधारणं । तत्कृतो ध्वंसे स
वैसाधारण्यप्रत्ययवत्प्रागभावस्य तत्त्यासस्यं नास्तिवेत्याशयेनाह । कल्प्यंत इति । नद्वेनेन । नाशप्रागभावप्रसंगबलेन । वर्णनीयमाह । अथाप्युक्तेरित्यादिना । शा
खावच्छेदेन जातस्य कपिसंयोगस्य मूलावच्छेदेनास्यं तत्प्रागभावस्यानुमानं समापन्नेः शाखावच्छेदेन संयोगात्संतानाभावो हेतुर्वाच्यः । एवं संयोगानुत्पादकाले शा
खामूलादिसर्वावच्छेदेनैव तदत्यंताभावसत्त्वात्सर्वावच्छेदेन संयोगस्यादनसंयोगस्य प्रादेशिकत्वोपपत्तये अवच्छेदकीभूतशाखादेरपि तदवच्छेदकतासंबंधेन हेतुत्वं
वाच्यं मूलादीनां शाखादेरभावादेव न संयोगोत्पादस्तदवच्छिन्ने । एवं च तदुभयहेतुत्वापेक्षया लाघवादेकस्यैव प्रागभावस्य हेतुत्वकल्पने तस्य च स्वावच्छेदेनका

र्यजनकत्वात्प्रादेशिकत्वं संयोगादीनामिति । अन्यत्रादिसिद्धे च प्रागभावे प्रागभावप्रागभावस्य धर्मिणः । तत्रानन्यथासिद्धत्वनियतपूर्ववृत्तित्वयोः कल्पनात्रयमपेक्ष्य
नियतपूर्ववृत्तित्वयोः शाखासंयोगात्संतानाभावयोरनन्यथासिद्धत्वद्वयकल्पने वलघीयसीत्यादनः प्रथमं प्रागभावप्रसंगमुपन्यस्य न च मूलाभिमुखक्रियानुः शाखावच्छेदेन सं
योगानुत्पादात् कारणाभिमुखक्रियायास्तदवच्छेदेन संयोगजनकत्वं वाच्यं तथा च तावतैव संयोगस्य प्रादेशिकत्वनियम इति वाच्यं । तदभिमुखत्वस्यैकस्याभावे न तत्र क्रियाव्यक्तेरे
वनत्वेन तत्संयोगं प्रति व्यक्तिहेतुतायां मूलाभिमुखक्रियाजन्यसंयोगव्यक्तेः शाखावच्छेदेन प्रागभावादेवानुत्पादात् शाखावच्छिन्नसंयोगं प्रति मूलाभिमुखक्रियाव्यक्ते
रेव हेतुत्वादिति । लीलावतीकारमते संयोगादेरव्याप्यवृत्तित्वाभावादाह । धारावहनस्थले इति । आत्ममनःसंयोगव्यक्तेः स्वहेतुविषयसंयोगव्यक्तेर्वा निर्देशेन स्यादेव विशिष्य हेतुत्व
कल्पनेपेक्षानतिप्रसंगः संभवतीत्यतो धारावहनपर्यंतानुधावनं । तथा च तत्सैवात्ममनःसंयोगादेश्चतुर्थक्षणपर्यंतं वर्तमानत्वमित्यर्थः । पूर्वक्षणद्वये तस्यैव प्रतिबंधकत्वात् द्वितीय
तृतीयक्षणे तद्व्यक्तिनिर्धारणे इति चतुर्थक्षणे इत्युक्तं । सविकल्पकस्य तु पूर्वोत्पन्नविशेषणज्ञानव्यक्तेस्तत्त्वेन हेतुत्वकल्पनेपेक्षावारणं संभवतीति निर्विकल्पकपर्यंतानुधावनं । क्षणादि
शोषस्य हेतुतानुपगमे तु एककारणविशेषापत्तिरिति भावः । ननिर्विकल्पकस्यांतोद्भयनयानत्प्रागभावस्यापि तथात्वमिति कथं प्रसक्तोपपदं नेनतस्य हेतुत्वमिति वाच्यं निर्विकल्पकस्या
योग्यत्वेपि संबंधितावच्छेदकप्रकारकज्ञानादेवाभावप्रत्यक्षोपपत्तेः प्रागभावस्यानप्रागभावत्वादिरूपेण प्रत्यक्षत्वोपगमादिति । उत्तरत्रान्याभावस्येति । नचैवं चमक्षणे आपत्ति
कनिर्विकल्पकापत्तिः । आपत्तिकनिर्विकल्पकध्वंसावच्छिन्नत्वानस्य नाशध्वंसस्य वा प्रतिबंधकत्वेन तस्यर्थात् । लाघवात्कारणतावच्छेदकल्पनापि रूपात् कस्य प्रागभावस्य कारणता कल्प
नेलाघवात् । अथाप्याश्रित्वस्यत्वेः वच्छेदकीभूतशाखादेः कारणत्वाकल्पनेलाघवं सूचयति । तत्स्वभावाधीनाक्षेति । अत्रेरमरुचिबीजं । उक्तरूपेण प्रागभावस्य प्रत्यक्षत्वं नास्ति ।
न चैवं संयोगस्य निर्विकल्पकस्य वर्तमानक्षणोत्पत्तिकतदवच्छेदकावच्छिन्नध्वंसविशेषादेर्वा प्रतिबंधकत्वे विनिगमनाविरहादितातिरिक्तप्रागभावकल्पनं । एतावतातिरिक्तपदार्थ

सिद्धावपि तस्याभावत्वे मानाभाव इत्यादिकमिति। सर्वत्रेति। बहुसमवायिकारणकद्रव्यस्थले इत्यर्थः। अयं भावः। दशतन्तुकपटादौ चरमतन्तुसंयोगसमानकालोत्पन्न
स्यात न ईश्वरापेक्षाबुद्धिजन्यैव दशत्वसंख्याविशेषस्य सामानाधिकरण्यप्रत्यासत्त्या तत्त्वेन हेतुताभावे तन्तुत्वानधिकरणेऽनुत्पत्तेरस्य नोत्पादः। नञ्चनां तन्तुसंयोगानां च
तन्तुत्वेन विजातीयसंयोगत्वेनैव हेतुत्वे ननु तद्घटितत्वेनापि। कतिपयसंयोगानुत्पाददशायामपि नाशसंख्याव्यक्तिव्यवहारादेव तत्समयानुत्पादसंभवादित्याशयेनाह।
वेध अभ्युपगमेनैनेति। एवकारेण न संयोगानां विशिष्यहेतुतानिरासः। न चैवं यत्र चरमतन्तुसंयोगमादाय पूर्वमेव नाशसंख्याविशेषो जातः तद्दशायां तत्पटोत्पत्तिप्रसानसंयोगानां
विशिष्यहेतुत्वमावश्यकमिति वाच्यं ईश्वरापेक्षाबुद्धिजन्यसंख्याविशेषस्यानीतियत्या फलबलेनैव कल्पनेन चरमसंयोगकाल एव तदुत्पादकल्पनात् इत्थं च यत्र चरमत
न्तुयमिद्वितीयक्षणे एव संयोगोत्पादस्तत्र तेन समवायिकारणभावेन संख्याविशेषानुमत्यावपि तत्परक्षणे द्वित्वादिसंख्योत्पत्तेरमेव ताद्वशद्व्योत्पादइत्येवं रूपे
ण तत्र द्व्योत्पादनियमः संभवतीत्यर्थः। युगपदिति। क्रमोत्पन्नेत्यपि च समवायिनोऽनुत्पाददशायामपि समवाय्यसमवायिनिमित्तानां प्रागभावस्य च सत्त्वात्कार्या
पत्त्याप तिरस्तत्र तत्समवायिनां तत्तद्व्यक्तित्वेन हेतुताया आवश्यकत्वे तत एवातिप्रसङ्गभङ्गेन तत्प्रागभावस्याकल्पनादिति भावः। केचित्तु क
मोत्पत्तिस्थले प्रथमोत्पन्नानां द्वित्वादिकं चरमोत्पन्नस्यैकत्वमनयोर्विशिष्यकारणत्वेनैवातिप्रसङ्गो न संभवतीति युगपदित्युक्तमिति व्याचक्रुः तेषु युगपदुत्पन्नस्य
त्रिद्वित्वोत्पत्तौ द्वयोरेवाधिकरणयोस्तत्त्वेनान्यथासिद्धत्वद्वयकल्पने लाघवं प्रागभावकल्पने च धर्मतन्तन्यथासिद्धत्वनियतपूर्ववृत्तित्वानां त्रयाणां कल्पने गौरवमतो द्वि
त्वमुपेक्षित्वादीत्युक्तं। तत्र त्रित्वस्थले त्रयाणां समवायिनां तदेकत्वानां प्रत्येकं तत्त्वेनान्यथासिद्धत्वत्रयकल्पने विनिगमनाविरहेण प्रत्येकं दयाद्धि द्वित्वादौ लाघवं त
त्र बहुत्वे समवायिनां तत्त्वेनान्यथासिद्धत्वचतुष्टयकल्पनामपेक्ष्य प्रागभावकल्पनात्र यत्स्थल एव त्वादिति भावः। नवापेक्षाबुद्धौ द्वितत्त्वेन हेतुत्वान्ज्ञानित्वसे टम

२०

गः एकस्यापि एव ईश्वरापेक्षाबुद्धेर्द्वित्वादिपरार्द्धपर्यन्तोत्पादकत्वात्। न च तत्र व्याप्यसमदादेरेकत्वद्वयमात्रज्ञाने द्वित्वाज्ञाने त्रित्वाद्युत्पादात्तदेकत्वत्रय
ज्ञानत्वेन तत्त्रित्वप्रतिकारणत्वावश्यकत्वमिति वाच्यं एवमपि अस्मदादिनाशस्तानाविषयुगपदुत्पन्नादिस्थले ईश्वरयोगिमात्रतादृशज्ञानविषया
पेक्षाबुद्धेस्तथा कारणत्वकल्पनापेक्षया एकस्याएव प्रागभावस्य कल्पनस्थलद्धुत्वादिति भावः। अत्रेदमवहितव्यं। नाशत्रित्वादिकं प्रति त्रित्वादिक
मेवोपलक्षणीकृत्य समवायिकारणतावच्छेदकं त्रित्वाश्रयमात्रवृत्त्यन्यतमत्वं वा तत्प्रागभावकल्पनेन तत्पनघटित्वेन हेतुत्वकल्पनाभावमात्र्य क्रमेऽपि त
त्तावच्छेदकत्वसंभवात् एवं वनित्यद्रव्ये त्रित्वादिमत्प्रतियोगिकानन्तप्रागभावकल्पनामपेक्ष्य लाघवात्तावन्मात्रव्यक्तेरेकस्याएवैतद्व्यक्तेः कारणतावच्छेद
कत्वकल्पनमेव त्रित्वायुत्पादनियमसंभवादिति। तदुपस्थितिमिति। इच्छोपधायकत्वात्तत्तुपधायकेच्छाव्यक्त्युपस्थितिरिति। नचेति। इच्छाकाले तात्पर्यकं कालेऽवधा
याः साक्षात्कार इत्यर्थः। संस्काराद्युत्पादकाले ज्ञानादेरुत्पादाभ्युपगमात्। योग्येति। योगपद्यं युगपदुत्पत्तिः। निषेधादिति। तथा च तदन्यथानुपपत्त्या योग्यविशे
षगुणसामग्र्याः स्वेतरतादृशगुणोत्पत्तिप्रतिबन्धकत्वं कल्प्यते इति भावः। ज्ञानायेत्यरेति। इच्छाकृत्युपधायकभिन्नसाक्षात्कार इत्यर्थः। फलोपधायकव्यक्तित्वेन
विनायमक्तत्वेन दुत्तरक्षणे यत्समचमित्यन्वयदलस्य कारणतायाहकस्य ग्रहासंभवः। नकुहः सामान्यलक्षणाग्रहत्वेनापि न संभवतीत्याशयेनाह पौर्वापर्येति। का
रणत्वग्रहासंभवादिति। अवश्यमनुमेयत्वादिसत्यहेतुः इच्छाकृत्योरनुमादेति। इच्छानुत्पादस्थले ज्ञानस्य कृत्यनुत्पादस्थले चेच्छायाः साक्षात्कारादित्यर्थः। इदं च व्य
तिरेकग्रह इत्यत्र हेतुः। एवं च सामान्यलक्षणया फलोपधायकव्यक्तिषु हेयिपौर्वापर्यग्रहानन्तरं तानेच्छाव्यतिरिके हृस्वे इत्थं नियतव्यतिरेकग्रहात्समानादिना पौर्वापर्यो
पस्थितेर्मनसा कार्यकारणभावग्रहस्यावश्यानुपेयत्वे किं स्वरूपतः फलोपधायकव्यक्तिग्रहेणेत्यर्थः। अनुपेत्य फलोपधायकव्यक्तेरपि ज्ञानमन्यथोपपादय

ति। कृत्यनुमादेति। नयाचात्रसानेघयोरन्वयपरहोपि संभवतीति भावः। इच्छाकृत्योरप्यन्वयग्रहमाह। कृत्यनंतरमिति। नचेच्छात्वकृतित्वनिर्विकल्पकका
लेन वेच्छाया नाशो कथं ताद्दशेच्छात्वादिनान्वयग्रह इति वाच्यं। निर्विकल्पकालकोपसंहकारे लेच्छात्वविशिष्टोपनीतज्ञानकृतित्वविशिष्टलौकिक
प्रत्यक्षात्मकज्ञानोत्पादाद्विशिष्टबुद्धौ विशेषणधियो हेतुतानभ्युपगमाच्च। अतएव पूर्वं निर्विकल्पकमपि खंडितं। इत्थं च घटमिच्छाकरोमीत्येवमिच्छा
यनुव्यवसायः इच्छात्वांशे विशेष्ये विशेषणमित्येवंरूपः घटांशे च विशिष्टवैशिष्ट्यधीरूप एव विशेषणतावच्छेदकघटत्वप्रकारकगुणस्येच्छा
देःसत्त्वादिति ध्येयं। यद्यपि यत्र ज्ञानलेच्छात्वकृतित्वोपस्थापनत्वादेरुपनीतज्ञानात्मकमपेक्षाबुद्धिरूपं चोपादानं घस्य कृतं तत्कृत्यनंतरं त्र्याणमेव
विशिष्टप्रत्यक्षात्मकारः संभवति। तथाप्यपेक्षाबुद्ध्यनंतरमिच्छादेकत्वेनो नेनेव नस्य विनाशान्न रूपत्रयावस्थायित्वमेव नस्यादतोऽपेक्षाबुद्ध्यनंतरमिच्छा
दिके नाप नष्ट इति मनेनैवं प्रकारः संभवतीति तदुपेक्षितानकृतिकार्यकारणभावग्रहे प्रकारांतरेणान्वयग्रहमाह स्मरणेनैवेति। घटस्मरणं घटत्ववि
शिष्टधीजन्यं घटत्वविशिष्टस्मृतित्वात् इत्येवं क्रमेणान्वयः। ज्ञानयोरेव योगपद्यं नेष्यत इत्याशयेनाह। विशास्येति। तथा चेच्छाकाले ज्ञानस्य कृतिकाले च
आयाश्च प्रमाणाकारोपि नानुपपन्न इत्यर्थः। ननु सकलगोसमवेतत्वघटितस्य गोत्वलक्षणस्य विना सामान्यलक्षणां प्रत्यासत्तिं न रूपं लक्षोत्वलिंगकानुमितिर्न
स्यादिति चेन्नित्यमनेनैवं निराचष्टे गोत्वे चेति। विशेषितमिति। गोपदप्रवृत्तिनिमित्तत्वे साध्ये तादात्म्येन गोत्वस्य हेतुतायां विशेषितं। न च गोरूपादेर्व्यभिचारवारणा
य प्रतियोगित्वांतं सयत्वादौ नद्वारणाय समवेतत्वं। मनादौ तद्दोषवारणाय विशेष्यमिति। न च गोत्वस्यापि संयोगादिसंबंधावच्छिन्नगोनिष्ठत्वेत्यभावप्रतियो
गित्वादे समवायेन गोनिष्ठात्यंताभावप्रतियोगित्वं वाच्यं। तथा च मेयत्वादेः समवायेन गोनिष्ठाभावप्रतियोगित्वाभेनेव वारणे समवेतत्वं व्यर्थमिति वाच्यम्

राम

२१

र्थस्यैव विशिष्टाभावादिप्रतियोगित्वेन निरुक्तस्याप्रसिद्धा समवायेन प्रतियोगिताश्रयव्यधिकरणत्वस्याभावविशेषणावश्यकत्वे मेयत्वाद्यभावस्य स
मवायेन गोनिष्ठस्वप्रतियोगिव्यधिकरणप्रसिद्धप्रतियोगिव्यधिकरणघटताभावप्रतियोगित्वस्य मेयत्वादावसत्त्वेन व्यभिचारावश्यकत्वात्। अविशेषि
तमिति। सास्नादौ साध्ये। तत्र गवेतरासमवेतस्यापि गोत्वस्य कालादौ हेतुसाव्यभिचारात् समवायेन हेतुतायां अवश्यं वाच्यत्वेन तादृशाप्रतियोगित्वस्य समवेत
त्वस्य चानुपादानादिति भावः। सामान्येति। यासज्यवृत्तिधर्मस्य साकल्यस्य गोत्वसामान्यलक्षणायाग्रहात् तु मशाक्यत्वादिति भावः। समानप्रकारतामात्रेति
मात्रपदेन विषयत्वव्यवच्छेदः। ननु कीदृतज्ज्ञाना विषयस्यापीच्छाविषयत्वे इच्छामात्रस्यैव सर्वविशेष्यकत्वस्यादिति भावः। ननु यत्र रजतत्वप्रकारकेच्छा तत्र त
त्प्रकारता घटकसंबंधे स्वप्रकारीभूतरजताश्रयत्वसंबंधेन ज्ञानमिति क्रमेणैव कार्यकारणभावोपि विषयतानियामकः स्यादित्याशंक्य निराचष्टे नाहरोमि
त्यनकज्ञानप्रकारीभूतरजतत्वाश्रयेणेत्यर्थः। नद्दृश्याद्यभ्युपगमे। रजतत्वप्रकारकेच्छोत्पादाभ्युपगमे। कथमरजतेति। इदं रजतमिति ज्ञानाद्यत्र रजतत्वप्रका
रिकाशुक्तीच्छा तत्र व्यभिचारान्नताद्दशकार्यकारणभावइत्यर्थः। ननु तत्र रजतत्वांशे संसर्गाग्रहणेव रजतत्वप्रकारेच्छायां विषयतानियामकोऽस्त्वत आह। अनु
पस्थितेश्चेति। उपसंसर्गाग्रहस्यानुपस्थितेः रजतेयरादौ चतुल्यत्वान्नरजतमात्रविषयकज्ञानात् घटादावपि रजतत्वप्रकारकेच्छास्यादिति भावः। यद्यपि प्रमे
यत्वादिना उपस्थितेप्यसंसर्गाग्रहोत नियामकः इत्यनुपस्थितः इत्युक्तं तथाप्यन्यथा संनेगौकर्तव्ये इदं रजतमित्याकारकव्यवहारजनकोपस्थितिविशे
षविषयेतदसंसर्गाग्रहस्य तद्विषयत्वनियामकत्वं संभवतीति तत्प्रायवर्तनामानुपस्थितइत्युक्तं। ननु रजतत्वप्रकारेच्छायां संसर्गाग्रहो नासंसर्गस्य निखिलस्यैवाबा
धयत्वेपि कृतिविरहः उपादानप्रत्यक्षाभावादेव तत्र प्रवृत्त्यभावोपपत्तेरत आह वस्तुत इति। नद्विषयकरजतत्वप्रकारकेच्छायां तदग्रहो नासंसर्गकरजतत्वप्रका

भावानंदी

रकज्ञानत्वेनहेतुत्वंलाघवात्कल्प्यं। रंजनत्वप्रकारकज्ञानत्वेन वा कारणत्वं कल्प्यतां। असंसर्गाग्रहस्य सहकारित्वकल्पनां चापेक्ष्य तद्विषयकरजतत्वप्रकारकज्ञानत्वेन
तद्रूपेति भावः। कथं नियामकत्वेन दर्शयति। सामान्यत इति। तत्प्रकारकत्वं रजतत्वप्रकारकत्वं। लाघवादसंसर्गादेरवच्छेदकत्वे हेतुत्वं चापेक्ष्य लाघवात्। नन्वेवं रज
तत्वप्रकारकत्वस्य तद्विषयकत्वस्य च परस्परं विशेषणविशेष्यभावे विनिगमकाभावात्कारणताद्वयस्यावश्यकत्वे असंसर्गाग्रहस्य हेतुत्वमपेक्ष्य लाघवं। किंच रज
तत्वप्रकारकज्ञानस्य सुखत्वप्रकारकज्ञानस्य च विशेष्यभेदे तद्रूपं विशिष्य कारणताभेदः स्यादत आह। अलमिति। अतिप्रसंगेनेति। अतिप्रसंगो एकपुरु
षस्य रजतत्वप्रकारकज्ञानादन्यस्य रजतत्वप्रकारकेच्छापत्तिः। एवमेकविषये रजतत्वप्रकारकज्ञानसत्त्वे विषयान्तरे रजतत्वप्रकारकेच्छापत्तिः रजतत्वप्र
कारकस्यामेव कारणतायामनुनयं प्रत्यासत्तिः। तथा च यत्रात्मनि ज्ञानं समवेतं यत्र विषये रजतत्वप्रकारकं तदात्मसमवेतानां विषयतासंबंधेन तत्र विषये र
जतत्वप्रकारिकामिच्छां जनयतीति भावः। न च समानप्रकारकत्वमेव प्रत्यासत्तिरस्तु समानविषयत्वं तु कारणतावच्छेदकमिति वाच्यं। तथा सति सुखव्यक्तिभे
देन सुखत्वप्रकारकत्वस्य विशेष्यभेदे न च कार्यकारणभावस्यानंत्यं स्यात्। किंच सुखस्य प्रमेयत्वादिना ज्ञानेऽपि इच्छाविरहात् सुखदुःखाभावत्वादिप्रकारकम
तः समानप्रकारकत्वस्य न प्रत्यासत्तित्वमिति। ननु विषयतासंबंधस्य हेतुत्वे नियामकत्वेन न तदवच्छिन्नप्रतियोगिताकाभावात् तेन संबंधेन व्यापकत्वं त
था च कथं प्रत्यासत्तिरत आह। असंसर्गाग्रहादेरिति। यत्तु रजतारजतयोरिमे रजतारजते इति समूहालंबनात् रजतत्वप्रकारिकेच्छा सर्वत्रैव स्यात् समानवि
शेष्यकप्रत्यासत्तेरस्तीत्यादिरिति। असंसर्गेति तत्र रजतत्वप्रकारितानिरूपितविशेष्यतासंबंधेन यत्र ज्ञानं तत्र तत्प्रकारिकेच्छा इत्येवमुक्तौ दोषाभावादिति।
यद्यपि यत्र चैत्रस्य रजतत्वप्रकारकं ज्ञानं रजते मैत्रस्य च मुक्तौ तत्रैव चैत्रस्य मुक्तावपि रजतत्वप्रकारकेच्छापत्तिः विषयतासंबंधेन मैत्रीयस्य रजतत्वप्रकारक राम

२२

ज्ञानस्य तत्र सत्त्वात् चैत्रीयस्य तदात्मनि समवायेन सत्त्वादिति। तत्र प्रत्यासत्त्यवच्छिन्नैककारणतायामुक्तातिप्रसंगस्य दूरपरास्तत्वादिति। न हि विषयत
या रजतत्वप्रकारकेच्छायां विषयतया यस्य कस्यापि तत्र रजतत्वप्रकारकं ज्ञानं सहकारि येन मा भूत् सहकारिवशात् यत्किंचिद्धर्मिकस्वीयरजतत्वप्रकारकज्ञाने
नान्यत्र रजतत्वप्रकारकेच्छापत्तिः स्यात्। परं तु यत्रैकं रजतत्वप्रकारकं ज्ञानं विषयतया प्रत्यासन्नं यत्र आत्मनि समवायेन स्थितं तत्र विषये रजतत्वप्रकारिकामिच्छां ज
नात्मसमवेतां जनयतीति। अन्यथा परामर्शस्य सामानाधिकरण्यप्रत्यासत्त्याप्यनुमितिजनकत्वे उक्तातिप्रसंगः स्यात् अधिकरणपरामर्शस्य कालिकतयाना
स्य परामर्शस्य समवायेन प्रत्यासन्नत्वात् अधिकरणपरामर्शसत्त्वेप्यनुमित्यापादनसंभवादिति न किंचिदेतत्। समानविषयत्वस्येति। तथा च तद्विषयकरज
तत्वप्रकारकेच्छां प्रति तद्विषयकरजतत्वप्रकारकधीत्वेन कार्यकारणभावोपि विशिष्य भेदेन भिन्न इति भावः। समानप्रकारकत्वस्याप्यवच्छेदकत्वात्। कोटि
मिति विवेचयिष्यते। नापि नात्प्रत्यासत्तित्वं समुच्चितं। ननु समानविषयत्वस्य प्रत्यासत्तित्वे रजतत्वप्रकारकज्ञानत्वस्य कारणतावच्छेदकत्वाविशेषात् कथं यथार्थ
त्वायथार्थत्वरूपकार्यवैलक्षण्यं। अन्यथा नेतु दोषाभावेन दायग्रहापात्मकसहकारिवैलक्षण्यान्नदुपपत्तिः स्यादत आह कारणेति। तथा विधः यथार्थत्वायथा
र्थत्वरूपः। एतेन यथार्थत्वायथार्थत्वनियामकत्वेन तत्प्रकारकं रजतत्वप्रकारकं। दोषाभावसहितमिति। तेन रजतत्वप्रकारकज्ञानाद्युक्तौ न संके
दिनो छायां तत्र दोषस्यैव सत्त्वादिति भावः। उपस्थितेनेति। उपस्थितं यद्रजतं तत्र योः रजतभेदाग्रहस्तत्सहितमित्यर्थः। त्वदिशापीति। यथा उपस्थिता रजतवृत्तित्व
विशिष्टरजतभेदाग्रहाभावादनुपस्थिते रजते रजते वा न विसंवादिनी च्छा तथा उपस्थितं यद्रजतं तद्वृत्तित्वविशिष्टभेदाग्रहस्य हेतुत्वकल्पनमपेक्ष्यानुपस्थिते
रजते रजते वा संवादिनी च्छा नावोपपत्तौ न दोषाभावस्य गुरोः कारणत्वे कल्पमपि नु मुच्चितमिति भावः। तथा चानुगत रजतोपस्थित्यर्थमपि सामान्यलक्षणावश्य

DR. BHAU DAJI MEMORIAL

कीतिहृदयं। नेदाग्रहस्यैवैसैव कारेण दोषाभावव्यवच्छेदः दोषाभावापेक्षया लाघवं दर्शयति। दोषाणामिति। रजतभेदग्रहेति। दोषाणामानेत्यानन्त्ये
नन्तदभावानरहेतुत्वकल्पनेऽनन्तकार्यकारणभावापत्तिः रजतभेदग्रहप्रतिबंधकाभावत्वेन हेतुताया अथा तथा च तदपेक्षया रजतभेदाभावग्रहत्वेन हेतुत्व
मुचितमित्युचितमित्यर्थः। न च भवतामपि रजतत्वाभावादिग्रहाभावस्यापि विनिगमनाविरहाद्धेतुत्वं स्यादिति वाच्यं रजतत्वाद्यंशे न्याप्रकारकरजतत्वप्रकार
केधांशे तिरजतत्वाभावग्रहस्याविरोधित्वात्। तथात्वेपि अभावद्वयकारणतामपेक्ष्य लघुदोषाभावस्य गुरुत्वादिति। लघुत्वादिति। इदमुपलक्षणं। दोषाभा
वस्यात्मनिष्ठतया हेतुत्वे रजतरूपीः रजतत्वप्रमाप्रमाद्रजते संवादिनीच्छा न स्यात्। विषयतया हेतुत्वे च रंगे रजतत्वभ्रमकाल्पनुपस्थितेऽपस्थितेवा घटो
दौ नाच्छा दोषाभावस्य सत्वात्। संवादिन्यार रजतत्वप्रकारिकेच्छा स्यात्। एवं संवादिन्यामुपस्थितारजतत्वे न गृह्यहस्यहेतुत्वेपि यथाकथंचिदुपस्थितारजतभे
दाग्रहसत्वात्तादृशेच्छापत्तिः स्यात्। दोषप्रयोज्यभेदाग्रहस्य हेतुत्वे दोषस्याननुगमात् अननुगमतादवस्थ्यमेवेत्यादिकमूह्यं। सिद्धेएवेत्येवकारेणानागतव्य
वच्छेदः। ननु सिद्धत्वस्येच्छाविरोधित्वात् कथं सिद्धेइच्छेत्यत आह। लाघवादिति। नन्वेकारावच्छेदेनेति। यत्किंचित्सुखेसुखत्वसामानाधिकरण्येन सिद्धत्वग्रहेपि सु
खत्वावच्छेदेन सिद्धत्वग्रहाभावो वर्त्तत एवेति भावः। ज्ञानमेवेति। ननु सिद्धत्वमपीत्येवकारार्थः। स्वरूपसिद्धत्वस्येच्छाविरोधित्वेप्यनागते सिद्धत्वज्ञानकाले
रच्छानुदयात्सिद्धत्वज्ञानस्याविरोधित्वमावश्यकं तथा च कल्पनालाघवात्तस्यैव तथात्वमन्न ननु स्वरूपसिद्धत्वस्येति भावः। ननु। सुखत्वावच्छेदेन सि
द्धत्वज्ञानं प्रकृते सिद्धसुखे। सिद्धत्वं नेच्छाविरोधि इत्यत्र युक्तिमाह। कथमन्यथेति। अन्यथास्वरूपसत्सिद्धत्वस्य भिन्नरूपेण सिद्धत्वज्ञानेऽप्येच्छाविरो
धित्वे। प्रोषितस्येति। का नाम रणज्ञानस्येच्छा। तामन्या संघटनाय च। यद्यपि बोधितेपीच्छा दयाज्ञानकान्तामरणनामपीच्छा न वत्सैव न थापि बाधनिश्च राम

२३

यस्य प्राते बंधकत्वमभ्युपेत्याह। ज्ञानकान्तामरणस्येति। अपसिद्धे कान्तान्तरावलोकनेच्छानानुपपन्नेत्यतः तत्कान्तेति। अतिरिक्तस्य। सिद्धत्वेन ज्ञानादतिरिक्त
स्य। न च तत्र तत्कान्तावलोकनत्वेनानागतेपदार्थेच्छाविषयः स्यादिति वाच्यं। तत्कान्तावलोकनत्वेन यदा विच्छेदप्रायकदोषाभावात् अनागतानंतपदार्थेन
दच्छाविषयत्वकल्पनामपेक्ष्य तत्कान्तावलोकनत्वेन तत्ततकृतिपर्यावलोकनएवेच्छाविषयत्वकल्पने लाघवादिति। लाघवादसिद्धत्वज्ञानमेवेति। यद्यपि भि
न्नत्वेनासातसिद्धत्वनिश्चयापेक्षया भ्रमत्वेनानिश्चीयमानासिद्धत्वज्ञानमेव लघु तथापि यत्र विषयविशेषे भ्रमत्वेनाज्ञाते एवासिद्धत्वे सिद्धत्वज्ञानं तत्रोक्तला
घवस्योक्तत्वादिति। विशेषरूपावच्छेदेन। तत्तत्सुखत्वादिना। सामान्यरूपेण सुखत्वादिना। नासिद्धसुखे। सिद्धत्वप्रकारकं ज्ञानमेकं ज्ञानद्वयं वेतित्साधारण्याप
त्वतंत्रोपस्थितासिद्धत्वस्यासंसर्गाग्रह एवान्यथा रवाल्पनंगकत्रीकारणं वक्तव्यमिति भावः। नन्वेवं संसर्गाग्रहमात्रेणेच्छाभ्रमत्वसंभवे सप्रकारकभ्रमस्य तमात्रस्यैव भ्र
मत्वापातः इत्यतो दोषविशेषाणामपि हेतुत्वं वाच्यं तथा च यत्र सिद्धे सिद्धत्वभ्रमजनकदोषाभावतत्रेच्छानस्यादतो सिद्धत्वप्रमोत्पादाय सामान्यलक्षणा वा च्या
इत्यत आह। सामान्यलक्षणेति। सुखत्वसामान्यलक्षणया यावत्सुखगतो सिद्धसुखत्वैस्य सुखत्वेन ज्ञानं भवतु तदसिद्धत्वज्ञानं कुतः इति भावः। ननु सुखत्वेनोपस्थिते अनागत
सुखे सुखं वर्त्तमानप्रागभावप्रतियोगिवर्त्तमानकालावृत्तित्वे सति अतीतकालवृत्तित्वादित्यनुमानादसिद्धत्वं सुग्रहमेवेत्यत आह वक्ष्यतीति। तत्कालवृत्तिप्रागभावप्र
तियोगित्वरूपस्यैतत्कालप्रतियोगिकध्वंसाधिकरणक्षणोत्पत्तिकत्वरूपस्य वाऽसिद्धत्वस्य पक्षधर्मताबलात्सिद्धिसंपादनाय [illegible] यमिति। अनागतसुखादेरपि वर्त्तमा
नध्वंसादिस्वरूपाभावप्रतियोगित्वादसिद्धत्वस्वरूपत्वान्नायमाधेय प्रागभावपर्यंतं प्रागभावत्वमखंडोपाधिरतो नानुगमः। प्रागभावेमानाभावेत्याह सुखोत्पादेति।
सिद्धसुखस्यापि स्वद्वितीयक्षणवृत्तिध्वंसप्रतियोगिप्रथमक्षणवृत्तित्वादसिद्धत्वस्वरूपत्वेनानस्यादत आह उत्पादेति। अतीतसुखोत्पादाधिकरणस्थूलकालहेति

भावानंदी

ध्वंसप्रतियोगित्वमाशयउद्देश्यासिद्धिवारणाय कालपदं हृणपरं। न चैवं नैःहृणस्य च स्वत्वघटितत्वात् सिद्धसुखीयसिद्धसुखीयानि साधारणस्योत्पत्तित्व
स्यन्तरधिकरणे हृणसाधारणस्य हृणत्वस्य चैकस्याभावात् कथं व्याप्तिग्रह इति वाच्यं स्वोत्पत्तिहृणहृत्तित्वसंबंधेन कालिकतया स्वावच्छिन्नत्वसंबंधेन वा सुखवि
शिष्टो यो ध्वंसस्तत्प्रतियोगित्वस्यानुगतत्वादिति। इदानींतनत्वेनेति। महाप्रलयास्तु पगमे वा हृणनाशेनेति। इदानींतनत्वस्यावाधिकरणत्वेनार्थः। अत्र्येपांसहृणयो
र्भिवारवारणाय। ननु नागतसुखप्रागभावव्यापकत्वात् नानाकथं तदनुमितिरत आह। निपुणतरमिति। सुखप्रागभावत्वेन सिद्धसुखप्रागभावस्य व्यापकत्व
ज्ञानात् सिद्धसुखप्रागभावस्यापि पक्षधर्मताज्ञानात् अनुमितौ ज्ञानं समानप्रकारकत्वस्य नियामकत्वात् अनागतप्रसंग इति भावः। शब्दमणिदीधितावितिं। अनागतया
कानुमानप्रस्तावे इति भावः। ननु प्रमेयत्वादिना घटत्वप्रकारकनिश्चयसत्वात् कथं घटत्वप्रकारकसंशय इत्यत आह। संशयसमानाकारको हीति। न केवलं स
मानस्य प्रकारत्वं किंतु प्रकारतापीति बोध्यमिति भावः। कोटितावच्छेदकघटत्वेति। घटो न वेति संशये नाशस्मिन्नेव घटस्य कोटित्वात् घटत्वं कोटिताव
च्छेदकमिति भावः। तथा। कोटितावच्छेदकघटत्वांशे निःप्रकारकः। तत्र प्रमेयत्वस्य घटत्वांशे प्रकारत्वादिति भावः। अतएव समानप्रकारकनिश्चयस्यैव वि
रोधित्वादेव। नन्वेवं तदंशे घटत्वप्रकारकत्वात् घटत्ववानिति निश्चयोपि तत्संशयविरोधी स्यादत आह घटत्ववानितीति। घसमानतासंदेह
मिति। नत्कोटिसंदेहे प्रतितद्व्याप्तिविशिष्टस्य दर्शनं यथा विशेषदर्शनं तथा विशेषितथात्तदव्याप्तिस्वविशिष्टस्यापि दर्शनं यावत्तत्कधर्म
दर्शनविधया विरोधीत्यनुभवबलाद्दास्थीयत इति भावः। यद्यपि नाशस्मिन्न घटकोटिकसंशये पि घटेतराहृत्तित्वविशिष्टधर्मत्रुत्ता नंबाप्यदर्श
नमेवेति स्वातंत्र्येण विरोधित्वप्रदर्शनमनुचितं तथापि ताद्रात्म्येन घटो न कोटिः किंतु घटभेदतदभावौ स्वरूपसंबंधेन कोटी तत्रापि घटेतराहृत्ति राम

२४

भवानंदी

त्वविशिष्टधर्मज्ञानस्य विरोधित्वप्राप्त्यर्थं तत्रोक्तं। अतएव यत्र केनापि प्रकारेण व्याप्यदर्शनं तत्र न संशय इति तदर्शनं ग्रतनयति। पुरुषाद्यमीति। घट इति निश्चयं प्र
तीति। निश्चयपदं ज्ञानसामान्यपरं। निश्चयत्वस्य कार्यतानवच्छेदकत्वात् घटइत्याकारकसंशयेपि ताद्रशज्ञानसत्वात्। ननु प्रमेयत्वसामान्यलक्षणा
येव यावत्प्रमेयगोचरत्वं निर्विकल्पकं नन्यतामतं हि सामान्येति। ननु प्रमेयत्वप्रकारकप्रमेयत्वप्रत्यक्षे रूपत्वाद्यपेक्षया प्रमेयत्वस्य लघुत्वात्तदवच्छिन्नतावच्छेद
कं तच्च निर्विकल्पकसाधारणमत आह। विशिष्टज्ञानेति। प्रमेयत्वज्ञानस्यैव प्रत्यासत्तित्वात् विशिष्टज्ञानसामग्रीसत्वाद्यर्थवशात् पन्नमेव विशिष्टज्ञानमिति भावः।
यद्यपि घटो न वेति संशयानुरोधेन घटत्वांशे निर्विकल्पकं ज्ञानमावश्यकं। न चानादरेण निर्विकल्पकत्वेपि दोषादेव घटः स इति न ज्ञानमिति वाच्यं। घटत्वांशे निर्विकल्पका
भावात्तादृशज्ञानमित्यस्यासंगतत्वापातात्। तथापि यत्र प्रमेयवानिति सामान्यलक्षणाजन्यनिर्णयोत्पत्तिकाले नादृशरोषाभावोऽनंतरक्षणे निर्विकल्पकसंबंको
टिस्मरणं संशयजनकदोषोत्पत्तिश्च तत्र घटो न वेति संशयः तत्र प्रमेयवानिति निर्णयस्य घटइत्याकारकत्वेन संशयोत्पादितात्प्रेपेघटत्वांशे निर्विकल्पकाभावा
त्तादृशनिर्णयस्य न घट इत्याकारकत्वमिति समाधानं सम्यगिति मंतव्यं। वस्तुतस्तु सामान्यलक्षणाव्यवस्थापकं प्रतिसोपानसमयमारोपः। सामान्यलक्षण
याविश्वस्यैव घटत्वप्रकारकज्ञानसत्वान्नानात्मत्वमेतादृशज्ञानस्याभ्युपेमिति संतायावत्सामान्यलक्षणाव्यवस्थापयितुः नवपरकीयज्ञानादिप्रयोधटो नवाप
रः तादृशघटज्ञानवत्वेति संशयोत्पत्तिः स्यादिति विशेषदर्शनस्य सत्वात्। अतएव पूर्वपक्षे परकीयज्ञानविषयत्वमुक्तं। सर्वस्य सामान्यलक्षणाया घटत्वप्रकारकज्ञानसंभवेपि
स्वाधीन्याप्रकारकतादृशज्ञानासंभवेनानुमितौ तत्रापि घटत्वप्रकारकज्ञानवत्वव्याप्यमिति विशेषदर्शनाभावात्तादृशज्ञानस्य संशयो नानुपपन्न इति सिद्धं नौ व्यर्थमि
ति वयं ब्रूमः। इति श्रीभवानंदसार्वभौमविरचितायां शिरोमणीयप्रत्यक्षव्याख्या समाप्ता।

राम

२५

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

24

24